व्याकरणभाषाविज्ञानदृशा वाक्यसमीक्षा

SYNTACTICAL CRITICISM IN THE LIGHT OF SANSKRIT GRAMMAR AND LINGUISTICS

डॉ. यशःपालखजूरिया

श्री वेंकटेश प्रकाशन, दिल्ली

भाषाविज्ञानं तु अष्टादशशताब्द्यां जन्म लेभे, परं भारते वर्षे भाषाध्ययनं भाषाशास्त्रं वेति वैदिककालादेव सुस्थित मासीत् ।

संस्कृतवाङ्मयस्य वेदसंहितोपनिषद्प्रातिशाख्य-निरुक्त-शिक्षा- व्याकरण-दर्शनादिषु भाषायाः प्रचुरं विश्लेषणमभूतपूर्वं चोपलभ्यते । भारतीयैर्भाषाविषयकं गूढचिन्तनं यत्कृतं, तन्नान्यत्र दृष्टिपथमायाति ।

ऋग्वेदे संहितासु च भाषामादाय सूक्तयः समुपलभ्यन्ते । किं यास्कस्य निरुक्तं, भर्तृहरेर्वाक्यपदीयं, पुण्यराजस्य व्याख्यानं, पतञ्जलेर्महाभाष्यम्, नागेशस्य मञ्जूषा, जगदीशस्य शब्दशक्तिप्रकाशिका भारतीयं भाषाविज्ञानं नास्ति ? किमधिकेन पाणिनेरष्टाध्यायी-भाषा-विज्ञानस्य चरमोत्कृष्टा कृतिर्नास्ति? पदविज्ञानस्य वाक्यविज्ञानस्य चेतोऽधिकं क्वास्ति भाषाविदां शरणस्थलीति। भाषाविज्ञाने भारतीयानां बहुमूल्यं मौलिकञ्च योगदानमस्ति । आधुनिकैर्भाषावैज्ञानिकैः प्राचीनपरम्परया विहितमध्ययनं कदापि नोपेक्षणीयमिति मे मतिः ।

लेखकः

व्याकरणभाषाविज्ञानदृशा वाक्यसमीक्षा

SYNTACTICAL CRITICISM IN THE LIGHT OF SANSKRIT GRAMMER AND LINGUISTICS

लेखक

डॉ. यशः पालखजूरिया

प्राध्यापक व्याकरण विभागाध्यक्ष

श्री रणवीर केन्द्रीय संस्कृत विद्यापीठ, जम्मू

वेंकटेश प्रकाशन

नई दिल्ली - 110063

प्रकाशक :
वेंकटेश प्रकाशन
69, संस्कृत नगर, प्लाट नं० 3, सैक्टर–14 रोहिणी, दिल्ली–85

© लेखक

सन् : 1997

द्वितीय संस्करण

मूल्य : रू 295/-

कार्यालय :-
97/109 सुन्दर पैलेस, ज्वाला हेड़ी मार्किट, पश्चिम विहार,
नई दिल्ली–110063 फोन न० 5670420

शाखा –
(1) देवरा कलॉ, कटनी (मध्य प्रदेश)
(2) 2/20 इन्दिरा विहार जानीपुर, जम्मू (188007)

लेजर टाइप सेटिंग
अजय कम्प्यूटर सेंटर,
97/109 सुन्दर पैलेस, ज्वाला हेड़ी मार्किट, पश्चिम विहार,
नई दिल्ली–63 फोन न० 5670420, 7864335

समर्पणम्

श्रद्धेया स्वर्गीया सीतादेवी' (अम्मा जी)

एवं

पूज्य पिता स्व. पुरोहित नृसिंह दास

जी के पुण्य चरणों

में समर्पित है ।

****

पुरोवाक्

मातुः कटिपार्श्वेऽवस्थितः पद्भ्यां रिङ्माणो वा बालः माता पित्रादिभिरुच्चारितान् शब्दान् श्रृण्वन् तत्कृताश्च क्रियाः पश्यन् कियत्याचित् कालकलया अस्य वाक्यस्यायमर्थ इत्यवगच्छति। एवं नानाविधान् शब्दान् शृण्वन् पश्यञ्च कर्माणि वाक्यावयवान् पदरूपान् तदर्थाश्चापि भेदेनाकलयति।एवं पदावयवानपि प्रकृतिप्रत्ययरूपान् आपाततोऽवगच्छति। पदानां पदार्थानाञ्च वाच्यवाचकभावं जानन् स्वयमपि तथा व्यवहरति। अशिक्षिता निरक्षरा हालिकाजाविपालादयोऽपि सर्वं व्यवहारं कुर्वन्तो दृश्यन्ते। सोऽयं व्यवहाराच्छक्तिग्रह इत्युच्यते। श्रवणदर्शनरूपव्यवहारेणैव लिप्यादिज्ञानं विनैव पदपदार्थयोश्च सम्बन्धो बोध्यबोधकभावो व्यवहारेणैव जीवनपर्यन्तो ज्ञायत इत्यर्थः।

किञ्च वाक्यावयवान्,पदावयवान् प्रकृतिप्रत्ययरूपान् व्याकरणशास्त्रमन्तरा न कश्चिदपि ज्ञातुं शक्नुयात्। आपाततः यज्ज्ञानं दृश्यते तदपि प्रत्यक्षपरोक्षाभ्यां व्याकरणादेव सम्भाव्यते। भाषाव्यवहारस्तु सर्वैरपि जनैः क्रियते परन्तु वैयाकरणस्य शब्दप्रयोगो भिन्न एव सन्तिष्ठते।तस्य भाषाप्रयोगश्चमत्कारोत्पादको भवति। साधुशब्दस्य ज्ञानं सन्देहनिवृत्तिश्च केवलं व्याकरणाश्रिता विद्यते।

वाराणस्यां व्याकरणशास्त्राध्ययनावसरे वाक्यपदीयस्य पठने मम रुचिः प्रावर्तत, तेनाहं भारतीयान् भाषासिद्धान्तानन्वगच्छम्। ततश्च भाषाविज्ञानस्य स्नातकोत्तरपरीक्षासफलतायै भाषाविज्ञानस्य अनेके ग्रन्थाः पठिता आसन्। भाषाविज्ञानक्षेत्रे कियन्तः सन्ति ये प्रातिशाख्येषु, महाभाष्यवाक्यपदीयादिषु ग्रन्थेषु भाषाविषयकान् विचारान् जानन्ति।मन्ये! भारतीयभाषाविज्ञानस्य ग्रन्थराशितोऽपि तेऽपरिचितास्तिष्ठन्ति।

भारतीयप्राचीनेषु ग्रन्थेषु भाषाविषयकं कियत्तत्त्वं तस्य प्रकाशनञ्चाद्यत्वेऽनिवार्यमस्तीति मनसि निधाय वाक्यविषये भारतीयान् सिद्धान्तान् समीक्षयितुमहं प्रवृत्तोऽभवम्। श्रेयांसि भवन्ति बहुविघ्नानि तथापि कामयेऽहं यत् श्रीकुलदेवस्य गुरुजनानाञ्च सत्कृपया ममायं प्रयासो विदुषां पुरस्तात् सफलो भविष्यति ।

वस्तुतः शोधकर्म हि पञ्चाग्नितपः विद्यते। किं बहुना इदं कार्यमतिदुष्करं वरिवर्ति। दुस्तरमपि कार्यं परिश्रमशीलैस्तत् सुकरं क्रियते।मन्दैश्च मत्सदृशैर्न हि स्वतन्त्ररूपेण तत्कर्तुं पार्यते। तस्मिन्कर्मणि बहूनां सहृदयानां विदुषां सान्निध्यमुपगम्य तेषां सत्परामर्शैः उचितमार्गदर्शनै- रस्मद्भिरपि तन्महत्कार्यं कदाचित् सम्पादयितुं शक्यते।

अस्य ग्रन्थस्य पूर्णतां सफलताञ्च काङ्क्षन्तो विद्वांसोऽधिकारिणः सहयोगिनश्च स्वीयं सहाय्यं प्रदानेन मां प्रोत्साहयन्ति स्म,ते महान्तोऽत्रावस्यं स्मरणीया इति। तत्र सर्वप्रथमं मम पथप्रदर्शकाः श्रीमन्तो बलजिन्नाथपण्डितमहाभागा अभिनन्द्यन्ते। ये श्रुतशीलाभ्यां चारित्र्येण च सम्पन्नाः सन्ति।येषां जीवनस्य प्रतिक्षणं शैवतत्त्वचिन्तनेनोत्प्रोतं जायते। यद्यपि काश्मीरशैवदर्शने साम्प्रतं सन्ति अङ्गुलिगण्या एव विद्वांसोऽवशिष्टाः। परं गुरुवर्याणां शैवागमे एकच्छत्रं साम्राज्यमस्ति। न हि केवलं भारते वर्षे अपितु पाश्चात्येषु देशेष्वपि येषां शास्त्रज्ञानपताका राराजते। एतस्य शोधप्रबन्धस्य प्रत्यक्षरं,प्रतिस्थलं आमूलं सूक्ष्मेक्षिकया परीक्ष्य बहुषु स्थलेषु परिवर्तनं, परिवर्धनं, संशोधनादिकं विधाय तैः प्रबन्धोऽयं सुफलः कृत इति।अहं हृदयेण तेषां कार्तज्ञ्यं विभर्मि ।

न चात्र विस्मर्यतव्या अनेके मम सहृदयाः यैरस्य प्रबन्धस्य सफलतायै मम साहाय्यं महता प्रमोदेनानुष्ठितम्। तत्र हि सर्वप्रथमं

श्री लालबहादुर शास्त्रि-राष्ट्रिय-संस्कृत-विद्यापीठस्य (मानितविश्वविद्यालयस्य) उपकुलपतयः डॉ० श्रीधरवासिष्ठाः तथा डॉ० राघवप्रसाद चौधरी (प्राचार्यः श्री रणवीर केन्द्रीय-संस्कृत-विद्यापीठं जम्मूः) महाशयाः मां सर्वदा अनुजं मत्वा उत्साहितवन्तः, यथाकालं सकलं साहाय्यं दत्तवन्त इति । ते सर्वदाभिनन्दनीया एव सन्ति। पुनश्च डॉ० प्रियतमचन्द्रशास्त्रिणः, डॉ० शालिग्रामत्रिपाठिनः महोदयाश्च स्वीयानि, बहुमूल्यानि कार्याणि अपनीय मम सहायतां कृतवन्त एतस्मिन् ग्रन्थे अतस्तेभ्यः हृदयेन धन्यवादान् वितरामि।

एतस्य ग्रन्थस्य प्रकाशनादिकं यावत् सर्वस्यापि-शैक्षणिकप्रशासनिका-र्थिकस्वीकृतिप्रदानेन राष्ट्रियसंस्कृतसंस्थानस्य निदेशकवर्याः एवं विद्यापीठ कार्यालयाधिकारिणः,पुस्तकालयाध्यक्षाः सर्वेऽपि मामुपकृतवन्तः सकलं सौविध्यं च दतवन्तः इति । अहं कथं तान्विस्मर्तु शक्नुयाम तेभ्यः हृदेण धन्यवादान् विज्ञापयामि।जम्मूनगरे संस्कृते ग्रन्थमुद्रणं अतीव क्लेशाय

कल्पते । परं मम मित्रेण श्रीजगदीशशर्मणा एवं वेङ्कटेश प्रकाशनस्य

स्वामिना श्री राजमणित्रिपाठिमहोदयेन, अजयकम्प्यूटर-केन्द्रयस्य श्री अजय- त्रिपाठिना च स्वीयेन महता परिश्रमेण मनोयोगेन चैतत्कार्यं सुसम्पादितम् । कथं न तेऽत्र धन्यवादार्हास्स्युरिति । मम मातृश्रीचरणाः सम्पूज्यन्ते, धर्मपत्नी सौभाग्यकाङ्क्षिणी श्रीमतिगीताखजूरिया विशिष्यात्मजा सुश्री तनुः, चिरञ्जीवी आत्मजो पुत्रः मनुः स्मारं-स्मारं, मधुरं मधुरं हृदयेन वाचा वा भूयो-भूयो श्लाघ्यन्तेऽभिनन्द्यन्ते च ।

समेषां विदुषां स्वीयेन पक्षेण कार्तज्ञ्यं ज्ञापयामि।सज्जनाः विद्वांसो हि सकलदोषान् तिरस्कृत्य केवलं गुणान् एव धारयन्ति।

तथैवोक्तम्-

दोषजालमवधूय मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय वारिधेर्गृह्णते सलिलमेव वारिदाः ।।

इति।।

रक्षाबन्धनोत्सवः
संस्कृतदिवसश्च
२१-८-९४

श्रैमत्कः
यशःपालखजूरिया

भूमिका

मङ्गलाचरणम्-

प्रणमामि महेशानं शब्दविद्याप्रवर्तकम् ।

ततः सरस्वतीं देवीं बुद्धिवैशद्यकारिणीम् ।। १ ।।

ततः पाणिनिमुख्यांश्च प्रसिद्धान् मुनिसत्तमान् ।

ततो भर्तृहरिं सिद्धं शास्त्रतत्त्वप्रकाशकम् ।। २ ।।

नत्वा श्रीबलजिन्नाथं शिवशास्त्रविशारदम् ।

गुरुः मे शोधकार्येऽस्मिन् प्रबन्धं रचये शुभम् ।। ३।।

सिद्धान्तान् वाक्यसम्बद्धान् हरिणा प्रतिपादितान् ।

विस्तारितानप्याचार्यैः बहुधा संशयाविलान् ।। ४ ।।

एतेन सत्प्रबन्धेन सप्रमाणं विवेचये ।

यशः पालाभिधानोऽहं नरसिंहात्मजः सुधीः ।। ५ ।।

क्व वाक्यविषया गूढा क्व चाल्पविषया मतिः ।

तथापि नोपहास्यत्वं यास्यामि गुरुकारणात् ।। ६ ।।

सूरिभिः प्राक्तनैः पूर्वनिर्मिते ग्रन्थसेतुभिः ।

परं गन्तास्म्यहं पारं शब्दशास्त्राम्बुधेर्ध्रुवम् ।। ७ ।।

वाग्वै पराच्यव्याकृतेति तैत्तिरीयसंहितायां वागव्याकृताऽखण्डरूपा चेति प्रतिपादिता । संहितावाक्यानि प्रथमतोऽखण्डान्यासन् ततो विभागः श्रूयत इति । अखण्डेत्यादिना सूच्यते वाचो वाक्यरूपत्वम् । तदेवाभिप्रेत्य ऋक्प्रातिशाख्ये पदप्रकृतिः संहितेत्युक्तम् । पाणिनेरपि वाक्यविषयकोऽयमाशयः 'परः सन्निकर्षः संहिता' अत्रापि संहितापदेन वाक्यग्रहणं न तु पदं गृह्यते । पदानि प्रकृतिर्यस्याः संहितायाः तस्य वाक्येन तात्पर्य्यम् । भर्तृहर्य्युक्तमप्यत्र सङ्गच्छते-पदानां संहिता योनिः संहिता वा पदाश्रया । सर्वत्र मौलिकं तत्त्वं वाक्यमेव प्रतिपादितं वैय्याकरणैः वाक्याखण्डवादिभिरिति ।

वाक्यं हि भारतीयानां वैय्याकरणानां प्रमुखो विषयोऽवर्तत अष्टप्रकारकेषु स्फोटेषु वाक्यस्फोटस्य प्राधान्यस्य प्रतिपादनेनैतत् तात्पर्य्यं यद्वाक्यमेव भाषायाः मौलिकं घटकं भवति न पदमिति । यद्यपि नैय्यायिकैः मीमांसकैश्च पदानां वाक्यानां वाऽनित्यता प्रतिष्ठाप्यते तथापि भगवता पतञ्जलिना 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकव्याख्यानेन पदानां वाक्यानाञ्च नित्यता प्रतिपादिता । अयं दार्शनिको विचारस्तद्विषये नूतनमेकं पक्षं समुद्भावितवान् । क्वचिन्मीमांसकैरपि वाक्यस्य नित्यत्वं कथ्यते । वाक्यस्यानित्यत्ववादः शबरस्वामिनोक्तः जैमिनिशास्त्रविरुद्ध एव प्रतिभाति । औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इत्यादिना पदस्यार्थेन नित्यः सम्बन्धः जैमिनिनोक्त एवास्ति। इदमेवात्र प्रमाणमस्ति यद् वयं ब्रूमः मीमांसकानां पदनित्यत्ववादित्वमिति। नैयायिकैरपि शब्दार्थतादात्म्यनिरूपणावसरे वाक्यमेव गृह्यते । तन्मते पदे वाक्ये च बोधजनकता संतिष्ठते । यथा पदमर्थस्य वाचकं तथैव वाक्यमपि भवति । परन्तु शक्तिज्ञानं पूर्वं वाक्यतस्ततश्च पदतोऽपि जायते। निष्कर्षतोवाक्यं प्रधानमुच्यते वैय्याकरणैस्तत्रभर्तृहरिराह वाक्यस्फोटोऽतिनिष्कर्षे सिद्धयतीति मतस्थितिः ।

शोधविषयः-

प्रस्तुतस्य शोधप्रबन्धस्य विषयः व्याकरणभाषाविज्ञानदृशा वाक्यसमीक्षा' इति वर्तते । तत्र वैय्याकरणैः वाक्यमधिकृत्य ये सिद्धान्ताः प्रतिपाद्यन्ते । अथ च भोजदेवादिभिरपि यदुक्तं तत्सर्वं संकल्य्य समीक्षादृशा तत्परीक्षणमेव भाषाविज्ञानदृशाऽपिवाक्यसामर्ग्याः तोलनं व्यवस्थापनञ्चास्ति प्रकृतविषयः । भाषावैज्ञानिकैरद्य यद्दृष्टं तत्सर्वं पाणिनिप्रभृतिभिः सुदूरपूर्वकाले स्वाभ्यासबलेन सूक्ष्मदृशाऽवलोक्य प्रतिपादितमासीत् । तस्य शास्त्रस्य तत्त्वं तेऽपि सम्यग् जानन्ति स्म यच्छास्त्रमद्यत्वे भाषाशास्त्रमिति कथ्यते । वाक्यविषयकस्य विवादस्य विषये तेषां गहनो गम्भीरश्च विचार आसीत् । वैयाकरणानां स्तुत्योऽयं प्रयासो यत्तैः व्याकरणशास्त्रं दार्शनिकं पदवीमारोपितम् । मीमांसान्याय-बौद्धवेदान्तदर्शनेषु प्रचलितसमस्यास्तासां तैः दार्शनिक्या शैल्या समीचीनतया समाधानं विधाय शब्दशास्त्रसिद्धान्तानां परिशीलनं कुर्वद्भिः व्याकरणमपि दर्शनशास्त्रधरायां प्रतिष्ठापितम् ।

वाक्यस्याष्टौ पूर्वभेदान् भर्तृहरिः स्वीयप्रबन्धे परीक्ष्य व्याकरणशास्त्ररूपभेदेषु आस्थां प्रदर्श्य, सर्वेषामपि यथास्थानं परिशीलनञ्चकार । हरिव्याख्यामादायैव वाक्यभेदान् वैय्याकरणाः यथावसरं स्व-स्वग्रन्थेषु प्रदर्शितवन्त इति । ते पदपदार्थयोः सत्तां तिरस्कृत्य वाक्यवाक्यार्थयोः सत्तामेव स्वीचक्रुः । पदवादिनां पदविषयिकाः युक्तयः सप्रमाणं परिहृत्य स्वशास्त्रानुकुलं वाक्यपक्ष प्रतिष्ठापयामासुरिति । स्वमते वाक्यमेवाक्षरं - ध्रुवं, कूटस्थं,परिणामरहितं, अक्षयं, अवयवरहितं घोषयाञ्चक्रुः ।पदस्यास्तित्वं तज्ज्ञानं वाक्यमा-ध्यमेनान्वयव्यतिरेकतः प्रदर्शयामासुः । तत्र पदव्यवहारन्तु अपोद्-धारकल्पनयैव कथितवन्त इति । निष्कर्षतो वाक्यमेव स्वतन्त्रं सत्तायुतं प्रदर्श्य तस्यैव अर्थवत्तया, तदेवार्थनिश्चायकमिति प्रतिपादितवन्त । परिणामतः पदपदार्थाभ्यां वाक्यवाक्यार्थो पृथग्भूताविति स्वीचक्रुः । पाणिनीये तन्त्रे सकलशब्दविदां दृढतरमेतन्मतं यद्वाक्यमेव वाचः सर्वोच्चं स्थानमलङ्कर्तुमर्हति ।

वाक्यार्थस्य विषये मतभेदानपि निरस्य तत्र षड्विध-त्वमुल्लेखयाञ्चक्रुः । सर्वप्रथमतः प्रतिभैव वाक्यार्थ इत्यत्र स्वीयां सम्मतिं प्रकाशयामासुः । ततोऽप्यधिकं प्रतिभा वाक्यम् प्रतिभैव वाक्यार्थ इति सुस्थिरं मतं प्रतिष्ठापयामासुः। प्रतिभैव जगत आत्मा, प्रतिभा आत्मतत्त्वम्, प्रतिभैव वाक्तत्त्वमिति प्रतिपाद्य प्रतिभाऽपि नित्या-ध्रुवा-अक्षया-अक्षररूपा, अपरिणामी अवयवरहिता चेति विचारप्रपञ्चे व्यवस्थिते विधिना कथयामासुरिति ।

वाक्यभेदान् आधारीकृत्य वैय्याकरणैः षड्वाक्यार्थाः कथिताः। तत्र षड्विधान् वाक्यार्थान् सूक्ष्मसैद्धान्तिकदार्शनिकवैज्ञानिकरीत्या विश्लेषणं कृत्वा तेष्वेव विधिवत् समावेशं चक्रुरिति ।

किञ्च वाक्यविज्ञानविषयकं भारतीयैः वैय्याकरणैः यत्किञ्चित् प्रत्यक्षं परोक्षं वोक्तं तस्य संकलनं, परीक्षणं, व्यवस्थापनं, तोलनं आधुनिकभाषाशास्त्रदृष्ट्या समीक्षणमेव प्रकृतस्य प्रबन्धस्य शोधविषय इति मे सङ्कल्पः ।

प्रबन्धस्य मौलिकता-

वाक्यमधिकृत्य पाणिनिना यत्सूत्रमाध्यमेन प्रोक्तम् वार्तिककारेण यद्वार्तिकमुखेन व्याख्यातम्, भाष्यकारेण पतञ्जलिना भाष्येण भाषितम्, एतैर्यद्बीजरूपेणोक्तं तद्भर्तृहरिग्रन्थे कारिकाद्वाराऽतिविस्तरेण पुष्पितं फलितञ्चेति । पुनरपि तत्कैय्यटभोज-पुण्यराज-हेलाराज-भट्टोजिदीक्षित-नागेशविश्वेश्वरप्रभृतिभिः विद्वद्भिः वाक्यविषयकं यदुक्तं तत्सर्वमतिगंभीरं, दुर्ज्ञेयमपि विद्यते।तत्र ममायासोऽस्ति तदयं विषयः सरलः सुबोधश्च भवेदिति । परं वैय्याकरणसिद्धान्तानां परममौलिकतत्त्वानां समावेशेनावश्यं भवितव्यमिति । वाक्यविषयकस्याभिप्रायस्य प्रस्तुतीकरणमेव मम लक्ष्यमुद्देश्यं वेति । प्रबन्धस्य गुणदोषविवेचने विद्वांस एव प्रमाणम्।

विषयस्य महत्त्वम्-

विषयस्यैतस्य यन्महत्त्वं तज्ज्ञातुं शक्नुमो यतो भर्तृहरिपूर्वैराचार्यैः

वाक्यमधिकृत्य स्वीयग्रन्थेषु अनेके वादाः प्रचाल्यन्ते स्म । आचार्याणां तच्छास्त्रवासनावशाद् भिन्ना भिन्ना एव मान्यताः प्रावर्तन्त । न हि कश्चन सर्वमान्यः सिद्धान्त आसीत्। भर्तृहरिणा तत्सर्वमादाय स्वग्रन्थे विषयीकृत्य तस्यैकः काण्डो वाक्यकाण्डत्वेन निर्मितः । ततोऽप्यकिं वक्तुं शक्यते यद्भर्तृहरिणा स्वीयस्याद्भुद्ग्रन्थस्य नामकरणमपि वाक्यस्य प्रधानतां निरूपयितुं वाक्यपदीयमिति कृतमस्ति । तत्रेदं चित्रं यद्वैय्याकरणेभ्योऽतिरिक्तैः मीमांसकैः नैय्यायिकैः बौद्धैरालङ्कारिकैरपि विषयेऽस्मिन् स्वीयेषु ग्रन्थेषु विपुलमालिख्यते । किं बहुना कुमारिलेन तु श्लोकवार्तिकस्यैकं प्रकरणं वाक्याधिकरणं नाम्ना लिखितमस्ति। परं न हि कोऽप्याचार्यो वाक्यमादाय कश्चन स्वतन्त्रग्रन्थः लिलेख। वाक्यविषयकान् विवादान् परिहर्तुं वैय्याकरणैः विदुषां पुरस्तात् प्रतिभापदार्थस्य यो ह्याविष्कारः समुपस्थापितस्तेन सर्वे निरुत्तरा अभूवन्। मन्ये वाक्यवादचिन्तायामियं महती घटना वर्तते ।

इदानीं भाषाविज्ञानेऽपि वाक्यविज्ञानं स्वतन्त्रविषयत्वेनाधीयते। वाक्यविज्ञानेऽनेके पाश्चात्याः भारतीयाश्च विद्वांसः कार्यं कुर्वन्ति । स्वतन्त्रा वाक्यविज्ञानग्रन्थाश्चापि प्राप्यन्ते ।

आधुनिकाः विद्वांसोऽद्यत्वे स्वीयं भाषाविषयकं सर्वमपि शोधकर्म भर्तृहरिप्रोक्तसिद्धान्तैः सह संतोल्य संतोषमावहन्ति । भर्तृहरिकार्येण पाश्चात्यं जगत् सम्मोहितमभवत् । इदानीमेतस्य सिद्धान्ताः प्रमाणभूताः मन्यन्ते ।

नात्र सन्देहलेशोऽपि यदयं विषयः महत्त्वपूर्णोऽस्ति । प्रबन्धेऽस्मिन्व्याकरणभाषाविज्ञानदर्शनसाहित्यादिविषयेषु वाक्यमधिकृत्य यत् किमपि लब्धम् ततसर्वं संकलय्य वाक्यविज्ञानदृशा समीक्षते । आधुनिक-भारतीयासु भाषासु इदानीं शोधकर्म प्रचलति । तत्रापि वाक्यस्य शास्त्रीया भूमिकाऽपेक्षते । तत्कर्मपूर्तयेऽयं प्रबन्धः समुचितं स्थानलाभं करिष्यतीति मे विश्वासः । प्रतिभाविषयकस्याध्यायस्य योगेनायं विषयोऽत्यधिकं महत्त्वमुपदधाति ।

विषयस्य विभागः-

प्रकृतोऽयं विषयोध्यायेषु चतुर्षु विभक्तोऽस्ति । अध्यायान्तर्गताः कल्परूपाः लघुविभागा अपि सन्ति । त एवम् -

भूमिकाभागः-

प्रथमोऽध्यायः- वाक्यलक्षणसमीक्षा ।
द्वितीयोऽध्यायः- वाक्यधर्मसमीक्षा ।
तृतीयोऽध्यायः - वाक्यार्थसमीक्षा ।
चतुर्थोऽध्यायः प्रतिभासमीक्षा ।

उपसंहारः

परिशिष्टम् १,२,३, इति ।

१-प्रथमेऽध्याये-

भारतीयव्याकरणदर्शने पदस्य वाचकत्वमन्येषान्तु वाक्यास्यीति सिद्धान्तः । वाक्यस्याखण्डत्वे आचार्यैः मतभेदपूर्वकमष्टौ पक्षाः समुद्भावितास्सन्ति, तेषां आन्तरत्वबाह्यत्वाभ्यां पुनरपि द्विविधं स्वरूपं प्रतिपादितमस्ति । एवं समासव्यासाभ्यां वाक्यस्य स्वरूपप्रतिपादने वैय्याकरणानां, मीमांसकानां, शाक्यानां, तत्रापि विशिष्य मुनित्रयस्य, नागेशस्य, भर्तृहरेः, तत्रापि प्रथमतया सूरिविश्वेश्वरस्य सिद्धान्तसुधा-निधेः विविधानि मतानि भाषाविज्ञानक्षेत्रस्य मूर्धन्यविदुषां श्लाईखर, गार्डिनर, चामस्की, ब्लूमफील्ड, सौस्यूरप्रभृतीनां मतानि पर्यालोच्य तौलनिकं कर्म, समीक्षणञ्चेति कृतमस्ति ।

जगति व्यवहारमूला भाषा वर्तते । भाषा वाक्यैरुपनिबद्धा भवति । आत्मनो मनोभावान् परं प्रति प्रकटयितुं भाषैव परमं साधनमस्ति । विचाराः वाक्यैः प्रस्तूयन्ते तैरेव अर्थस्य परिसमाप्तिर्भवति, तस्मादेव लोके वाक्य स्फोटस्य वाचकत्वं प्रधानत्वं चेति प्रतिपादितम्। अमरकोशे सुप्तिङन्तचयो वाक्यमिति प्रतिपादितम्। पदसमूहो वाक्यमर्थपरिसमाप्ताविति न्यायभाष्यकृता विवेचितम् ।

वाक्यास्याष्टौ विकल्पाः भर्तृहरिणा वाक्यपदीयस्य द्वितीयकाण्डे उपस्थाप्याचार्याणां मतभेदःप्रदर्शितः -

आख्यातशब्दः संघातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ।।
पदमाद्यं पृथक् सर्वं पदं साकांक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ।।

एकोऽनवयवः शब्दः वैय्याकरणानां वाक्यलक्षणमस्ति । तत्राखण्डपक्षे त्रीणि लक्षणानि सन्ति । सखण्डपक्षे पञ्च लक्षणानि वर्तन्ते । एवञ्च अन्विताभिधानपक्षे लक्षणत्रयम्, लक्षणद्वयम-भिहितान्वयवादिनां पक्षे वर्तते । बुद्ध्यनुसंहृत्या वाक्यस्याखण्ड पक्ष एव समर्थितो भवति । तत्र वार्तिककारमीमांसकयोरपि वाक्यलक्षणमतभेदः तस्योपादेयत्वमपि प्रदर्श्यते । पाश्चात्यविद्वान् गार्डिनीरोऽपि भारतीयमतस्य पोषक आसीत् ।

वाक्यमेव भाषायाः विचारस्य वा न्यूनतमं घटकं भवतीति पाणिनिभर्तृहरिकैय्यटनागेशादीभिः स्वीक्रियते, तदेवाधुनिकभाषाविदोऽपि स्वीकुर्वन्ति ।

वाक्यं वच् धातोर्ण्यति कृते तस्य च कुत्वे सति निष्पद्यते। तद्धि वचनं, वक्तव्यं, कथनं, उक्तिः, वक्तृतादयोऽर्था वाक्यपदस्य संगृह्यन्ते । आधुनिकभाषाशास्त्रे विचारस्य पूर्णोच्चारणं वाक्यं कथ्यते। यथाऽत्र विशिष्टविदुषामेव वाक्यलक्षणनि दीयन्ते-

1- A Sentence is a word or a set of words revealing an intelligible purpose. And a Sentence is an utterence which makes just as long as communication as the speaker has intended to make before giving himself a rest.

2- A sentence is a complete and independent human utteance, the completenss and independenacce shown by its standing along-of being uttered itself.

3. Sentence is that after which silence seems best.

रसेलमतम् अयं महाशयस्तु आख्यातपदघटितस्यैव पदसमूहस्य वाक्यत्वं कथयति । तन्मते- चैत्रो ममार इत्येव वाक्यं भवति । चैत्रस्य मृत्युरिति न कदापि वाक्यमिति ब्रूते । तदुक्तं वाक्यलक्षणन्तु- येन किञ्चिदुद्दिश्य किञ्चिद्विधीयते तदेव वाक्यम् इत्यस्ति । भारतीयैः शब्दशास्त्रज्ञैरपि सर्वं वाक्यं क्रियापदेन परिसमाप्यत' इति समीचीनतया प्रतिपादितम् । (वाक्यलक्षणविषयकं विस्तारेण परिशिष्टं तृतीयं द्रष्टव्यम्) ।

२-द्वितीयेऽध्याये-यैः वाक्यधर्मैः पदपदार्थाः निरूप्यन्ते, त एव वाक्यस्याखण्डत्वं संस्थापयन्ति । ते वाक्यधर्माः भर्तृहरिणा, टीकाकर्तृभिश्च संकलय्य व्याख्यायन्ते । तत्राह हरिः -

इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः ।
सर्वे ते न प्रकल्पेरन् पदं चेत् स्यादवाचकम् ।।

भोजोक्ताः वाक्यधर्मा अपि उल्लिख्यन्ते । वाक्यधर्माः वस्तुतः मीमांसाशास्त्रे वाक्यधर्माः वाक्यलक्षणानि वेति रूपेण प्रतिष्ठापिता आसन् । ते वाक्यधर्माः हरिग्रन्थस्य तृतीयकाण्ड लक्षणसमुद्देशे विस्तरेणासन् । दौर्भाग्येन लक्षणसमुद्देशोऽद्यावधि नोपगतोऽस्माभिः, परञ्च वाक्यकाण्डे बीजरूपेणोक्ताः ते संगृह्य व्याख्यायन्त इति । डा० वी० राघवन् महाशस्य शोधग्रन्थोऽप्यत्र महत्त्वपूर्णोऽस्ति ।

वाक्यधर्माणां विषये यो हि संख्या विषयको विवादोऽस्ति, सोऽप्यत्र तुलनात्मकदृशा परिहृतो वर्तते । ते हि वाक्यपदीयस्य द्वितीयेकाण्डे 'प्रासङ्गिकमिदं कार्यमिदं' तन्त्रेण लभ्यते इति कारिकात अयं शब्दादपोद्धृत्य पदार्थ एव पदार्थः प्रविभज्यते इति यावत् कारिकासु वाक्यधर्मा एव सन्ति ।

३-तृतीयेऽध्याये-

वाक्यार्थः निरूपितोऽस्ति । वाक्यार्थस्तु वाक्यस्य प्रयोजनं भवति । पदार्थस्तु तत्राभिधेयात्मको भवति । अभिधेयः पदस्यार्थः, वाक्यस्यार्थः प्रयोजनमिति । भर्तृहरिणा वाक्ये व्यञ्जनावृत्तिस्तु नाङ्गीक्रियते । महिमभट्टस्य व्यक्तिविवेके तस्या प्रपञ्चितत्वात् नेह प्रतन्यते । तद्दूषणपरं कारिकाया उत्तरार्धमुपस्थाप्यते - यस्य तस्य न सम्बन्धो वाक्यानामुपपद्यते । इति वाक्यार्थश्चात्र षड्विधो भवति। षड्विधोऽप्यत्र सविस्तरं निरूपितोऽस्ति । शास्त्रान्तरेष्वपि यानि त्रीणि वाक्यार्थस्य लक्षणानि संदृश्यन्ते तान्यपि विस्तरेण प्रतिपादितानि सन्ति। मण्डनमुरारिमिश्रप्रभृतीनां यन्मतं यद् वाक्याल्लभ्यमानो लिङ्गद्वयर्थोऽपि वाक्यार्थ एव मन्यते, तदपि निरूपितमस्ति । भट्टमते भावना वाक्यार्थोऽप्यत्र मात्रसप्रंसङ्गं प्रतन्यते । भावनायाः द्विविधत्वं तत्र प्रदर्शयते ।

वैय्याकरणानां मतेऽखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः अध्यास एव च सम्बन्धः, पदं शब्दः पदसंघातो वाक्यं भवतीति सर्वसम्मतः पक्षः प्रपञ्चितोऽस्ति । पाणिनिपतञ्जलिभर्तृहरिणामाशयः सर्वोऽत्र व्यवस्थापितोऽस्ति ।

४-चतुर्थेऽध्याये-

प्रतिभा वाक्यम्, प्रतिभैव वाक्यार्थ इति वैय्याकरणाः ब्रुवन्ति। सा प्रतिभा भर्तृहरिणोच्यते -

शब्देष्वाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते ।।

हरिमते हि सा पुरुषस्य तृतीयं नेत्रमस्ति । भगवतश्च सा चतुर्थं नेत्रमिति येन सर्वं प्रकाशितं भवति । प्रतिभा मात्रं जगदिति जयन्तभट्टो व्याजहार । प्रतिपुरुषं वासनानुसारं प्रतिभोत्पद्यते । प्रतिभायाः लक्षणानि शास्त्रन्तरेभ्यः संकलय्यात्र लिखितानि सन्ति ।

वाक्यपदीये तु-

विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ।।

तिरश्चामपि प्रतिभा बलादेव सर्वे समारम्भाः जायन्ते । अतः प्रतिभाऽवश्यं स्वीकरणीया भवति । तस्या अपलापेनात्मा न वञ्चनीय इति मतिः । क्वचिज्जन्मान्तरजा प्रतिभा दृश्यते ।

प्रतिभा षड्विधाऽत्र निरूपिता वर्तते । तस्याः भेदा एवं कथिताः-

१.-स्वाभाविकी प्रतिभा,
२.-चरणनिमित्ता प्रतिभा
३.-अभ्यासनिमित्ता प्रतिभा,
४.-योगनिमित्ता प्रतिभा
५.-अदृष्टनिमित्ता प्रतिभा,
६.-विशिष्टोपहिता प्रतिभा । इति ।

हेमचन्द्राचार्यः प्रतिभास्वरूपं निरूपयन् लिलेख- सर्वोऽपि जीवो निसर्गतोऽनन्तज्ञानेन, अनन्तदर्शनेन, अनन्तसामर्थ्येन एवं विधेनान्येनापि सद्गुणेन सम्पन्नो भवति,परन्तु जीवानामावरणीयकर्मकलापैर्रुपयुक्त-धर्मोऽभिभूयते । जीवानामेवाशुभकर्मज्ञानस्वरूपमावृणोति । शुभकर्मानुष्ठा-नेनेदमावरणं नश्यति । एवं आत्मा संविदेव प्रकाशरूपः असत् कर्म च मेघमण्डलमिव तदावरकम् । सदाचारेणासदावरणं क्षीयते तदा प्रतिभाया भवत्युन्मेषः ।

प्रतिभा विषये बहुधा आचार्य्याणां महान् मतभेद एव दृश्यते। यथा येनानुभूतं तथैव तल्लिखितमस्ति । वयमल्पज्ञाः स्मः यज्जानीमस्तदेव सारभूतं वदामः । प्रतिभास्वीकार एवं व्युत्पत्ति-स्वीकारेऽपि मतभेदा आसन् । प्रतिभाव्युत्पत्त्योः प्रतिभा श्रेयसीति व्यवस्थाप्यते । साहित्ये सा कारयित्री भावयित्रीति पदद्वयेन व्यवहृता

वर्तते । प्रतिभाविषये एवं विधं सर्वमपि विचारजातमत्र तुलनात्मिकया समीक्षात्मिकया च दृष्ट्या विवेचितमस्ति ।

पातञ्जलयोगसूत्रस्था प्रतिभाऽप्यत्र निरूपिता वर्तते । तत्सूत्रं 'प्रतिभाद् वा सर्वम्' तत्र बुद्धिस्मृत्योरपि भेदोऽस्ति । तदाश्रितायाः प्रतिभायाः भेदाश्चात्राध्याये निरूपिताः समीक्षिताश्च वर्तन्ते। एवमभिनवगुप्तोक्तं प्रतिभाविज्ञानमपि सावसरं निरुपितमस्ति । तन्त्रालोके प्रतिभाविषयकोऽत्र बहुविधविचारोऽस्ति । मन्ये भर्तृहरिप्रोक्तप्रतिभाविचारोऽत्र शैवागमोक्तपरम्पराप्राप्तसिद्धयोगेन प्रभावितोऽस्ति । हरिरपि कामपि प्राचीनां शैवसिद्धपरम्परामाश्रित्य विचारान् प्रस्तावयामास ।

अस्मिन् अध्याये राजशेखरस्य प्रतिभा विचारोऽपि सविस्तरं प्रतिपादितः सुसमीक्षितश्चास्ति । विशिष्यात्र रामाज्ञापाण्डेयस्य प्रतिभा विवेचनं दर्शनयोग्यमस्ति । शोधप्रबन्धस्यावसाने परिशिष्टत्रयं संयोज्य पूरितोऽयं प्रबन्ध इति ।

शोधप्रबन्धस्य पूर्ववृत्तम्-

वाक्यमेवाधिकृत्य न कोऽपि ग्रन्थः स्वतन्त्ररूपेण केनापि प्राचीनेन नव्येन वाचार्य्येण लिखितोऽस्ति । प्राप्तावसरं स्वीयेषु प्रबन्धेषु ते वाक्यविवेचनं कृतवन्त इत्येवालम् । व्याडिपाणिनिकात्यायन-पतञ्जलिप्रभृतिभिर्यद्बीजरूपेण सूत्रवार्तिकभाष्यमुखेनोक्तं तत्सर्वं प्रथमतया हरिणा वाक्यपदीये प्रपञ्चितम् । हरिकारिकानां मूलं महाभाष्यमेवास्ति। एकैकस्याः कारिकायाः मूलमन्वेषणयोग्यमस्ति । न ह्यत्र केनापि विदुषा सपरिश्रमं शोधकर्मकृतमस्ति । पश्यामः मीमांसादिष्वपि वाक्यस्य बहुप्रकारकं वासनाग्रस्तं वा चिन्तनमस्ति ।

भर्तृहरेः पश्चात् पुण्यराजोऽपरनाम राजानकः शूरवर्मा आसीत्। पुण्यराजस्य वाक्यकाण्डटीका वाक्यविषयेऽतिमहत्त्वपूर्णाऽस्ति ।

पुण्यराजेन तत्रानेके ग्रन्थाः ग्रन्थकाराश्च स्मार्यन्ते । पुण्यराजग्रन्थसहाय्येनैव द्वितीयकाण्डस्य काश्चन अवधारणा सम्भावयितुं शक्यते । तस्याः शैली सौष्ठवयुता, पूर्णा, अतिगम्भीरा चेति वर्तते ।

हेलाराजोऽपि द्वितीयकाण्डस्य टीकामेकां शब्दप्रभां लिलेख । न साऽद्य यावदुपलब्धा वर्तते । बहुषु स्थलेषु स तस्याः टीकायाः समुल्लेखं करोति । पुण्यराजहेलाराजौ काश्मीरिकौ आस्ताम् । हैलराजोऽभिनवगुप्तस्य गुरोर्भट्टभूतिराजस्य पुत्र आसीत् ।

भोजराजग्रन्थेऽपि एतद्विषयिणी सामग्री विपुला वर्तते । अस्मिन् शोधप्रबन्धे तस्याः प्रचुरप्रयोगः कृतोऽस्ति ।

पाण्डेयरामाज्ञामहाशस्य ग्रन्थरत्नत्रयमपि महत्त्वपूर्णं वर्तते । पण्डितरघुनाथशास्त्रिणां टीकाम्बाकर्त्री। विषयस्यैका प्रौढा संस्कृतटीका वर्तते । प्रो० अय्यरमहाशयानां तत्राङ्ग्लभाषानुवादोऽप्यत्र स्मरणीय एवास्ति। डा० के० राघवन् पिल्ले महोदयस्यापि आङ्ग्लानुवादोऽस्ति। डा० गौरीनाथशास्त्रिणां फिलासिफी आफ वर्ड एण्ड मीनिंग शोध-प्रबन्धोऽप्यत्र विषये मार्गदर्शको भवति ।

डा० रामसुरेशत्रिपाठी 'संस्कृत व्याकरण दर्शन' ग्रन्थेऽपि वाक्यविषकोऽध्यायः लिलेख । एतेषां शोधप्रबन्धोऽतिप्रौढरीत्या हिन्दीभाषायां लिखितोऽस्ति । शोधविषयस्तु वाक्यपदीयस्य विशेषतः आख्यातार्थाध्ययनम्' आसीत् ।

डा० सत्यकामवर्मणां शोधग्रन्थः भाषातत्त्व और वाक्यपदीय' नामकोऽस्ति । तत्रापि 'वाक्य का स्वरूप' इत्येकोऽध्यायो वर्तते ।

डा० कपिलदेवद्विवेदीमहाशस्य हिन्दीभाषायां 'अर्थविज्ञान और व्याकरणदर्शन' ग्रन्थोऽपि वर्तते । तत्रापि वाक्यविषयक एकोऽध्यायोऽस्ति ।

आंग्लभाषायामपि केचन शोधप्रबन्धाः वर्तन्ते । तत्र प्रभातचन्द्रचक्रवर्तिकाव्यतीर्थस्य एवं डा. वी राघवन् महाशस्य

के० कुञ्जुनीराजा महोदयस्य च महत्त्वपूर्णाः प्रबन्धा भवन्ति। सारस्वती सुषमायां 'व्याकरणदर्शने वाक्यविमर्शः लेखोऽप्यस्ति यत्र श्रीरघुनाथशर्मभिर्वाक्यस्य पूर्वलक्षणं ततश्च स्वरूपमुपन्यस्यते । अयं लेखस्तु विशिष्टव्याख्यानभूत एव उपर्युक्तशीर्षके प्रकाशितोऽस्ति।

प्राचीना दृष्टिः-

१. प्रातिशाख्य-पाणिनि भर्तृहरि प्रभृतीभिः वाक्यस्थाने संहिताप्रतिनिधिशब्दः प्रयुज्यते ।
२. कात्यायनपतञ्जलिराचार्य्याणां कापि स्पष्टादृष्टिरवलोक्यते।
३. वाक्यं हि भाषायाश्चरमोऽवयव इति सर्वप्रथमं भर्तृहरेरेवोद्घोषोऽस्ति ।
४. न्यायामीमांसादिषु भिन्नेव मान्यता आसीत् । न्याये पदवादस्य प्रधानता, मीमासायां तु परोक्षतया वाक्यमेव स्वीक्रियते। तत्र वादद्वयमपि प्रादुर्भूतमासीत् । अभिहितान्वयवादः, अन्विताभिधानवादश्च ।
५.- वैय्याकरणाः पदस्य पदार्थस्य वा न कदापि प्राधान्यं ब्रुवन्ति।
६. पदार्थानां सत्ता न वास्तविकी वर्तते ।
७. निष्कर्षत एकोऽनवयवः शब्दो वाक्यमिति सिद्धान्तः।

आधुनिकी दृष्टिः-

वाक्यं ही भाषायाः सहजं घटकं भवति, यत्रैको बहवो वा शब्दाः प्रयुज्यन्ते येऽर्थदृशा पूर्णाऽपूर्णाः वा स्युः । परं व्याकरणदृशा विशिष्टे कस्मिंश्चिदर्थे सन्दर्भे च पूर्णा भवन्ति, तेन साकं प्रत्यक्षं परोक्षं वा एका सामायिको क्रियाऽवश्यं प्रयुज्यत इति । येस्पर्सनमतेन निराकाङ्क्षमद् भाषाभिव्यक्तिर्वाक्यम् एतद्वाक्यपदीयेऽपि दृश्यते- 'निराकाङ्क्षस्य सर्वत ' इति । नालमते वाक्यं हि नाम यदुत्तरं न कोऽपि वक्तुं यतते, एतदपि वाक्यपदीये प्राप्तरूपविभागायाः यो वाचः परमो रस इति ।

प्रो० देवेन्द्रशर्म्मणां मते- वाक्यं हि पूर्णतया मनोविज्ञानमयं मानसिकं वा तत्त्वमस्ति । तच्च पूर्णं सार्थकञ्चेति भवति । एवं आधुनिकभाषाविदामपि विचारः प्राचीनैः विचारैः सह साम्यं वहन्ति । वाक्यमधिकृत्य शब्दशास्त्ररहस्यविदां प्राचीनानामाधुनिकानां च विदुषामेवम्प्रकारकाः विचाराः अत्र प्रबन्धे संकलिताः सन्ति । तेषां विचाराणां परस्परं तुलना भर्तृहरिदृष्ट्या च तत्तद्विचारविषयिणी समीक्षाऽस्य प्रबन्धस्य मुख्यो विषयः । अमुख्यविषयत्वेनाद्यत्वेऽल्पजन-विदितानां बहूनां शब्दशास्त्रसम्बन्धिनां विषयाणां सम्यक् प्रकाशनमनेन प्रबन्धेन क्रियते ।

आशास्यते यद्वर्तमानभाषाविज्ञानदृष्ट्या प्रचीनानां शब्दतत्त्वविदां सिद्धान्तानां समीक्षात्मकमध्ययनं विधातुं पथप्रदर्शकोऽयं प्रबन्धो भवेदिति ।

वि ष या नु क्र म :

पुरोवाक्	i - iv
भूमिका	१-१४
मङ्गलाचरणम्	१
शोधविषयः	३
प्रबन्धस्य मौलिकता	४
विषयस्य महत्त्वम्	४
विषयस्य विभागः	६
शोधप्रबन्धस्यपूर्ववृत्तम्	११
प्राचीनादृष्टिः	१३
आधुनिकीदृष्टिः	१३

प्रथमोऽध्यायः

वाक्यलक्षणसमीक्षा	१-८१
वाक्यलक्षणम्	१
अभिहितान्वयवादः	२
अन्विताभिधानपक्षः	२
आख्यातशब्दो वाक्यम्	४
पदसङ्घातः (वाक्यम्)	११
सङ्घातवर्तिनीजातिः (वाक्यम्)	२१
एकोऽनवयवः शब्दो वाक्यम्	२२
क्रमः (वाक्यम्)	३४
बुद्ध्यनुसंहृतिः (वाक्यम्)	३७
पदमाद्यम् (वाक्यम्)	४१
पृथकसर्वपदं साकाङ्क्षं वाक्यम्	४४
वाक्यस्य खण्डाखण्डभेदः	४७
कात्यायनोक्तं वाक्यलक्षणम्	४९

भाष्यसम्मतिः ५०
वार्तिकमेव वाक्यम् ५२
कात्यायनमीमांसकयोर्न एकत्र समावेशः ५३
मीमांसकलक्षणम् ५४
लौकिकं वाक्यलक्षणम् ५७
अमरसिंहोक्तं वाक्यलक्षणम् ५८
अखण्डवाक्यस्वरूपम् ६०
प्रत्याय्यप्रत्यायकयोरभेदप्रदर्शनम् ६२
सूत्रकारस्याभेदपक्षो वार्तिककारस्य
भेदपक्षनिरूपणम्- ६५
शब्दैकत्वप्रदर्शनम् ६६
प्रथमाध्यायस्य पादटिप्पणयः ६८-८१

द्वितीयोऽध्यायः

वाक्यधर्मनिरूपमणम् ८३-१५२
वाक्यधर्माः ८४
भोजोक्ता वाक्यधर्माः ८८
भर्तृहरि-उक्ता वाक्यधर्माः ८९
(प्रासङ्गिकम्) ८९
तन्त्रम् ८९
आवृत्तिः ९१
भेदः ९१
बाधा ९३
समुच्चयः ९४
ऊहः ९५
सम्बन्धाबाधनम् ९६
सामान्यातिदेशः- विशेषातिदेशः ९६
अधिकारी-अर्थित्वम् ९७

पुण्यराजभोजयो समान वाक्यानि ९८
वस्तुमात्राम् ९९
अभिध्येयम् ९९
शास्त्रीयः ९९
लौकिकाः ९९
विशिष्टावग्रहसम्प्रत्यहेतुः १००
अविशिष्टावग्रहसम्प्रत्यहेतुः १००
मुख्या परिकल्पित विपर्यासः १००
व्यपदेश्यः १००
अव्यपदेश्यः १०१
सत्यभावापन्नः १०१
असत्त्वभूता १०१
स्थिरलक्षणः १०१
विवक्षाप्रापितसन्निधानः १०१
अभिधीयमानः १०१
प्रतीयमानः १०१
अभिसंहितः १०१
नान्तरीयकः १०१
तत्रासूया १०२
क्रियान्तरभ्युदासम् १०३
श्रुत्यादिक्रमः १०४
श्रुतिक्रमः १०४
अर्थक्रमः १०४
पाठक्रमः १०५
काण्डक्रमः १०५
प्रवृत्तिक्रमः १०५
प्रतिपत्तिक्रमः १०६
प्रयोगक्रमः १०६

बुद्धिक्रमः	१०६
पराङ्गभृतः	१०७
अप्रयोजकः	१०७
प्रयोजकः	१०७
नान्तरीयकम्	१०७
प्रधानकम्	१०७
शेषः	१०७
विनियोगक्रमः	१०७
साक्षादुपकारकत्वम्	१०८
आरादुपकारकत्वम्	१०८
शक्तिव्यापारभेदः	१०८
फलभेदः	१०९
सम्बन्धभेदः	१०९
अविवक्षितभेदः	१०९
प्रसज्यप्रतिषेधः	११०
पर्युदासः	११०
गौणम्	१११
मुख्यम्	१११
व्यापितम्	१११
गुरुः	११२
लघुः	११३
अङ्गाङ्गिभावः	११३
विकल्पः	११३
नियमः	११४
योग्यता	११४
लिङ्गादभेदः	११४
अपोद्धारः	११५
भोजोक्ता वाक्यधर्मा	११५

वाक्यदोषनिरूपणम् ११६
वाक्यभेदनिरूपणम् १२१
राजशेखरमतम् १२२
वाक्यानामेकत्वनानात्वप्रदर्शनम् १२३
आख्यातनिर्वचनम् १२४
अनेकाख्यातं वाक्यम् १२५
एकाख्यातं वाक्यम् १२७
आवृत्ताख्यातं वाक्यम् १२७
एकाभिधेयाख्यातं वाक्यम् १२८
परिणताख्यातं वाक्यम् १२८
अनुवृत्ताख्यातं वाक्यम् १२८
समुचिताख्यातं वाक्यम् १२९
अध्याहृताख्यातं वाक्यम् १२९
कृदभिहिताख्यातं वाक्यम् १३०
अनपेक्षिताख्यातं वाक्यम् १३०
शक्तिभेदेन वाक्यविभागः १३०
शक्तिभेदार्थनिर्णयः १३२
द्वितीयाध्यायस्यपादटिप्पणयः १३३-१५१

तृतीयोऽध्यायः

वाक्यार्थसमीक्षा
वाक्यार्थसमीक्षणम् १५२
वाक्यार्थप्रकारनिरूपणम् १५४
प्रतिभावाक्यार्थः १५८
भोजसम्मतिः १६०
क्रिया वाक्यार्थः १६६
क्रियावाक्यार्थवादः १६७

संसर्गो वाक्यार्थ १६८
निराकाङ्क्षपदार्थो वाक्यार्थः १७१
संसृष्टो वाक्यार्थः १७२
प्रयोजनं वाक्यार्थः १७३
स्थितलक्षणो वाक्यार्थः १७५
कुमारिलभट्टमतेन वाक्यार्थः १७५
जयन्तभट्टष्य सतम् १७८
ज्ञानं वाक्यार्थः १७९
क्रियावाक्यार्थः १८०
फलं वाक्यार्थः १८०
पुरुषोवाक्यार्थः १८१
भावनावाक्यार्थः १८१
शब्दभावनावाक्यार्थः १८२
नियोगो वाक्यार्थः १८२
उद्योगो वाक्यार्थः १८२
प्रतिभावाक्यार्थः १८३
फलम् वाक्यार्थः १८३
वाक्यार्थविषयकाः नूतनाः विचाराः १८४
पदार्थप्रविभागः १८५
पदार्थो निराकारः १८५
पदार्थो हि साकरः १८६
गुणप्रधानभावः पदार्थः १८६
समुदायपदार्थः १८७
असत्यभूतः संसर्ग एव पदार्थः १८७
असत्योपाधिविशिष्टः पदार्थः १८७
स्वरूपाभिधः पदार्थः १८७
स्वमाहात्म्योपस्थापित एव पदार्थः १८९

बौद्धार्थपदार्थः १९०
प्रतिनियताकारः पदार्थः १९१
अप्रतिनियताकारः पदार्थः १९१
वाक्यार्थस्य सत्यत्वम् १९७
वाक्यार्थपदार्थानात्मा २००
बौद्धोवाक्यार्थ २०१
वाक्य वाक्यार्थयोः सम्बन्धः २०१
संसर्गादयो वाक्यार्थविच्छेदकाः २०२
साहित्यशास्त्रेऽन्यत्रापि २११
भोजाक्तवाक्यार्थदोषाः २१२
तृतीयाध्यायस्य पादटिप्पणयः २१५

चतुर्थोऽध्यायः

प्रतिभासमीक्षा
प्रतिभानिरुपणम् २२३-२८०
प्रतिभाशब्दव्युत्पत्तिः २२४
भर्तृहरिसम्मता प्रतिभा २२५
प्रतिभायाः षाड्विधत्वम् २३१
स्वाभाविकी प्रतिभा २३१
चरणनिमित्ता प्रतिभा २३२
अभ्यासनिमित्ता प्रतिभा २३४
योगनिमत्ता प्रतिभा २३५
अदृष्टनिमित्ता २३५
विशिष्टोपहिता प्रतिभा २३५
प्रतिभायाः बहुविधत्वम् २३७
भिन्नागमदर्शनेन सा प्राप्या २४०
पातञ्जलयोगसूत्रे प्रतिभा २४१

बुद्धिस्मृत्योर्भेदः	२४२
ऋतम्भरा प्रतिभा	२४२
विवेकिनीप्रज्ञायाः सप्तप्रकाराः	२४३
अभिनवगुप्तस्तदीयं प्रतिभाविज्ञानम्	२४४
अभिनवगुप्तस्यवंश परम्परा	२५१
तस्य प्रातिभं ज्ञानम्	२५२
प्रतिभा स्वरूपम्	२५३
प्रतिभाऽऽनन्त्यमप्यत्र प्रतिपादितम्	२५४
प्रातिभं सर्वात्मना श्रेष्ठम्	२५५
केषांञ्चिदत्रविमतिर्दृश्यते	२५६
प्रतिभोदये मोक्षप्राप्तिः	२५९
प्रतिभाविकासः	२६०
विवेकस्वरूपम्	२६१
राजशेखरस्तदीयं प्रतिभाविवेचनञ्च	२६५
एतस्य प्रतिभाविवेचनम्	२६६
प्रतिभाभेदः	२६८
भावयित्र्या प्रतिभा	२७०
कारयित्री प्रतिभा	२७१
प्रतिभाव्युत्पत्त्यो का श्रेयसी	२७२
रामाज्ञापाण्डेयस्य प्रतिभाविवेचनम्	२७३
सा च ऋकसंहितायाम् (प्रतिभा)	२७४
प्रतिभापश्यन्त्योरभेदः	२७७
उपसंहारः	२७८
परिशिष्टम्	२८१
चतुर्थाध्यायस्य पादटिप्पणयः	२८९
सन्दर्भग्रन्थाः	**२९७-३०४**

प्रथमोऽध्यायः

वाक्यलक्षणसमीक्षा

पृष्ठ संख्या 1 से 81

प्रथमोऽध्यायः

वाक्यलक्षणसमीक्षा

वाक्यलक्षणम्

वाक्यं हि भाषायाः प्रधानभूतमङ्गं प्रत्यक्षपरोक्षतया सर्वैरपि भाषातत्त्वविदभिरङ्गीक्रियते। यद्यपि वाक्यं प्रधानं तथापि पदं तत्रापरिहार्यम्, यतो हि वाक्यस्याधारभूतं पदमेव सन्तिष्ठते। तत्र केषाञ्चिन्मते पदं अपरेषान्तु वाक्यं वाचकमिति पश्यामः। वस्तुतस्तु वाक्यमेव वैय्याकरणानां मते वाचकम्, तत्राष्टाध्याय्यस्तृतीय-चतुर्थ-अष्टमाध्यायानां परिशीलनेन तत्र च वाक्यप्रकारदर्शनेन पाणिनेर्वाक्यस्यैव वाचकत्वमभिमतमित्यनुमीयते । (यद्यपि साक्षादत्र वाक्यलक्षणनिर्देशाभावस्तथापि पाणिनिना वाक्यादेव यतः पदसत्ताभ्युपगता, न केवलं पदमेव व्याकरणमित्यङ्गीकृताचेति प्रवृत्तिनिमित्तकारणीभूतस्य वाक्यस्यैव प्राधान्यं वरीवर्ति वैयाकरणनये सर्वत्र) । निष्कर्षतः वाक्यस्य पदसमूहरूपत्वात् पदानां वास्तविकी अवगतिः वाक्यस्य पूर्णविश्लेषणादेव भवितुमर्हति । नान्यः पन्था विद्यते । यतो हि वाक्यविश्लेषणासत्वे तद् घटकपदादीनां तात्त्विकं ज्ञानमपूर्णमसम्भवञ्च भवति । तस्मान्मन्यामहे यद् वाक्यमेव पदाद्गरीयस्त्वं भजत इति । भर्तृहरिकृतस्य वाक्यपदीयग्रन्थस्य सङ्गतिरप्येवमनुभूयते, तत्र वाक्यस्य पदस्य च विवेचनमेव तद्ग्रन्थनिर्माणनिबन्धनम् । अत एव तेन द्वितीयवाक्यकाण्डविवेचनपुरस्सरं तृतीयपदकाण्डस्य विवेचने यत्नः कृतः । भर्तृहरिः पदस्य वाक्यादेव निर्गमनमिति स्वीकृत्य द्वितीयकाण्डप्रारम्भे सर्वतो भावेन प्राचीनानामाचार्य्याणां मतभेदादीन् समाश्रित्य विशदरूपेण वाक्यस्य विषयेऽष्टौ पक्षान् निर्दिशति। वाक्यपदीये तत्र ते वाक्यविकल्पाश्च-

[१] आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ।।
पदमाद्यं पृथक् सर्वं पदं साकाङ्क्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ।।

२ इत्यत्र पुण्यराजेनोच्यते-यच्छब्दस्य साधारण्येन वाचकत्वमेव व्यवस्थापयितुं शक्यते । इदानीम्मतभेदेन केषाञ्चित्पदं वाचकमन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्य तावद्वितत्य स्वंरूपप्रतिपादनायायं प्रारम्भ इति ।

द्वितीयकारिकायाम्- बहुधा न्यायवादिनामित्यस्य वाक्यविषयकः विदुषां न्यायः-मार्गः बहुधा वाक्यं प्रति मतिर्भिन्ना मतभेदाः सन्ति, ते च भेदा अष्टौ दृश्यन्त इति तात्पर्यम् ।

१- आख्यातशब्दो वाक्यम् ।
२- सङ्घातः (पदसङ्घातः) ।
३- सङ्घातवर्तिनी जातिः ।
४- एकोऽनवयवः शब्दः ।
५- क्रमः ।
६- बुद्ध्यनुसंहृतिः ।
७- आद्यं पदम् ।
८- पृथक् पदं सर्वं साकाङ्क्षं वाक्यम् ।

एषु अष्टसु अखण्डखण्डरूपौ द्वौ पक्षौ स्तः तत्राखण्डपक्षे-

१- जातिः सङ्घातवर्तिनी ।
२- एकोऽनवयवः शब्दः ।
३- बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि वर्तन्ते ।

खण्डपक्षे च

१- आख्यातशब्दः ।
२- क्रमः ।
३- सङ्घातः पदसङ्घातः ।
४- पदमाद्यम् ।
५- पृथक् सर्वं पदं साकाङ्क्षमिति पञ्च लक्षणानि वर्तन्ते ।

अभिहितान्वयवादः-

सङ्घातः क्रमश्चेति लक्षणद्वयमभिहितान्वयपक्षपातिभिः शक्तं पदमिति

वदद्भिर्न तु वाक्यं स्वीक्रियते । केऽभिहितान्वयवादिनः- अभिहितानां-पदैरुपस्थापितानां पदार्थानामाकाङ्क्षादिभिस्तात्पर्येणान्वयं भवतीति वादः -पक्षोऽस्य इत्यभिहितान्वयवादी ते तथोक्ताः ।

येऽभिहितयोः शक्त्योपस्थापितयोः पदपदार्थयोरन्वय आकाङ्क्षाभास्यइति वदन्ति । उपर्युक्तलक्षणे पदानां शक्तत्वादेव प्रवर्तितौ द्वावपि बोध्यौ। तत्र पदानां सङ्घातो वाक्यम् । पदानामेव क्रमः पौर्वापर्यभावरूपः क्रमो वाक्यमिति। अभिहितान्वयवादोऽयं नैयायिकेष्वपि प्रसिद्धः । तत्र पदपदार्थयोरन्वय आकाङ्क्षाभास्यो भवति । विस्तरेणेदं व्युत्पत्तिवादे ३ निरूपितम् 'शाब्दबोधे चैकपदार्थेऽ- परपदार्थस्ये संसर्गः संसर्गमर्यादया भासत इत्यत्र संसर्गत्वं विशिष्टबुद्धिनियामकत्वम्, प्रतियोग्यनुयोगिसंबन्धेभिन्नत्वे तथा द्विष्ठत्वे सति विशिष्टज्ञानोत्पादकत्वम्' । एवं संसर्गमर्यादा शब्दः आकाङ्क्षायां रूढोऽस्ति तृतीयार्थस्तु प्रयोज्यभावेन तिष्ठति ।

अन्विताभिधानपक्षः-

१. आख्यातशब्दः।

२. पदमाद्यम्।

३. पृथक् सर्वं पदं साकाङ्क्षमिति लक्षणत्रयं वाक्यस्य वर्तते। केऽन्विताभि धानवादिनः प्राभाकराः मीमांसकास्ते। तेषाम्मते संसर्गः शक्तिभास्यो भवति। अन्वयेनान्वयरूपसामान्यं यज्ज्ञानं तच्छक्तिभास्यमिति तत्र तादात्म्यादिरूपसम्बन्धः वाक्यलक्षणेन लभ्यते । 'कार्यान्विते इतरपदार्थान्विते वा स्वार्थे पदानां शक्तिरित्यन्वयरूपः संसर्गोऽपि शक्तिभास्य एवेति, शक्तिः वृत्तिः ।

तदुक्तम्-

*** सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ।**
भाट्टास्तेऽपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम् ।।

एषाम्मतेन तत्तदर्थविषयकशाब्दबोधं प्रति वृत्त्या तत्तत्पदजन्यतत्तदर्थ-विषयकोपस्थितिः कारणमिति कार्यकारणभावः स्वीकर्तव्यः । अन्यथा घटमानयेत्यादौ-घटपदसम्बन्धितयोपस्थितस्यावकाशस्यापि शाब्दबोधे भानापत्तिः। अत एतादृशकार्यकारणभावस्वीकारेणान्वयांशे शक्तिरभ्युपेतव्येति । अथाष्टौ

वाक्यविकल्पाः क्रमशः समुपस्थाप्यन्ते । तद्यथा-

१ आख्यातशब्दो वाक्यम्-

आख्यातशब्दो वाक्यमिति मतावलम्बिनां आख्यातशब्द एव वाक्यं भवति। इदं तेषां तात्पर्य्यम् । अष्टविकल्पेषु प्रथमोऽयं आख्यातशब्दः 'भावप्रधानमाख्यातम्' धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने समर्थः स्वार्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते।

एतेन आख्यातं नाम क्रियार्थं पदम्। क्रियापदहीनं वाक्यं न क्वचिदपि श्रूयते तस्मात्क्रियाप्रधानपदं वाक्यमिति प्रपञ्चितम् । कारकं विनापि केवलस्या- ख्यातस्य प्रयोगे तस्य तत्साकाङ्क्षत्वाद्वाक्यार्थस्य ज्ञानं भवति । यथा पिधेहि वर्षति इत्यादीनां वाक्यार्थः सम्भवति। कर्तृकर्मापेक्षत्वात् 'देवो जलं वर्षति' इति पूर्णं वाक्यम्भवत्येव । अतो हि भर्तृहरेरुक्तिरत्र संगच्छते ।

आख्यातशब्दे नियतं साधनं यत्र गम्यते ।
तदप्येकं समासार्थं वाक्यमित्यभिधीयते ।।

सुबन्तं प्रसिद्धतया क्रियापदस्य प्रत्यायकम् भवति यथा तृतीयान्तं नाम पदं परशुना छिनत्ति क्रियापदस्य बोधकं जायते, क्वचिद्गर्भीभूतमाख्यातपदमपि प्रकरणानुरूपं स्वार्थरूपवाक्यार्थस्य प्रत्यायकं भवति । यथा 'द्वारमिति नामपदं प्रकरणानुरूपं द्वारं पिधेहि' 'द्वारमुद्घाटय' इति वाक्ययोरर्थस्य प्रत्यायकमस्ति ।एवं वाक्यं तदप्येकं पदम् समाप्त्यर्थं परिपूर्णार्थं वाक्यमेवाभिधीयते तत्रेति पुण्यराजः [६] । वस्तुतः पदानामस्तित्वयोर्भानं वाक्यादेव जायते वाक्यस्य च सम्यक् प्रतीतिः क्रियापदेन भवति । क्रियापदे श्रूयमाणे सति झटित्यर्थस्यानुमितिः जायते।[७] हरिवृत्तावपि तद् दृश्यते- 'तस्माच्छ्रूयमाणं क्रियापदम् अनुमीयमानं क्रियापदं वा वाक्यमेव सर्वव्यवहारेषूपपद्यत' इत्यत्र वेति पाठाध्याहारेण क्रियापदं श्रूयमाणम्भवति क्वचिच्चानुमीयमानमपि लक्ष्यते । श्रूयमाणानुमीयमानयोरूभयत्र वाक्यार्थे क्रियासत्तापरिहार्या भवति । अनेन प्रकारेण प्रयोक्तृणां योऽर्थः यस्मिन्कालेऽभिमतो भवति सोऽर्थः कर्तृकर्मादिशक्तित्वाद् तस्मिन्काले

क्रियोपकारेण व्यवस्थितो भवति। यथोक्तं वाक्यपदीये-

[८] योऽसौ येनोपकारेण प्रयोक्तृणां विवक्षितः ।
अर्थस्य सर्वशक्तित्वात् स तथैव व्यवस्थितः ।।

प्रायशः क्रियाऽवान्तरभेदरहिता भवति। सा च क्रिया तिङन्तेष्वाद्रियते।तस्याः प्रविभागकल्पनापि शक्या न वक्तुम्। यथा-

[९] निवृत्तभेदा सर्वैव क्रियाख्यातेऽभिधीयते ।
श्रुतेरशक्या भेदानां प्रविभागकल्पना।।

सैका क्रिया विशिष्टा वाक्यस्य प्रतिपाद्यस्वरूपा भवति। एकः शब्दः सैव क्रिया, सोऽर्थः, सा क्रियापोद्धारपद्धत्या व्यवहारकाले अनेकत्वं भजते परन्तु तेषामेक एवार्थः- 'यावज्जीवमग्निहोत्रं जुहोति' मासमग्निहोत्रं जुहोति' इत्यत्रोभयत्र 'जुहोति पदमेकाख्यातपदं दृश्यते। पुनरपि तत्र वाक्यपदीये-

[१०] चङ्क्रम्यमाणोऽधीष्वात्र जपंश्चङ्क्रमणं कुरु ।
तादर्थ्यस्याविशेषेऽपि शब्दाद्भेदः प्रतीयते ।।
फलवन्तः क्रियाभेदाः क्रियान्तरनिबन्धनाः ।
असंख्याताः क्रमोद्देशैरेकाख्यातनिदर्शनाः ।।

इत्यत्र हरिवृत्तिः-

[११] एकत्वनित्यत्ववादिनस्तु मन्यन्ते विशिष्टा हि क्रिया यथासम्भवं कालसा- धनद्रव्यपुरुषोपग्रहादिभिः अनुगता वाक्येनाभिधीयते। स चैकः शब्दो व्यवहाराय प्रविभक्तोद्देशः सर्वविशेषणविशिष्टः परिकल्पितविशेषणविशेष्यभेदे एकस्मिन्नर्थे वर्तते । तस्य शक्तिरपोदृत्य व्यावहारिको विभागोऽनुगम्यते।

उपर्युक्तनिर्देशेन एकत्वनित्यत्ववादिनो विशिष्टां क्रियामेव वाक्यस्य प्रतिपाद्यामाम्नन्ति । यश्चैकः शब्दः, क्रिया सैव, योऽर्थः, सैव क्रिया, अपोद्धारेण व्यवहाराय एकत्वस्य नानात्वे प्रयोगः परन्तु क्रियाकालेन, कारकेन द्रव्येण पुरुषेण, उपग्रहादिना च यथासमयं अनुगता वाक्येनाभिधीयते। अयं विभागो व्यवहारिक एव न तु वास्तविको वर्तते । क्वचित्क्रिया नियत-

साधनक्रियावाक्यत्वेन परिचीयते। तत्र क्रिययैव कर्तृकर्मादीनां स्वतोऽनुमानं ज्ञानञ्च कर्तुं शक्यते ।

[१२] **वाक्यं तदपि मन्यन्ते यत्पदं चरितक्रियम् ।।**
आख्यातशब्दे नियतं साधनं यत्र गम्यते ।
तदप्येकं समासार्थं वाक्यमित्यभिधीते ।।

[१३] संस्कृत व्याकरणदर्शननाम्नि ग्रन्थे टिप्पण्यां कारिकेयमित्थं प्राप्यते-

वाक्यं तदपि मन्यते यत्पदं चरितक्रियम् ।
अन्तरेण क्रियाशब्दं वाक्यादेव हि दर्शनात् ।।

कारिकायाः द्वितीयोंऽशःमुद्रितग्रन्थेषु न लभ्यते । अयं पाठः हस्तलेखे समुपलभ्यत इत्यत्र ग्रन्थकार एव प्रमाणम् । चरितक्रियम् भक्षितक्रियम्-गर्भीकृतक्रियम्-अन्तर्भूतक्रियमिति निराकाङ्क्षत्वादर्थ-प्रतिपादकत्वादक्रियमपि वाक्यं स्वीक्रियते । तेन च वाक्येन पदस्य सत्यत्वं सत्यार्थत्वञ्च फलति । यथैकमाख्यातं वाक्यम् तथैव विशिष्टमेकं पदमपि वाक्यं भवति। यतो हि तत्र एका गर्भीभूता क्रियान्तरिता दृश्यते। एकत्वं च क्वचिद् दूरत्वादपि दूरस्थितेषु पदार्थेषु संश्लिष्टं भवति । यथा इह वने धवखदिरपलाशा एव च्छिद्यन्तां नेतरे इत्यत्र विवक्षायोगेनेतरेतरसंश्लिष्टात् धवखदिरपलाशानां द्वंद्वे सत्येकत्वभावः अन्यत्र सम्बद्धोऽपि पदार्थः अश्लिष्टोऽसम्बधो भवति यथा 'तोयमत्स्ययोर्नैकत्वम्'। एकत्वेऽपि च कल्पनावशान्नानात्वं वस्तूनां राहो शिर इति यथा नानात्मकानां च धवखदिरपलाशादीनामेकत्वमेकस्यां बुद्धौ सङ्कलनरूपं दृश्यते, वनमिति यथा विवेकिनां परस्परविलक्षणानां पदार्थानामयः शलाकाकल्पानां संसर्गो वाक्यार्थरूपो दृश्यते, यथा देवदत्तः काष्ठैरित्यादौ, संसृष्टानां च विभक्तित्वं यथा माथुराः पाटलिपुत्रेभ्य आढ्यतराः इत्यादौ । एषां बुद्धया सङ्कलितानां सतां पश्चाद्विभागकल्पनं क्रियत इति पुण्यराजः । तदुक्तम्-

[१४] **संसृष्टानां विवेकित्वं संसर्गश्च विवेकिनाम् ।**
नानात्मकानामेकत्वं नानात्वं च विपर्यये ।।

इत्यस्यां कारिकायाम्-

क्रियां विना पदार्थस्य ज्ञानमसम्भवम् । यतो व्यवहारकाले क्रियापदेनैव यथार्थबोधः सम्भवति।

क्रियापदोपसंहारे तु सत्यासत्यभावेन प्रतिपत्तिषु, व्यवहारोऽवतिष्ठते, । तत्रैव वस्तूपलक्षणं [१५] शब्दो नापकारकस्य वाचक इति कारिका तत्र हरिवृत्तिः विभागेन सर्वेषां साकाङ्क्षत्वमुपलभ्यते । साध्यस्त्वर्थात्मा स्वफलप्रयुक्तः प्रधानात् सर्वस्य वाक्योपसंग्रहस्यार्थस्य पूर्वं प्रविभज्यते । यथा नामपदं साकाङ्क्षं तथैव क्रियापदमपि साकाङ्क्षम्भवतीति । यद्यपि कारकं विना क्रियामाकाङ्क्षते वाक्यम् तत्र क्रिया साध्या प्रधाना चास्ति । कारकानि चाङ्गभूतानि वाक्यस्य भवन्ति । तस्मात्प्रतीयते क्रियाकारकयोरभिन्नः कश्चन सम्बन्धः । साधनसाध्यशब्दौ कारकक्रियार्थपरकौ भवतः ।[१६] (क्रिया) साधनेषु (कारकेषु) अवश्यं तिष्ठति । कारकं हि 'करोतीति' [१७] कारकमिति व्युत्पत्त्या कारकपदं सर्वदानुरूपं प्रतीयतेऽनेनाशयेन प्रदीपकारः कैय्यटोऽपि क्रियां साध्यरूपां स्वीचकार । सैव क्रिया शब्देनापि व्यपदिश्यते।

भर्तृहरिरप्याह-

[१८] नियतं साधने साध्यं क्रिया नियतसाधना ।
सन्निधानमात्रेण नियमः सन् प्रकाशते ।।

यथा साधने साध्यनियमस्तथैव साध्ये साधननियमो भवति। क्रियाजनकं किमपि कारकं नाम अवश्यं स्वीकर्तव्यमेव । तत्रोभयसत्त्वे वाक्यबोधाय आकाङ्क्षायोग्यता तात्पर्यासत्तिद्वारैव तयोः परस्परं सम्बन्धः नियमेनोपदिश्ते। पदेषु पदान्तरभावो भवत्येव सुनिश्चितम् । तत्र हरिवृत्तिः

नियतसाधनः साध्योऽर्थः [१९] नियतक्रियाणि च साधनान्यविभक्ति-रूपोपकाराण्यपि युतव्यवस्थानि प्रतिपदमभिधेयत्वेनावस्थितानि । नित्यनियतत्वाच्च नियमोऽत्र विधेयः । सस्तु नियमः प्रयोगो सन्निधिमात्रेण पदान्तराणां पुरुषं प्रति प्रकाशते नानुगृह्यत इति ।

पूर्वोक्तमेव स्पष्टयितुं पुनराह पुण्यराजः-

साध्य[२०] साधनं च परस्परं नियतमेव । केवलमाकांक्षावशादितर-पदार्थसन्निधाने सति नियमः सन्नेव प्रकाशत इत्याक्षिप्तपदान्तराणि पदान्येव वाक्यम्, पदार्थश्च वाक्यार्थ इत्यव्यतिरिक्तः संघातपक्षोऽयम् ।

यद्यपि क्रियाकारकयोर्नियतसाधनवशात्परस्परमभिन्नता तथापि वाक्ये क्रियायाः प्रधानत्वम्, कारकस्य च गौणत्वं भर्तृहरिणोक्तम् -

[२१] गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ।।

इत्यत्र नामपदं क्रियापदं गुणभावेन गुणभूतं सत् साकाङ्क्षं पदान्तरमाकाङ्क्षं भवति, तत्र क्रियापदं मुख्यरूपेण तिष्ठति, कारकपदञ्च पदानि अपेक्षते । एतस्मान्मन्यामहे साध्यपदं क्रियापदं मुख्यं भवति, साधनं कारकपदं पदान्यपेक्षत इति। व्यवहारकाले क्रियारहितः न कश्चन पदार्थः स्थातुं शक्नोति

[२२] क्रियानुषङ्गेण विना न पदार्थः प्रतीयते।
सत्यो वा विपरीतो वा व्यवहारे न सोऽस्त्यतः।।

क्रियामन्तरा कश्चन पदार्थः सत्यो वा, विपरीतोऽसत्यो वा न कुत्रापि प्रतीयते। स च सत्योऽसत्यो वा व्यवहारे न व्यवस्थितः योग्यतायां सत्यामपि व्यवहारेऽसत्वाच्च शुक्तिरूप्यादिवदसदिति भावः ।

किञ्च क्रियाप्रधानमाख्यातमिति [२३] निर्देशात् क्रियाप्रधानस्यैवार्थस्य तद्धितान्ताद् बोधो यद्यपि भवति तथापि आख्यातस्य क्रियाप्रधानत्वाद् तद्धितः स्वभावात् साधनप्रधान एव भवति । यथा-

[२४] आख्यातं तद्धितार्थस्य यत्किञ्चिदुपदर्शकम्।
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः।।

इत्यत्र तद्धितार्थस्य तेन [२५] दीव्यतीत्यस्याख्यातपदं निमित्तभावेन तदर्थस्य तद्धितार्थस्य ज्ञापकं भवति। अस्मिन्सूत्रेऽर्थानां गुणप्रधानता नोच्यते, मुख्यार्थस्तु-अक्षकरणकदेवनादिक्रिया मुख्यविशेष्यको बोध इति। अयं विषयः

पुण्यराजेनाधोनिर्दिष्टपद्यत्रयेण स्फुटीकृतः

[२६] **गुणप्रधानताभेदः पुरुषादिविपर्ययः ।**
निर्दिष्टस्यान्यथा शास्त्रे नित्यत्वान्न विरुध्यते ।।
यथा निर्देशमर्थाः स्युर्येषां शास्त्रं विधायकम् ।
किञ्चित्सामान्यमाश्रित्य स्थिते तु प्रतिपादनम् ।।
योऽश्वे यः पीठ इत्यत्र भूतयोरश्वपीठयोः ।
यथोपलक्षणार्थत्वं तथार्थेष्वनुशासनम् ।।

श्रीरघुनाथशास्त्रिणायं [२७] विषयो व्याख्यानरूपेणोक्तः

शास्त्रे तेन दीव्यतीत्यादौ निर्दिष्टस्येत्यत्र शेषत्वेन विवक्षितेन षष्ठी भवति। अक्षैर्दीव्यति आक्षिक इत्यादौ पुरुषादिविपर्ययो भवति । यथा आक्षिकोऽसि, आक्षिकोऽहम् इत्यादौ केवलं पुरुष विपर्यय एव भवति ।

यथानिर्देशमर्थाः स्युः- शास्त्रे निर्दिष्टा येऽर्थास्तदनुसारेण स्युः। स्थिते तु नित्यशब्दे तु किञ्चित्सामान्यं शास्त्रानुसारिलोकव्यवहारानुसारिणञ्च किञ्चित्।

योऽश्वे दृष्टः स चैत्रः, यः पीठे दृष्टः स चैत्रः, इत्यत्र यथाभूतयोरश्वपीठ- योश्चैत्रपदार्थे उपलक्षणार्थत्वम् । शास्त्रेऽर्थेष्वनुशासनम् अर्थविषयकमनुशासनमिति उपलक्षणम् ।

कारकाणि नियामकानि अनुवादकानि वा भवन्ति, यथा 'वर्षति' इति साध्येन जलकर्मणोऽध्याहारः तथा देवकर्तृकव्यवहारः । एवञ्च वर्षतीति पदस्य योऽर्थः स एव देवः जलं वर्षतीति वाक्यस्यापि बुद्धयते । देवशब्दः जलशब्दश्च वर्षति क्रियापदस्य व्यक्तार्थस्य वानुवादकः । अत एव इमौ शब्दावनुवादपरकौ भवतः एवमेव आश्रयति इति पदं कर्मपदमपेक्षते आश्रयविशेषं तन्नियतं भवति तेन माणवकम् इति सुबन्तस्याध्याहारेण माणवकमाश्रयति श्रुतेन सामान्यबुद्धिं परित्यज्य विशेषबुद्धिं प्राप्नोति । तेन ज्ञायते कारकं सामान्यविशेषयोर्नियामकं भवति ।

आख्यातशब्दो वाक्यमिति वादस्याधारः कात्यायनकृतवाक्यलक्षणे प्रयुक्ताख्यात शब्द एव प्रतिभाति । तद्यथा आख्यातं [२८]

साव्ययकारकविशेषणं वाक्यमिति वार्तिकनिर्देशः । यद्यपि वैय्याकरणैः नायं विचारोऽङ्गीक्रियते तथापि वार्तिकस्य विचारेण कश्चिदनुमातुं शक्नुयात् कात्यायनकृतवाक्यलक्ष्णं महत्त्वपूर्णमस्ति, कदाचित्तदेव लक्षणं संक्षिप्य केनचिदाचार्येण समुपस्थापितं भवेदिति । साव्ययकारकविशेषणस्य व्याख्याकृद्भिः सकारकविशेषणं सक्रियाविशेषणं इत्यर्थोऽङ्गीकृतः। तत 'आख्यातं सविशेषणं वास्तविकं वाक्यस्वरूपं समुपगतम् येनाचार्य्येण आख्यातं शब्दो वाक्यम्, आख्यातं वाक्यमिति वाक्यलक्षणम् प्रस्तुतीकृतं तेन सविशेषणपदं तद्गर्भीकृत्यैवेति अनुमातुं शक्यते। आख्यातं वाक्यमित्यत्राव- श्यकतानुरूपं कस्यापि पदस्य कारकविशेषणस्य क्रियाविशेषणस्य वाऽऽध्याहारः कर्तुं पार्यते तदानीमाख्यातपदमपि वाक्यमिति पक्षः स्वीकर्तव्यो भवतीति ज्ञेयः। अयं विचारः त्रिपाठिमहाशयैः २९ स्वीयनिबन्धे प्रस्तुतीकृतः ।

आख्यातशब्दो वाक्यमित्यस्मिन्पक्षे क्रियावाक्यार्थः । यथा वक्ष्यति

[३०] क्रिया क्रियान्तराद्भिन्ना नियताधारसाधना ।
प्रक्रान्ता प्रतिपत्तॄणां भेदाः संबोधहेतवः ।। इति

पुण्यराजोक्तैका कारिकास्मिन्नवकाशे महत्त्वपूर्णा वर्तते, परं सा कारिका कुतस्तेनादृतेति न वक्तुं शक्यते। शर्म्मभिरपि ३१ कथितम् इयं कारिकान्वेषणीया। अस्यां क्रियायां वाक्यार्थभूतायां विशेषणत्रयमुद्दिष्टम्।

१. प्रतिभा यत्प्रभूतार्थेति।
२. यामनुष्ठानमाश्रितम्
३. फलं प्रसूयेत यतः । इति।

सा कारिका-

प्रतिभा यत्प्रभूतार्था यामनुष्ठानमाश्रितम् ।
फलं प्रसूयेत यतः सा क्रिया वाक्यगोचरा ।।

नियताधारनियतसाधनक्रियात एव फलं प्रसूयते, न त्वेतादृशक्रियातः। सा क्रिया वाक्यगोचरैव वाक्यार्थ इति ।

२. पदसङ्घातः-

पदसङ्घातो वाक्यम्भवतीति पदसङ्घातवादिनाम्मतम् । पदं हि नाम सुबन्ततिङन्तचयं, संघातः समूहः । पदानां एकार्थपरकाणां सङ्घातः समूहो वाक्यमिति वक्तुं शक्यते । एतेन जानीमः यत्केवलमाख्यातपदं न वाक्यमिति पिधेहि इत्यस्य क्रियापदस्यानेन विधिना वाक्यत्वं न सन्तिष्ठते, यतो हि अस्मिन् कर्मपदस्य द्वारम् इत्यस्याध्याहारो भवति । पिधेहि द्वारम् इति द्वयमपि सम्भूय वाक्यत्वं जनयति । न हि केवलस्य द्वारमित्यस्यापि वाक्यत्वं पिधानाक्रियाभावे भविष्यति । तस्मात् परस्परान्वितार्थानां पदानां सङ्घातेन वाक्यत्वमुपतिष्ठते । एतेन पदसङ्घातलक्षणभूतेन वाक्येन वाक्यार्थोऽपि समुत्पद्येत । शृङ्गारप्रकाशस्य [३२] दृष्टान्तेनायं विषयोऽधिकः स्पष्टो भविष्यति, तद्यथा तत्र यथा त्रयोऽपि ग्रावाण उखां धारयन्ति, चत्वारोऽप्युद्यन्तारः शिविकाम् उद्यच्छन्ति, सर्वाण्यपि कारकाणि पाकं साधयन्ति तथा पदान्यपि सर्वाणि वाक्यार्थमन्वगमयन्तीति ।

त्रयो ग्रावाणः यथा उखां (स्थालीं) धारयन्ति, यथा चत्वारोऽप्युद्यन्तारः शिविकावाहकाः शिविकां वहन्त्येवं यथा सर्वाणि कारकाणि एकं पाकं साध्यं साधयन्ति तथैव सर्वाणि पदानि सङ्घाततया वाक्यं वाक्यार्थञ्चावगमयन्ति।

पदसंघातवादिनां पदसंतघातजं वर्णसङ्घातजं पदमिति सिद्धान्तोऽतिप्राचीन आसीत् । कदाचिद्व्याडेराचार्यस्येदं मतं संग्रहे उपनिबद्धमासीत् । आचार्यव्याडेः वाक्यलक्षणमिदमिति वाक्यपदीयटीकाकारो वृषभो [३३] वदति । इदं वाक्यं शौनकेनापि [३४] समुद्धृतम् ।[३५] रामसुरेशत्रिपाठिभिरेषां संकलनं स्वीये निबन्धे सविशदं कृतम् । सङ्घातवादमनुसृत्य भर्तृहरिणोक्तम्

[३६] केवलेन पदेनार्थो यावानेवाभिधीयते।
वाक्यस्थं तावतोऽर्थस्य तदाहुरभिधायकम् ।। इति।

केवलेन पदेनात्र यावन्तं केवलो वृक्षशब्दो जातिमात्रं भिन्नमर्थं ब्रवीति तावन्तमेव 'वृक्षोऽस्ति', वृक्षो नास्ति वृक्षच्छिन्न इत्येवमादिष्वपि वाक्येषु प्रतियोगोऽस्तीति पुण्यराजः[३७] । वृक्षशब्दोऽत्र जातिप्रत्यायकोऽस्ति। केवलं

पदं यस्यार्थस्य वाचकम् तमेव वाक्यस्थमपि अभिदधाति । भावोऽभावस्य बोधको यथा-वृक्षोऽस्ति तत्र वृक्षस्य च्छेदनादेरभावः । एवं वृक्षो नास्ति यथा वृक्ष इत्यनेन वृक्षोऽस्ति, वृक्षो नास्ति इत्यनयोर्बोधो भवेदिति।

अम्बाकर्त्री टीकायामयं [३८] विषयः स्पष्टीकृतः । तद्यथा- इह लोके केवलो वृक्षशब्दो यावन्तं जातिमात्रं भिन्नमर्थं ब्रवीति तावन्तमेव वृक्षोऽस्ति वृक्षो नास्ति वृक्षच्छिन्न इत्येवमादिष्वपि वाक्येषु पदान्तरेण सह प्राप्तयोगः सन् सः प्रत्याययति। वाक्ये वृक्षशब्दार्थस्य भावाभावच्छेदादियोगो न भिन्नजातियुक्तात्मकत्वं तस्य प्रदर्शयति । नापि चात्र वृक्षत्वे जातियोग्यो भावाभावच्छेदादिसम्बन्धः, अत्र जातेर्व्यक्तौ विशेषणतया प्रतीयमानत्वाद् भावाभावादिसम्बन्धस्य प्रधानीभूतायां व्यक्तावेव प्रतीतिरौचित्यात् भवति।

किञ्च 'वीरः पुरुषः' इत्यत्रैकस्य पदस्यापरपदेन सह सामानाधिकरण्येन विशेष्यविशेषणरूपेणान्विततया अधिक एवार्थः दृश्यते, यथोक्तम्-

[३९] सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते ।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ।।

आधिक्यमुपजायते इत्यादिना विशेष्यविशेषणरूपो सामानाधिकरण्यरूपो यः संसर्गः, स एव पदसङ्घाते वाक्यार्थः कथ्यते । भाष्येऽपि [४०] यदत्राधिक्यं वाक्यार्थ स इति । 'ग्रामो ग्रामो रमणीयः' इत्यत्र पदानां समुदाये यो हि- अधिकः संसर्गः स वाक्यार्थः । 'अनेकपदसंश्रयम्' इत्यनेन कारिकांशेन पदसंघातो वाक्यमिति पक्षेऽभिहितान्वयवादेऽपि जातिवद्वाक्यार्थस्य प्रत्येकं परिसमाप्तिः, अन्येषां संख्यावत् समुदाये परिसमाप्तिः यथोक्तम्-

[४१] स त्वनेकपदस्थोऽपि प्रतिभेदं समाप्यते।
जातिवत्समुदायेऽपि संख्यावत्कल्प्यते परैः ।।

१. जातिवत् प्रत्येकं परिसमाप्तिरित्यत्र अभिहितान्वयवादः ।

२. संख्यावत्समुदायपरिसमाप्तिरित्यत्र अन्विताभिधानवादः ।

पक्षद्वयमपि कारिकाद्वयेन दर्शयति ।

[४२] **सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः ।**
तदर्थान्तरसंसर्गाद् भजते भेदरूपताम् ।।
भेदानाकाङ्क्षतस्तस्य या परिप्लवमानता ।
अवच्छिनत्ति सम्बन्धस्तां विशेषे निवेशयन् ।।

पदं पूर्वं सामान्यमर्थं प्रकटयति ततो विशिष्टम् । सामान्यादन्यो विशिष्टोऽर्थः समुपलभ्यते स एव वाक्यार्थः । भाष्येऽयं [४३] विषयः पतञ्जलिनोपस्थापितः

'एषां पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थः । यथा देवदत्तः गामभ्याज शुक्लामिति । वाक्येऽत्र देवदत्तपदेन कर्तृव्यवहारः, न च कर्मक्रियागुणादीनां निर्देशः । ग्राम इति शब्देन कर्मनिर्देशः न च कर्तृकर्मक्रियागुणादीनाम् । अभ्याजपदेन क्रियानिर्देशः न च कर्तृकर्मगुणादीनाम्। शुक्लाम् पदेन गुणनिर्देशः न च कर्तृकर्मक्रियादीनां सङ्केतो भवति । केवलं देवदत्त गामभ्याज शुक्लामिति सम्पूर्णवाक्येन वक्तुरभिप्रायः ज्ञातुं शक्यतेऽत्र प्रत्येकपदेन कर्तृकर्मक्रियागुणादयः शक्यन्तेऽवगन्तुम् । तस्मान्मन्यामहे पदानि पूर्वं सामान्यमर्थं वहन्ति ततो प्रयोगेण विशिष्टमर्थं प्रकटयन्तीति । अनेन प्रकारेण विशेषोऽर्थ एव वाक्यार्थो भवति । तत्र कैयटः-

'पदार्था [४४] एव त्वाकाङ्क्षायोग्यतासन्निधिवशात् परस्परसंसृष्टो वाक्यार्थ इत्यर्थः । ध्वनिव्यङ्ग्यं नित्यं वाक्यं विशिष्टस्यार्थस्य पदार्थसंसर्गरूपस्य वाचकम् । अन्यथा शाब्दबोधसहकारिकारणैराकाङ्क्षा-योग्यतासत्तितात्पर्यादीनां सन्निधिवशात् मिथः संसृष्टेन विशिष्टो बोधो भवति, स च वाक्यार्थः प्रतिपादितः । सोऽपि पुनः ध्वनिव्यंग्यनित्यवाक्य-पदार्थसंसर्गरूपविशिष्टार्थस्य वाचको भवति, अन्यथा सोऽशाब्दो वाक्यार्थो भवेदिति तात्पर्य्यम् ।

'अन्यथा ह्यशाब्दो वाक्यार्थः स्यादित्यत्र नागेशो [४५] वदति न च शब्दप्रयोज्यत्वाच्छाब्दत्वम् प्रत्यक्षदृष्टधूमबोध्यबह्नेरपि प्रत्यक्षत्वापत्तेः श्रुतधूमशब्दोपस्थितधूमार्थबोध्यबह्नेरपि शाब्दत्वापत्तेश्च । यदि पदसमभिव्याहार-रूपाकांक्षा तत्कारणत्वज्ञानञ्च शाब्दबोधे करणमिति शाब्दत्वं, तदा पदानां पदार्थेष्वपि शक्तिर्न सिद्धयेत् । पाठोऽयमनूद्यते-शब्दप्रयोज्यत्वान्न शाब्दत्वं बिभर्ति । यद्येवं तदा प्रत्यक्ष धूमोऽभिलक्ष्य बोध्यबह्नेः प्रत्यक्षत्वं सञ्जायते। एवमपि श्रूयमाणधूमशब्दादुपथितधूमार्थबोध्यबह्नेरपि शाब्दत्वापत्तिः भविता ।

यद्यत्र (शब्देन) पदसमभिव्याहाररूपाकाङ्क्षायाः तत्कारणत्वज्ञानशाब्दबाधे कारणमस्तीति तात्पर्य्यम्, तदा पदानां पदार्थेषु शक्तिर्न सिद्धयति। तदुक्तं वाक्यपदीये-

[४६]**अशाब्दो यदि वाक्यार्थःपदार्थोऽपि तथा भवेत् ।**
एवं च सति सम्बन्धः शब्दस्यार्थेन हीयते ।।

तादात्म्यसम्बन्धस्य वाक्ये महती आवश्यकता वर्तते, यद्यसम्बद्धे बोधजनकताभावस्तदा पदार्थैः पदानां शक्तिरूपसम्बन्धकल्पनं भवति, तत्र संसर्गबोधकारणताया अपि सम्बद्धाभावे केवलं तादात्म्यसम्बन्ध एवावशिष्यते कार्यनिर्वाहायेति, एवं प्रतीयते तादात्म्यमेव च शक्तिरिति तत्त्वम् वाक्यस्य। भाष्यकारप्रयुक्तो 'वाक्यार्थ' शब्दः नागेशेन शब्दार्थे प्रयुक्तः, संघातवादि-भिस्सामान्याद्विशेषे या शक्तिस्स्वीक्रियते सा शक्तिरूपविषया महाभाष्यम-धिकृत्य चर्चितास्ति । स्वतन्त्रं पदं यस्यार्थस्य बोधकं भवति, अस्वतन्त्रमपि (वाक्यगतं) तत्पदं स्वमर्थं न जहाति । समुदायेऽऽधिक्यमेव संसर्गः वाक्यार्थ इति । विशेषणविशेष्यसंसर्गः स च वाक्यशक्य एवेति निरूपितः मञ्जूषायां नागेशेन। संघातपक्षे वाक्यस्य वाक्यार्थस्य च विषये अधोनिर्दिष्टाभिः कारिकाभिः पक्षत्रयम् सम्भाव्यते वाक्यपदीये-

[४७] **स त्वनेकपदस्थोऽपि प्रतिभेदं समाप्यते ।**
जातिवत्समुदायेऽपि संख्यावत्कल्प्यते परैः ।।
सर्वभेदानुगुण्यं तु सामान्यमपरे विदुः ।
तदर्थान्तरसंसर्गाद् भजते भेदरूपताम् ।।
भेदानाकाङ्क्षतस्तस्य या परिप्लवमानता ।
अविच्छिनत्ति सम्बन्धस्तां विशेषे निवेशयन् ।।

१- केषाञ्चिन्मते -'जातिवद्' वाक्यार्थस्य प्रत्येकं परिसमाप्तिः'।

२- केषाञ्चिन्मते -' संख्यावत् समुदायपरिसमाप्ति':।

३- केषाञ्चिन्मते - 'संसंर्गसामान्यादर्थान्तरसंसर्गाद्वा संसर्गविधानम्।

अम्बार्थकत्र्यांम् पक्षद्वयमेव दर्शितं टीकाकर्त्रा ।

पदसंघातो [४८]वाक्यमिति पक्षेऽभिहितान्वयवादमाश्रित्य वाक्यार्थस्यान-

कपदसंश्रयत्वेऽपि-तद्दर्शयितुमाह-स त्वेनकपदस्थोऽपीति । तृतीयपक्षः महाभाष्यानुसारी [४९] वर्तते । प्रथमपक्षे जातिवत् प्रतिपदं समाप्यते तद्वाक्यम्, वाक्यार्थो वेति यथानेकाश्रिते सति जातिराश्रये पूर्णभावेन प्रवर्तते । ब्राह्मणत्वजातिः यथा ब्राह्मणसमुदाये तथैवैकब्राह्मणे । तेनोच्यते यत्समुदाये तत्समुदायैकदेशेऽपि भवति इति । तत्र पुण्यराजः-[५०]

यद्यथा जातिवत् सत्तावसाने अनेकाधिकरणयोगेऽपि प्रत्यधिकरण-मन्यूनता तथायं वाक्यार्थ आकृतिन्यूनता समतिक्रमेण प्रतिपदमेवाविकलः समाप्यत इति, अस्य पाठस्यानुवादोऽत्राम्बार्थकत्र्यार्म् -स तु वाक्यार्थः वाक्यलक्षणतया वानेकपदस्थोऽपि प्रतिव्यक्तिजातिवत् प्रतिभेदं प्रतिपदं समाप्यत इत्येकः पक्षः । यथा जातिरूपायाः सत्ताया अनेकाधिकरणयोगेऽपि वाक्यार्थ आकृतिन्यूनतासमतिक्रमेण वाक्यापेक्षयाविकल एव प्रतिपदं समाप्यते ।

'परैः [५१] संख्यावत्कल्प्यते' इति पाठेन द्वितीयः पक्षः समुपस्थाप्यते। 'यथैकस्याः विंशत्यादिसंख्यायाः प्रत्यधिकरणं तन्निमित्तप्रत्ययहेतुत्वं तथा वाक्यार्थस्य प्रतिपदं प्रत्याय्यत्वेनावस्थानमिति पुण्यराजः । अयं भावः- यथा विंशत्यादिकायाः संख्यायाः पूर्णता विंशतिसमुदाये पश्यामः, न तु प्रतिसंख्यम्। परं संख्याप्रत्यायने प्रतिसंख्यं निमित्तता तथैव वाक्यस्य समुदाये परिसमाप्तिः, वाक्यार्थ एकैकेन पदेन प्रत्याय्यो भवति इति। अम्बाकत्र्यां [५२] यथोक्तम्-

'यथैकस्या [५३] एव विंशत्यादिकायाः संख्यायाः समुदायपर्याप्तायाः प्रत्य-धिकरणमपि वर्तमानत्वेन संख्यानिमित्तसंख्येयप्रत्ययहेतुत्वं तथानेकपदनिष्ठस्यापि वाक्यार्थस्य प्रतिपदमपि प्रत्याय्यत्वेनाविकलमेवावस्थानमिति । तथा च केषाञ्चिज्जातिवत्प्रत्येकपरिसमाप्तिर्वाक्यार्थस्येति पक्षः । केषाञ्चित्तु संख्या-वत्समुदायपरिसमाप्तिस्तस्येति निष्कर्षः ।

द्वावपि पक्षौ 'पदसंघातो वाक्यमिति' अभिहितान्वयवादमाश्रित्य प्रोक्तौस्तः ।

तृतीयः पक्षः- 'सर्वभेदानुगुण्यं तुना व्यज्यते' । पूर्वोक्तः 'पदसंघातो वाक्यम्' इति सिद्धान्तः 'पदार्थो वाक्यार्थ' इति अन्विताभिधानप्र-दर्शनपूर्वकमुच्यते । अस्य [५४] मूलं-भाष्ये प्रोक्तमस्ति । तथा च पुण्यराजः [५४] 'पूर्वत्र पदानां वाक्ये तावानेवार्थो यावानेव केवलानां, संसर्गस्तु संघातवाच्यः । इह तु तथाभूत एव सामान्यरूपः पदस्यार्थो यस्तत्तद्विशेषस-

न्निधौ तत्तद्विशेषविश्रान्त' इति। अस्मिन् पक्षे संघातस्तु संसर्गवाच्यः कथ्यते। यः सामान्यरूपः पदार्थः सोऽपि विशेषसन्निधिं प्राप्य विशेष एव विश्राम्यतीति तात्पर्य्यम् ।

पूर्वोक्तयोः पक्षयोः पदस्य स्वतन्त्रो योऽर्थः स एव समुदायेऽपि यथावद्भवति। तृतीये विचारप्रसङ्गे पदस्य स्वतन्त्रस्य योऽर्थः स एव विशेषयोगे (योग्यताकाङ्क्षादियोगे) विशेषोऽर्थो भवति इति निष्कर्षः ।

चतुश्चत्वारिंशपञ्चचत्वारिंशकारिकाभ्यां 'सर्वभेदानुगुण्यं' इति पाठेन सामान्यस्य विशेषेण संन्निधानेन संसर्गेण पदार्थ एव वाक्यार्थ इत्युक्तम्। तत्र सामान्यविशेषयोः प्रतीयमानः सम्बन्धः पदार्थातिरिक्तः न तु वाक्यस्याभिधेयपर इति । स सम्बन्धोऽतिक्रान्तः, स च [५५] पूर्वत्र जातिवत् संख्यावद्वा पदार्थव्यतिरेकेण वाक्यत्वेन कल्पितः । इदानीं पदार्थव्यतिरेकेणासन्नैवैकान्तानुमेयो न समुदायवाच्यः, किं तर्हि सर्वभेदानुगुणसामान्यरूपो विशेषान्तरसन्निधानाद्विशेषविश्रान्तपदार्थ एव वाक्यार्थ इति दर्शयितुमाह-

[५६] कार्यानुमेयः सम्बन्धो रूपं तस्य न दृश्यते ।
असत्त्वभूतमत्यन्तमतस्तं प्रतिजानते ।।

'संघातपक्षे संसर्गो वाक्यार्थ' - इत्युक्तम् । संसर्गस्य रूपं स्वरूपं वा निर्धारयितुं न शक्नुयात् कश्चिदपि । स च कार्यानुमेयः कश्चन योग्यतायुक्तः सम्बन्धोऽस्ति । कार्यानुमेयत्वञ्च कार्येण पदार्थानां सामान्यानां विशेषविश्रान्तिलक्षणेनानुमानरूपत्वम् । शाब्दबोधात्पूर्वं तस्य स्वरूपं नावलोक्यते कीदृशं तदिति। तदसत्त्वभूतमिति प्राचीना आचार्या ब्रुवन्ति ।

[५७] नियतं साधने साध्यं क्रिया नियतसाधना ।
स सन्निधानमात्रेण नियमः सन् प्रकाशते ।।

अनियतसम्बन्धे सति,योऽनुमेयोऽसत्त्वभूतश्च भवति, स सर्वत्र विशिष्ट-भावं भजते । स संसर्गः पुनः साध्यसाधनयोर्नियते आकाङ्क्षादिभावेन सन्निधानमात्रेण प्रकाशते । पुनरपि-

[५८] **गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।**
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ।।

'नाम कारकपदं क्रियायां गुणभूतं सन् पदान्तरमाकाङ्क्षति । क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षत इति पुण्यराजः । भर्तृहरिः संघातपक्षस्य क्वचित्पोषकः, क्वचिच्च विरोधी दृश्यते ।

[५९] **यथा सावयवा वर्णा विना वाच्येन केनचित् ।**
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ।।

तस्येयं कारिकोपर्युक्तपक्षं समर्थयति। यथा सावयवा वर्णाः स्वतः निरर्थकाः भवन्ति, तथापि पदे समुदिते सार्थकाःजायन्ते तथैव पदान्यपि समुदाये वाक्यानि भवन्ति, सार्थकानि च जायन्ते, तस्मात्पदसमुदाय एव वाक्यमित्यर्थः । संघातस्य आलोचनायामपि द्वे कारिके दृश्येते

[६१] **सामान्यार्थतिरोभूतो न विशेषेऽवतिष्ठते ।**
उपात्तस्य कुतस्त्यागः निवृत्तः क्वावतिष्ठताम् ।।
अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत् ।
एवं सति च सम्बन्धः शब्दस्यार्थेन हीयते ।।

एताभ्यां कारिकाभ्यां 'पदसंघातो' वाक्यमित्यत्र सामान्याद् विशेषाभिधानरूपमुख्यसिद्धान्तस्य विरोधः परिलक्ष्यते । यथा 'देवदत्त गामभ्याज' इत्यत्र वाक्ये 'देवदत्त' शब्दस्य सामान्यभूत एवार्थ समुपलभ्यते' न हि विशिष्टोऽर्थोऽत्र प्रकाशते । यत्र सामान्यार्थस्य सत्त्वे, लुप्ते विशेषार्थस्य चाभावे का दशास्य भविष्यति । सामान्यस्य तिरोहिते सति न हि विशेषस्य प्रतिष्ठापनं भवति। शब्दः स्वोत्पत्तिकाले यदि विशिष्टार्थं न ब्रूयात्तदा तिरोहितेऽपि विशिष्टार्थवाचको न भवेत् । इत्यत्र पुण्यराजः[६२]-

इह सामान्यवृत्तिरुच्चरितो देवदत्तशब्दः सामान्यार्थसम्बद्ध एव तिरोभवति। तत्र येन शब्देनाविर्भाव काल एव विशिष्टार्थो न प्रतिलब्धः स शब्दः विशेषेऽवस्थातुं न पुनरुत्सहते । न च सामान्यविशेषयोर्विवक्षा युगपत् सम्भवति । विशेषविवक्षायां हि सर्वस्यानियमेन सामान्यादवच्छेदो विज्ञायते । तत्रोपात्तस्य नित्ये शब्दार्थ- सम्बन्धे कुतस्त्यागः युक्तिनि-

रूपणेषु चार्थात्मस्वाभिधानक्रियायोगाभावे विनिवृत्तोऽनवधार्यमाणात्मा शब्दः शब्दोपक्रमस्यार्थस्याभावादविषयः क्वावस्थाप्यताम् ।

एतेन विज्ञायते यत्सामान्यविशेषयोर्विवक्षा न सम्भवतीति । विशेषस्थोऽपि शब्दः सामान्याद्विच्छिद्यते । उपात्तस्य चात्यागः, यतो हि शब्दार्थसम्बन्धो नित्यः। निष्कर्षतः निवृत्तस्य शब्दस्य शब्दान्तरेण सह शब्दान्तरबोध्यार्थेनावाचकत्वे न कश्चिदवकाशस्तत्र तिष्ठति तस्मादुच्यते 'अशब्दो वाक्यार्थः' तेन शब्दः स्वं रूपं प्रकाश्य तिरोभवति, बुद्धौ संस्कारविशेषञ्च जनयति । एवं यदा पदानि पदार्थमात्रं प्रकाश्य निवर्तन्ते तदा असत्त्वभूतः कश्चन सम्बन्ध उदेति स एव सामान्यार्थान् भेदवान् विदधाति, संस्कारसम्पन्नस्य बुद्ध्यन्तरेण योगो कारयति। इयं [६३] प्रक्रिया तथैवास्ति यथा हर्षशोकादीनां एकस्मादपरस्मिन्संक्रमणं भवति। अशब्दो [६४] वाक्यार्थः, शब्देष्वाप्तरूपमात्रा प्रतिपत्तिहेतुषु तिरोभूतेष्वपदेश्यसंस्कारविशेषायां बुद्धावुपजातायां पदेषु पदार्थमात्रं प्रत्याय्यनिवृत्तेष्व शब्दवाच्योऽसत्त्वभूतः सम्बन्धः संज्ञार्थानां सामान्यरूपाणां भेदहेतुरुपप्लवमानः शोकहर्षादिवदुत्तरेषु बुद्ध्यन्तरेष्वनुसन्धीयते ।

यदि ' अशब्दो वाक्यार्थ' इति स्वीक्रियेत तदा शब्दार्थयोर्मध्ये कश्चन सम्बन्धविचारः निष्फल एव भविष्यति । शब्द एवार्थः अर्थ एव शब्द इति स्वीकारे शब्द एवार्थेषु परिणमते । यो यः शब्दः स सोऽर्थः यो योऽर्थः स स शब्द इति शाब्दिकसिद्धान्तः । वस्तुतः शब्दार्थयोः कश्चन ज्ञानज्ञेय- सम्बन्धः सम्बन्धदृशा वा कश्चन भावो विद्यते इति ।

पूर्वोक्तेन दृष्टान्तेन 'हर्षशोकादिना' एवं वर्णेष्वपि सा प्रवृत्तिर्भविष्यति। यतो वर्णेष्वप्यनर्थकेषु स्वरूपमात्रं बुद्धौ संनिवेश्य निवृत्तेष्वभ्यासान्नियतनिमित्तमनाख्येयोपायमर्थरूपं बुद्ध्यन्तरेष्वनुसन्धीयते। तथा शब्दार्थयोः सम्बन्धो हीयत इति पुण्यराजः [६५]एतेन 'पदार्थो वाक्यार्थः' इत्यपि स्वीकरणीय एव भवति शब्देऽभिधेयतत्त्वस्य विद्यमानत्वात् । यथोक्तं भर्तृहरिणा-

[६६] **विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः ।**
अर्थाभिधानसम्बन्धमुक्तिद्वारं प्रचक्षते ।।
यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते ।
तथाभिसंहितः शब्दो भवत्यर्थस्य वाचकः ।।

इत्यत्र पुण्यराजः -'इहैक [६७] एव शब्दो बह्वर्थः । स यदा वक्त्रा प्रतिनियत एवार्थे विनियुज्यते, तदा तमर्थं प्रकाशयतीति दृष्टम् । अतः शब्दस्यार्थप्रतिपादनयोग्यता उक्तिद्वारैवेत्याहुः' । वैय्याकरणाः शब्दः स्वार्थप्रतिपादनयोग्यतारूपोऽभिधाख्यः सम्बन्ध उक्तिद्वारैव प्रतिनियतस्वार्थविषयकं बोधं जनयतीत्याहुः । तत्र हरिवृत्तिः- कैश्चित् [६८] मन्यन्ते, सामान्येन व्यवस्थितानि पदानि सन्निधीयमानानि यतो विशेषं जनयन्ति सतेषु प्रत्येकं परिसमाप्यते । तस्मात् पदार्थकल्पनया नवो वाक्यार्थो व्यवतिष्ठत इत्यस्मिन् दर्शने इदमुच्यते-योऽसौ पूर्वं निमित्तभूतः पदार्थः, उत्तरपदार्थप्रादुर्भावे विरोधिन्युपजन्यमाने सति निवर्तेत वा सह वा तेन व्यवतिष्ठते'' इति ।

सामान्यरूपनिवृत्त्यैव हि विशेष आत्मानं प्रतिलभते स कथं तेन सहावतिष्ठमानः स्वामर्थक्रियां प्रतिपद्येत । तदप्रतिपत्तौ च विशेष एव न स्यात्। अथवा पूर्वमुपात्तोऽर्थः पश्चात्त्यजते तदा नित्यत्वं सम्बन्धस्य हीयते।

एतस्माज्ज्ञायते पदं पूर्वं सामान्ये ततो विशेषे व्यवस्थितं भवति, इति। यदि पूर्वपूर्वपदस्य तदुत्तरपदोच्चारणवेलायां नाशः स्वीक्रियेत तदा सिद्धान्तविरोधः समुपजायते । तत्रोच्यते एतत्पक्षवादिभिः- योऽसौ पूर्वं निमित्तभूतः पदार्थः स एवोत्तरपदार्थप्रादुर्भाववेलायां विरोधी सन्निवर्तते, अर्थाभावे स कथं विशेषपदं लभेत, पूर्वोपात्तार्थस्य परित्यागेन सम्बन्धस्य नित्यत्वं भजते । तस्मात्प्रत्येकपरिसमाप्तिपक्षः सत्यभूतपदपदार्थो न सम्भाव्यते ।

समुदाये प्रत्येकं परिसमाप्तिरित्यत्र पाणिनेः सूत्रद्वयमुपस्थापयितुं शक्यते। 'अदेङ्गुणः [६९] वृद्धिरादैच [७०] इति सूत्राभ्यां गुणवृद्धिसंज्ञे प्रत्येकं भवतः न तु समुदायस्येति । भाष्येऽपि एतत्समर्थितम्।

समुदायपरिसमाप्तिपक्षे - 'हलोनन्तराः [७१]संयोगः' इति सूत्रमुदाहर्तुं शक्यते । अस्तु तर्हि समुदाये संज्ञा । समुदाये संयोगादिलोपो मस्जेः, पुनरपि ग्रामशब्दोऽयं बह्वर्थ अस्त्येव शालासमुदाये वर्तते 'ग्रामो दग्ध' इति वाटपरिक्षेपे वर्तते । तद्यथा 'ग्रामं प्रविष्ट' इति । उच्यते ग्राम्यसमुदायविषये, यथा-ग्रामो गतो ग्राम आगत इति। अस्ति समीपके, सस्थण्डिलके वर्तते। तद्यथा -ग्रामो लब्ध इति भाष्यम्[७१]।

संयोगसंज्ञा समुदायस्य, न तु अवयवस्येति । संयुज्यन्तेऽत्र वर्णा इत्यस्मात् योगबलात् । अन्यथा-'निर्यायात्' ७२ इत्यादिकस्य ग्लेयादितिवत् अवस्था भविष्यति । संयोगसंज्ञाभावे दोषास्स्युरिति। यथोक्तं विश्वेश्वरसूरिणा- 'इयं [७३] च संज्ञा समुदायस्य नावयवमात्रस्य, संयुज्यन्ते अस्मिन्समुदाये वर्णा इत्यन्वर्थसंज्ञाविज्ञानात् । अन्यथा निर्यायादित्यादौ रेफयकारयोः प्रत्येकं संयोगसंज्ञायां यकारस्यापि संयोगादित्वात्-'वाक्यस्य संयोगादेः', इत्येवं स्यात् ग्लेयादितिवत् । न च सिद्धान्तेऽपि 'अचोरहाभ्यां द्वे' इति द्वित्वेन यकारद्वयसम्पत्तया स्यादेवोक्तदोष इति वाच्यम्। तस्यासिद्धत्वेन संयोगसंज्ञाया अनिष्पत्तेः । समुदायकार्येणावयवानां कार्यसंपत्तेरेव तद्बीजात् ।

अत्र भर्तृहरिः

[७४]एकः साधारणो वाच्यः प्रतिशब्द उपस्थितः ।
संघे संघिषु चार्थात्मा सन्निधाननिदर्शकः ।।

समुदाये वाक्यपरिसमाप्तिरिति पक्षे सङ्घात एवार्थवान् भवति, न चावयवा भवन्ति । यथा संयोगसंज्ञा द्वयोः समुदाययोः भवति तथैव अर्थोऽपिएकस्मिन् द्वयोः समुदाययोः प्रतिष्ठाप्यते । तदर्थः संन्निधाननिदर्शकोऽस्ति ।

मल्लवादिना [७५] भर्तृहरिकृतसमीक्षोपेक्षते द्वादशारनयचक्रे- 'पदसंघातो वाक्यम्'। देवदत्त गामभ्याज शुक्लामि इति प्रत्येकवृत्तिसामान्यविशेषैकत्वान्यत्वानेकार्थो वक्तव्यस्तदर्थ इति दिक् । एवं च कृत्वा यदुक्तं-'सामान्यर्थातिरोभूतः' इति तदपि प्रत्युक्तमेव ।

'देवदत्त गामभ्याज शुक्लामि' त्यत्र सामान्यो विशेषो वार्थः एकत्वेऽनेकत्वे उभयत्वे च विद्यमानत्वादनिर्वचनीयो भवति । एवं हि हरेः 'सामान्यार्थः तिरोभूतः' इति कथनमनुपयुक्तं भविष्यतीति प्रत्यपादि । पुनरपि हरिः कारिकाद्वयमुखेन पदवादं दूषयति-

[७६]पदानि वाक्ये तान्येव वर्णास्ते च पदे पदे ।
वर्णेषु वर्णभागानां भेदः स्यात् परमाणुवत् ।।
भागानामनुपश्लेषान्न वर्णो न पदं भवेत् ।
तेषामव्यपदेश्यत्वात् किमन्यदपदिश्यताम् ।।

वाक्ये दृश्यमानानि पदानि पृथग् भूतानि स्वतन्त्राणि वा भवन्ति। पृथग् [७७] भूताः वर्णाः समुदायेन पदानि भवन्ति । तदानीं जानीमो यद्वर्णव्यतिरिक्तस्य पदस्य वा स्वतन्त्र आत्मा न भवति । भर्तृहरिरत्र स्वीयामन्याकारां मनोदशां प्रकटयति । उपर्युक्तविचारादिभिस्तस्य मतं किमपि भिन्नमेव भवति । वर्णेषु वर्णभागः भेदरूपतां भजते ते च परमाणुवज्जायन्ते । तेन भागानुपश्लेषान्न वर्णः कदापि पदं भविष्यति, उभयत्र सत्ताया अभाव एव तिष्ठति । शब्दः सर्वदाव्यपदेश्यो भविष्यति। एतद्बुद्धाववधार्य हरिः 'यथा सावयावा वर्णा' इत्यादिना संघातपक्षं समर्थितवानिति दृश्यते ।

पुण्यराजः संघातो वाक्यमिति लक्षणमभिहितान्वयवादानुकूलं स्वीकार। कुमारिलेनापि संघातपक्षः समीक्षितः । सुचरितमिश्रपार्थसारथिमिश्रप्रभृतिभिरपि पक्षोऽयमनुमोदितः । कुमारिलमतेन पदेषु परस्परानुग्रहस्याभावे न तद्वाक्यं भविष्यति, यथोक्तं श्लोकवार्तिके-

[७८]एवमाद्यन्तसर्वेषां पृथक संघातकल्पने ।
अन्योन्यानुग्रहाभावात् पदानां नास्ति वाक्यता ।।

'पदसंघातो न वाक्यमिति मीमासकोक्तं वैय्याकरणैरुपर्युक्तानेकयुक्तिभिः निरस्यते ।

३. संघातवर्तिनी जातिः-

'संघातवर्तिनी जातिर्वाक्यम्' [७९] इत्यनेनाशयस्तु सुप्तिङन्तपदसंघातवर्तिनी जातिर्वाक्यमिति तदर्थः । तत्र देवदत्त गामभ्याज दण्डेनेति वाक्ये पदसंघातरूपेऽस्मिन्नस्ति कश्चन जातिविशेषो येन प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं च भिद्यमानेऽपि तस्मिन् एकत्वप्रत्यभिज्ञा भवति । तत्र प्रतिपुरुषं प्रत्युच्चारणं प्रतिक्षणं च भिद्यमाने पदसंघाते वाचकत्वं न संभवति, शक्तेरानन्त्यव्यभिचारदोष- प्रसङ्गात् । अतः पदसंघातगतायाः जातेरेकस्या एव वाचकत्वमिति, तस्या एव वाक्यत्वमिति सिद्धम् ।

[८०] यथाक्षेपविशेषेऽपि कर्मभेदो न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ।।
वर्णवाक्यपदेष्वेवं तुल्योपव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तत्त्वस्य सरूपैव प्रतीयते ।।

भ्रमणादिना जातेः वाचकत्वं तस्या एवं वाक्यत्वं च सुस्थापितम्। यथा केषाञ्चिन्मतेन शब्दजातिरेव वाक्यम्, तत्र वाक्यं शब्दः, स च जातिनिबन्धनो भवति । शब्दाकृतिवाद एव जातिवाक्यवादत्वेन ज्ञाप्यते। पुण्यराजोऽपि [८१] शब्दाकृतिर्वाक्यं जातिस्फोटं स्वीचकार-

'शब्दजातेरेव [८२] वाक्यत्वे भ्रमणत्वादयो दृष्टान्तत्वेनोपन्यस्ताः । अपचितध्वनिव्यंग्यस्तावदेको वर्णः । तस्याभिव्यक्तिनिमित्तैः सदृशैरन्यैश्च श्रुतिभिन्नैरेकं निरवयवं च पदं व्यज्यते तुल्यातुल्यैः प्रचिततमैर्वाक्यमिति'।

पुण्यराजेनापि [८३] 'भ्रमणत्वादयः' इत्यादिनैव शब्दाकृतिवादस्य जातिर्वाक्यमित्यस्य वैकः पक्षः समाद्रियते । भ्रमणदृष्टान्तेनैवायं पक्ष उपपाद्यते।

भ्रमणं हि आक्षेपविशेषो भवति, तच्च भेदयुक्तमपि जातौ एकत्वमेव स्थापयति । भ्रमणे कम्पनरेचनोत्क्षेपादिभ्यो यो भेदः न स गृह्यते । अयमाशयः पुण्यराजेन स्फुटीकृतः-

'आक्षेपविशेषाद्धि स्वजातिप्रयुक्ते भिन्नात्मनि प्रतिभेदं विनिविष्टस्वजातिविशेषे भ्रमणादौ कर्मणि कम्पनरेचनोत्क्षेपणादिभ्यो यो भेदः स न गृह्यते । आवृत्तौ तु दिग्विशेषावधिसंयोगविभागोपाधिकायामुपलब्धायामनुपलब्धापूर्वाव्यक्तोपलब्धा वा भ्रमणरेचनाख्या जातिरुपलब्धृणां स्वनिमित्तप्रत्ययहेतुः सम्पद्यते । तथैव यावत् सदृशानि जात्युपव्यञ्जनानि तावदत्यन्तभिन्नोऽप्यर्थः सर्व एव सारूप्येण गृह्यते। यथा भ्रमणादिना कर्मणामुत्क्षेपणादिकर्मभ्यो भेदो न भवति, भूयोभूयः पादक्षेपेण एका क्रिया समाप्यतेऽपरा च प्रारभ्यत परन्तु न सा समीपस्थेन केनचित्पुरुषेण विज्ञायते । प्रत्येकपदक्षेपरूपभ्रमणक्रियाजातौ व्यज्यते, एवमेव वर्णपदवाक्येषु स्वरूपाणां पारस्परिकमत्यन्तभेदेऽपि असादृश्येऽपि सा सदृशीव जातिः प्रतीयते ।

ननु का नामेयं जातिः? इति प्रश्ने या स्फोटत्वेनोपवर्ण्यते । यद्यनुगतप्रतीतिविषयत्वम् यथा अयं घटः' इत्यनुगतप्रतीतिविषयत्वात् घटत्वं जातिः, तदा घटशब्दानुगतप्रतीतिविषया सेति । तदुक्तं हरिणा[८४]

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ।।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।।

नागेशः[८५] स्फोटवादे - आकृत्यधिकरणन्यायेनावश्यकत्वाच्च शक्या जातिरिवशक्तावपि सैव । 'इदं घटपदम् इदं घटपदम्, इयं प्रकृतिः, इयं प्रकृतिः, अयं प्रत्ययः, अयं प्रत्ययः, इदं घटमानयेति, इदं घटमानयेति वाक्यम् इत्येकाकारप्रतीत्या घटपदज्ञानत्वादिना कारणत्वे कारणतावच्छेदककोटिप्रविष्टतया च जातिविशेषस्यावश्यकत्वात् ।

यदि व्यक्तिशक्तिः स्वीक्रियते तदा अनेकासु व्यक्तिषु शक्तिः कल्पनीया, अतः जातिशक्तिस्वीकारेण लाघवं भवति, यतो हि जातिरेकैव भवति, इयमेव युक्तिरभिमता वर्तते अनेकशब्दानां वाचकत्वापेक्षया जातेर्वाचकत्वस्वीकारे लाघवम्। तदुक्तं हरिणापि-

[८६]अनेकव्यक्त्यभिव्यङ्गया जातिः स्फोट इति स्मृता ।
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।।

सा जातिर्ज्ञातैव वाचिका, न तु स्वरूपसतीत्यर्थः।

[८७]विषयत्वमनापन्नैः शब्दैर्नार्थः प्रतीयते ।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ।।
अतोऽनिर्ज्ञातरूपत्वात्किमाहेत्यभिधीयते ।
नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा ।।

तदेवं जातिः सर्वातिशायि गौरवाधायकं पदं धत्ते । भर्तृहरिणा वाक्यपदीयस्य तृतीयकाण्डस्य जातिसमुद्देशे बहुधा विचारितैषा । तत्र पूर्वजातिपरकसिद्धान्तानां समीचीनैका समीक्षा दृष्टिपथमायाति। शब्दजातिः सत्ताजातिश्चेति द्वे वैय्याकरणैः समाद्रियेते ।

शब्दजातिः- कैश्चित् शब्दस्य वाच्यं, शब्दस्य स्वरूपम्भवति 'स्वरूपमेव च जातिपदेन कथ्यते, सैव शब्दजातिपदेन व्यवह्रियते इत्यभ्युपगम्यते । यथा गोशब्देन वाच्या, गोशब्दे च स्थिता गोशब्दत्वजातिः, न तु सा गोत्वे दृश्यते[८८]। शब्दः स्वजातावेव स्वं रूपं संनिविशते, तद्वदेव शब्दः अव्यपदेशस्य व्यक्तेः प्रत्याय्यो भवति । सर्वे शब्दाः जात्याः अभिधानं कुर्वन्ति । तदेवं स्वजातिरेव शब्दानां असाधारणरूपमस्ति[८९]।

सत्ताजातिः-

महाभाष्ये - 'स[९०] तत्र बुद्ध्या नित्यां सत्तामध्यवस्यति, " न सत्तां पदार्थो व्यभिचरति' एवंभूतानि वाक्यानि दृश्यन्ते । महाभाष्यतः बीजरूपेण संम्प्राप्तः भर्तृहरिणा विस्तरेण प्रकाशतां नीतोऽयं वादः । सत्ता हि भिन्नभिन्नपदार्थेभ्यः भिन्ना सती सम्बन्धिभेदाधारेण जातिः कथ्यते । नान्या काचिज्जातिरिति भावः। अश्वस्य सत्ता अश्वत्वे, गोःगोत्वे, डित्थस्य डित्थत्वे एव सत्ता नान्यात्र। सर्वे शब्दाः सत्तामात्रवाचकाः । सत्ता जातिः सैव महासामान्या महासत्ता[९१] च वर्तते। 'प्रातिपदिकार्थःसत्तात्वत्तलप्रत्यययोगेन पाणिनिना निर्दिष्टा ।

[९२] अत्र महाभाष्यकारमतम्

१-जननेन या प्राप्यते सा जातिः

२-आकृतिग्रहणाज्जातिलिङ्गानाञ्च न सर्वभाक्।
सकृदाख्यातनिग्राह्य गोत्रञ्च चरणैः सह।।

३-प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः।
असर्वलिङ्गां बह्वर्थां तां जाति कवयो विदुः।।

४ यत्तर्हि तद् भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं समान्यभूतं स शब्दः । नेत्याह । आकृतिर्नाम सा ।

प्रथमं लक्षणं शब्दव्युत्पत्तिमूलकम्, द्वितीयं लक्षणं आकृतिसम्बद्धम्, तृतीयं आविर्भावेन, चतुर्थं सामान्यरूपेण, भिन्नेष्वभिन्नम् इत्यत्रैकत्वं दृश्यते, छिन्नेष्वच्छिन्नम् इत्यनेन जातिनित्यत्वं कथितमिति ।

४ एकोऽनवयवः शब्दः-

एकोऽनवयवः शब्दः वाक्यमिति तात्पर्य्यम् । यत्र वाक्यं वाक्यस्फोटो वाखण्ड एव भवति । अस्मिन्वर्णाः पदानि - अपोद्धारकल्पनायामपि निष्कर्षतः पदे वर्णाः; वर्णेष्ववयवाः, वाक्ये पदानि च न भवन्ति ।

तत्र हरिः-

[९३] **चित्रस्यैकरूपस्य यथा भेदनिदर्शनैः ।**
नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः ।।
तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः ।
शब्दान्तरैः समाख्यानं साकांक्षैरनुगम्यते ।।

निरवयवं वाक्यमेकमेव भवति । तत्र वर्णपदादीनां कल्पना 'अपोद्धारपदार्थाः ये' इति कारिकानिर्देशेन क्रियते, परन्तु वाक्ये पदादीनि न सन्ति । वाक्यं तु मूलतोऽनवच्छिन्नं परिपूर्णञ्च भवति । तस्य निरवयवत्वमखण्डत्वं च शाब्दिकैः पानकरसमयूराण्डर सचित्ररूपनरसिंहगवय-शरीरचित्रज्ञानानां दृष्टान्तमुखेन प्रतिपाद्यते । यथा चित्रज्ञानं पूर्णं सर्वाकारमेकरूपेण भवति, तत्रांशभेदज्ञानं सूक्ष्मप्रविभागमाध्यमेन जायते । यन्नीलपीतप्रभृतिरूपज्ञानं तत्र समुपजायते, वस्तुतः तत्तथा न वाक्यस्य वाक्यार्थस्य वा निरवयवत्वमेकत्वञ्चाधिकृत्य स्वरूपं ज्ञातव्यमिति । वाक्यं निराकांक्षमव्यवरहितञ्च स्थितम् यथा चित्रस्यैकरूपस्य भिन्नदर्शनैः भिन्नलक्षणैःनीलादिभिः समाख्यानं क्रियते तथैवेकस्य वाक्यस्य सर्वतः निराकांक्षस्य शब्दान्तरैः वर्णपद- प्रकृति- प्रत्ययादिभिः साकाङ्क्षभूतैः समाख्यानमनुगम्यत इति । वस्तुतः अयमेव वाक्यपदीयकारस्याशयः । वाक्यं भागरहितं निर्भागरूपञ्चास्ति तन्मते अपोद्धाराः के सन्तीति-

[९४] **अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।**
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः ।।
धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु ।।
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः ।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ।।

अपोद्धारपदार्थाः- पदार्थादपोध्रियन्ते विभज्यन्ते ते अपोद्धाराः, पद्यते बोध्यतेऽर्थोऽनेनेति पदं प्रकृतिः प्रत्ययश्च न 'सुप्तिङन्तं पदम्' इत्यादिरूपेण पारिभाषिकम्भवति, तस्यार्थाः अपोद्धाराश्च ते पदार्थाः आपोद्धारपदार्थाः प्रकृतिप्रत्ययार्थरूपाः ।

[९५] **भावप्रदीपे :-**

'तत्र ये प्रतिपादकाः प्रकृतिप्रत्ययरूपाः, ये च अन्वाख्येयाः, पदवाक्यरूपाश्च शब्दा ये अपोद्धारपदार्थाः प्रकृतिप्रत्ययार्थाः ये च स्थितलक्षणा पदवाक्यार्थरूपाश्चार्थाः ते द्विविधा अपि शब्दा अर्थाश्च कार्यकारणभावेन योग्यभावेन तादात्म्येन च स्थिताः साधवः यस्य शब्दस्य येनार्थेन कार्यकारणभावः तादात्म्यं च वर्तते तस्मिन्नर्थे स साधुरिति यावत्'।

'सरूपाणामेकशेष एकविभक्तौ', इत्यत्र न वा पदस्यार्थे प्रयोगात्' इति वार्तिकनिर्देशेन न प्रातिपदिकानि लोके प्रयुज्यन्ते शास्त्रेऽपि प्रकृत्याद्युपदेशेनानुमेयत्वात्प्रातिपदिकानां प्रयोगाभावः । 'हरितस्य स्त्री [९६] हरिणी, एवं हरिणस्यापि, हरिणी च हरिणी च हरिण्यावित्येकशेषानुपपत्तेश्च। प्रातिपदिकावस्थायां वैरूप्यात्। एवं श्येण्यौ रोहिण्यावित्यपि । यद्यपि हरितशब्दात्पुंयोगे ङीषा हरितीति रूपं तथापि हरितशब्दस्य स्त्री हरिणी स्त्री प्रत्ययान्ते हरितशब्द इति यावदिति कैय्यटः। प्रातिपदिकग्रहणस्य विच्छिन्नत्वाच्च प्रातिपदिकानां लोके प्रयोगाभावात्सारूप्यस्य पदान्तर्भाविणैव ग्रहणात् तदुक्तं न वा पदस्यार्थे प्रयोगादिति । अयमेवाशयः हरिणाप्युक्तः-

[९७]**यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः ।**
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते ।।

तत्र पुण्यराजः [९८] न वा पदस्यार्थे प्रयोगादित्यस्मिन्दर्शने यथाखण्डमेव पदं प्रकृतिप्रत्ययादिभिः कल्पितैरेव विभज्यते तथा वाक्येऽप्यसत्यभूतानामबु-बोधनाय विभागो द्रष्टव्य इति' ।

कारिकाव्याख्यानावसरे पुनरप्याह - पदे [९९] हि यथा प्रकृतिप्रत्ययविभागोऽसत्य एव बालव्युत्पादनाय क्रियते तथा वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपवर्ण्यत इति ।

[१००] अखण्डे निर्भागे च पदे बालबोधनाय यथा प्रकृतिप्रत्ययादयः विभज्य प्रदर्श्यन्ते तथैव वाक्येऽपि पदानीति । यतो हि प्रकृतिप्रत्ययादयः पदे सर्वथा काल्पनिकास्सन्ति । तदुक्तं नागेशेनापि [१०१] – 'तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवाद् वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान्प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्तिस्माचार्याः ।

वाक्ये पदानि, पदे च प्रकृतिप्रत्ययभागं परिकल्प्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थाः कल्पिता इति भावः ।

वाक्ये वर्णाविभासः पदावभासश्च प्रतिपत्तुरशक्तिरेव । तौ हि केवलं वाक्यग्रहणोपायभूतौ भवतः । यथा शतादिसंख्याः । यथा एकसंख्यायाः ज्ञानं शतसंख्याज्ञाने सहायकं, तथैव वाक्यज्ञाने असत्यभूतवर्णानां पदानाञ्च प्रतीतिरिति भावः । वाक्यस्फोटमात्रमधिकृत्य हरिणोक्तं सङ्गच्छते–

[१०२]यथाद्यसंख्याग्रहणमुपायः प्रतिपत्तये ।
संख्यान्तराणां भेदोऽपि तथा शब्दान्तरश्रुतिः ।।

अनवयवे वाक्येऽभिव्यज्यमाने, वाक्याभिव्यक्तिहेतुभिः प्रथमं भागावग्रहरूपेण बुद्धिर्जायते, ततोऽसज्ज्ञानात्सज्ज्ञानं समुपजायते। तदुक्तम्–

[१०३]व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भागावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ।। इति ।

अखण्डवाक्येऽभिव्यक्तिहेतवः काल्पनिका एव भवन्ति । मीमांसकमतेनापि समुदितवर्णरूपेषु पदेषु ध्वनिक्रमेण एव रूपभेदः नदीदीनादौ न तु वर्णक्रमेण तन्मतेन नित्यानां विभूनां च वर्णानां कालतः देशतो वा पौर्वापर्यविरहो भवति यतः तथैवाखण्डानवयववाक्येऽपि वर्णपदकल्पना उपाया एव भवन्ति–

[१०४]भागवत्स्वपि तेष्वेव रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वभ्युपायो वा भागभेदप्रकल्पनम् ।।

अपि चाखण्डानवयवं वाक्यमेव वाचकम्, वर्णपदादिरूपभेदाः काल्पनिका एव दृश्यन्ते ।

[१०५]ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ।।

यथा ब्राह्मणकम्बलम्, इत्यत्र् ब्राह्मणशब्दस्य विच्छेदोच्चारणे न कश्दिर्थो भवति तथैव 'देवदत्त गामम्याजे' त्यादौ देवदत्तस्य पृथग्भूतस्य नास्ति कोऽप्यर्थः । अनेन प्रतीयते यत्पदान्यसत्यभूतानि भवन्ति । एतेन सुस्थितम्यदखण्डं निराकांक्षमेकपद- व्यतिरिक्तं वाक्यं पदार्थव्यतिरिक्तो वाक्यार्थश्च भवति । वाक्यवद्वाक्यार्थस्यापि निर्विभागत्वं स्थितम् ।

शाब्दिकाः (व्यक्तिस्फोटवादिनः) वाक्यं निरंशमखण्डमवयवरहितं च ब्रुवन्ति । तत्र भेदाभासः मात्रात्मकोपाधिवशात् भवति । अत एवाक्रममपि क्रमप्रधानं दृश्यते । एवञ्च शतैः, उच्चैः, उपांशु, परमोपांशु, संहृतक्रमं, द्रुतं, मध्यमं, बिलम्बितं चैतत्सर्वं ज्ञानमुपाधिवशादेवानुभूयते । तदुक्तम्-

[१०६]अव्यक्तः क्रमवाञ्शब्दः उपांश्वयमधीयते ।
अक्रमस्तु वितत्येव बुद्धिर्यत्रावतिष्ठते ।।

उपाधिकृतभेदाः न समया इति बोद्धव्याः पुण्यराजस्तत्राह- 'इह निरंश एवाभिन्नो व्यक्तिस्फोटो जातिस्फोटो वा बहीरूप आन्तरशब्दार्थमयो वा बुद्ध्यनुसंहारो वाक्यमिति स एव वाचक उपपन्नं यस्तु भेदप्रतिभासोऽसावुपाधिकृत एवेत्यर्थः । तथोपांशु परमोपांशु व्यक्तः व्यक्ततरश्च बिलम्बितो बिलम्बिततरश्च द्रुतो द्रुततरश्चेत्यादिकाः प्रतिभासा अभिव्यञ्जकध्वनिकृता न पुनः सत्या इति, ।

वस्तुतोऽसावक्रम एवोपाधिवशात् कल्पितांशभेदे हि प्रत्यंशबुद्धिः (प्रतिभा) बृद्धिमुपगच्छति । विस्तारं लब्ध्वैव क्रमावस्थां प्राप्नोति, यथोक्तं पुण्यराजेन [१०७] परमार्थस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः, उपाधिवशात्तु तत्र बुद्धिर्वितत्येवानुगम्यत इति बोद्धव्यम् । अनेनैकोऽनवयवः शब्द इत्युद्दिष्टस्य व्यक्तिस्फोटस्य स्वरूपमुक्तमिति ज्ञेयम् ।

यथा वाक्ये पदाभावस्तथैव वाक्यार्थे पदार्थाभावः दृश्यते, यथोक्तम्-

[१०८]ब्राह्मणार्थे यथा नास्ति कश्चित् ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ।।

समस्तस्य ब्राह्मणकम्बलेति वाक्यस्यैकोऽर्थोऽस्ति परन्तु ब्राह्मणकम्बले पदे केवलब्राह्मणशब्दस्य न कश्चिदर्थो भवति, तथैव देवदत्त गामभ्याज शुक्लां दण्डेन इत्यत्र देवदत्तस्य केवलपदस्य न हि कश्चिदर्थोऽनुगम्यते, तस्मात्पदान्यसत्यानि एव भवन्ति । एतेन वाक्यं निराकाङ्क्षमेकमखण्डं पदव्यतिरिक्तम्, वाक्यार्थश्च पदार्थव्यतिरिक्तः भविष्यति ।

अखण्डवाक्यवादिनां मतत्रयमुपस्थाप्यते-

१- वाक्यमेकमखण्डञ्च भवति ।

२- पदसंघातवर्तिनी जातिर्वाक्यमुच्यते ।

३- बुद्धिगतसंहृतिर्वाक्यमुच्यते ।

एतेषां भिन्नता प्रतिभाभेदवशाद् भवति । प्रथमद्वितीयलक्षणयोः वाक्यं बाह्यसत्तायुक्तम्, तृतीये तु बुद्ध्यनुसंहृतम्भवति [१०९] ।

यथा भवनं (द्रव्यं) अनवयवम् तथैव वाक्यमपि प्रोक्तं मल्लवादिना [११०] यतो हि वाक्यस्यानवयवत्वं द्रव्याधारेणैवोच्यत इत्याशयः।

'एकोऽनवयवः शब्दो वाक्यार्थः । भवनस्यानवयवत्वात् । इह तु द्रवति भवतीति द्रव्यं भवनं भावः ।

सूरिणा वादिदेवेन वाक्यस्यानवयवत्वं ओङ्कारशब्देन परिकल्पयते।

यथोक्तम्-

'अन्ये तु ओङ्कारोऽनवयवः[१११] शब्दपरिकल्पितपदविभागो वाक्यमित्याहुः'। इत्यत्र स्पष्टम् यदोङ्कार एवानवयवः शब्दो वाक्यञ्च, वर्णपदभागकल्पितं (निर्विभागं) इति यावत् । यथा मायारूपस्य मिथ्याप्रतीतिः तथैव निरवयववाक्ये वर्णपदादीनामिति वाचस्पतिमिश्रेण प्रतिपादितम्- अनवयवमेववाक्यम् [११२] अनाद्यविद्योपदर्शितालीकवर्णपदाविभागमस्याः निमित्तमिति केचित् ।

निरवयववाक्यवादस्य स्वीकारे कैश्चिद्दार्शनिकैरसहमतिः प्रदर्श्यते। अनवयववाक्यप्रसङ्गं तस्य दर्शनान्तरप्रसङ्गेन विचारो युक्तिसंगत एव भविष्यति, तत्र धर्मकीर्ति [११३] मण्डनमिश्रकर्णगोमिजयन्तभट्टकुमारिल-भट्टप्रभृतिविदुषां विचारसमन्वयेन शाब्दिकानां निरवयवं वाक्यमधिकं सुस्थिरं

भवति । एतस्य तुलनात्मको विचारः श्री रामसुरेशत्रिपाठिना [११४] सविस्तरं प्रतिपादितः । इत्थं समीक्षितवान्ननवयवं वाक्यम् तत्र धर्मकीर्तिमतम् - 'एकत्वेऽपि [११५] ह्यभिन्नस्य क्रमशो गत्यसंभवात्' व्याख्या कालभेद एव न युज्यते । नह्येकस्य क्रमेण प्रतिपत्तिः युक्ता । गृहीतागृहीतयोरभेदात् गृहीतागृहीताभावात्क्रमेण च वाक्यप्रतिपत्तिः दृष्टासर्ववाक्यव्यवहारश्रवणकालस्यानेकक्षणनिमेषानुक्रमपरिसमाप्तेः । वर्णरूपसंस्पर्शितश्चैक बुद्धिप्रतिभासितः शब्दात्मनोऽप्रतिभासनात् ।

वर्णानुक्रमप्रतीतेः तदविशेषेऽप्यनुक्रमकृतत्वाद् वाक्यभेदस्यानुक्रमवती वाक्यप्रतीतिः वर्णानुक्रमोपकारानपेक्षणैः तैः यथाकथञ्चित् प्रयुक्तैरपि यत् किञ्चिद्वाक्यं प्रतीयेत । विना वा वर्णैः तैरनुक्रमविद्भिः अक्रमस्योपकारयोगात्। अक्रमेण च व्याहर्तुमशक्यत्वात् गत्यन्तराभावाच्च। नैव वाक्ये वर्णाः सन्ति। तदक्रममेव शब्दरूपं व्यञ्जकानुक्रमवशादनुक्रमवद्वर्ण विभागवच्च प्रतिभातीति चेदनुक्रमवता व्यञ्जकेनाक्रमस्य व्यक्तिः प्रयुक्ता व्यक्ताव्यक्तविरोधात्। अवर्णभागे च वाक्येऽसकलश्राविणोऽसकल वाक्यगतिर्न स्यात् एकस्य सकलाभावात् । सकलश्रुतिर्न वा कस्यचिदिति।

तस्याशयः- वाक्यस्यानवयवत्वे हि क्रमो न लभ्यते, न च कालभेदोऽवलोक्यते, एकस्य वस्तुनः क्रमप्रतिपत्तिरपि न भवति, वाक्यज्ञाने क्रमोऽपेक्षते, परन्तु गृहीतस्यागृहीतस्य च भेदात्तत्र युक्तमिति । वाक्ये सर्वत्र श्रवणं, स्मरणं कालस्यानेकक्षणनिमेषानुक्रमः परिसमाप्तावावश्यं भवति । वर्णानुक्रमस्य प्रतीतिरपि जायते। एतस्याभावे वाक्यज्ञानमपि न भवेदिति। तत्र व्यक्तस्याव्यक्तस्य च परस्परविरोधे अक्रमस्य नाभिव्यक्तिर्भवति । क्वचिदपूर्णवाक्यश्रवणेन पूर्णवाक्यज्ञानं भविष्यति । एतान् आरोपान्लक्ष्यीकृत्य मण्डनमिश्रेण निरवयववाक्यवाद एव स्थिरीकृतः । धर्मकीर्तेः समाधानं कतिपययुक्तिभिः तैः कृतम् । यथा ।

'एकत्वेऽपि ' [११५]अ क्रमशो गतिरनुपाख्येयोपाख्येयाकारप्रयत्नभेदेन पुरस्तात् प्रपञ्चिता व्यञ्जकसादृश्यात्तु शब्दान्तरग्रहणाभिमानः, तेन नाश्रवणं सकलश्रवणं वेति' ।

मण्डनमिश्रमतेन - वाक्यस्य प्रतिपत्तिः वर्णक्रमेणानुपाख्येयाकारोपाख्येयाकारयोर्भेदेन सम्भवति अनुपाख्येयं ज्ञानं तु 'इदं तत् इति बुद्धया निश्चतं न गृह्यते । उपाख्येयं तु बुद्धया निश्चितरूपेण गृह्यत इति। एतेन वाक्यस्याखण्डत्वे यद्यपि क्रमप्रतीतिर्जायते तथापि अनुपाख्येयोपाख्येयबुद्धिभ्यां तन्निवारयितुं शक्यते अतो हि अनवयवत्वे वर्णपदप्रतीतिरपि निवारयितुं शक्नुयात् ।

अवर्णपक्षे - व्यञ्जकध्वनिसादृश्यात् केवलं वर्णपदानामवभासः, परन्तु वाक्यमेकमखण्डञ्चास्ति । तत्राश्रवणस्य सकलश्रवणस्य वा प्रश्न एव न समुदेति । इदमेव लक्ष्यीकृत्य[११६] स्फोटसिद्धिग्रन्थस्य टीकाकार ऋषिपुत्रः (द्वितीयः) वाक्ये भागप्रतीतिरश्रवणसकलश्रवणमात्रेण भवतीति न स्वीचकार, स तु धर्मकीर्तेरिदं मतमसङ्गतमिति कथयामास-

'तेन[११७] कारणेन परमार्थाभागपक्षेऽपि भागशो ग्रहणमुपपद्यत एव, न पुनरश्रवणं वा सकलश्रवणं वापद्येतेति ।

सकलासकलश्रवणलक्षणेन कर्णकगोमी अपि विरुद्ध एव दृश्यत। स आह सकलासकलवर्णभागस्य समयेऽखण्डवाक्यप्रतीतिरेव नोपपद्यते, वाक्यग्रहणे वर्णग्रहणमपि नोचितमिति- यथा तेन यदुच्यते मण्डनेन व्यञ्जकसादृश्याच्च वाक्ये तदात्मग्रहणाभिमानः तेन नाश्रवणं सकलश्रवणं वेति तदापास्तम् । सकलासकलवर्णभागप्रतिपत्तिकाले निष्कलस्य वाक्यस्याश्रवणात् । न हि व्यंग्यव्यञ्जकयोः सादृश्यं वर्णावर्णात्मकत्वेन विसदृशत्वात्। तत् कथं वाक्ये वर्णात्मग्रहणाभिमान इति यत् किञ्चिदेतदिति।

[११८] यथोक्तं रामसुरेशत्रिपाठिना- कर्णकगोमिना[११९] मण्डनमिश्रोक्तं नानुमन्यते, तन्मते सकलासकलवर्णभागस्य ज्ञानकालेऽखण्डस्य वाक्यस्याश्रवणमेव जायते, अपरञ्च वाक्यग्रहणावसरे वर्णग्रहणप्रसङ्गोऽप्युक्ततरोस्ति । वर्णात्मकावर्णात्मकयोः सादृश्यमपि नाङ्गीक्रियते, अतो व्यंग्यव्यञ्जकयोरपि न सादृश्यं भवितुं शक्नोति ।

जयन्तभट्टोऽपि न्यायमञ्जर्याम् वाक्यस्यानवयत्वं विरोधयामास[१२०] 'वाक्यं सावयवमि'ति स ब्रूते । वाक्ये- वर्णपदप्रतीतिस्तु न भ्रान्तिमूला, अपितु वाक्ये वर्णपदानुगमो भवत्येवेति स्वीचकार । वाक्यस्य निरवयवत्वे

चित्रपानकरसनरसिंहादिदृष्टान्तानपि स नाङ्गीकरोति । तन्मतेन नरसिंह इत्यत्रापि नरावयवानां सिंहावयवानां ज्ञानम् । एवं वाक्येऽपि अवयवभूतानां वर्णपदादीनां पूर्वं पृथक् पृथक् प्रतीतिः ततः समुदितस्य वाक्यस्य ज्ञानम्, अतो हि वाक्यं सावयवमिति स कथयामास ।

एतत्सर्वमपि मनसि निधाय समीचीनतया मीमांसापरम्परायां पार्थसारथिरेव[१२१] न्यूनाधिकरूपेण एकोनवयवः शब्दो वाक्यमिति शाब्दिकलक्षणं स्वीयमतेन ईषद्भेदेन समर्थितवान्केचन वर्णपदातिरिक्तबहिर्भूतवाक्याभावात् वाक्याकारबुद्धिरेव वाक्यार्थो न बाह्यः । पदार्थातिरेकेनानतिरेकेण वा निरूपणसम्भवात् इत्यादिनेति।

इत्यत्र 'वाक्याकारा बुद्धिरेव' वाक्यम्, तत्र बुद्धि पदेन आभ्यान्तरः पक्षः समुद्घाट्यते । यथा स्फोटस्य आभ्यन्तरबाह्यौ द्वौ पक्षौ भवतः तथैव वाक्यस्यापि (वाक्यस्फोटस्यापि) एतौ सम्भवतः । एतन्मतेन वाक्यस्य बाह्यसत्ताभावात् पूर्वं वाक्याकारां वाक्यस्य बाह्यसत्तामपि आम्नन्ति । वर्णपदादीनां बहिर्भूतसत्ताभावात् पूर्वं वाक्याकारा बुद्धिरेव वाक्यं भवति, ततः द्रव्य-गुण-क्रिया-संसर्गादीनामवगमेनोत्पद्य माना बुद्धिरेव वाक्यार्थो भवति । वाक्यार्थो बाह्यभूतो न भवति, यतो हि पदार्थानाम् अधिकानधिकरूपेण निरूपणं कदापि न सम्भाव्यते ।

पार्थसारथिः स्वीयव्याख्यायां केचित् पदेन कदाचिद्वैयाकरणसिद्धान्तमेव इङ्गयति इति अनुमातुं शक्यते । यतो हि पार्थसारथेः मतं वैय्याकरणानामतिनिकटस्थं प्रतीयते । अनवयवत्वे स बाह्यां सत्तां वाक्यस्य नाङ्गीचकार शाब्दिकास्तु वाक्यस्य बाह्यसत्तां ब्रुवन्ति । रामसुरेशत्रिपाठी लिखति [१२२]

'वाक्याकारा बुद्धिरेव वाक्यम् एकोनवयवः शब्दो वाक्यमि' त्युभयत्र ईषद्भेद एव प्रतीयते, केवलं पूर्वोक्तेन वाक्यस्य नास्ति बाह्यसत्ता, परोक्तेन च वाक्यस्य बाह्यसत्ता भवति ।

कुमारिलभट्टोपि [१२३]स्वीये ग्रन्थे वाक्याधिकरणं निरवयवादं समर्थन्नाह-

तेष्वेव च पदार्थेषु प्रक्लृप्तस्तोकशक्तिषु ।
आवापोद्वापरचनाभेदाद् वाक्येष्वनन्तता ।।
स्तोकशक्त्युपपन्नेर्थे बहुशक्त्यप्रमाणता ।
वाक्यतच्छक्त्यनन्तत्वे नार्थापत्तिस्ततो भवेत् ।।

अखण्डं [१२४] वाक्यं यदि वाक्यार्थस्य वाचकं स्वीक्रियेत तदा कल्पनागतं गौरवं सेत्स्यति, यतो हि- एकवाक्यार्थबोधस्य कारणतापदानामावापोद्वापरचना वशादनेक वाक्येषु गमिष्यति । यथादेवदत्तकर्तृकतण्डुलकर्मकपाकरूपवाक्यार्थस्य ज्ञानमनेक वाक्यैः शक्यते कर्तुम् । १ तण्डुलान् देवदत्तः पचति २- देवदत्तःतण्डुलान् पचति । ३- पचति तण्डुलान् देवदत्तः । उपर्युक्तवाक्येषु कथितशाब्द-बोधोऽखण्डवाक्यैः भवति, एवं सर्वाणि वाक्यानि अखण्डानि भवन्ति, एतेष्वखण्डवाक्येषु एकस्यैव वाक्यार्थबोधस्यानेकानेकशक्तयः स्वीक्रियेरन्। पुनरपि अनन्तवाक्येषु एकाखण्डनिष्ठशक्तिमन्तरानुपपन्न एव भवति । अतो हि अखण्डवाक्येषु वाक्यार्थबोधजनकशक्तिकल्पनं गौरवास्पदमप्रमाणिकञ्च भविष्यति ।

वैय्याकरणाः वाक्यमनवयवं निर्भागमखण्डं च वदन्ति, तत्र वर्णपदादीनामवगमः अखण्डवाक्येषु चैकवाक्यार्थबुद्धिजनकतायाः प्रत्यभिज्ञानमपि च स्वीचक्रुः। वाक्यगतध्वनिषु सादृश्यमपि साधयन्ति । यथा देवदत्तः तण्डुलान् पचति इत्यस्याभिव्यञ्जकध्वनयः तण्डुलान् देवदत्तः पचति इत्यस्याभिव्यञ्जकध्वनिसदृशाः भवन्ति । एतत्सर्वं नरसिंहरूपकमूलेन स्पष्टम्।

निष्कर्षतः पार्थसारथिमिश्रः प्रोवाच-वैय्याकरणैः [१२५] निरवयवत्वेऽपि वाक्यानामवयवप्रतिभासे अवयवप्रत्यभिज्ञायां च सादृश्यं कारणमुक्तम् ध्वनयः सदृशात्मानो विपर्यासस्य कारणमिति। नानाजातीयानेकध्वनिव्यग्यं हि वाक्यम्। तेन च ध्वनयः प्रत्येकं वाक्यान्तरव्यंजकध्वनिसदृशा निर्भागस्यापि वाक्यस्य तत्तद्वाक्यसादृश्यम् । नरसिंहस्यैव केनचिद् भागेन नरसादृश्यं केनचिच्च सिंहसादृश्यं भागशः सम्पादयन्तः सादृश्योपाधिभेदावयवभेदमिव वाक्ये दर्शयन्ति । ध्वनिसादृश्यादेव अवयवानामपि सादृश्यात् प्रत्यभिज्ञापि भवतीति ।

वाक्यस्य निरवयवत्वं सिद्धान्ततोऽङ्गीक्रियते शाब्दिकैः वाक्ये पदावगमः तेन च प्रत्यभिज्ञा सादृश्यबलादेव शक्यते वक्तुम् । निरवयववादी महावाक्येऽवान्तर- वाक्यभेदमपि न स्वीकरोति । यथा अपोद्धारेण पदस्य सत्ता भवति तथैव अवान्तरवाक्यस्यापि सत्ता स्वीकर्तुं शक्यते । वस्तुतः न वाक्ये पदसत्ता, न च महावाक्येऽवान्तरवाक्यसत्ता भवतीति सिद्धान्तः।

५ - क्रमः-

क्रमो वाक्यम् क्रमः- पदक्रमः, पदक्रमो वाक्यमिति केचित् । तत्रापि पदानां विशिष्टक्रमो वाक्यमिति ब्रुवन्ति । तन्मतेन वाक्यं नाभिधायकम् तत्र पदानामेव विशिष्टसत्ता प्रतिपादयन्ति । क्रमः- कालधर्मः । भर्तृहरिणा सप्तकारिकाभिः क्रमपक्षः निरूपितोऽस्ति । ताः कारिकाः-

[१२६]सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः ।
ते क्रमादनुगम्यन्ते न वाक्यमभिधायकम् ।।
शब्दानां क्रममात्रे च नान्यः शब्दोऽस्ति वाचकः ।
क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते ।।
ये च संभविनो भेदाः पदार्थेष्वविभाविताः ।
ते सन्निधाने व्यज्यन्ते न तु वर्णेष्वयं क्रमः ।।
वर्णानां च पदानां च क्रममात्रनिवेशिनी ।
पदाख्या वाक्यसंज्ञा च शब्दत्वं नेष्यते तयोः ।।
समानेऽपि तु शब्दत्वे दृष्टः संप्रत्ययः पदात् ।
प्रतिवर्णं त्वसौ नास्ति पदस्यार्थमतो विदुः ।।
यथास्यावयवा वर्णाः विना वाच्येन केनचित् ।
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ।।
अनर्थकान्युपायत्वात् पदार्थेन वार्थवन्ति वा ।
क्रमेणोच्चरितान्याहुर्वाक्यार्थं भिन्नलक्षणम् ।। इति ।।

वाक्यं पदानां [१२७] क्रमो वाक्यमिति केचन परिकीर्तयन्ति तेषां हि मते वर्णानां क्रमः पदम् पदानाञ्च क्रमो वाक्यमिति ।

१- 'देवदत्त[१२८] गामभ्याज दण्डेन' इत्यत्र देवदत्तस्य कर्तृत्वम्, गामित्यस्य कर्मत्वम्, क्रिया अभ्याजैव, कारणन्तु दण्डपदमस्ति । वाक्यार्थभावमापद्यमानेषु ये कर्तृत्वादयो व्यवस्थिता विशेषाः प्रतीयन्ते ते वाक्यार्थाभावात् प्रागपि सन्त एवानभिव्यक्ताः, क्रमात्क्रमं प्राप्यावगम्यन्त इति तस्मात्क्रम एव वाक्यम्, न वाक्यमभिधायकमित्यनेन क्रमव्यतिरेकेण शब्दात्मकं न वाक्यमभिधायकमित्युच्यते ।

२- पदानां पौर्वापर्ये क्रमेऽन्यः कश्चिच्छब्दो वाचको न भवति, यतो हि कालधर्मः पदेषु पदार्थेषु चानुभूयते, क्रमो[१२९] हि धर्मः कालस्येत्युक्ते क्रमकालस्य धर्मः यथा कालस्याक्रमत्वं तथैव क्रमस्यापि अक्रमत्वं कथ्यते। तस्मात्क्रमादतिरिक्तं न किमपि नाम वाक्यं विद्यते । एतेन पदमेवार्थवद्वाक्यञ्चावास्तविकमभिलापमात्रमेवेतदिति ।

हरिवृत्तौ कालस्य[१३०] शक्तिद्वयं प्रतिबन्धाभ्यनुज्ञारूपं दृश्यते। एताभ्यां शब्दस्यार्थरूपं निष्पद्यते नान्येन केनचिदुपजायते येनार्थान्तरमुपलभ्यतें एतेन श्रोतुः शब्दस्यावगमोऽर्थस्य चानुगमः कालाधीन एव भवति । शब्देष्वपि यः क्रमोऽवलोक्यते तस्मिन्कालशक्तिसन्निवेशः स्वीक्रियते, न तु कालशक्तिभिन्न इति । पुण्यराजोऽपि अनपेक्षितविशिष्टानुपूर्वीकः क्रमः क्रममात्रम् । तस्मिन्सत्यर्थ प्रतीतेर्नान्यस्तद्व्यतिरिक्तः कश्चित् स्फोटादिः शब्दो वाचकोऽभ्युपगन्तुं युक्तः। अपि तु क्रम एवोपलभ्यमानो वाचकः । अथ क्रम इति क्रमवत् पदादार्थोपाधिवशेनापि कालस्य धर्म उच्यते ।

पदानां[१३१] नियतसन्निवेशेन वैशिष्ट्यमुपगच्छति, तत्र विशेष एव वाक्यन्तदा विशेषोऽयं क्रमजन्यः अतो हि क्रम एव वाक्यम् । एतत्स्वीकारे पदमर्थवद्वा- क्यमनर्थकं प्रलापमात्रं भवति ।

३- केवलं पदानां क्रम एव वाक्यम्, न तु वर्णानामिति । पदार्थेषु ये अभिभाविताः अज्ञातभेदाः सन्निधानेन व्यज्यन्ते, तान्दृष्टवैव क्रम एव वाक्यमिति पदक्रम एव वाक्यम् न तु वर्णक्रमः यतो हि पदार्थाः धर्मविशेषस्य बोधकाः भवन्ति, न च वर्णास्तथा । एतस्माद्वर्णानां क्रमो न वाक्यमिति।

४- वर्णानां क्रममात्रनिवेशिनी पदाख्या, पदानां क्रममात्रनिवेशिनी वाक्याख्यापदरूपशब्दः एवञ्च पदानां क्रम एव वाक्यरूपशब्दः परन्तु एतयोरुभयोः शब्दत्वं नेष्यते ।

५- [१३२] वर्णपदलक्षणस्योभयरूपस्यास्य शब्दत्वे समाने पदानां क्रमाद्वाक्यार्थ- स्यावगमो दृश्यते न वर्णादिन्यतः पदान्येवार्थवन्ति । तत्क्रमश्चैव वाक्यम्, संसर्गो वाक्यार्थ इति पुण्यराजः ।

६- [१३३] यथा वर्णानां समुदायार्थवत्त्वे केवलानामनेकत्वं तथा पदानां केवलानामर्थासम्भवात्तत्समुदाय एव वाक्यमिति ।

७- [१३४] पदानि स्वार्थेनार्थवन्ति, केवलान्यनर्थकानि तानि क्रमेणोच्चरितानि वाक्यमिति केषाञ्चिन्मतम् ।

को हि क्रमः [१३५]- क्रमः- क्रमोऽन्यनिरपेक्षो भवति, केवलं क्रम एव वाक्यम्, तत्सत्त्वेऽर्थज्ञानम्, तदतिरिक्तः शब्दो न वाचकः क्रमो-वृत्तिः, तद्बोधे पदार्थबोधो जायते । क्रमःकालशक्तिविशेषः [१३७] ।

न हि क्रमो वाक्यमिति कुमारिलभट्टः [१३८] यतो हि पदक्रमभेदाद्वाक्यभेदः सञ्जायते, यथा शुक्लो गौ; गौः शुक्ल इत्यत्र यदि पदक्रमो वाक्यन्तदा अनेकपदक्रमाणां कल्पना कर्तव्या एव वाक्यभेदेनार्थभेदेन भवितव्यम् पार्थसारथिरपि क्रमो वाक्यमिति न स्वीकरोति। तन्मतेन वर्णक्रमः पदम्, तदेवार्थज्ञाने साधनम् वर्णक्रमाभिन्ने अर्थोऽपि भिन्नो भवति परन्तु पदक्रमभिन्ने नार्थो भिन्नो जायते, यतो हि संस्कृते पदानां निश्चितं स्थानं न भवति। शुक्लो गौ इत्यस्य वाक्यस्य पूर्वाक्तार्थनिष्पत्तिजायते ।

यदि [१३९] पदक्रमो वाक्यार्थस्याङ्गन्तदा पदानामेकसमुदायस्य यावन्तः क्रमाः तावन्त एव पदार्थाः स्वीकर्तव्या, परं नेदमुचितम् ।

तेन [१४०] वाक्यं न विद्यते, पदाख्या [१४१] वाक्यसंज्ञा च शब्दत्वं नेष्यते तयोः' इत्यादिना क्रमो वाक्यं नेति भर्तृहरिणोक्तं सङ्गच्छते । क्रमस्य सम्बन्धः कालेन वाक्यस्य च सम्बन्धः शब्दधर्मेण भवति, अतो हि क्रमकालपदार्थयोर्भिन्नत्वे न क्रमो वाक्यमिति सिद्धान्तः

६- बुद्ध्यनुसंहतिः-

बुद्ध्यनुसंहतिर्वाक्यम्, बुद्धिः - पदबुद्धिः तत्र कल्पितानां पदबुद्धीनां अनुसंहतिः अनुक्रमेण संहतिः -संहारोपसंहारः, तत्र पदानि न वर्तन्ते, तानि पदबुद्धित्वेन कल्पितानि भवन्ति, पदसमूहत्त्वं बुद्ध्या कल्पयित्वा वाक्यं व्यवह्रयते, तादृशं वाक्यमखण्डं कथ्यते । एतदाह भर्तृहरिः-

[१४४]यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता ।।

शब्दो बाह्यस्थोऽपि तत्त्वतोऽन्तस्थ एव, यथा अक्षरचिह्नादिप्रभृतयो लिपयः न शब्दः तास्तु शब्दसङ्केतमात्रम् प्रतीकमिति वाऽवास्तविकतयैव ताः शब्द इति कथ्यते,तथैव बहिर्भूत-व्यक्ति- जातिरूपस्फोटशब्दोऽन्तःस्थो भवति । बहिः क्रमः निर्धार्यते, क्रमवान्प्रतीयते परं सोऽक्रमो भवति बुद्धाविति। स एव बुद्ध्यनुसंहृतिपदेन परिचीयते, स एवानवयवः अखण्डः निर्विभागश्च व्यवह्रियते ।

'नादैरेकं प्रकाशितम्' केषाञ्चिन्मतेनायमपपाठोऽस्ति हरिवृत्तौ -तथाभूतैः क्रमवर्ध्दिभर्भागैरेकं प्रकाश्यत इति पाठः । भरतमिश्र-ग्रन्थदर्शनेनापि भागैरेकं [६] प्रकाशितमिति पाठो लभ्यते । भागैः क्रमवद्भिरतथाभूतैरित्यर्थः, भागवतोऽपि निर्भाग एवेति तात्पर्य्यम् ।

रामाज्ञापाण्डेयः[१४५] स्वीयग्रन्थे बुद्ध्यनुसंहारवादमित्थं व्याख्यातवान्, बुद्धेरनुसंहारमन्तस्तत्त्वं वाक्यम् मनुते । तथा हि संहृतसकलक्रमस्य एकस्य (कारकसंन्निभस्य वाक्यार्थस्याभिधाने सति) अदेशप्रदेशत्वेऽप्यन्तरात्मान्तर्यामी-त्येवाख्यायमानस्य प्रति प्राणिकृतेः शब्दतत्त्वस्य अक्षरचिह्नादिभिरिव अतथाभूतैः क्रमवद्भिर्भागैर्योऽयं बुद्ध्यनुसंहारः क्रमशः पूर्ववर्णभागग्राहि-णीभिर्बुद्धिभिर्जनितो यः संस्कारस्ततः उत्पन्नस्य स्मरणस्य बलादन्त्यवर्णभा-गग्रहणतुल्यकालः वाक्यमिति ।

वाक्यकाण्डप्रथमकारिकायाः व्याख्याने -'आभ्यन्तरस्य [१४६] तु बुद्ध्यनुसंहृतिरित्यनेनोद्देशःयदन्तः शब्दतत्त्वमित्यादिना श्लोकचतुष्टयेन आन्तरस्य स्वरूपमुक्तम् ।

अक्रमरूपान्तर एव बुद्ध्यनुसंहृति लक्षणेन समाम्नायते। स शब्दः पदविभक्तो न भवति, स चैकः शब्दः, एकः शब्द एव वाक्यमिति हरिवृत्तौ प्रतिपादितम् स चैष [१४७] बुद्ध्यनुसंहारलक्षण आन्तरः शब्दात्मा तत्र समाम्नातः । तस्य चेत्थम्भावे विच्छिन्नपदरूपप्रविभागदर्शन एक एवायं वाक्याख्यः शब्दो तथैव वर्णपदाख्य इति प्रसिद्ध एवं समाम्नाये मार्ग इति।

बुद्ध्यनुसंहारवादे - 'वाक्यस्यान्तरस्यैकता निरंशतैव प्रतिपद्यत इति तदेव सत्यत्वाद्वाक्यमस्तु किं तद्व्यतिरिक्तेनासत्येन वाक्येनेत्यर्थ इति पुण्यराजतात्पर्य्यम्'[१४८]।

वर्णपदादिभिः रहितं न केवलं वाक्यमेवाखण्डम्, तत्र वाक्यार्थोऽप्यखण्डः प्रतिभात्मकः पदार्थभागैरभिव्यज्यते । इत्यत्रोच्यते भर्तृहरिणा-

[१४९]अर्थभागैस्तथा तेषामान्तरोऽर्थः प्रकाश्यते ।
एकस्यैवात्मानो भेदौ शब्दार्थाविपृथक् स्थितौ ।।

यथा वाक्यं प्रकल्पितप्रकृतिप्रत्ययरूपपदादिभिः प्रकाश्यते तथैव वाक्यार्थोऽपि पदार्थभागैः सर्वदा बुद्ध्या कल्पितैर्व्यज्यते । वाक्यवाक्यार्थयोर्न कोऽपि भेदः, इमौ एकस्यैवात्मनो भैदौ अवास्तविकौ दृश्येते । परमार्थतः तौ न पृथक् स्थितौ स्तः। निष्कर्षतोऽम्बाकर्त्र्याम्-

'यदा [१५०] बहिरुच्चारितः शब्दः श्रोत्रेण गृह्यमाणः स्वपरिसमाप्तिकाले श्रोत्रद्वारेणैव बुद्धौ प्रविष्टस्तत्र प्राप्तानुसंहारस्तदा बुद्धौ प्राप्तानुसंहारादन्तर्निवेशिन एव शब्दाद् बुद्धावन्तर्निविष्टरूपेष्वेवार्थेषु गृह्यमाणेषु प्राक् शब्दाद् विभक्तरूपेणा- नुभवानन्तरं विभागरूपानतिक्रमेण वासनारूपेण बुद्धौ प्रतिसंहृतष्तेष्वविभक्तेषु एक एवायं बुद्ध्यात्मा शब्दार्थयोः परिसमाप्तौ व्यवतिष्ठते ।

आन्तरशब्दोऽयमनपायिन्यापायिन्या चेति द्वाभ्यां शब्दशक्तिभ्यामनुगतोऽस्ति। तस्मिन् प्रकाशकप्रकाश्यत्वभावोऽस्ति शब्दः प्रकाशकोऽर्थश्च प्रकाश्यः। एवं सति तत्र कार्यकारणभावोऽपि संपृक्तोऽस्ति, प्रकाशकत्वेन - कारणता, प्रकाश्यत्वेन च कार्यता भवति। एतदुक्तं[१५१] भर्तृहरिणाः-

प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता ।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ।।

रघुनाथशर्म्मणा अस्य भावः विस्तरेण विज्ञाप्यते

"योऽयं [१५२] बहिः शब्दः श्रवणेनोपलभ्यते स न बाह्यः किन्त्वन्तर्मात्रा-बुद्ध्यन्तरवस्थितो विषयरूपः स चान्तर्मात्रारूपः शब्दो ज्योतिरूपोऽखण्डक्रमोऽपि द्वाभ्यां शब्दशक्तिभ्यामनुगतः । तत्रैकानपायिनी शक्तिः प्रकाशकत्वरूपा, शाश्वतिकत्वात्। अपरातु प्रकाश्यत्वरूपापायिनी कादाचित्कत्वात्'।

तस्मिन्नान्तरशब्देऽस्तित्वनास्तित्वसामर्थ्ये समवस्थिते स्तः बुद्ध्यनुसंहार आन्तरस्फोटः स्वीक्रियते, तत्र अक्रमे क्रमनिर्भासे भावाभावाख्य एकबुद्धिगतमिव संवेद्यत इत्याह-

[१५३]तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते ।
अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने ।।

इत्यादिनाखण्डपक्ष एव पोषितः- आन्तरशब्दस्य अस्तित्वं नास्तित्वं, भावाभावौ तस्यैकत्वं न खण्डयते । एते द्वे शक्ती एकस्यैवान्तरशब्दस्य स्तः । बुद्ध्यनुसंहारः शब्दार्थतत्त्वस्यान्तर्मात्रानिवेशी वर्तते ।

विज्ञानमेव शब्द इति जैनाः । तादृशशब्द एव बुद्ध्यनुसंहृतिरूपेण तत्र गृह्यते। विज्ञानं [१५४]वाक्यम्, तदेव वाक्यार्थः । तत्रोक्तम्- विज्ञानं शब्दार्थः। विज्ञानमेव हि शब्दः तच्च विज्ञानं कल्पना, बुद्ध्यनुसंहृतिर्वाक्यार्थ इति ।[१५५]रूप-रस-घटपटादयो बाह्य वस्तुनोद्बुद्ध्यन्ते। विज्ञानं कल्पना, अभिजल्पः, बुद्ध्यनुसंहृतिः, तदेव वाक्यं वाक्यार्थोऽपि सैव।

प्रभाचन्द्रादिभिराचार्य्यैः [१५६] बुद्ध्यनुसंहृतैः शब्दैः द्वौ भागौ कल्पितौ स्तः बुद्धिवाक्यपक्षः, अनुसंहृतिवाक्यपक्षश्च। इमौ विभागौ भर्तृहरिणा न स्वीक्रियेते ।

वाक्यपदीयस्य [१५७]द्वितीयकारिकाव्याख्यानावसरे शाक्यसिद्धान्तमुल्लिख्य पुण्यराजः बुद्ध्यनुसंहृतिवादं शाक्यसिद्धान्तस्य सहोदरसिद्धान्त इति स्वीचकार पुण्यराजस्य शाक्येन सहमतिः प्रतीयतेतत्रोक्तम्- 'तत्तदनादिवाक्यार्थविकल्पाहित वासनाप्रबोधजन्मः क्रमवद्भिरिवाक्रमैर्बहीरूपतयाध्यस्तपदः पदार्थैश्चित्रीकृत इव विकल्प विशेषोल्लिख्यमानाकारो बहीरूपतयाध्स्तैः निर्विभाग एव शाक्यानां वाक्यार्थ इति प्रायशः प्रतिभासोदर एवासौ मन्तव्य इति। तत्र शाक्यानां वाक्यस्वरूपं बुद्ध्यनुसंहारवादानुरूपमिति पुण्यराजः प्रोवाच- वाक्यं ह्यान्तराकार विशेषस्य बहिरध्यासमात्रमस्ति । बौद्धाकारोऽनादिवा- क्यवासनयोद् बुद्धयते क्रमे भासमानः अक्रमेऽवस्थितः पदविशेषरूपो भवति, तस्य बाह्याध्यासो वाक्यमिति आशयः[१५८] ।

परं कैश्चिद्वाक्यस्य बुद्धिग्राहितायाः स्थानं अन्त्यग्राहिता स्वीक्रियते। तेषु धर्मकीर्तिरपि वर्तते । बुद्ध्यनुसंहृतिपक्षोऽन्त्यग्राहितायाः पक्ष एव नास्ति, अतो हि तेषां कथनमयुक्तं भवति ।

नागेशभट्टेनापि पूर्वोक्तवादः बौद्धार्थनिरूपणावसरे कतिपयपाणिनीयसूत्रनिर्देश पूर्वकं भाष्यकैय्यटसम्मतिप्रदर्शनपुरस्सरञ्च मञ्जूषायां निरूपितोऽस्ति [१५९]। तत्र बुद्धिस्थस्य वाक्यस्य बहिस्थस्य चाभेदो दर्शितः -'अत एव उपदेशेऽजनुनासिकः [१६०] इति सूत्रे भाष्ये उक्तम् को देवदत्तः? इति प्रश्ने अङ्गुदी कुण्डली व्यूढोरस्को वृत्तबाहुरीदृशो देवदत्त इति। तत्र तु एकव्यक्तौ भेदाभावाद् ईदृश इत्यस्यासंगतिः मम तु एतैः शब्दैर्यादृशोऽर्थो बुद्धौ प्रतिभासते तादृशो बाह्य इत्यर्थः। हेतुमति च इति [१६१] सूत्रे, पङ्क्तिविंशति [१६२] इति सूत्रे मतुप् [१६३] सूत्रे च भाष्यकैय्यटयोः स्पष्टमिदम्।

उपदेशेऽजनुनासिक इत् इत्यत्र भाष्यम्-गुणः प्रापणमुद्देशः तद्यथा- कश्चित्कं चिदाह- 'देवदत्तं मे भवानुद्दिशतु इति। स इहस्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति ईदृशो देवदत्त इति। एतैः शब्दैः विशेषणैरुत्तमपुरुषः मध्यमुद्दिशति, एतदवस्थायां यादृशः देवदत्तः बुद्धाबुल्लिखितस्तादृश एव बाह्योऽपि भवति। कैय्यटोऽपि इत्थमाह - ईदृश इति-

एतैः [१६४] शब्दैः यादृशो बुद्धावर्थः प्रतिभासते तादृशो बाह्यशब्दस्यार्थः- लोके दृश्यमान इत्यर्थः। एतेन बौद्धार्थस्यैव शाब्दबोधे भानमिति दर्शितम्।

एतेन बुद्धिस्थ आन्तरो क्रमः शब्दः बाह्यरूपतां अर्थरूपतां वा लभत इति तात्पर्य्यम्। 'हेतु मति च' सूत्रे भाष्येऽपि 'कंसं घातयति' 'बलिं बन्धयति' इत्यादौ ये तावदेते शौभिका नाम एतं प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयन्ति,चिरहते च कंसे चिरबद्धे च बलौ । कृष्णकंसयोर्बध्यघातकभावः चिरकालिकः एवं बलिबन्धोऽपि चिरकालिकः, कथमिदानी वर्तमाने तत् क्रियत इति प्रश्ने पूर्वाख्यानं बुद्धावाल्लिख्य नटाः प्रत्यक्षं कंसं घातयन्ति प्रत्यक्षं च बलिं बन्धयन्तीति। चित्रलेखका अपि चित्रस्थं कंसं तादृशेनैव कृष्णेन घातयन्ति एवं ते बुद्धिविषया दर्शकेभ्यः प्रकाशयन्ति। एवं ग्रन्थिका अपि स्वबुद्धिविषयान्सतो विद्यमानान्कंसादीन्प्रकाशयन्ति श्रोतृबुद्धौ समर्पयन्तीत्यर्थः। एवं बुद्धिविषयसत्तैव सर्वोपरिव्यवहार इति भावः [१६६] । भर्तृहरिरप्याह-

[१६७]**शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।**
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते ।।

विश्वेश्वरसूरिणा उपर्युक्तसूत्रव्याख्यानावसरेऽयं विषयः प्रस्तावितः 'न च कंसं घातयतीति चिरातीते वर्तमानत्वान्वयायोगात् वार्तिकावश्यकत्वमिति वाच्यम् कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायैः शौभिकपदाभिधेयै-र्घातनात् । कंसपदस्य सामाजिकवृत्तिकसत्वप्रकारकज्ञानविशेष्यनटपरत्वात् चित्रकेष्वपि उद्घूर्णनिपातितप्रहारदर्शनात् । कथकेष्वपि बुद्धिविषयत्वे न वर्तमानव्यपदेशात् ।

पङ्क्तिविंशति - सूत्रे भाष्ये प्रदीपोद्योते [१६८] ननु चोक्तं-परिमाणिनि चेत् पुनः स्वार्थे प्रत्ययविधानमिति। नैष दोषः। द्रव्यसंघयोर्दशतोः संघे प्रत्ययो निपात्यते, न तु द्रव्यसंघे । इह द्रव्याणां द्रव्यसंघस्य दशतां दशतसंघस्य च पारमार्थिका भेदो नास्ति, केवलं बुद्ध्या परिकल्प्यते। बुद्धिव्यवस्थापितार्थनि-बन्धनाश्च शब्दा बुद्धिमेवार्थकारामुपजनयन्तोऽसत्यपि वास्तवे भेदे भेदमवगमयन्ति ।

बुद्धिपरिकल्पितार्थाभिधायिन एव शब्दाः न तु बाह्यार्थाभिधायिन इति । तदस्यास्त्यस्मिन्निति मतुप् [१६९] सूत्रभाष्ये - 'अथास्ति ग्रहणं किमर्थम् सत्तायामर्थे प्रत्ययो यथा स्यात्। नैतदस्ति प्रयोजनम्। न सत्तां पदार्थो व्यभिचरति इत्यस्य प्रदीपे - यावत् बुद्ध्या पदार्थो न विषयकृतस्तावत्पदस्य प्रयोगाभावः । तस्माद् बुद्धिसत्ताविष्टोऽर्थो विधिनिषेधजननादिभिः संबध्यते- वृक्षोऽस्ति, वृक्षो नास्ति, वृक्षो जायत इति। अत्यन्तासतोऽपि बहिः; शशविषाणादीनर्थान् बुद्ध्या विषयीकृत्य शशविषाणादिप्रयोगः तस्माद्बुद्ध्यारूढोपचरिता सत्ता शब्दप्रयोगाश्रयत्वादव्यभिचारेत्यर्थः । सैव बुद्धिसत्ता प्रयोक्तृणां बहीरूपतयावभासते । उद्योते [१७०] बाह्यसत्ताया एव मुख्यत्वादियं गौणीत्यर्थः, तयैव सर्वव्यवहारत्वात् । सैव बहिः सत्तासत्वे तु तत्समानाधिकरणतया, असत्त्वे तु केवलायास्तस्या एव बहीरूपत्वेन भानम् अत एव घटशून्यादपि 'गेहाद्घटमानये' त्युक्ते आनयते प्रवर्तते पश्चात्तदभावनिर्णये वक्तृज्ञानस्य भ्रमत्वं कल्पयतीति भावः । अन्तःकरणस्य रागादिदोषवशेन तस्या एव तत्त्वेन भानमिति तात्पर्य्यम् ।

पदमाद्यम् [१७१] - केचन आद्यं पदं वाक्यमिति कीर्तयन्ति, आद्यमिति-पदसमुदाये यत्प्रथमं पदं तद्वाक्यमिति ब्रुवन्ति। एतेन सखण्डस्य कल्पना क्रियते तत्रानेकपदारम्भेणेति यत्र वाक्येऽनेकानि क्रियावाचकानि साधनवा-

चकानि वा पदानि तेषु यत्प्रथमं पदं तद्वाक्यमिति, तत्राद्यं पदं वाचकमन्यानि तस्य सहकारिकारणभूतानि तच्छक्तिद्योतकानि वा भवन्ति। यथा ' साक्षात् क्रियते' इत्यत्र साक्षात्पदमेव साक्षात्कारवाचकम्, क्रियते पदं साक्षात्पदस्य, साक्षादर्थे साक्षात्पदस्यैव शक्तिद्योतकम्, तस्मादाद्यं पदं साक्षात्पदस्य, वाक्यमिति तेषां तात्पर्यम् । रामाज्ञापाण्डेयः स्वीयग्रन्थे-आद्यं पदं १७३ वाक्यमिति १७३ परे समीरयन्ति । यदा पदं प्रथमतः प्रयुज्यते तदेव वाक्यं तेनैवेतरापेक्षत्वात् । यतः प्रथमतः प्रयुज्यमानपदं क्रियावाचि साधनवाचि वा भवेत् । क्रियासाधनयोश्च परस्पराविनाभूतत्वात् तयोर्यदेव पदमादौ प्रयुज्यते तदेव स्वार्थस्य धर्मभूतमर्थान्तरमपि तत्र सन्निधापयति धूम इवाग्निम् । इत्येवं प्रथममुपादीयमाने पदे सर्वरूपार्थोपग्राहिव्याख्यातशब्द इव नियमानुवादफलानि पदान्तराण्यभ्यनुज्ञापयन्त इति ।

अत्रावसरे भर्तृहरिः-

[१७४]नियतं साधनं साध्ये क्रिया नियतसाधना ।
स सन्निधानमात्रेण नियमः सन् प्रकाशते ।।

इत्यत्र क्रियाकारकयोर्नियतस्वरूपं प्रतिपदमभिधेयवत् स्थितं भवति यथा साधने साध्यं नियतम्, तथैव साध्ये साधनमपि नियतम्भवति।

स्वोपज्ञे [१७५]-नियतसाधनः साध्योऽर्थः । नियतक्रियाणि च साधनान्य-विभक्तरूपोपकराण्यपि युतव्यवस्थानि प्रतिपदमभिधेयत्वेनावस्थितानि। नित्यनियतत्वाच्च नियमोऽप्यत्र विधेयः । सस्तु नियमः प्रयोगे सन्निधिमात्रेण पदान्तराणां पुरुषं प्रति प्रकाशते नानुगृह्यते । अत्र नित्यनियतत्वं नियमस्य हेतुस्तेन प्रयोगस्य सान्निध्येन पदान्तराणां बोधः क्रियते ।

अनया कारिकया सङ्घातवाद् उपन्स्यते - यदि पदसंघातो वाक्यम्, तदा पदार्थसंघातो वाक्यार्थ इति

[१७६]विशेषशब्दाः केषाञ्चित् सामान्यप्रतिरूपकाः ।
शब्दान्तराभिसम्बन्धाद् व्यज्यन्ते प्रतिपत्तृषु ।।

उपर्युक्तकारिकाया हरितात्पर्यम् स्पष्टम्। तत्र विशेषशब्दाःसामान्यानां प्रतिरूपकाः भवन्ति, ते च शब्दान्तरभावेन आगन्तुना केनचिदप्यर्थेनोपयुज्य-

केवलमनुवादमात्रेण शब्दान्तराणाम् अर्थाभिधानसिद्धये व्यज्यन्ते। तत्र यथोक्तं पुण्यराजेन [१७७] देवदत्त गामभ्याजेत्यत्र देवदत्तपदं गां बधानेत्यस्माद् विशिष्टमेव-वक्त्रा समुदीरितं भ्रमात्तु सकलसाधारणं प्रतिभाति। उत्तरकालं गवादिपद-सम्बन्धाद् विशिष्टा प्रतिपत्तिरभिव्यज्यत इति तदेव वाक्यम्। सकलविशेषण खचितश्च प्रथमतरमेवोपक्रान्तः संसृष्ट एवार्थो वाक्यार्थ इति।

आद्ये पद एव सकलवाक्यस्य सकलवाक्यार्थस्य च परिसमाप्तिरनेन प्रकारेण दृश्यते । पुनरपि वक्ष्यति-

[१७८] पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः ।
संसर्ग एव प्रक्रान्तस्तथान्तेष्वर्थवस्तुषु ।।

अनेन श्लोकेनान्विताभिधानसमाश्रयणेन संसृष्टं वाक्यार्थप्रदर्शनं क्रियते। तथात्वभिहितान्वयवादिनः पूर्वपूर्वार्थानुगतः संसर्गो वाक्यार्थः, अन्विता-भिधानवादिनस्तूत्तरोत्तरपदार्थावगतः प्रथमतरमेव संसृष्ट एव।

इत्यननेन कैश्चिदुत्तरं पदं अन्त्यं पदं वा वाक्यमिति स्वीक्रियते । तेषाम्मतेन आद्यं पदं वाक्यमित्यत्र ये उपायास्तेऽन्त्यं पदं वाक्यमित्यत्रापि चिन्त्यन्ते । यथा आद्ये पदेऽन्यानि पदानि सहकारीणि भवन्ति तथैवान्त्येऽपि तानि वक्तुं शक्यन्ते । वाक्यपदीये भर्तृहरिणान्त्यपदवादो न कीर्तितः नहि व्याकरणशास्त्रे क्वचिदस्योल्लेख इति सुचरितमिश्रादिभिरयं पक्षः प्रस्तूयते-

अन्त्यपदवाक्यता [१७९] परैरपठितापि यथा संभवमुपन्यासादुपदर्शिता। एवं हि ते मन्यन्ते, मुख्यत्वाद् आद्यमेव पदं वाक्यमिति। अन्त्यञ्च तदनन्तरमर्थावगतेः ।

एतस्मान्मन्यामहे आद्यं पदमेव वाक्यमिति। वैय्याकरणैराद्यं पदं वाक्यं मुख्यतया मन्यते ।

अन्त्यं पदं वाक्यं केवलं क्षमाश्रमण [१८०] (मल्लवादि) कृत ग्रन्थे दृश्यते। 'अन्त्यं च पदं वाक्यार्थः'। स च पूर्वपदज्ञानाहितसंस्कारापेक्षोऽन्त्यपदप्रत्ययः। एतस्योल्लेखस्तेन केवलं पूर्वपदज्ञानाहितसंस्कारस्याधारेण कृतोऽस्ति।

भोजराजेनेदं [१८१] नाङ्गीक्रियते आद्यं वा स्यादन्त्यं वेति। न तत्र शक्तिविशेषः, नाद्यो, नान्त्यश्चेति । वाक्ये आद्यं प्रमुखपदेन यदि सर्वोऽपि

व्यवहारः सम्पद्येत्तदान्यानि निरर्थकानि पदानि भविष्यन्ति । न हि लोके तद्दृश्यते यथा गौः इति शब्दोच्चारणेन सकलगोगतगुणानां क्रियाणाञ्चाभिव्यक्तिस्तदा एकगुणैकक्रियावगमे काठिन्यमनुभूयते । न हि तत्र कश्चिदपि हेतुः येन नियतगुणस्य नियतक्रियायाश्च ग्रहणं भवेदिति । पदान्तरसन्निधानं न नियामकमिति ।

एतस्य परिहारस्तु कैश्चिन्नियतं साधनं साध्ये क्रिया नियतसाधनेति कारिकामुखेन प्रस्तूयते । अतो हि आद्यं पदं वाक्यमिति केषाञ्चिन्मतम् तत्र नियमानुवादपक्षेणापि पुण्यराजप्रभृतीनां सन्तोषो नास्ति ।

८ - पृथक्सर्वं पदं साकाङ्क्षं वाक्यम्-

पृथक् [१८२] सर्वपदं सापेक्षं वाक्यमिति केचिदुपवर्णयन्ति । पृथगिति संघातादवच्छिनत्ति सर्वमिति आद्यपदादाख्यातशब्दाच्चावच्छिनत्ति । तेन सर्वाण्येव पदान्यन्योऽन्यसापेक्षाणि प्रत्येकं वाक्यमिति । अयं भावः- पृथक् वाक्यात् पृथक्कारे साकाङ्क्षमपदान्तरसाकाङ्क्षम्, सर्वम् आद्यं मध्यमन्त्यञ्च पदं समुदितं वाक्यमिति । तदुक्तं जैमिनिमुनिना- अर्थैकत्वादेकं [१८३] वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति ।

अस्मिन्वादे पृथक् पदमिदं लक्षणमाद्यं पदं वाक्यमित्यस्मात् पृथक्करोति। प्रायशः संघातपक्षे ये हेतवः तेऽत्रापि प्रदर्श्यन्ते । यथा तिस्रः ग्रावा उखां धारयन्ति, चत्वारो वाहकाः शिविकां नयन्ति तथैव सर्वाणि पदानि वाक्यानि स्व स्वार्थयुतानि च भवन्ति । देवदत्त गामभ्याजेत्यत्र सर्वाण्यपि पदानि वाक्यभूतानि मन्यन्ते । तत्र देवदत्तस्य प्रतिपदं परिसमाप्तिर्भवति । एकैकः शब्दः स्वीयसम्पूर्णार्थद्योतकः, वाक्ये तत्तद्वाचकाः शब्दाः वर्तमाने सति वाक्यत्वमुपतिष्ठते। एकस्याभावे नहि वाक्यार्थो लक्ष्यते, तस्माज्जानीमः पृथक् सर्वपदं वाक्यमिति स्वीकार्यम्।

पृथक् [१८४] स्वेन स्वेनार्थेन युक्तानि पदानि वाक्यम्। वाक्यं [१८५] च पृथक् सर्वपदम्। यथा देवदत्त गामभ्याज शुक्लामित्यत्रैकैकं पदं वाक्यम्। तस्मादेव देवदत्तोऽपि हि गवात्मकोऽभ्याजात्मकश्च । तथा प्रवर्तनात् तत्तदापत्तेः । तान्यपि तथापत्तेरिति ।

मूलतः संघातः- पृथक्पदवादयोरयं भेदः-[१८६] पदसंघातः पदपरतन्त्रः पृथक्सर्वपदवादः पदस्वतन्त्रोऽस्ति। संघाते पदस्थितिः शकटावयववत् यथा शकटे सर्वाणि अङ्गानि सम्भूय शकटं चालयन्ति पृथक्त्वेनैकं अङ्गं कार्यकरणेऽक्षमं भवति। किन्तु पृथक्सर्वपदवादे पदस्थितिः शिविकावाहकवद् वर्तते, ते सम्भूय शिविकां वहन्ति परं स्वतन्त्ररूपेणापि स्वकार्यं कर्तुं शक्नुवन्ति ।

वादिदेवानुसारं पृथक् सर्वपदं साकांक्षम् [१८७] इत्यत्र पृथक् विशेषणं संघातपक्षात्पृथक्करोति,एवं सर्वविशेषणमैनम् आख्यातवादादाद्यपदाच्च पृथक्करोति तत्र वाक्यपदीये-

[१८८]गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते।
साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ।।

कारकपदं क्रियायां गुणभूतं सत् पदान्तरमाकाङ्क्षति । क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षत इति पुण्यराजः [१८९] ।

भर्तृहरिमतेन 'व्यपेक्षार्थे भवतु नवेति,शब्दे सदावतिष्ठते। शब्दस्तां एव प्रकाशयति। तदुक्तं यथा - अर्थेषु [१९०] सतीमसतीं वा शब्दवृत्त्यनुकारेण पुरुषो व्यपेक्षां समीहते। तां शब्द एव प्रकाशयति। सा हि नित्यनिविष्टरूपैव शब्दात्मनि व्यपेक्षते ।

बौद्धेषु [१९१] पदस्यापि वाक्याख्या संज्ञा भवति। पदमेव वाक्यम्। किन्तु लक्षणन्तु एकार्थपरकपदसमुदायवादिनां सम्मतमेव बोध्यम् [१९२]। तद्यथा- पदपर्यायो वाक्यम् । यावद्भिः अर्थवद्भिः पदैः विवाक्षितार्थपरिपूरिः (पूर्तिः) भवति तावतां समूहः पदम् इत्यभिधार्मिकाः [१९३]।

भर्तृहरेरेकत्रोल्लेखे [१९४] कर्णकगोमिना लिखितम् यत् सर्वाणि पदानि पृथक्-पृथक् अर्थतां लभन्ते तेषु च एकैकस्य पूर्णार्थे परिसमाप्तिर्जायते। तेषु यस्य प्रथमतो ग्रहणं, तस्मिन्नन्यपदानां निवेशो भवति। अन्यानि पदानि अनुवादाय नियमाय वा भवन्ति इति।

यदाह भर्तृहरिः- सर्वेषां [१९५] पृथक् अर्थवत्ता सर्वेषु प्रतिशब्दं कृत्स्नार्थपरिसमाप्तेः। तथा यदेव प्रथमं पदमुपादीयते तस्मिन् सर्वरूपार्थोपग्राहीणि नियमानुवादनिबन्धनानि पदान्तराणि विज्ञायन्त इति।

उपर्युक्तोल्लेखेन [१९६] पृथक्सर्वपदं, साकाङ्क्षमिति पृथक्-पृथक् भेदौ स्तः ।

योगदर्शनेऽपि [१९७] सर्वपदवाक्यवादः दृश्यते-सर्वपदेषु चास्ति वाक्यशक्तिः । वृक्ष इत्युक्ते अस्तीति गम्यते। न सत्तां पदार्थो व्यभिचरति। तथा न ह्यसाधना क्रिया अस्तीति ।

एतत्सर्वमालोडनेन 'पृथक् सर्वपदं साकाङ्क्षं वाक्यमिति' कैश्चदुपवर्ण्यते। आख्यातशब्दो वाक्यमिति कारिकाद्वयेन भर्तृहरिणा तदानीं प्रसिद्धवाक्यलक्षणानि संकलय्यैकत्रोपस्थापितानि। एषां मूलं न हि व्याकरणे भाष्यादिषु समुपलभ्ते। वाक्यपदीयेऽष्टौ विकल्पान् दृष्ट्वा कैश्चिद्भ्रमाद् व्याकरणोक्तविकल्पाः मन्यन्ते, न तत्सत्यम् । तत्र 'न्यायवादिनाम्' पदेन व्यज्यते यद् भर्तृहरेः पूर्वाचार्य्याणामिमानि वाक्यलक्षणानि प्रचलितान्यासन्। प्राचीनतन्त्रग्रन्थेषु [१९८] न्यायशब्दः मीमांसाशास्त्रार्थं व्यवह्रियते स्म, तस्मात्मीमांसादिष्वेते वादाः प्रवर्तेरन् । पुण्यराजेनापि एषां सम्बन्धः मीमांसाशास्त्रेण न्ययोजि परन्तु परवर्तिनः (कुमारिलप्रभृतयः) मीमांसकास्तावदेषां व्याकरणशास्त्रेण सह सम्बन्धं प्रतिपादयन्ति । इदं तावदेषां वाक्यपदीपे दर्शनादजायत। निष्कर्षतोऽष्टौ विकल्पाः भर्तृहरेः प्रागेव आसन् ।

उपर्युक्तेषु वाक्यलक्षणेषु नैकस्य कस्यचिद्व्यवहारे लौकिके समुचितसमादरोऽभूत् । यतो हि लोक एकार्थकपदसमुदायमेव [१९९]वाक्यं मन्यते स्म, तस्यैकार्थपदसमुदायत्वमनेकैः वैयाकरणैः भाषाशास्त्रिभिश्चाङ्गीकृतमासीत् ।

एषो वाक्यविकल्पप्रपञ्चःअनेकशास्त्रभावनासमाश्रयणेनानेकपुरुषेष्वपि दृश्यते स्म । भर्तृहरिराहः-

[२००]अविकल्पेऽपि वाक्यार्थे विकल्पा भावनाश्रयाः।
अत्राधिकरणे वादाः पूर्वेषां बहुधा गताः ।।

परमार्थतः वाक्यस्यैकत्वेऽपि तस्य अविकल्पेऽपि, इमे विकल्पाः भावनाश्रया अभ्युपगन्तव्याः । स्वस्वशास्त्रबुद्धिः तत्तच्छास्त्रवासनावशात् विकल्पे सञ्जाता ।

एतस्माद्वाक्यं निर्विभागं विभागकल्पनाशून्यं वेति हरेरभिमतमिति वक्तुं शक्यते । तत्र विभागकल्पना पूर्वेषामाचार्याणां बहुधा प्रवादेन समजनि, न तद् वास्तविकमिति चिन्त्यम् ।

एभिः वाक्यविकल्पैः चिन्तनपरम्परायां कोऽपि प्रामाण्यप्रकाशो जायते। तेषां कुत्रचिद्विशिष्टस्थले सङ्केतोऽभ्युपगन्तव्य इति । यथा अन्तिमत्रीणि लक्षणानि अखण्डार्थस्य विश्लेषणं प्रवदन्ति, तथैव पूर्वपञ्चलक्षणानि बाह्यसत्तां पदप्रयोगं चाधिकृत्य प्रवर्तितानि । तेन खण्डपक्षस्य सत्यत्वमुपस्थाप्यते । सत्यमेकमविभाजितञ्चास्ति तत्र खण्डाखण्डोपाधिना विभागो न क्रियते, परं स्वस्वशास्त्रेषु तत्र तत्र सत्यत्वम्, अन्यत्र तच्छास्त्रविहितं सत्यमपि, क्वचिदसत्यम् प्रतिभाति । परमतनिराकरणपूर्वकं स्वमतप्रतिपादनेन आलोच्यः विषयः अधिकः स्पष्टो भवति । अनया रीत्या वाक्यस्य शास्त्रान्तरोक्तानि लक्षणानि यद्यप्यत्र शब्दशास्त्रेऽसत्यभूतानि तथापि स्वशास्त्रे तल्लक्षणानि सत्यभूतानि एव । एतेन पर्यालोचनेन अस्मत्कृतवाक्यलक्षणस्यालोच्यो विषयः सुस्पष्ट एव जायते। अत इमे [२०१] वाक्यलक्षणविकल्पाः किमपि सत्यभूतं वाक्यलक्षणमिङ्गयन्ति ।

प्रत्यक्षरूपेण भर्तृहरेरत्र [२०२] वाक्यविकल्पेषु सम्मतिर्न दृश्यते स सर्वान्यपि वाक्यलक्षणानि आधारीकृत्य पर्यालोच्य च वाक्यस्य निर्भागत्वमखण्डत्वमेव च प्रतिपादयति ।

वाक्यस्य खण्डाखण्डभेदः-

अष्टविधलक्षणेषु तत्राखण्डपक्षे जातिः[२०३] संघातवर्तिनी, एकोऽनवयवः शब्दः बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि । खण्डपक्षे तु- आख्यातशब्दः, क्रमः संघातः, पदमाद्यम्, पृथक्सर्वपदं साकाङ्क्षमिति पञ्चलक्षणानि । एतस्य मूलं संहितावचनेनान्वेष्टुं शक्यते वाग्वै पराच्यव्याकृता एतेन ज्ञायते यद्वेदाः प्रथमं अखण्डवाक्यभूता अभूवन् ततः तत्र विभागोऽजायत इति एतेन वाचोऽखण्डता व्याकृतरूपता च प्रतीयते । अयं विचारः प्रातिशाख्ये पदप्रकृतिः संहितेति रूपेण समुपस्थापितोऽस्ति । तत्र पदप्रकृतिः संहितेति उक्तम् । पदानां प्रकृतिः पदप्रकृतिः पदानि प्रकृतिः यस्याः सा पदप्रकृतिरित्यत्र आद्ये विग्रहे तत्पुरुषः, द्वितीये तु बहुव्रीहिर्भवति। पूर्वत्र पदानां मूलं संहिता एवं शब्देषु संहिता नित्या अपौरुषेयी चास्ति । पदान्यनित्यानि पौरुषेयानि च भवन्ति । अपरत्र संहितामूलं पदमस्ति।

पदं पूर्वं पश्चाच्च संहिता, तत्र नित्यानि पदानि अपौरुषेयानि च सन्ति। तस्मात् संहिता नित्या पौरुषेयी चेति वक्तुं शक्यते। उव्वटमतानुसारं [२०४] पदमेव संहिताया प्रकृतिः, एवं पूर्वपदानि, ततः संहिता वाक्यं वेति परन्तु शाब्दिकः भाषाशास्त्रज्ञाश्च तत्र षष्ठीतत्पुरुषं कृत्वा संहिता वाक्यं पदानां प्रकृतिः इति वदन्ति । यतो हि पूर्वं संहिता (वाक्यं) ततः पदानां विश्लेषणम्।

तत्रैव द्वादशाध्याये [२०५] संहिताविभागः क्रियते–पदसंहिता, अक्षरसंहिता, वर्णसंहिता, अंगसंहितेति चतुर्धा । नानापदसन्धानं पदसंहिता, एवमक्षरादिसंहिताः ज्ञातव्याः । संहितापदार्थः भर्तृहरिणाप्युक्तः–

पदाम्नायश्च यद्यन्यः संहितायाः निदर्शकः ।
नित्यस्तत्र कथं कार्यं पदं लक्षणदर्शनात् ।।

अखण्डपक्षे पदप्रकृतिः संहितेति षष्ठीसमासेन व्याख्याता। एवमखण्डपक्षे भाष्यसम्मतिरपि दृश्यते, तत्र [२०६] न लक्षणेन पदकारा अनुवर्त्यः पदकारैः नाम लक्षणमनुवर्त्यम् इत्यनेन तात्पर्यं यल्लक्ष्यं नित्यम्, तस्मात् पदकारैः लक्षणानुसारं पदं करणीयम्, न तत्र लक्षणेन पदकारोऽनुवर्त्यो भवति (नानुसृयते) इति । शास्त्रं हि नामानुविधानं न चानुविधेयमिति मन्तव्यम्। तस्माद्भाष्यकारस्याखण्डपक्ष एवाभिप्रेतः। हरिरपि टीकायाम् यद्यन्य [२०७] एव पदाम्नायो नित्यः पुरुषप्रयत्नव्यतिरेकेण सिद्धस्तत्रायं भाष्यग्रन्थः समर्थयितव्यः। न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्, यथा लक्षणं पदं कर्तव्यम् । लोकोऽप्यर्थेषु प्रयुक्तेषु शब्देषु शास्त्रेण धर्मनियममात्रमेव क्रियते। अतः शास्त्रेण नित्यस्य लक्ष्यस्यानुविधानं कर्तव्यं न तु नित्येन लक्ष्येण शास्त्रमनुविधेयमिति ।

केषाञ्चिन्मतेन संहिताम्नाये द्वे शक्ती विभागाविभागरूपे स्तः। विभागशक्तिः पदप्रतिपादिका, अविभागशक्तिः संहिताप्रतिपादिका भवति।

पुनश्च–

[२१०]पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः संहिता वा पदाश्रया ।।

इत्यनया कारिकया पदप्रकृतिः संहिता इति प्रातिशाख्यमपि संगच्छते। तत्र हि पदानि प्रकृतिर्यस्याः संहिताया इत्यर्थ एव व्याख्यायते। इदमेव मनसि निधाय पाणिनिनापि सूत्रं रचितम्- 'परः सन्निकर्षः संहिता [२११] इत्यत्र संहिता-पूर्ववर्णोच्चारणानन्तरमेव यद्वर्णान्तरमुच्चार्यते न तु तत्रान्तराले कस्यचित्सद्भावः

एवं विधः सः पर उत्कृष्टः सन्निकर्षः प्रत्यासत्तिलक्षणः संहितासंज्ञ इत्यर्थः। अतिशयसन्निधिः संहिता कथ्यते, तत्तु केवलं वाक्य एव भवति, न तु पदे तद्दृश्यते । तस्माद्वाक्यं पदस्य कारणजातम्। संहितालक्षणेन-संहिता नामापरं वाक्यमेव प्रतिपद्यते ।

यास्कोऽप्याह- पदप्रकृतिः संहिता [२१२] तत्र दुर्गाचार्यो वदति संहिता अथवा वाक्यमेव पदानां मूलमिति । [२१६] तत्र मन्त्राभिव्यक्तये ऋषयः संहितामेव वाक्यत्वेन पश्यन्ति, न तु पदमिति पश्यामः। वैदिकाः खलु प्रथमं संहितां (वाक्यम्) अध्यापयन्ति तथैवाध्येतारोऽपि पठन्ति। एवं यज्ञेष्वपि मन्त्राः संहितारूपेण पठ्यन्ते न च पदरूपेणेति।-

कात्यायनोक्तं वाक्यलक्षणम्-

प्राचीनवाक्यलक्षणानि सम्यक् विचार्य भर्तृहरिणोच्यते [२१७] अन्यदपि वार्तिककारीयं पारिभाषिकं शास्त्रं वाक्यलक्षणमस्ति । [२१८] आख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङ्ति च अव्ययेन- कारकविशेषणेन च सहितमाख्यातं तिङन्तं वाक्यम्भवति, तदुदाहरणं- मृदु प्रपचति स्थाल्यां तण्डुलमिति, पचतौ प्रत्यव्ययम् स्थाल्यां तण्डुलमित्यत्र कारकद्वयमस्ति आख्यातस्य मृदु विशेषणम् इत्थं संकलय्य साव्ययकारकं विशेषणं आख्यातमिति । एवञ्च ओदनं मृदु विशदं पचति वाक्यं सकारकविशेषणम्, ओदनं पचति वाक्यं सकारकम्, उच्चैः पठति नीचैः पठति वाक्यं साव्ययमिति । एतस्माद् आख्यातं साव्ययं सकारकम् सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यमिति भाष्यम् । [२१९] वार्तिकस्य द्वितीयो भागः एकतिङ्ति च समुच्चयेन एकतिङ्वाक्यसंज्ञं भवति यथा ब्रूहि-ब्रूहि इति। वार्तिके- एकशब्दः समानवचनः न तु संख्यावाचो ब्रूहि ब्रूहि देवदत्तेत्यत्र वाक्यत्वादामन्त्रितनिघातः सिद्धयतीति कैय्यटः ।[२२०]

[२२१]'नागेशोऽपि- आख्यातपदेनात्र क्रियाप्रधानो लक्ष्यते, तेन त्वया शयितव्यमित्यत्र तिङन्तस्य वाक्यत्वव्यवहारस्तत्र तिङ्ङतिङेति सूत्रे [२२२] तिङ् ग्रहणं कुर्वतः सूत्रकारस्याभिमतं लौकिकमेव पचति भवतीत्येतत्सा- धारणम् । सविशेषणमित्यस्य साक्षात्परम्परया वा यद्विशेषणं तत्सहितमित्यर्थः तेन नद्यास्तिष्ठति कूले इत्यादौ नद्या इत्यादेः समानवाक्यत्वसिद्धिः।

फलतः 'त्वया शयितव्यम्' इत्यत्र वाक्यत्वम्, पचति भवति इत्यादावाख्यातविवक्षायां साध्यसाधने सति आख्यातद्वये समानवाक्यताभावेन निघातो भविष्यति, तत्रैकशब्दः समानवचनः न तु संख्यावाचक इति ।

एतद्वार्तिककारीयं पारिभाषिकं शास्त्रोपयोगि च वाक्यलक्षणमस्ति। तेन एकतिङन्तं वाक्यं भवति, तस्मादेव तेन पचति भवति, पश्य मृगो धावति, इत्यादीनामपि वाक्यत्वं वा सञ्जायते ।

एवमन्यत्र- अर्थैकत्वादेकं [२२३] वाक्यं साकांक्षं चेद्विभागे स्यादिति जैमिनिनोक्तं लौकिकं वाक्यस्य लक्षणं दृष्टिपथमायाति। **तच्च** - यत्पदं परस्परान्वितपदार्थकं तदर्थैकत्वादेकं वाक्यं भवति विभागे पृथक्कारे चेत्तत्पदं साकाङ्क्षं यदि स्यात् । तदुदाहरणम्-

" देवस्य त्वा सवितुः प्रसवे, अश्विनो बाहूभ्याम्, पूष्णो हस्ताभ्याम्, अग्नये जुष्टं निर्वपामिइत्यत्र अग्नये जुष्टं पदपृथक्कारे देवस्य त्वा पदसमूहो साकांक्षो भवति। सकलपदसमूहस्य एकः निर्वापोऽर्थोऽस्ति, तेनैतत्समूह एव वाक्यं तैः कथ्यते । अनेन लक्षणेन अयं दण्डो हरानेन ओदनं पच तव भविष्यति उभयत्र निघातसिद्धिः युष्मदादयः सिद्धयन्ति । पारिभाषिकलक्षणेन न तल्लाभः । व्याकरणदृशापि तादृशस्थलेषु निघातो न भवति । हरिणा अनयोः पारिभाषिकलौकिकवाक्यलक्षणयोः संघातपक्षेऽभिनिवेशो मन्यते।

अयं दण्डो हरानेन, ओदनं पच तव भविष्यतीत्यादौ मीमांसकोक्तलक्षणानुसारं निघातः जायते, परं वार्तिककृतोक्तेन निघातो न भवति । अतो हि एतस्माद्वाक्यलक्षणाद्वार्तिककारीयं लक्षणं सर्वतोभावेन शास्त्रे संगच्छते । कैय्यटः [२२४]मीमांसोक्तं वाक्यलक्षणं लौकिकं कात्यायनकृतञ्च पारिभाषिकमाह- अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेदं विभागे स्यादिति लौकिकं वाक्यलक्षणम्। इह तु वाक्यं पारिभाषितमाख्यातं साव्ययकारकविशेषणं वाक्यमिति ।

[२२५]भाष्यसम्मतिः-

तत्र महाभाष्यकारोऽपि कात्यायनस्य वाक्यलक्षणम् अपूर्वं व्याजहार-इदमद्यापूर्वं क्रियते वाक्यसंज्ञासमानाधिकारञ्चेत्यादिना कात्यायनस्य लक्षणमपूर्वं प्रतिपादितम्, इतः पूर्वं एतादृशं सर्वाङ्गीणं दोषरहितं वाक्यलक्षणं नासीदिति व्यज्यते । पूर्वं [२२६] जैमिनिप्रोक्तमेव लक्षणमासीत वार्तिककारीयं वाक्यलक्षणं शास्त्रीयं अत एव तत्रापूर्वता । लौकिकं वाक्यस्य लक्षणं व्याडिकृतमपि श्रूयते ।

उभयोरपि वाक्यलक्षणयोर्विषये प्राचीनकालादेव मतभेदः प्रचलतिकेषाञ्चिन्मतेनाद्यं पारिभाषिकं, द्वितीयं लौकिकम् अपरेषां मतेनाद्यं लौकिकं, द्वितीयं पारिभाषिकमिति । अयं भ्रमः मीमांसकेषु शाब्दिकेषु च सामान्यतो दृश्यते। यथा जैमिनिलक्षणं प्राचीनमीमांसकाः लौकिकं वदन्ति, नव्याः कौमारिलास्तं शास्त्रीयं निगदन्ति। एवं व्याकरणेऽपि भर्तृहरिप्रभृतयो वार्तिककारीयलक्षणं शास्त्रीयवाक्यलक्षणं ब्रुवन्ति, तत्र नागेशस्तु लौकिकमिति कथयन्नास्ते। वाक्यविषयकमतान्तराणिनिघातादिव्यवस्थार्थं शास्त्रे यत् परिभाषितम् इत्यादिना पाठेन वाक्यस्य पारिभाषिकत्वं द्रष्टुं शक्यते ।

कैय्यटः- 'नानाकारकत्वनिघातादि [२२७] निवृत्तये, क्वचिच्च समानवाक्ये निघातयुष्मदादेशाः वक्ष्यन्ते । तत्र लौकिकवाक्यग्रहणनिषेधार्थं वाक्यं परिभाष्यते' ।

भोजः-

वार्तिकारस्तु [२२८] अन्यदेव पारिभाषिकं वाक्यलक्षणमारभते। न च तेन लौकिको व्यवहारः सिद्ध्यतीति उपेक्षते' ।

विट्ठलः-

वाक्यसंज्ञा [२२९] पारिभाषिकी महाभाष्ये उक्ता ।

निष्कर्षतः पतञ्जलिरुवाच-

'इदमपूर्वमद्य क्रियते [२३०] वाक्यसंज्ञा समानाधिकारश्चेति।

नागेशः कैय्यटोक्तं वाक्यस्य पारिभाषिकत्वं न स्वीकरोति, तन्मतेन कात्यायनलक्षणं लौकिकमेवास्ति। नागेशानुसारं कैय्यटस्य भ्रम एव तत्र कारणम्। तदुक्तम्-'परे तु आख्यातं सविशेषणं वाक्यमिति लक्षणं लौकिकमेव पचति भवतीत्येतत् साधारणम्। यत्तु कैय्यटेनास्य पारिभाषिकत्वमुक्तं तत् प्रमादात् ।.[२३१].. तस्माद् आद्यलक्षणं वाक्यस्य टेरित्येतच्छास्त्रलोकसाधारणम् । इति ।

पतञ्जलिकैय्यटभोजप्रभृतयो वाक्यस्य पारिभाषिकत्वमेव स्वीचक्रुस्तस्मात्कात्यायनकृतलक्षणमेव श्रद्धेयम्, नागेशोक्तं नात्र संगच्छते। नागेशस्य तत्र किं तात्पर्यमिति नावगम्यते ।

वार्तिकमेव वाक्यम् - शब्दशास्त्रे वार्तिकमिति पदेन वाक्यं गृह्यते, एतस्मादेव वार्तिककारः कात्यायनो वाक्यकारोऽप्युच्यते। वार्तिकवाक्ययोस्तत्र पर्यायवाचित्वमेव वार्तिककारवाक्यकारयोरपि पर्यायवाचित्वं प्रायशो लभ्यते। तदुक्तम्-

वाक्यं विवरणं वार्तिकं च । यत् करणात् कात्यायनो वार्तिकार उच्यते । वार्तिकं हि नाम वृत्तेर्व्याख्यानम् । शाब्दिकेषु [२३२] वार्तिकस्य - वाक्यम्, व्याख्यान सूत्रभाष्यम्, सूत्रम्, अनुतन्त्रम्, अनुस्मृतिप्रभृतिशब्दानां व्यवहारस्तत्र वाक्यम्-

कैय्यटः-

१- सूत्र [२३३] व्याख्यानार्थत्वाद् वाक्यानाम्।

२- [२३४] तुल्यविचारत्वाद् भाष्ये त्रिसूत्री पठित्वा वाक्यं पठितम्।

इत्यादिनोदाहरणद्वयेन वार्तिकं वाक्यपर्यायरूपेण सस्मार। एवं 'उपालम्भे शपेर्वाक्यादिति वार्तिकमेव वाक्यमित्यत्रानेके ग्रन्थाः [२३५] प्रमाणम्। तस्माद् वार्तिकमेव वाक्यं न तु सूत्रमिति।

सूत्रेषु क्रियापदाभावत्वात्,[२३६] वार्तिकेषु तद्दर्शनादिति। वार्तिकेषु क्रियापदमवश्यं व्याप्तं दृश्यते । सूत्रेषु न तद्व्यापकत्वेनावलोक्यते । एतस्मात्कारणात् वार्तिकमेव वाक्यम् न तु सूत्रमिति भाषाविदां तात्पर्य्यम् केषाञ्चिदत्र विमितिः दृश्यते-नारायणमिश्रस्य '[२३७]' तत्र विप्रतिपत्तिः, तेन युधिष्ठिरोक्तं न मन्यते। सूत्रमपि वाक्यं भवितुमर्हति। तेनोच्यते यद्भाष्योद्धृतवार्तिकेषु बहुत्र क्रियापदं नोपलभ्यते ।

अस्तिर्भवन्ती परोऽप्रयुज्यमानोऽप्यस्ति सिद्धान्तानुरूपं वैय्याकरणैः सूत्रेष्वपि क्रियापदमवगम्यते, कथं तर्हि वार्तिकमेव वाक्यं, न सूत्रमिति। भवतु नाम वाक्यं सूत्रमपि न क्षतिः परन्तु वार्तिकपदं वाक्यारूढमिति मन्यामहे । बहुभिश्चाचार्य्यैः तदेवाङ्गीक्रियत इति भावः। तस्मान्मन्यामहे वार्तिकमेव वाक्यमिति ।

वार्तिककारकात्यायनस्य वाक्यकाररूपेणापि बहुभिश्चर्चा क्रियते। तदुदाहरणानि वार्तिकरूपाणि उपन्यस्यन्ते तत्र साक्षाद्वाक्यकारत्वेनैव सः स्मर्यते। तेषु भर्तृहरि [२३८] कुमारि-लजिनेन्द्रबुद्धि-क्षीस्वामि-हेलाराज-हेमचन्द्र-हरदत्त-सायणनागेशप्रभृतयो विद्वांसस्सन्ति । तेषां ग्रन्थावलोकनेन वार्तिककारो वाक्यरूपेण द्रष्टुं शक्यते ।

भर्तृहरिः - [२३९] एषा भाष्यकारस्य कल्पना न वाक्यकारस्य। यदेवोक्तं वाक्यकारेण वृत्तिसमवायार्थ उपदेशः कृतः । शास्त्रे वाक्यकारेणनिघातादिव्यवस्थार्थं यद्वाक्यलक्षणं परिभाषितम् ।

कुमारिलः- धर्माय [२४०] नियमं चाह वाक्यकारः, प्रयोजनम् ।

कैय्यटः- द्वितीय [२४१] वाक्यलक्षणं वाक्यकारेण पठितम् ।

एकतिङ्- वाक्यमिति ।

क्षीरस्वामीः- [२४२] सौत्राश्चुलुम्पादयश्च वाक्यकारीया धातवः ।

हेलाराजः- [२४३] तथा च एकवद्भावो वक्तव्यः 'इति चोदिते परिहृतं वाक्यकारेण-एकवद्वचनमनर्थमिति ।

भोजः- ननु [२४४] च निरन्तराख्यातं समुच्चितमाख्यातमेकार्थाख्यात-मावृत्ताख्यातमित्यादयो वाक्यविकल्पाः नोत्पद्यन्ते, वाक्यकारो हि मन्यते।

कात्यायनमीमांसकयोर्न एकत्र समावेशः-

वार्तिककारमीमांसकयोर्लक्षणयोरेकत्र समावेशो न भवति, उभे लक्षणे भिन्नविषयके स्तः । १- आख्यातं साव्ययकारकविशेषणं वाक्यम्। २-एक-तिङ्वाक्यमिति लक्षणद्वयं वाक्यकारस्य, अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यादिति मीमांसकोक्तं लक्षणम्। हरिणात्रोभयोः समामेशः न समर्थ्यते ।

[२४५] निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितम् ।
साकाङ्क्षावयवं तेन न सर्वं तुल्यलक्षणम् ।।

इत्यत्र कारिकायां तेन न सर्वं तुल्यलक्षणमित्यादिना सूच्यते [२४६] यल्लक्षणयोः क्वचित्समावेशः क्वचिन्न दृश्यत इति । एवं निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितमित्यादिना वार्तिककारीयं लक्षणम्, साकाङ्क्षावयवमित्यादिना जैमिनिनोक्तं वाक्यलक्षणं संगच्छते । वार्तिककारस्तु, युष्मदस्मदादेशनिघाताद्यर्थमाख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङ् वाक्यमिति अन्यदेव लौकिकात्पारिभाषिकं वाक्यलक्षणमारभते। न च तेन लौकिको व्यवहारः सिद्ध्यतीत्युपेक्ष्यते तदुक्तं-निघातादिव्यवस्थार्थमिति। [२४७]सम्बन्धिनामत्र सूचना- तद्यथा- 'यत्ते दिवो दुहितर्मर्तभोजनमित्यत्र सुबामन्त्रिते [२४८] पराङ्गवत्स्वरे इति, अनेन पराङ्गवद्भावेन दिव इत्यस्य

निघातः । नद्यास्तिष्ठति कूले,'शालीनां ते ओदनं दास्यामी' त्यनयोः प्रथमे वार्तिकारोक्तवाक्यलक्षणेन मीमांसकोक्तलक्षणेन च निघातसिद्धिः उभाभ्याञ्चात्र द्वितीये समानवाक्ये निघातयुष्मदस्मदादेशा [२४९] वक्तव्या इति वार्तिकबलेन समानरूपेण युष्मदस्मदादिसिद्धये समावेशः । परन्तु अयं दण्डो हरानेन ओदनं पच तव भविष्यति ओदनं पच मम भविष्यतीत्यत्र तिङन्तद्वयविद्यमानादे-कतिङ्वाक्यमिति लक्षणं न चरितार्थम् ।

यद्यपि मीमांसकोक्तं लक्षणं संघटते, तेन निघातसिद्धिः। युष्मदस्मदादेशाश्च सिद्ध्यन्ति परन्तु वाक्यकारीयं लक्षणं नास्तीत्यस्मान्निघातादयोऽत्र नेष्यन्ते । अतो वार्तिककृतोक्तं लक्षणमेव उचितमिति । मीमांसकलक्षणम्-

[२५०] साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम् ।
कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते ।।

भेदे-विभागे-साकाङ्क्षावयवमभेदे परानाकांक्षशब्दकम्, कर्मप्रधानं-क्रिया-प्रधानम्, गुणवद् विशेषणपदसंयुतम्, एकार्थमेकप्रयोजनार्थम्, वाक्यमिष्यते पदवादिभिः । तत्र पदसंघातो वाक्यं, संसर्गो वाक्यार्थ इति मतमनुसृत्यैतत्प्रवृत्तम् ।

वाक्यं [२५१] तु अर्थैकत्वात्- प्रयोजनस्यैकत्वात् एकमेव भवति, पदं पदविभागे प्रतिपदं साकाङ्क्षं भवतीति । पदमपि स्वार्थाभिव्यक्तिवेलायाम् पूर्णम्, परं वाक्यगतैः स्वैरपि पदैः सह पूर्णार्थं सृजति। वाक्ये पदविभागोऽपि सम्भाव्यते, तदर्थोऽपि विवक्षते । भर्तृहरिणैतन्न स्वीक्रियते तन्मतेन शब्दार्थयोर्विभागोऽनुचितोऽस्ति, अविद्वान् तत्र तत्प्रतिपद्यते । यथोक्तम्-

[२५२] शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति ।
विभागैः प्रक्रियाभेदमविद्वान्प्रतिपद्यते ।।

मीमांसकैस्तद्विपरीतं शब्दार्थयोः विभागः स्वीक्रियते । पदसत्ता तैः प्रोक्ता, पदसंघातो वाक्यमिति दर्शनात् ।

निम्नोक्तकारिकाद्वयस्योद्भावनेन वाक्यकारकृतलक्षणेऽतिव्याप्तिव्याप्तिदोष-निवृत्तये प्रयतते भर्तृहरिः- [२५३]

सम्बोधनपदं यच्च तत् क्रियाया विशेषकम् ।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ।।
यथानेकमपि क्त्वान्तं तिङन्तस्य विशेषकम् ।
तथा तिङन्तं तत्राहुस्तिङन्तस्य विशेषकम् ।।

'व्रजानि देवदत्त' अत्र देवदत्त पदस्य नाव्ययत्वम्, न कारकत्वम् न तत् क्रियाविशेषणम्, कथमत्र वार्तिककारलक्षणेन निघातो भवति तदत्र सम्बोधनपदं यच्च तत् क्रियाविशेषकम्, सामान्येनाभिधानात् सक्रियाविशेषणस्यापि आख्यातं भवति, तस्मान्नात्र दोष उद्भावनीयः । आमन्त्रितस्य व्रजति क्रियाऽत्र सम्बोध्यमानदेवदत्ताख्या वर्तते सा च यज्ञदत्ताद्य संबोध्यमानतः पृथक्भूत भवति, तस्मादत्र व्रजति क्रिया विशिष्टैव । क्रियाया विशेषणं क्वचित्समानाधिकरण्येनापि भवति । क्रियाविशेषणं द्विविधम् । यथा ' सुष्ठु करोति,'शोभनं करोतीत्यत्र क्रियार्थस्य सुष्ठु विशेषणेनैव प्रतीतिः यतो हि सुष्ठुप्रभृतीनां करोत्यादिक्रियया समानाधिकरण्यम् । वस्तुतः केवलमानय देवदत्तं व्रजत्यसाविति कामाचारार्थं 'व्रजानि देवदत्त' इति सम्बोधनपरकवाक्यमुच्यते । नात्र सामानाधिकरण्यम्, अत्र तु व्रजति विशिष्टा क्रिया वर्तते । एतस्मात् व्रजन क्रियात्र आख्यातम् देवदत्तेन साकं विशेषणभूतं तस्मान्निघातोऽत्र प्राप्नोति । व्रजानि देवदत्त तिङ्ङतिङ इत्यस्योदाहरणं नास्ति। अतो हि पूर्वकृतवाक्यलक्षणेषु एतस्याव्याप्तिः न शङ्कनीयेति ।

वाक्यभेदादपि निघातो न भवति यथा - पूर्वं स्नाति पचति ततो व्रजति - इत्यत्र तत एतदुत्तरं कथं निघातः सिद्धयति । तिङन्तादुत्तरं तिङ्प्रत्ययस्यापि प्रतिषेधोऽतिङिति वचनेन क्रियते, तस्मात् स्नाति इत्युत्तरं पचतेः कथं निघातः, परमत्र निघातस्तु कल्प्यते। एतस्योत्तरम्- यथानेकमपि क्तान्तमित्यादिना प्रस्तूयते। वस्तुतोऽत्र वाक्यभेद एव नास्ति यतो हि व्रजतीति क्रियैवात्र प्रधानभूता वर्तते, इतराणि व्रजतेरेव विशेषणानि सन्ति।क्त्वान्तपदं तिङन्तस्य विशेषणं भवति, अत्र स्नानभोजनपानादिभिः व्रजनाक्रिया विशिष्यते कृदन्तक्तान्तप्रत्ययैः- तद्यथा देवदत्तः स्नात्वा पक्त्वा भुक्त्वा व्रजति। सर्वमपि क्तान्तमत्र तिङन्तस्य विशेषकम्। एवं 'देवदत्तः पूर्वं स्नानि पचानि ततो भुनजै ततो व्रजानि' इति अस्मिन्वाक्ये तत इत्यत्रानेकमपि तिङन्तं तिङन्तस्य प्रधानभूव्रजनक्रियारूपस्य विशेषकं स्वोत्तरकालिकसम्बन्धेन विशेषणमपीति वाक्यविदां विचारः ।

तिङ्वाक्येन निघातः तिङ्रहितेन च प्रतिषेध सार्थकः । अन्यथा समानवाक्यत्वाभावादेवात्र निघाताप्राप्तिरिति स प्रतिषेधो व्यर्थस्तदाह-

२५६बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता ।
तिङ्ङतिङ्भ्यो निघातस्य पर्युदासस्तथार्थवान् ।।

साकांक्षेषु इत्यादिना पदेन मीमांसकलक्षणं व्यज्यते। बहुषु तिङन्तेषु इत्यादिना वार्तिककारीयमपि लक्षणं स्मर्यते । अयं भावः सति बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यत्वस्वीकारे सति तिङ्भ्यः तिङन्तेभ्यः परेषां तिङाम् तिङन्तानां निघातस्य पर्युदासः प्रतिषेधोऽर्थवान् भवतीति ।

वार्तिककारेण तिङ्ङतिङः- इत्यत्रातिङ् ग्रहणमनर्थकं प्रतिपादितम् एवं तस्य साकांक्षेष्वपि बहुषु तिङन्तेषु वाक्यभेदोऽभिमतः । आख्यातं साव्ययकारकविशेषण- मित्यत्रैकवचनमेवाभिप्रेतम्, आख्यातं- तिङन्तसामान्यस्य बोधकमिति। तदुक्तं हरिणा-

२५७ एकतिङ् यस्य वाक्यं तु शास्त्रे नियतलक्षणम् ।
तस्यातिङ्ग्रहणेनार्थे वाक्यभेदान्न विद्यतेसूत्रकारस्य

त्वतिङ्ग्रहणादेकमेवाखण्डवाक्यमर्थैकत्वादाख्यातभेदेऽप्यभिप्रेतमिति पदं वार्तिककारमतेन तत्र वाक्यभेद एवोपतिष्ठते- तन्मतेन नियतलक्षणं एकतिङ्वाक्यम् । तल्लक्षणं आख्यातं साव्ययेत्यत्राख्यातपदमेकवचनपरं भवति तद्युक्तमेव वाक्यं भवति। पचति भवति इत्यादौ अनेकतिङन्तसत्वे वाक्यभेदात् समानवाक्य एव निघातप्राप्तया तिङ्ङतिङः सूत्रनिघातग्रहणस्य न प्रयोजनमिति तदभिप्रायः। सूत्रकारस्य तिङ्ङतिङः सूत्रग्रहणादखण्डपक्ष वाक्यस्याभिरुचितः स तु मीमांसकोक्तेनापि वक्तुं शक्यते 'अर्थैकत्वादेकं वाक्यमिति । भर्तृहरिणोक्तम्-

२५९ अनेकाख्यातयोगेऽपि वाक्यं न्यायपथानुगैः ।
एकमेवेष्यते कैश्चिद् भिन्नरूपमिव स्थितैः ।।

कैश्चिदपवादोत्सर्गयोराख्यातभेदेऽपि एकवाक्यतैवेष्यते, न तु भिन्न वाक्यतेति। यद्यपि तत्कालं सा दृश्यते तथापि न सा रोचते । वस्तुतस्तु आकांक्षायोग्यतासन्निधिपूर्वकं एकवाक्यतां गतं वाक्यं ज्ञेयमिति भावः । अतो हि सर्वसिद्धये वार्तिककारीयं वाक्यलक्षणमेवोचितमिति।

लौकिकं वाक्यलक्षणम् -

लोकेऽर्थबोधकता अर्थपरिसमाप्तिश्च वाक्येनैव भवति। निष्कर्षतोऽर्थ-प्रतिपत्तिर्वाक्यादेव सर्वैः प्राचीनाधुनिकभाषाविद्भिरुद्घुष्यते । फलतः संहिताकालादेव वाक्यपरिशीलनं दृष्टिपथमायाति । तस्मादेव भर्तृहरिपर्यन्तं वाक्यस्याष्टौ विकल्पाः समुदभूवन्, तदतिरिक्तमन्याचार्य्यैरपि यथावसरं वाक्यलक्षणकरणे प्रयतितम्-

'उच्यते' इत्यस्माद्वाक्यम्, वचेर्ण्यति,'चजोः [२६०] कु घिण्यतोः इत्यादिना कुत्वम्, शब्दसंज्ञात्वात् वचोऽशब्दसंज्ञायाम् [२६१] अनेन न निषेध इति व्याकरणशास्त्रम्। एतद्विपरीतं वाच्यमेव सिद्ध्यति, वाच्यं तु [२६२] कुत्सिते हीने वचनार्हे च वाच्यवदिति कोशः । एवमपि वक्तुमुपक्रमते पट इत्येकं पदम् पटमानय इत्येकं वाक्यमित्याकारकप्रतीतिः यद् भवति वर्णातिरिक्तं पदं, पदातिरिक्तं च वाक्यमिति सिद्धान्तमभ्युपेत्य इति बोध्यम् । लोके तावदेकार्थकपदसमूहात्मकमेव वाक्यमित्येव धारणा प्रकल्प्यते । प्रथमतो व्याडिराचार्यस्य वाक्यलक्षणं प्रस्तूय तदनुसारीणि वाक्यलक्षणानि आलोच्यन्ते वाक्यादेरामन्त्रितस्या-सूयासम्मतिकोपकुत्सनभर्त्सनेषु ' इति सूत्रे हरदत्तः-[२६३] एकार्थः पदसमूहो वाक्यमिति । यदाह भगवाञ्जैमिनिः अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात् इति । क्वचित्तु एकतिङ्पदसमूहो वाक्यमिति पठ्यते एका तिङ्विभक्तिर्यत्र स एकतिङिति । क्वचित्तु न किञ्चिदपि वाक्यलक्षणं पठ्यते ।

१- पदसंघातजं वाक्यम् अत्रापि संघात पक्ष एवाभिमतः ।

२- पदसमूहो हि वाक्यमिति न्यासकारः [२६४] ।

३- एकार्थः पदसमूहो वाक्यम् ।

४- भर्तृहरिणा वाक्यविषये स्वीयं मतं प्रत्यक्षतया न प्रकाशितम्, परन्तु पुण्यराजः तदभिमतं निरवयवशब्दरूपं वाक्यस्य लक्षणं प्रसङ्गं सूचयति।

तद्यथा -

टीकाकारश्चामुमेव [२६५] पक्षं सूत्रकारस्याभिप्रायसमाश्रयणेन युक्तियुक्तं मन्यमानः बाह्यरूप आन्तरो वा निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दस्फोटलक्षण एव वाक्यमिति वदति ।

५- हेलाराजोऽपि वाक्यस्य निर्विभागत्वं-अनवयवत्वं वाऽभिलषति। तद्यथा वाक्यस्यैव [२६६] निरंशस्य वाचकत्वादन्तरा पदप्रतिपत्तिः ।

६- अमरसिंहोक्तं वाक्यलक्षणं प्रसिद्धम्

सुप्तिङन्तचयो [२६७] वाक्यं क्रिया वा कारकान्विता । इत्यत्र लक्षणद्वयं प्रथमं शब्दात्मकं सुप्तिङन्तचयो वाक्यम्, द्वितीयमर्थात्मकं क्रिया वा कारकान्विता वाक्यं भवति इति । तिङन्तानां चयः - पचति पश्य पचति भवति पाको भवतीत्यर्थः, सुबन्तानां चयः प्रकृतिसिद्धमिति। पचति भवति इत्यध्याहारस्य भाष्यकारमते आवश्यकत्वमस्ति । भाष्यकारानुसारं वृक्षः प्लक्षः इत्यत्राप्यभिधानादस्तीति गम्यते । तिङ्सुबन्तचयः चैत्रः पचति इत्यादिकस्यापि वाक्यत्वमुपद्यते ।

क्रिया वात्र इत्यत्र वा शब्दस्यार्थः पदार्थः । तेन कारकान्वितक्रिया-बोधकसुप्तिङन्तचयो वाक्यमिति तदर्थः । तत्र सुप्च तिङ् च सुप्तिङ् सुप्तिङ् च सुप्तिङ् चेति विग्रहेण द्वन्दस्समासे सरूपाणामेकशेष इत्येकशेषं कृत्वा षष्ठीतत्पुरुषे द्वद्वान्ते श्रूयमाणं प्रत्येकमभिसम्बद्ध्यत इति प्रत्येकसम्बन्धे सुबन्तचयः तिङन्तचयः सुप्तिङन्तचयश्च वाक्यमिति तदर्थः । [२६८] जगदीशेनामरोक्तं लक्षणव्याप्तिदोषसत्त्वात् नाङ्गीक्रियते। तद्यथा-सुप्तिङन्तचयो नैवमतिव्याप्ति- अव्याप्ति-आदिदोषत इति। 'सुप्तिङ्चयो नैवमव्याप्त्यतिव्याप्तिदोषतः इति पाठः सुसाधुः प्रतिभाति ।

एषां क्रमेणोदाहरणानि-

१- सुबन्तचयः-छात्रेण पठितव्यम् ।

२- तिङन्तचयः- पचति भवति ।

३- सुप्तिङन्तचयः- छात्रः पचति ।

एवं प्रयुज्यमानैरप्रयुज्यमानैर्वा कर्त्रादिभिर्विशेषणैः सहितमुच्यत इति वाक्यम् यथा- 'धर्मो वा रक्षतु,' अप्रयुज्यमानं यथा- 'शीलं ते स्वम्' अस्त्यत्र गम्यते।

वाचस्पत्ये-

[२६९] वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः । इत्युक्ते स्वार्थ-बोधसमाप्तेः पदसमुदाये वैय्याकरणाः वाक्यत्वमिच्छन्ति ।

शब्दकल्पद्रुमे-

[२७०] वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः। एवं परस्पराभिसम्बन्धः पदसमूहो वाक्यमिति वृद्धाः।

[२७१] **जगदीशः-** मिथः साकांक्षशब्दस्य व्यूहो वाक्यं चतुर्विधम् न्यायभाष्यकारः

[२७२] पदसमूहो वाक्यमर्थसमाप्तो (समर्थम्)

[२७३] तर्कसंग्रहे-वाक्यं पदसमूहः।

[२७४]तर्कभाषायाम्-वाक्यं त्वाकाङ्क्षायोग्यतां संन्निधिमतां पदानां समूहः।

भोजः-

[२७५] वयं त्वेकार्थपरः पदसमूहो वाक्यमित्येव प्रतिजानीमहे। तत्र पदैरपि वाक्यमारभते, वाक्यैरपि च प्रकरणमारभत इति ।

[२७६] **विश्वनाथो वाक्यलक्षणमाह-**

वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः ।

वेदान्ते-

[२७७] वाक्यजन्यज्ञाने आकाङ्क्षायोग्यतासत्तयस्तात्पर्यज्ञानञ्चेति चत्वारि कारणानि ।

[२७८] **नागेशः-** शाब्दे बोधे सहकारिकारणानि आकांक्षायोग्यतासत्तितात्पर्याणि ।

चन्द्रालोके-

[२७९] विभक्त्यन्तं पदं वाक्यम्

-तट्टीकायाम् वैद्यनाथः पायगुण्डः-

[२८०] विशिष्टैकार्थप्रतिपादकनिराकांक्षपदसमूहो वाक्यम् ।

एषु लौकिकवाक्यलक्षणेषु सर्वत्र पदसमूहस्यावलम्बः पुनश्च आकांक्षांयोग्यतासत्तिशाब्दबोधसहकारिकारणानामभ्युपगमः दृश्यते । तत्र तात्पर्य्यमपि चतुर्थशाब्दबोधकारणं कैश्चित् प्रतन्यते । शाब्दबोधसह-

कारिकारणानां विचारोऽभिहितान्वयवादपक्षमाश्रित्य क्रियते, यतो हि तन्मतेन वाक्यनिष्पत्तौ आकांक्षादयः कारणीभूताः भवन्ति ।

अखण्डवाक्यस्वरूपम् -

अखण्डवाक्यस्य स्वरूपं 'यथैक एकसर्वार्थप्रत्यय' इत्यादिकारिकया यथा चित्रज्ञानं सर्वाकारमैकमेव तथैव वाक्यस्यापि सर्वाकारमखण्ड स्वरूपमुपजायते । तत्र वाक्यस्याखण्डत्वं पानकरसमयूराण्डरसचित्र-रूपनरसिंहगवयचित्रज्ञानवत् अनुभूयते । अतो हि वर्णपदविभागशून्यं वाक्यमेव वाचकम्, तदेवाखण्डमिति । नागेशोऽपि- 'त्वं [२८१] ग्राममश्वः अश्वो धावति, अजापयः शत्रून्, अजापयः पिब इत्यादौ नामाख्यातसारूप्ये वाक्यार्थादेव पश्चात् पदपदार्थनिर्णय इत्यखण्डमेव वाक्यं बोधकमखण्डार्थ-स्येत्युचितम् । तदुक्तं हरिणा-

[२८२] **यथैवानर्थकैर्वर्णैर्विशिष्टार्थोऽभिधीयते ।**
पदैरनर्थकैरेवं विशिष्टार्थोऽभिधीयते ।।

यथा पदवादिनो वर्णैरनर्थकैरभिव्यक्तो विशिष्टार्थः पदरूपः स्फोटात्मा वाचक इति स्वीकुर्वन्ति तथैव वाक्यवादिनः पदैरनर्थकैरभिव्यक्त एव विशिष्टार्थः स्फोटात्मा वाचक इति वदन्ति । अन्यत्रापि-

[२८३] **न हि नाम किञ्चित्पदं नाम रूपेण नियतं क्वचित् ।**
पदानामर्थरूपं च वाक्यार्थादेव जायते ।।

किञ्चितपदं स्वरूपेण न नियतं नाम किन्तु वाक्यार्थादेव पदार्थविभागः यथा 'ग्राममश्वः', अश्वो गच्छतीत्यादौ ।

शास्त्रेऽखण्डस्फोट एव मुख्य इति नव्याः यदाह- तत्र [२८४] वाक्यस्फोट एव मुख्यः इति । अत्र वाक्यस्फोटपदेनाखण्डवाक्यस्फोटो [२८५] गृह्यते। वाक्यस्याखण्डपक्षं सानुबन्धम् साभिनिवेशमाह [२८६] भर्तृहरि अव्यक्तः क्रमवाञ्छब्दः उपांश्वियमधीयते ।

अक्रमस्तु वितत्येव बुद्धिर्यत्रावतिष्ठते ।।
यथाक्षेपविशेषेऽपि कर्मभेदो न गृह्यते ।
आवृत्तौ व्यज्यते जातिः कर्मभिर्भ्रमणादिभिः ।।
वर्णवाक्यपदेष्वेवं तुल्योपव्यञ्जना श्रुतिः ।
अत्यन्तभेदे तत्त्वस्य सरूपेव प्रतीयते ।।

ऐऽनवयव शब्द इत्यत्र इमाः कारिकाः समुपन्यस्तास्सन्ति। अत्र कैय्यटः-वैय्याकारणाः वर्णातिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति इति व्याचख्यौ । तत्र येनोच्चारितेनेत्येकवचनेन गौरित्यस्यैकपदत्वं सूचितम्। अत्र वाक्यं ब्रुवता आचार्येनाखण्डवाक्यमेव प्रतिपादितम्, 'पदप्रकृतिः संहिता इति प्रातिशाख्यवचनमत्र प्रमाणम् पदानां प्रकृति इत्यादिना पष्ठी तत्पुरुषेऽखण्डवाक्यमेव आकाङ्क्षते [२८७] पुनः नागेशो वदति स्फोटवादे वर्णमालायाम्- एकं पदम् , एकं च वाक्यम् इत्यादि प्रतीतेः तदेवेदं पटपदं, तदेवेदं घटमानयेति वाक्यम् इत्यादि प्रतीतेश्च वर्णातिरिक्तमेकमखण्ड-प्रकृतिप्रत्ययादिविभागरहितं पदं वाक्यं च वर्णव्यंग्यमवश्यं स्वीकार्यम् । अतो हि वर्णपदव्यतिरिक्तमेकमखण्डं वाक्यमवश्यमङ्गीकरणीयमेव भवति वैय्याकरणैः ।

अपि च -

[२८८] पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । इति ।

वाक्यात्पदानामत्यन्तं प्रविवेकः पार्थक्यं पृथक्सत्ता वेति काचन न विद्यत इत्यर्थः । वाक्ये च प्रतीयमानानि पदानि पदे प्रतीयमानाः वर्णाश्च न सन्तीति बोध्यम् । अतोऽखण्डवाक्यमेवशरणम्। एवञ्च- एकस्माद्वाक्यात् पदाद्वा अयमर्थो बुद्धः इत्यनुभवादखण्डः स्फोटो वाचकः। यथा मणिकृपाणादौ दृश्यते । वस्तुतो बाह्याभ्यनतरञ्च वाक्यमखण्डमेव भवतीति सिद्धान्तः।

निर्णयतो वाक्यमखण्डम्, तत्र भर्तृहरिणाखण्डवाक्यस्यावधारणा त्रयोदशकारिकाभिः (९६ तः १०८ पर्यन्तम्)समुपस्थापयते। अखण्डपक्षे तावदयं तर्कः-

[२८९] **संसर्ग इव रूपाणां शब्देऽन्यत्र व्यवस्थितः ।**
नानारूपेषु तद्रूपं तन्त्रेणापरमिष्यते ।। इति ।

'श्वेतो धावती' त्यादौ श्वा इतो धावति किम् ? श्वेतोऽश्वो धावति किम् एवंविधप्रश्नद्वयस्यापाकरणाय कथमेकं वाक्यं सेत्स्याति । वाक्ये श्वा इत्येतत्रूपे संहितावशाद्विनष्टे, तत्र पदार्थस्यासत्वे कथमर्थावगमनमिति प्रश्नः । तत्र वाक्यस्याखण्डत्वे श्वेत इत्यादौ 'श्वा इत इति श्वेत'' एवंविधरूपाणां तन्त्रेणोच्चारणेन संसर्ग इव व्यवस्थितः । तन्त्रं हि नाम अनेकार्थबोधनाभिप्रायेण सकृदुच्चारणम् । इव शब्दोपादानं श्वेतस्य, वस्तुतोऽखण्डपक्षे नानारूपाणां संसर्ग न व्यवस्थित इति कथयितुम् तन्त्रेणापरमिष्यते इत्यादिना श्वा इतः श्वेत इति तन्त्रेणावस्थितमपरमखण्डं तद्रूपं नानारूपेषु प्रत्यायकं, ताभ्यामर्थद्वयबोधोऽतो हि वाक्यस्याखण्डत्वे न कश्चन दोषावसरः । नागेशोऽपि २९० श्वेतो धावति इत्यादावखण्डमेव वाक्यं तन्त्रेणोभयार्थबोधकं स्वीकरोति। प्रकारान्तरेण व्याचिख्यासुराह-

२९१ **तस्मिन्नभेदे भेदानां संसर्ग इव वर्तते**
रूपं रूपान्तरात्तस्मादनन्यत् प्रविभज्यते ।।

तस्मिन्नेव भेदरहिते केवलं 'श्वेत' इति रूपे भेदानां पूर्वकारिकोक्तभेदद्वयस्य संसर्ग अवस्थितो वर्तते ।

एतस्मात्कारणाद् रूपं श्वेत इत्यखण्डरूपम् रूपान्तरात्-

श्वा इत इत्यस्मात् रूपद्वयात् अन्यदेव आवृत्त्योभयार्थप्रत्यायकतया प्रविभज्यते । तन्त्रेणोच्चारणं वक्तृ, बोधस्तु आवृत्त्या बोद्धुरिति। अत्र श्वेत इत्यस्यैवाखण्डत्वसूचनम्, न तु पूर्वोक्तरूपद्वयस्येति भावोऽविशेषः। पूर्वस्मिन् रूपद्वयस्य प्रत्यायकम्, तद्द्वयं स्वस्वार्थस्य प्रत्यायकमिति स्थितम्।

प्रत्याय्यप्रत्यायकयोरभेदप्रदर्शनम्-

शब्दस्वरूपयोर्भेदे प्रथमः पक्षस्तयोरभेदे द्वितीयः पक्षस्तावदिमौ प्रत्याय्यकयोर्विषयभेदेन भेदाभेदौ शास्त्रे दृष्टौ, प्रसंगात्तदत्राह-

२९२ **शास्त्रे प्रत्यायकस्यापि क्वचिदेकत्वमाश्रितम् ।**
प्रत्याय्येन क्वचिद्भेदो ग्रहणग्राह्ययोः स्थितः ।।

शास्त्रे कुत्रचित्प्रत्यायकस्य प्रत्याय्यकेन सार्धमेकत्वमभेदात्वं चाप्याश्रितम्। कुत्रचिच्च ग्रहणग्राह्योः प्रत्याय्यप्रत्यायकयोर्भेदः स्थितोऽत्रावसेयः। प्रत्याय्यप्रत्याय-कयोरभेदस्तावदुच्यते, तत्रैवानयोर्भेदोऽपि च निर्दिश्यते-

[२९३] **ऊ इत्यभेदमाश्रित्य यथासंख्यं प्रकल्पितम् ।**
लृङ्लृटोर्ग्रहणे भेदो ग्राह्याभ्यां सह कल्पितः ।।

श्लोकस्य प्रथमांशेनाभेदपक्षः, द्वितीयांशेन भेदपक्षः निर्दिश्यते तत्राद्ये-'ऊ० कालोऽज्झ्र [२९४]स्वदीर्घप्लुत इत्येक उच्चारित ऊकारः प्रत्यायकः, त्रयस्तु ह्रस्वदीर्घप्लुता उकारा अनुच्चरिताः प्रत्याय्या इति ।

प्रत्याय्यप्रत्यायकयोरभेदमादृत्यात्र शास्त्रे यथासंख्यं प्राप्नोति। तत्र 'ऊकालो' सूत्रे वार्तिकम् -ह्रस्वादिषु समसंख्याप्रसिद्धिनिर्देशवैषम्यात् सिद्धं तु समसंख्यात्वात् त्रयाणां हि विकारनिर्देशः तत्र भाष्यम् ह्रस्वादिषु समसंख्यत्वात् प्रसिद्धिः । किं कारणम् निर्देशवैषम्यात्। तिस्रः संज्ञा एकः संज्ञी । वैषम्यात्संख्यातानुदेशो न प्राप्नोति । एवम्-ऊकाल इति तत्कालस्येतिवद्व्याख्येयम् । एकद्वित्रिमात्रा अचः क्रमेण ह्रस्वदीर्घप्लुतसंज्ञा। समाहारेऽपि सौत्रं पुंस्त्वम्। न च संज्ञित्रयनिर्देशे मानाभावः, संज्ञात्रयस्य लिङ्गत्वादिति विश्वेश्वरः। तत्र समसंख्यानिर्देशादुद्देश्यविधेययोः क्रमेण ह्रस्वदीर्घप्लुतसंज्ञाः त्रिषु उकारेषु संतिष्ठत इत्यस्मान्न दोषः ।

एतयोर्भेदपक्षे ' स्यतासी लृलुटोः' इति सूत्रमुपस्थाप्यते तत्र लृशब्देन लृङ्लृटौ प्रत्याय्येते तद्यथाक्रमं लृलुटोः स्यतासी स्याताम् भविष्यति अभविष्यत् भविता सामान्यग्रहणन्तु लृङ् लृटोः भवति। स्यतासीत्यत्र द्विर्वचनम्, लृट्लृङ्लुटा इत्यत्र बहुवचनम्, उद्देश्यविधेयवैषम्ये यथासंख्यभावस्याभावः प्राप्नोति । यथासंख्यमनुदेशः समानामित्यत्रोक्तम् संख्यासाम्यं शब्दश्चेद्णलादयः परस्मैपदानाम् । डारौरसः प्रथमस्य, एचोऽयवायाव इत्यादि निर्देशः। अर्थतश्चेत् लृलुटोः नन्द्यादिभ्यो ल्युः सिन्धुतक्षशिलादिभ्योऽणञौ अरीहणादिभ्यो वुञ् एषु प्रत्याय्यप्रकृतीनां बहुलता, प्रत्यायकप्रत्ययानां तु एकत्वं क्वचिद्द्वित्वं रूपसंशयभेदः दृश्यते । अत्र पक्षद्वयेन शब्दतोऽर्थतश्च साम्यम् क्रियतामिति । एवं रीत्या 'स्यतासी प्रभृतिषु शब्दतः डारौरस इत्यर्थस्य साम्यम् । प्रत्याय्यप्रत्यायकयोर्भेदेऽपि निमित्तनिमित्तिनोः साम्यात् संख्यतानुदेशः गृह्यताम् न कश्चिद्दोष इति ।

अन्यत्रापि प्रत्याय्यप्रत्यायकयोर्भेद एव द्रष्टव्यः-

[३०१]यस्येत्येतदणोः रूपं संज्ञिनामभिधायकम् ।

नहि प्रतीयमानेन ग्रहणस्यास्ति सम्भवः ।।

यस्येति चेत्यत्र इश्च अश्च तद्यं तस्य यस्य यदेतत्संसृष्टेकाराकारयोः रूपमणोः प्रत्यायकम्, तत्संज्ञिनामितिवर्णावर्णानामभेदात्प्रत्यायकं भवति, तेन ईकाराकारयोरपि **'सौपर्णेयो वैनतेयः,** इत्यत्र लोपः प्रवर्तते। यदि चात्र प्रत्याय्यप्रत्यायकयोरभेदो नाश्रीयते तदा प्रतीयमानेन प्रत्याय्यमानेनान्येषां ग्रहणस्य प्रत्याय्यकस्यासंभव इति नात्रेष्टं सिद्धयेत् । तस्मात्तन्त्रेणोच्चरितमेकमेवोभयोः प्रत्यायकं संसृष्टरूपत्वादित्यस्यैव श्वेतो धावति इत्येतस्मादुभयार्थप्रतीतिरिति।

कारिकाव्याख्यानम् - अणोः रूपं यस्येति, संज्ञिनाम्, अभिधायकम्, हि यतः प्रतीयमानेन ग्रहणस्य सम्भवे नास्ति ।

अणोः- इकाराकारयोः रूपं यस्येति सूत्रे, तथा हि-इश्च अश्चेति विग्रहे समाहारद्वन्द्वे यमिति रूपम्, संज्ञिनाम्-इकारस्याष्टादशभेदानामभि-धायकम् अष्टादशाकाराणामपि अभिधायकम्, प्रतीयमानाकारेण स्वसंज्ञिनाम् ग्रहणस्य संभवो नास्ति उच्चारित एव शब्दः प्रत्यायको नानुच्चारित इति न्यायेन ग्रहणकशास्त्रस्योच्चारित एव प्रवृत्तेः । प्रकृते उच्चारितस्तु यकारस्तत्र खलेकपोतन्यायेन युगपत् त्रीणि सूत्राणि प्राप्तानि स्वरूपं शब्दस्याशब्दसंज्ञा

अणुदित्सवर्णस्य चाप्रत्ययः स्थानिवदादेशोऽनल्विधाविति तत्र व्याख्यातृपरम्परावगतप्रवक्त्राचार्यतात्पर्य्येन स्थानिवत्सूत्रेणेतरयोः प्रबाधे आदेशः स्थानिवद्भवतीत्यस्यादेशे स्थानिबुद्धिः कर्तव्येति फलितमर्थमादाय यकारादिकारस्य प्रतीयमानत्वम् इतीकारे प्रतीयमानेन ग्रहणकशास्त्रेण प्रवृत्तिरिति प्रत्याय्यप्रत्यायकयोरभेदपक्षोऽत्राश्रीयते ।

" श्वेतो धावतीत्यत्र" भिन्नवाक्यसमाश्रयेण वाक्यस्योभयार्थः दृश्यते । तदेव पररूपदृष्टान्तेनोपस्थापयति-

[३०२] ऊ इत्येतदभिन्नं च भिन्नवाक्यनिबन्धनम् ।

भेदेन ग्रहणं चास्य पररूपमिव द्वयोः ।।

इत्यत्र ' पररूपमिव द्वयोः' दृष्टान्तमुखेन भिन्नवाक्योपप्लावनेनोभयार्थप्रत्यायकं प्रदर्शयति । द्वयोरचोः पररूपं यथा भिन्नवाक्यनिबन्धनं प्रत्याायकं भवति तथैव ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यत्र प्रत्यायकं दृश्यते । त्रयाणाम् यत्र भिन्नं रूपं द्रष्टव्यम् । यथा ऊकालो ह्रस्वः, ऊकालो दीर्घः ,ऊकालः प्लुत इति । एतस्मात्संसृष्टत्वेनाभेदेन ग्रहणं प्रत्यायके स्थितं तदा ऊ एतद्रूपं भिन्नवाक्यनिबन्धनम् भवति। यथा पररूपमेकमपि द्वयोः प्रत्यायकं भवति तथैवात्रापि चिन्त्यम् । अतो हि 'श्वेतोधावतीत्यत्रावान्तरवाक्योपप्लाव-नेनोभयार्थता भविष्यति ।

सूत्रकारस्याभेदपक्षे, वार्तिककारस्य शब्दानां भेदपक्ष एवाभिरुचिरित्येतदत्र वक्षति-

३०३ प्लुतस्याङ्गविवृद्धिं च समाहारमचोस्तथा ।
व्युदस्यता पुनर्भेदः शब्देष्वत्यन्तमाश्रितः ।।

कारिकेयमम्बाकत्र्यां विशिष्य व्याख्याता तदेवात्रोपस्थाप्यते- यद्यपि वाक्यतदर्थयोरखण्डत्वे सुस्थितेऽपि तन्त्रेणावान्तरवाक्योप्लावनेन वाऽर्थत्रयबो-धाय ऊकाल इति निर्देशं कुर्वतः सूत्रकृता प्रत्याय्यप्रत्यायकयोरभेद एवेष्टस्तथापि 'प्लुतावैच इदुतौ इति सूत्रस्थवार्तिकतद्भाष्यदर्शनेन तेषां शब्दानां परस्परं भेद पक्ष एव वार्तिककारस्याभिरुचिरिति गम्यते । तथा हि प्लुतावैच इति सूत्रस्यैचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लुतौ भवत इत्यर्थः । ऐ इकायनः औ उपगव इति चोदाहरणम् । चतुर्मात्रावदैचो सम्पद्यते । अत्र च वार्तिककृता एचोऽवयवयोरिकारोकारयोः प्लुतः, तथा पररूपेचोः पूर्वपरयोः समाहारश्च प्रतिषिद्धः । तेन वार्तिककृतः प्रत्याय्यप्रत्यायकयोर्भेद एवेष्ट इति गम्यते। भाष्यकृतोऽपि यद्यपि स एवेष्टः तथापि प्रागुक्तरीत्या सूत्रकृताभिप्रेतोऽ-भेदपक्षस्तन्मूलभूतं तन्त्रञ्च शास्त्रसिद्धान्त इति विज्ञेयम्। तथा हि प्लुतावैच इति सूत्रे भाष्ये उक्तम्-

''अङ्गविवृद्धिर्नोपपद्यते न ह्यैचोऽवयवोऽकार इकार उकारो व इत्येवमङ्गविवृद्धिप्रतिषेधता वार्तिककृता''

तावेव शब्दावेवात्र सम्मिलिताविति, यः प्रागुक्तप्रत्याय्यप्रत्या-यकयोरभेदः स भेदः दूरीकृत इति ।

पूर्वकारिकायाम् - श्वेतो धावतीत्यादौ सदृशयोर्मेलनमनुपदमवान्तरवाक्योपप्लावनेन तन्त्रन्यायसमाश्रयणेन वा समर्थनं तज्ज्याय इत्यत्र तन्त्रमुपसंहर्तुं चेष्टते-

[३०४]अर्द्धर्चादिषु शब्देषु रूपभेदः क्रमाद्यथा ।
तन्त्रात्तथैकशब्दत्वे भिन्नानां श्रुतिरन्यथा ।।

अत्रार्द्धर्चादिषु इति सूत्रेण सूत्रकारस्याभेद पक्षः समर्थ्यते, तन्मूलं तन्त्रं, तत्तन्त्रं शास्त्रनियमेनोपसंहर्तुं प्रयतते। यथा क्रमेण ऋचोऽर्धम् अर्द्धर्चं इत्येकस्यैव शब्दस्य रूपभेदस्तथा तन्त्रन्यायाश्रयणेनैकशब्दत्वे भिन्नानां रूपाणामन्यथा श्रुतिरभिन्ना श्रुतिर्बोधायेति तन्त्रमुपसंहृतम् ।अतो हि प्रत्याय्यप्रत्यायकयोरभेद पक्ष एव समर्थनीय इति ।

शब्दैकत्वप्रदर्शनम्- अस्यां कारिकायां शब्देकत्ववादः प्रस्तूयते, तद्यथा-

[३०५] संहिताविषये वर्णाः स्वरूपेणाविकारिणः ।
शब्दान्तरत्वं यान्तीव शक्त्यन्तरपरिग्रहात् ।।

संहिताविषये श्वा इत इत्यत्र वर्णाः स्वरूपेणाविकारिणोऽपि शक्त्यन्तरपरिग्रहात्, 'श्वेत' शब्दान्तरत्वम्- संहितया श्वेत इति शब्दान्तररूपेण परिणतिं यान्तीव इति शब्दान्तररूपेण परिणमते ।

संहिता अपि नात्र वस्तुतः स्थिता। एक एव श्वेतशब्दः अनेकार्थप्रत्यायनशक्तियुक्तेन असंहिता विषयेऽपि दृश्यते। संहिता काल्पनिकैव प्रतिभाति । एकस्यापि श्वेतशब्दस्य निमित्तभेदाद्भेदः दृष्टान्तेन प्रतिपादयति-

[३०६] इन्द्रियादिविकारेण दृष्टं ग्राह्येषु वस्तुषु ।
आत्मत्यागादृते भिन्नं ग्रहणं स क्रमः श्रुतौ ।।

यथा- काचाद्युपहतचक्षुषामेकाकारमपि वस्तुः नानारूपतयाऽवभासते,तथा संहिता वशादेकोऽपि श्वेतशब्दः शास्त्रकल्पितसंहितावशात् श्वा इत इति रूपान्तरेणावभासते पूर्वोक्तमेवात्र पुनरुपस्करोति-

३०७ **अभिधानक्रिया योगाच्छब्देष्वविकृतेष्वपि ।**
रूपमत्यन्तभेदेन तदैवैकं प्रकाशते ।।

अभिधानं हि नाम संहितयोच्चारणम्, तादृश-क्रियायोगाद्विकृतेष्वपि शब्देषु एकमेव शक्तयन्तरपरिग्रहादत्यन्तभेदेन प्रकाशत इत्यर्थः । प्रागुक्तमागमेन द्रढयति-

३०८ **ऋचो व गीतिमात्रे वा साम द्रव्यान्तरं न तु ।**
गीतिभेदाद्विगृह्यन्ते ता एव विकृता ऋचः ।।

यथा गीति भेदेनोदीरिता ऋच एव सामाख्यां प्रतिलभन्ते, गीतिभेदेनोदीरणं क्रियामात्रं वा साम यथोच्यते । तदुक्तं **'गीतिषु सामाख्या'** इति । एवमेव श्वेत इत्यादावविकृतेषु शब्देषु संहितयाऽभिधानेक्रियास-म्बन्धात् श्वा इत इति रूपभेदप्रकाशोऽर्थभेदप्रकाशश्च ।

पुनरपि-

३०९ **उपायान्-श्रुतिसंहारे भिन्नानामेकशेषिणाम् ।**
तन्त्रेणोच्चारणे तेषां शास्त्रे साधुत्वमिष्यते ।।

भिन्नानाम् = श्वेत इति, श्वा इति प्रभृतीनां एकशेषिणाम् - एकशेषसंवेताम् उपाया तन्त्रेणोच्चारणोपायाः, **श्रुतिसंहारे**- श्वेतो धावतीत्ये-काखण्डवाक्यं संहारः प्रश्लेषः इति । तन्त्रोच्चारणे साधुत्वं शास्त्रे श्वा इत इत्यत्राद्गुणेति सूत्रेणोच्यते । श्वेतो धावतीत्यादौ द्वयोरखण्डयोर्वाक्य-योस्तन्त्रेणोच्चारणान्न वाक्याखण्डवादिनां काचिदपि क्षतिरिति ।

प्रथमाध्यायस्य पादटिप्पणय:

१- वाक्यप. २/१-२
२- वाक्यप. पुण्य. टीका, २/१-२
३- व्युत्पत्ति:, पृ.-१
४- वाक्यप., अम्बा, टी, पृ.-३
५- वाक्यप., २/३२६,
६- तदेव, पुण्य, टी, पु. ३९८.
७- तदेव, २/४३० हरिवृत्तिहस्तलेख:
८- वाक्यप., २/४४९.
९- तदेव, २/२४७.२४८.
१०- वाक्यप. २/२४७.२४८,
११- तदेव हरिवृत्ति हस्तलेख:
१२- वाक्यप., २/३२६
१३- सं० व्या० द०, रामसुरेश त्रिपाठी, पृ. ३३६ मुद्रितग्रन्थेषु कारिकाया: द्वितीयभाग: नोपलभ्यते ।
१४- वाक्यप. २/ ४३२ पुण्य:।
१५- तदेव, २/४३४. हरिवृत्तिहस्तलेख:
१६- तदेव, २/४३४. हरिवृत्तिहस्तलेख:
१७. महा. भा.१/४,३३ सूत्रम्
१८. वाक्यप., २/४-७ हरिवृत्ति:।
१९. तदेव
२०. वाक्यप. २/४७ पुण्यराज:
२१. तदेव, २/४८
२२. तदेव, २/४२४
२३. निरु. १/१
२४. वाक्यप. २/३०६
२५. पा. सू. ४/४/२
२६. वाक्यप. २,३०८ पुण्य.

२७. तदेव. २/३०६ अम्बा. टी.
२८- महा. भा., २/१/१-वा.-१
२९- स. व्या, द., पृ. ३३८
३०- वाक्यप., २/४१७
३१- तदेव, २/१-२, अम्बा. टी.
३२- शृं. प्र., पृ. = २७७
३३- वाक्यप., १/२३ वृषभदेवः
३४- बृहद्दे. २/११७
३५- सं. व्या. द. पृ. ३३८
३६- वाक्यप., २/४१
३७- तदेव, २/४१ पुण्य.
३८- तदेव, २/४१ अम्बा., पृ. ८३
३९- वाक्यप. , २/४२
४०- महा. भा., २/३/४३ वार्तिकम्
४१- वाक्यप. २/४३
४२- वाक्यप., २/४४-४५
४३- महा. भा., १/२/४५
४४- महा. भा., १/२/४५
४५- तदेव, प्रदीपोद्योतः, स. १/२/४५
४६- वाक्यप., २/१६
४७- तदेव, २/४३-४५
४८- वाक्यप., २/४३-४५
४९- महा. भा., १/२/४५
५०- वाक्यप., २/४३ पुण्य.
५१- वाक्यप., २/४३ पुण्य.
५२- तदेव, अम्बा. टी.
५३- महा. भा. १/२/४५
५४- वाक्यप., २/४५ पुण्य.
५५- तदेव, २/४६

५६- तदेव, २/४६

५७- वाक्यप., २/४७

५८- तदेव, २/४८

५९- वाक्यप., २/४८; पुण्यराज:

६०- तदेव, २/५४

६१- वाक्यप. २/१५,१६

६२- तदेव, २/१५ पुण्य.

६३- वाक्यप., २/१६. पुण्य.

६४- सं. व्या. द., पृ. -३४२- 'वाक्यार्थ अशब्द है, शब्द अपने स्वरूप की प्रतिपत्ति मात्र कराकर तिरोहित हो जाता है, किन्तु बुद्धि में एक संस्कार बना जाता है, जब वाक्यार्थ सभी पद पदार्थ - मात्र द्योतित कर निवृत्त हो जाते हैं, एक प्रकार का असत्त्वभूत सम्बन्ध उदित होता है जो सामान्य रूपों का भेदक है साथ ही संस्कार सम्पन्न बुद्धि का बुद्धयन्तर से योग करा देता है। यह प्रक्रिया कुछ वैसे ही है जैसे एक व्यक्ति का शोक या हर्ष दूसरे में संक्रमण कर जाता है ।

६५- वाक्यप., २/१६ - पुण्यराज:

६६- तदेव, २/३९९-४००

६७- वाक्यप. पुण्य. २/४००

६८- तदेव-हरि. वृ.

६९- पा. सू., १/१/२

७०- तदेव, १/१/१- महाभाष्यम् - प्रत्येकं बृद्धिगुणसंज्ञे भवत इति वक्तव्यम्।किं प्रयोजनम् ? समुदाये माभूदिति

७१- तदेव, १/१/७

७२- तदेव-तदेव' वाऽतज्जातीयव्यवायात्

७३- व्या. सिद्धा. सु. नि., पृ. २०८

७४- वाक्यप., २/३९४

७५- सं. व्या. द. पृ. = ३ द्वादशारनयचक्र., पृ. = १०३६

७६- वाक्यप., २/२८-२९

७७- श्लो. वार्ति. का., ७/४९-" पदानां पृथग् भूतानां संघातवर्तिनां वा न वाक्यत्वम् पृथग् भूतेषु हि तावत् वाक्यबुद्धिरेव नोन्त्पद्यते। संघातकल्पनेऽपि

संघो विशेषः तदानीमप्यन्योन्यानुग्रहस्य तेष्वनवगमात्। असति चाग्रहे वाक्यत्वे कल्पनामात्रम्। एकैकस्यापि तत प्रसंगात्।

७८- तदेव- वाक्याधिकरणे, ७/४९

७९- सार. सु. -२४ वर्षस्य ४ अङ्कः-व्या. द. वाक्य वि., पृ. =२९४

८०- वाक्यप., २/२०-२१

८१- वाक्यप., २/२१ पुण्य.

८२- सं. व्या. द., पृ. = ३४४ - हरिवृत्तावपि एतादृशोऽक्षरशः पाठः समुद्धृतः

८३- वाक्यप., २/२० पुण्य.

८४- वाक्यप., ३/३३-३४ जातिसमुद्देशः

८५- स्फो. वा., पृ.- ९६ अडयार लाईब्रेरी सीरज़ि वाल्युम,५५

८६- वाक्यप., १/९४.

८७- तदेव, १/४६-४७

८८- सं. व्या. द., पृ. =१५०

८९- तदेव, पृ. =१५१

९०. महा. भा., ३/३/१३३,५/२/९४

९१- सं. व्या. द., पृ. =५८

९२- महा. भा.;

(अ) ४/३/५५ पा. सू. अतिशायने'।

(आ) ४/१/६३

(इ) ४/१/६३

(ई) पस्पशाह्निकम्

९३- वाक्यप., २/८८

९४- वाक्यप., १/२४-२६

९५- भावप्रदीपः, पृ. =४४

९६- पा. सू., १/२/६४ महाभाष्यम्- ११ वार्तिकम्

९७- वैय्या. सिद्धा. सुधा. पृ. = ६२७

९८- वाक्यप., २/१०

९९- तदेव, पुण्य.

१००- तदेव, २/१० पुण्य.

१०१- परमलघु . म. पृ. =१३, एम, एस, युनिवर्सिटी आफॅ वारोदा रिसर्च सीरिज -७

१०२- वाक्यप., १/८७

१०३- तदेव, १/९०

१०४- तदेव, १/९२

१०५- तदेव, २/१४

१०६- वाक्यप. २/१९

१०७- तदेव, २/१९ पुण्य.

१०८- तदेव, २/१९ पुण्य०

१०९- वाक्यप. २/१४

११०- अर्थ विज्ञान और व्या. द., पृ. = ३१५

१११- द्वादश. चक्र, पृ. = ३०३

११२- स्याद्वा., रत्ना, पृ. = ६४५

११३- तत्त्ववि., पृ. = ६, पद्रास सं.

११४- सं. व्या. द., पृ. = ३४७,२४८,३४९,३५०

११५- प्रमा. वार्ति., १/१५०

११६- स्फो. सि., पृ. २३८-२३९

११७- सं. व्या. द., पृ. = ३४९

११८- स्फो. सि. टीका, पृ. =२३

११९- सं. व्या. द.,= ३४९- " कर्णक गोमी ने मण्डन मिश्र के तर्क को महत्त्व नहीं दिया । उनके मत में सकल असकल वर्ण भाग के ज्ञान के समय अखण्ड वाक्य का श्रवण ही नही होता। दूसरी बात यह है कि वाक्य के ग्रहण के अवसर पर वर्ण ग्रहण की बात भी अयुक्त है। वर्णात्मक और अवर्णात्मक सदृश नहीं माने जा सकते, इस लिए व्यंग्य और व्यंजक में भी सादृश्य नही हो सकता।

१२०- न्या. मं., पृ. = ३५२-३५३

१२१- श्लो. वार्ति, ७/१२२ पार्थसारथि।

१२२- सं. व्या. द., पृ. = ३५०- इस मत (पार्थसारथि प्रोक्त) और वैयाकरणों के निरवयव वाक्य में केवल इतना ही भेद है कि पहले मत के अनुसार वाक्य ही बाह्य सत्ता नहीं है जबकि निरवयववादी वाक्य की ही बाह्य सत्ता मानते हैं ।

१२३- श्लो. वा. ७/१२१-१२२

१२४- श्लो. वा., ७/१२१-१२२; हिन्दी व्याख्या -पं. दुर्गाधर झा पृ. =१०७४ कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयसंस्करणम् ।

१२५- श्लो. वा., ७/१२२ पार्थसारथिः।

१२६- वाक्यप., २/४९-५५

१२७- व्या. द. प्रति.- रामाज्ञा पाण्डेयः, पृ.-५४ संस्करणम्-सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, १९७९

१२८- वाक्यप., २/४९ अम्बा.

१२९- तदेव, २/४९ पुण्य.

१३०- तदेव, २/५० स्वोपज्ञवृत्तिः

१३१- वाक्यप. ,२/५० स्वोपज्ञवृत्तिः

१३२- तदेव, २/५० पुण्य.

१३३- सं. व्या. द., पृ. = ३५१.... पदों के नियत सन्निवेश से एक विशेषता आ जाती है। यदि विशेष ही वाक्य है तो यह विशेष क्रमजन्य है। अतः क्रम ही वाक्य है। इस मत से पद में अर्थ सत्ता मानी जाती है, किन्तु वाक्य एक प्रलाप मात्र है।

१३४- वाक्यप., २/५३ पुण्य.

१३५- तदेव, २/५४

१३६- तदेव, २/५५

१३७- अर्थ. औ. व्या. द., पृ. =२३२

१३८- श्लो. वा., ७/५५-"तत्र यावत् क्रमभेदो वाक्यार्थस्य प्रसज्यते। पदान्तरस्य पारार्थ्यादाख्यातं योऽपि मन्यते।।

१३९- श्लो. वा., ७/५५ पृ. १०५१ हिन्दी टिप्पण -"वाक्य में जितने पद रहेंगे, उनके गुणनफल को तीसरे की संख्या ३ से गुणित करके जो गुणनफल होगा उतने ही वाक्यार्थ होंगे। फलतः देवदत्तः तण्डुलं पचति। १-देवदत्तः २-तण्डुलं ३-पचति इन पदों से १ २ ३= ६ वाक्यार्थ बनेंगे। इसी प्रकार १- देवदत्त,२-अग्निना, ३-तण्डुलं, ४-पचति-इस वाक्य से १.२.३.४ = २४ वाक्यार्थ और वाक्य बनेंगे।

१४०- वाक्यप., २/५०

१४१- तदेव, २/५२

१४२- तदेव, २/३०.

१४३- वाक्यप., २/३० स्वोपज्ञवृत्तिः।

१४४- स्फो. सि., पृ. २५-२६

१४५- व्या. द. पी., पृ. =३४

१४६- वाक्यप., २/१

१४७- तदेव, २/३०-३३

१४८- वाक्यप., २/३० पुण्य०

यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितम् ।
तदाहुरपरे शब्दं तस्य वाक्ये तथैकता ।।
अर्थभागैस्तथा तेषामान्तरोऽर्थः प्रकाश्यते ।
एकस्यैवात्मनो भेदो शब्दार्थावपृथक् स्थितौ ।।
प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता ।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ।।
तस्यैवास्तित्वनास्तित्वसामर्थ्ये समवस्थिते ।
अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने ।।

१४९- तदेव, २/३१

१५०- वाक्यप., २/३१

१५१- वाक्यप., २/३२

१५२- तदेव, २/३२ अम्बा., पृ. =६९

१५३- तदेव, २/३३

१५४- द्वादश. चक्र., पृ. ११५१

१५५- सं. व्या. द., पृ. ३५३-३५४- रूप,रस,घट,पट बाह्य वस्तु विज्ञान से उद्बुद्ध होते हैं। विज्ञान कल्पना है, अभिजल्प है, बुद्धयनुसंहृति है। वही वाक्य है, वही वाक्यार्थ है।

१५६- सं. व्या. द., पृ. =३५३-३५४ ' प्रभा चन्द्र ने बुद्धनुसंहृति को दो भागों में विभक्त कर बुद्धि वाक्य पक्ष और अनुसंहृतिवाक्य पक्ष की कल्पना की है। किन्तु यह विभाग भर्तृहरि द्वारा अभिप्रेत नहीं है ।

१५७- वाक्यप., २/१ पुण्य., पृ. =१४

१५८- सं. व्या. द., पृ. = ३५४ 'पुण्यराज ने वाक्य को बौद्ध दर्शन के वाक्यस्वरूप के सदृश माना है। उनके अनुसार शाक्य सिद्धान्त

में वाक्य आन्तरिक आकार विशेष का बाह्य अभ्यास मात्र है। बौद्ध आकारं अनादि वाक्य वासना के प्रबोध से उद्बुद्ध होता है और क्रम रूप में अवस्थित पदों से विशिष्ट रूप में उभरता है। उसका बाह्य अभ्यास वाक्य है।

१५९- वैया. सि. ल. मं., पृ. = २०४ चौखम्बा संस्कृत सीरिज, वाराणसी।

१६०- पा. सू. १/३/२

१६१- तदेव, ३/१/२६

१६२- तदेव, ५/१/५९

१६३- तदेव, ५/२/९४

१६४- पा. सू. १/३/२- महाभाष्य प्रदीपः।

१६५- तदेव, १/३/२ महाभाष्यमुद्योतः।

१६६- महा. भा. प्रदी., ३/१/२६

१६७- वाक्यप.

१६८- व्या. सि. सु. नि. पृ. = १२२८ भाग - १३ चौ. सं. सी., १९२४

१६९- महा. भा. ४/१/५९ प्रदीपोद्योतः

१७०- तदेव, ५/२/९४ प्रदीपोद्योतः

१७१- वाक्यप. २/२ -अम्बा.- "आद्यं पदं वाक्यमित्यपि केषाञ्चिन्मतम्। अस्मिन्पक्षेऽनेकपदारब्धं सखण्डं वाक्यम्। अस्मिन्मते प्रथमोपस्थितत्वात् शक्ततावच्छेदकानुपूर्वी कल्पनायां लाघवाच्च आद्यं पदमेव वाचकम् इतरपदानि तु तत्सहकारीणि तच्छक्तिद्योतकानि।

१७२- सा. सु., पृ. २९४, वर्ष- २४ अंक-४

१७३- व्या. द. व प्र. = ५४

१७४- वाक्यप. २/४७

१७५- वाक्यप. २/४७ स्वोपज्ञवृत्तिः

१७६- वाक्यप० २/१७

१७७- तदेव,१/१७ पु०

१७८- तदेव, २/४११

१७८- तदेव, २/४११ पुण्य०

१७९- श्लो० वा० - हस्तलेखः स्त्रोतः- सं० व्या० द०, पृ० = ३५६

१८०- द्वादश. च., पृ. =६११

१८१- शृ. प्र., =२७७

१८२- व्या. द. प्र., पृ. = ५४४- सार. सु., पृ.=२१४,२४ व., ४ अंक

१८३- मीमां० द०, =२/१/४६

१८४- द्वादश. चक्र., पृ. = १०७८

१८५- तदेव, ४२६

१८६- सं. व्या. द., पृ.=३५७

१८७- स्याद्. रत्ना., पृ.= ३४५; पृथगिति संघातादवच्छि नत्ति। सर्वमिति आद्यपदात् आख्याताच्चावच्छिनत्ति। तेन सर्वाण्येव पदानि अन्योऽन्यसापेक्षाणि प्रत्येकं वाक्यमित्यर्थः।

१८८- वाक्यप., २/४८

१८९- तदेव, २/४८ पुण्य.

१९०- वाक्यप. २/४७ स्वोपज्ञवृतिः

१९१- अभि. दी. पृ. =१०९

१९२- सं. व्या. द., पृ. =३५२

१९३- सं. व्या. द.,पृ. =३५८

१९४- प्रमा. वा.,टी.,पृ. =४३४

१९५- सं. व्या. द., पृ. = ३५८ " योग दर्शन से भी ऐसा जान पडता है कि पृथक् सर्वपद और साकाङ्क्ष - से अलग-अलग भेद है।

१९६- सं. व्या. द.,पृ. = ३५८ " योग दर्शन भी सर्वपदवाक्य सिद्धांत का पोषक है। उसके अनुसार सभी पदों में वाक्यशक्ति है। पद वाक्य है वृक्षः कहने पर भी वृक्ष है ऐसा बोध देखा जाता है। पदार्थ सत्ता निरपेक्ष नहीं होती।

१९७- योगसू. व्या. भा., ३/१/१७

१९८- सं. व्या. द.,पृ.=३३४- प्राचीन तन्त्रों में न्याय शब्द मीमांसादर्शन के लिए व्यवहृत किया जाता था।

१९९- सं. व्या. द. पृ. ३५९ लोक व्यावहार में एकार्थक पदसमुदाय को वाक्य माना जाता रहा और अनेक विचारकों ने भी उसे स्वीकार किया।

२००- वाक्यप. २/१६

२०१- भाषा. और वाक्यप. डा. सत्यकाम वर्मा, पृ. = १०३- " वस्तुतः ये आठों ही मत किसी एक न एक सत्य का उद्घाटन करते हैं।

२०२- भाषा और वाक्यप.,पृ.=१०३- भर्तृहरि ने आठों मतों में से किसी को भी अपना समर्थन नहीं देकर, सबके द्वारा अनुस्यूत और पुष्ट वाक्य और वाक्यार्थ की अविभाज्यता का अपना ही मत प्रस्तुत किया है।

२०३- वाक्यप., ३/१/२- स्वोपज्ञवृत्तिः

२०४- तैत्त. सं., ६,४,७

२०५- अर्थवि. औ. व्या. द.,पृ. =३१०

२०६- ऋक्प्राति. २/१

२०७- सं. व्या. दर्श.,पृ.= ३३४-३३५ - पहले पक्ष के अनुसार पदों का मूल संहिता है अर्थात् संहिता पहले है। पदों की सत्ता बाद में। दूसरे शब्दों में संहिता नित्य है, अपौरुषेयी है, पद अनित्य है पौरुषेय है। दूसरे पक्ष के अनुसार संहिता का मूल पद है। पदों की सत्ता पहले और संहिता की सत्ता बाद में हैं,पद नित्य हैं अपौरुषेय है।

२०८- ऋक्प्राति., २/१

२०९- ऋक्प्राति., २/१२/३

२१०- वाक्यप., २/५८

२११- महाभा.,३/१/१०९

२१२- वाक्यप.,२/४९ स्वोपज्ञवृत्ति, पृ. =१०४-१.५

२१३- वाक्यप., २/४८

२१४- पा. सू., १/४/१०८

२१५- तदेव, १/४/१०८ कैय्यटः

२१६- निरु., १/१७ दुर्गाच्चार्यः " मन्त्रो ह्यभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशाः संहितयैवाभिव्यज्यते न पदैः। अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचान ब्राह्मणा अधीयन्ते चाध्येतारः, अपि च यज्ञकर्मणि संहितयैव विनियुज्यन्ते मन्त्राः न पदैः।

२१७- अर्थ वि. और व्या. द.,पृ. =३१२- संहिता अर्थात् वाक्य को मूल मानना अधिक उचित है। मन्त्र की जब अभिव्यक्ति होती है तब वह मन्त्रद्रष्टा ऋषि को संहिता अर्थात् वाक्यरूप में ही अभिव्यक्त होते है, पदों के रूप में नही। अत एव वेद विद्वान सर्वप्रथम संहिता को ही पढाते हैं और उसी प्रकार पढ़ने वाले उसे पढते है यज्ञ सम्बन्धी कार्यों में मन्त्रों का संहितारूप में विनियोग होता है, पदों के रूप में नहीं।

२१८- वाक्यप., २/१,२ स्वो. वृ.

२१९- महाभा., २/१/१ वार्ति., ९

२२०- तदेव, २/१/१

२२१- तदेव, २/१/१ वा.- १० प्रदी.

२२२- तदेव, २/१/१ वा.- १० उद्यो.

२२३- जैमि. सू. २/१/४६

२२४- महाभा., ८/१/१८ प्रदीप:

२२५- महाभा., २/१/१

२२६- सं व्या. द., पृ. = ३३० प्राचीन क्षेत्र में जैमिनि का वाक्य लक्षण भी प्रसिद्ध था। जैमिनि के वाक्यलक्षण और कात्यायन के वाक्यलक्षण में पूर्वापर का विचार कठिन था । भाष्यकार के अपूर्वशब्द से जान पडता है कि कात्यायन ने ही सर्वप्रथम शास्त्रीय दृष्टि से वाक्य पर विचार प्रस्तुत किया। लौकिक वाक्य के स्वरूप पर कात्यायन के पूर्ववर्ती व्याडि ने अपने संग्रह में विचार किया था ....।

२२७- महाभा., २/१/१/ प्रदीप:

२२८- शृ. प्र., पृ. = ११६

२२९- प्रक्रि. प्र., पृ. = ७१- सं. व्या. द., पृ. = ३३१ त: संकलितम्।

२३०- महाभा., २/१/१ प्रदोपोद्योत:।

२३१- हर्ष. शङ्करट्टीका, पृ. = ११३ (संस्कृत व्याकरण दर्शन, पृ. =३३०)

२३२- सं. व्या. शा. का इति., भाग-१, पृ.= २८१-२८२ = युधि. मीमां भारतीय प्राच्य विद्या प्रतिष्ठान, अजमेर, सं०= २०२०

२३३- महाभा, ६/३/३४

२३४- तदेव, ८/३/५

२३५- १३२ श्लो. (संस्कृत व्याकरणशास्त्रेतिहासत:, पृ.=१८२) (अ) - महाभा. , ६/३/३४ प्रदीप:; ८/३/५ प्रदीप: (आ) हेलाराज: ३/३८; ६/१५ उद्योत: (इ) पदमञ्जरी, पृ. = ९

२३६- सं. व्या. द.,पृ. = वार्तिक के लिए वाक्य पद का प्रयोग सम्भवत: इसलिए होता है कि सूत्रों में क्रियापद का प्रयोग नही होता। अत: उनमें वाक्यत्व लक्षण व्याप्त नही होता। वार्तिकों में प्राय: क्रिया पद भी प्रयुक्त होता है।अत: उनमें वाक्यत्व का लक्षण भले प्रकार उत्पन्न हो जाता है ।

२३७- काशिका (हिन्दी व्याख्या) प्रथमो भाग: चौखम्बा संस्कृत सीरिज, वै.सं. -२०२७ पृ.=७१.

२३८- सं. व्या. शा. का इति., पृ. =२८३-२८४

२३९- महाभा. दी.,पृ.=१६०,११६, (सं. व्या. शा. इ. ग्रन्थत: पृ.=२८३)

२४०- तन्त्रवार्ति., १/३/८

२४१- महाभा., ८/१/१८ प्रदीप:।

२४२- क्षीरत., पृ, ३२२

२४३- वाक्यप., ३/१०६ हेल.

२४४- महाभा.- ६/१/१ वार्तिक. ८- श्रृ. प्र., पृ.=१०४

२४५- वाक्यप.,२/३

२४६- सा. सु., पृ. =३०२,२४/४/२०२६ विक्रम:

२४७- श्रृ. प्र., पृ. =११६

२४८- पा. सू. २/१/२

२४९- महाभा., २/१/१/११ वार्तिकम्

२५०- वाक्यप.,२/४ ५- तदेव २,५ स्वोपज्ञवृत्ति:

२५१- भाषा और वाक्य., पृ. =८७

२५२- वाक्यप., २/१३

२५३- वाक्यप., २/५६

२५४- वाक्यप., २/६ स्वोज्ञवृति-अम्बा. च।

२५५- तदेव, २/६ अम्बा

२५६- वाक्यप., २/४४२

२५७- वाक्यप. २/४४३

२५८- तदेव, २/६ स्वोपज्ञवृति

२५९- तदेव ।

२६०- पा. सू., ७/३/५३

२६१- पा. सू. ७/३-६७

२६२- मेदि. को., ११६-५५

२६३- वाक्यप.,२/७ पुण्य.

२६४- तदेव, ३/१ हेला.

२६५- अमरको., १/६/२, पृ. =८१; चौ. सं. सं. ४- अम. को. पृ.=८१

२६६- काशि. न्या., ४/४/१ " प्राग्वहतेष्ठक्' तत्र ठक्प्रकरणे तदाह माशब्दादिभ्यो

तत्र न्यासः मा इत्यस्य च शब्द इत्यस्य च पदस्य यः समुदायस्तद् वाक्यम्।

२६७- काशि. पद. ८/१/८

२६८- शब्द. प्रका., १३

२६९- वाचस्प. भा.-६, पृ.=४४७०

२७०- शब्दक. भा.-४, पृ. =३१८

२७१- शब्द. श. प्रका. ७१३

२७२- वैय्या. सि. ल. म., पृ. =१

२७३- तर्क. सं.

२७४- त. भा.

२७५- श्रृं. प्र., पृ. =१२० मैसूर सं.

२७६- सा. द. २/१ एवं- वाक्योच्चयो महावाक्यम्। योग्यताकांक्षासत्तियुक्त एव।
इत्थं वाक्यं द्विधा मतम् । इत्थमिति वाक्येन महावाक्यत्वेन च ।।

२७७- वेदा. परि. आगमपरिच्छेदः

२७८- परमलघुमञ्जूषा

२७९- चन्द्रा.

२८०- चन्द्रालो. टी., पृ. = ८

२८१- वैय्या. सि. ल. मं.; स्फोटनिरूपण, पृ. =३८९

२८२- वाक्यप., २/४०९

२८३- तदेव, ३/७६

२८४- वै. सि. ल. मं., पृ. =

२८५- स्फोटवादस्योपोद्घातः, पृ. = २४ नागेशकृतः।

२८६- वाक्यप., २/१९-२१

२८७- महाभा. पस्पशाह्निकम्

२८८- वैय्या. सि. ल. मं., स्फोटनिरूपण, पृ. =३८९

२८९- वाक्यप., २/९५

२९०- तदेव, २/५६

२९१- वै. सि. ल. मं.,

२९२- स्फोटवादस्योपोद्घातः, पृ. = २४ नागेशकृतः।

२९३- वाक्यप., २

२९४- महाभा. पस्पशाह्निकम्

२९५- वाक्यप., २/९८७

२९६- तदेव, २/९१

२९७- पा. सू., १/२/२७

२९८- पा. सू., १/२/२७ वार्ति.

२९९- व्या. सिद्धा. सु., पृ. = ५३८

३००- पा. सू., ६/४/१४८

३०१- वाक्यप., २/१०० स्वोपज्ञ.

३०२- वाक्यप. २/१०१

३०३- तदेव, २/१०२

३०४- वाक्यप. २/१०३

३०५- तदेव, २/१०४

३०६- वाक्यप. २/१०५

३०७- तदेव, २/१०६

३०८- तदेव, २/१०

३०९- तदेव, २/१०८

वाक्य- पं० युधिष्ठिर मीमांसक जी ने वार्तिक के अर्थ में वाक्य शब्द के प्रयोग के लिए युक्ति दी है कि सूत्रों में क्रियापद के अप्रयोग तथा वार्तिकों में क्रियापद के प्राय: प्रयोग होने के कारण (एक तिङ; वाक्यम् अथवा क्रियाकारकान्वितं वाक्यम् के आधार पर) वार्तिक को वाक्य कहा जा सकता है। परन्तु यह उचित नहीं है। टीका ग्रन्थों में वार्तिक के अन्त में वक्तव्यम् वाक्यम्, उपसंख्यानम् आदि के प्रयोग होने पर भी महाभाष्योद्धृत वार्तिक में क्रिया पद का प्रयोग के आधार पर ही हो ऐसा नियम व्याकरण शास्त्र में नहीं है। अत: सूत्र वाक्य नहीं है, कथन का कोई अर्थ नहीं है ।

द्वितीयोऽध्यायः

वाक्यधर्मनिरूपणम्

पृष्ठ संख्या 83 से 151

द्वितीयोऽध्यायः

वाक्यधर्मनिरूपणम्

वाक्यधर्माश्चात्र निरूप्यन्ते-

वाक्यस्याखण्डत्वपक्षसंस्थापनार्थाय पदपदार्थोपनिबन्धनाः वाक्य-धर्मास्संदृश्यन्ते आकरग्रन्थेषु । ते चामी वाक्यधर्माः भर्तृहरिणा, पुण्यराजेन, भोजेन यथासम्भवं शास्त्रान्तरेभ्यः संकलय्य स्व स्व ग्रन्थेषु सोदाहरणं प्रतिपाद्यन्ते ।

यदाह हरिः-

[१] इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः ।
सर्वे ते न प्रकल्पेरन् पदं चेत् स्यादवाचकम् ।। इति ।

एवं भूता ये पदार्थोपनिबन्धना पदार्थविशेषावधारणप्रयुक्ताः, वाक्येषु धर्मा वाक्यार्थविशेषावधारकाः न्यायास्ते सर्वेऽपि न प्रकल्पेरन् वाक्यार्थविशेषावधारणे न शक्ताः स्युः यदि पदं वाक्यघटकं सुप्तिङन्तलक्षणम्, अवाचकं- स्वार्थाभिधायकं न स्यादिति[२]। एवं भोजोऽपि- [३]अखण्डवाक्यार्थपक्षे य एते पदपदार्थोपनिबन्धना वाक्यार्थविशेषप्रतिपत्तिहेतवो वाक्येषु धर्मास्संदृश्यन्ते तेऽपिपदानामानर्थक्यात् न प्राप्नुवन्ति । [४]पुण्यराजमतेन पदार्थोपनिबन्धनाः वाक्येषु न्यायाः सकलशास्त्रीयलौकिकव्यवहारनिबन्धनभूताः पदपदार्थानङ्गीकरणे न प्रकल्पन्त इति । भर्तृहरिसमये वाक्यधर्माः शास्त्रज्ञैः परिचीयन्ते स्म वस्तुतो वाक्यधर्माः मीमांसाशास्त्रे वाक्यन्यायाः वाक्यलक्षणानि वेति रूपेण प्रतिष्ठापिता आसन्। त एव हरिणा संगृह्य स्वग्रन्थे व्यवस्थापिताः । तेषां संख्याविषये षट्सप्ततिकारिकाव्याख्यानमेव प्रमाणम् तत्र षड्द्वादशचतु-र्विंशतिर्वाक्यलक्षणानि लक्षणसमुद्देशे सापदेशं सविरोधं विस्तरेण व्याख्यायन्ते टीकाकारेण । [५]लक्षणसमुद्देशस्तृतीयकाण्डे विशिष्य विस्तारपूर्वकं व्याख्यात आसीत् दौर्भाग्येनायं भागो दशमशताब्द्यामेव विनष्ट [६]इति श्रूयते ।

वाक्यधर्माणां सङ्केतो वाक्यकाण्डे संक्षेपेणोपलभ्यते, पुण्यराजः [७]सोदाहरणं तान् स्वीयटीकायां व्याख्यातवान् ।

भोजेन [८]शृङ्गारप्रकाशस्य नवमे प्रकाशे दोषहानगुणोपादाननामकेऽध्याये वाक्य धर्माः वाक्यपदीयाधारेण प्रकाशितास्सन्ति। "इति वाक्येषु ये धर्माः पदपदार्थोपनिबन्धना इत्यस्मादेव संगृह्य" पदपदार्थोपनिबन्धना वाक्यार्थविशेषप्रतिपत्तिहेतवः वाक्येषु धर्माः इत्येवं व्याख्यातम्। पुण्यराजमतेन तानि पूर्वमीमांसाशास्त्रस्य न्यायभूतानि लक्षणानि वर्तन्ते, यज्जैमिनिः द्वादशाध्यायैः तानि प्रकाशयति । अत एव पूर्वमीमांसाद्वादशलक्षणीति नाम्नापि व्यवह्रियते। वाक्यधर्माः पूर्वमीमांसात एव हरिग्रन्थे समुपनिबद्धा इति विचारणा कथञ्चित् सत्या प्रतिभाति। यथा पुण्यराजः[९] एतैश्च निर्ज्ञातवाक्यगोचरोऽर्थात्मा यथावल्लक्ष्यते निश्चीयत इत्येतानि मीमांसकैर्लक्षणानि इत्युच्यन्ते। तत्र षड्द्वादशचतुर्विंशतिर्वै तानि तावदिह प्रदर्श्यन्ते। डा० वि० राघवन् [१०]स्वीयशोधनिबन्धेऽपि तावदित्थमेव वाक्यधर्मान् तुलनात्मकदृशा संक्षेपेण न्यस्तवान्।

यद्यपि षड्द्वादशचतुर्विंशतिर्वा लक्षणानि सोपपत्तिकं संनिदर्शनं पदकाण्डेऽऽसन् तथापि वाक्यकाण्डेऽत्र त एव धर्मा प्रतिष्ठाप्यन्ते। षड्न्यायवादिनः पूर्वोक्ता षडध्यायाः प्रत्यक्षविहितधर्मकर्मणामिति कर्तव्यताविषयका एव षड्न्यायाः लक्षणानि इति वदन्ति । तदुत्तरं षडविहितेति कर्तव्यताकपरका अध्यायाः सन्ति तत्र द्वादश लक्षणानीति द्वादशन्यायवादिनो वदन्ति। द्वादशलक्षणानि द्वादशस्वध्यायेषु सप्रपञ्चं प्रासङ्गिकविचारसहितानि निर्णीतानि सन्ति ।

मीमांसाशास्त्रस्यपूर्वषडध्याया प्रकृतिषटक्पदेन व्यवह्रियन्ते, कैश्चिदुपदेशषट्केनापि कथ्यन्ते । तदुक्तं पुण्यराजेन [११]विधिभेदशेषशेषिभावप्रयुक्तिक्रमाधिकारिणां प्रतिपादनायाध्यायाः षडिति षड्लक्षणानि। तानि क्रमशः लिख्यन्ते ।

वाक्यधर्माणां सङ्केतो १- प्रमाणलक्षणं [१२] तावत्प्रथमेऽध्याये, तत्र विध्यर्थवादमन्त्रस्मृतयो व्याख्याताः। गुणविधिः नामधेयञ्चापि निर्णीतम्। वाक्यशेषबलेन संदिग्धानामर्थानामर्थप्रतिपत्तिः प्रदर्शिता । वेदप्रामाण्यं हि तावन्मुख्यमन्यत् प्रासंगिकमिति ।

२- द्वितीयेऽनन्तरं प्रधानाप्रधानानि परीक्षिप्यन्ते, एवं भिन्नाभिन्नान्यपि। तेषाञ्च भेदः मुख्यत्वेन प्रतिपाद्यते ।

३- तृतीये शेषशेषिभावो व्याख्यायते । स च श्रुत्यादिभिरुपवर्णितः। श्रुत्यादीनि श्रुतिः, लिङ्गम्, वाक्यम्, प्रकरणम्, स्थानम्, समाख्यानञ्चेति।

४- चतुर्थे प्रयोजकाप्रयोजकभावप्रतिपदानम् ।

५- पञ्चमे- श्रुत्युच्चारणादिनां क्रमेण विनियोगः। क्रमनियमलक्षणविचारः।

६- षष्ठेऽध्यायेऽर्थोसमर्थाधिकाराणां प्रतिपादनमिति ।

येषाम्मतेन षडेव वाक्यधर्मास्तेषां मते मीमांसासूत्रस्य षडध्यायैः प्रतिपादितानि लक्षणानि एव सन्ति, न द्वादश, न चतुर्विंशति, इत्यादिनेति भावः। इमान्येव मौलिकानि सन्ति ।

अनुक्तकर्तव्यतायाम् -

७- [१३]सप्तमे सामान्यातिदेशस्य प्रतिपादनम् ।

८- अष्टमे क्वचित्सामर्थ्येन विशेष एवातिदेशस्य निरूपणम् ।

९- नवमेऽतिदेशप्राप्ते मन्त्रे प्रकृतियागदेवता-विकृतियागदेवतात्वेन विपरिणमयितव्येति समर्थनम् ।

१०- दशमे बाधालक्षणं प्रवर्तते। सामान्यशास्त्रस्य विशेषशास्त्रेणानवकाशेन तदितरपरतात्मकसंकोचरूपैव बाधा भवति ।

११- एकादशे तन्त्रलक्षणम् । येन सकृदनुष्ठानादुभयसिद्धिस्तत्तन्त्रम्।

१२- द्वादशेऽन्यदर्थमारब्धमन्यदप्येकेनैव प्रयत्नेन संभवलाघवाभ्यां निष्पादनम्।

अथेदानीं निश्चप्रचमिदं यद्द्वादशलक्षणानि जैमिनिमीमांसासूत्रोद्दतानि द्वादश- लक्षणान्येवात्र वाक्यधर्मत्वेनावस्थितानि वर्तन्ते ।[१४] डा० वि० राघवन्नपि शृंगारप्रकाशसमीक्षायां तान्वाक्यधर्मान् संक्षिप्य प्रस्तौति । तन्मतेन भोजस्याधारो वाक्यपदीयम्, वाक्यपदीयस्य चाधारः मीमांसासूत्रमेवास्ति यत्रेमे शब्दशः संगच्छन्त इति। मीमांसातो वाक्यधर्माः सर्वप्रथमतः भर्तृहरिणा एव संगृह्य स्वग्रन्थे प्रतिपादिता इति तथ्यम् ।

चतुर्विंशतिलक्षणानि-

द्वादशलक्षणीमनुसृत्य षड्द्वादश लक्षणानि प्रदर्शितानि । तत ऊर्ध्वं तान्येव द्वादशप्रतिपक्षसहितानि वर्णितानि सन्ति। यथोक्तं पुण्यराजेन [१५]

प्रतिपक्षभूतान्यन्यानि द्वादश यथायोगमेतेष्वध्यायेषु दर्शितानि'' इति, तत्र प्रमाणस्य प्रतिपक्षो न भवति। सामान्यातिदेशविशेषातिदेशयोस्त्वपवादरहितमेव स्वरूपं निर्दिश्यते । एतदतिरिक्तधर्माणां प्रतिपक्षोऽपवादो न द्रष्टुं शक्यते तदित्थम्-

द्वादशलक्षणानि	**तत्प्रतिपक्षः / अपवादः**
१- प्रमाणम् (विधिः)	प्रतिपक्षाभावः [१६]
२- भेदः	अभेदः [१७]
३- शेषशेषिभावः	गुणप्रधानभावाविवक्षा [१८]
४- प्रयुक्तिः	अप्रयोजकम् [१९]
५- क्रमः	अविवक्षा [२०]
६- अधिकारी	क्रियान्तरव्युदासः [२१]
७- सामन्यातिदेशः	प्रतिपक्षाभावः [२२]
८- विशेषातिदेशः	प्रतिपक्षाभावः [२३]
९- ऊहः	सम्बन्धाबाधः [२४]
१०- बाधः	समुच्चयविकल्पौ [२५]
११- तन्त्रम्	आवृत्तिः [२६]
१२- प्रासङ्गिकम् (प्रसङ्गः)	भेदः । [२७] इति।

[१६] तन्त्रप्रसङ्गौ तु सूत्रे कृताविति तत्पुरःसरत्वेनैव पदपदार्थावधानमिति। समुच्चयो विकल्प आवृत्तिश्चेत्येवमादिभिः सह द्वाविंशतिर्लक्षणानि भवन्ति।[१७] अवशिष्टलक्षणद्वयस्य नात्र सन्निवेशः पुण्यराजमतेन द्वे लक्षणे लक्षणसमुद्देशादूह्ये। अथवा सामान्यातिदेशस्य तदभाव एवापवादः । विशेषातिदेशस्य सामान्यातिदेश एव विशेषान्तरातिदेशो वेत्यनयोः सम्प्रतिपक्षत्वमाश्रित्य चतुर्विंशति लक्षणानि सम्पद्यन्ते, एतदेव क्रमेण लक्षणानि मनसि निधाय 'षड्द्वादशचतुर्विंशति' लक्षणानि भवितुमर्हन्तीति सुवचम् ।[१८] भोजप्रतिपादितलक्षणानि वाक्यपदीये पुण्यराजटीकायां च नहि प्राप्तुं शक्यन्ते । हरिसंकलितलक्षणातिरिक्तलक्षणान्यपि मीमांसातः लोकतो वा [१९]भोजेन संगृहीतानि, तस्मादेव हरिप्रोक्तलक्षणेभ्यः भोजप्रोक्तलक्षणानि अधिकानि सन्ति ।

पुण्यराजेन वाक्यधर्मव्याख्यानावसरे तदुदाहरणानि, वेदशास्त्रलोकेभ्यः दीयन्ते, व्याकरणसूत्राण्यपि समुदाह्रियन्ते, परन्तु भोजस्तदुदाहरणानि काव्यशास्त्रश्लोकैः क्वचिल्लोकतः वोपस्करोति ।

ते धर्माः हरिसम्मतत्वेन द्वितीयकाण्डगतकारिकाभिरिह प्रदर्श्यन्ते इह तु वाक्यधर्मप्रदर्शनार्थमुदाहरणमात्रं प्रसक्तानुप्रसक्तं च किञ्चिदुच्यते-

२० **प्रासङ्गिकमिदं कार्यमिदं तन्त्रेण लभ्यते ।**
इदमावृत्तिभेदाभ्यामत्र बाधसमुच्चयौ ।।
ऊहोऽस्मिन् विषये न्याय्यः सम्बन्धोऽस्य न बाध्यते ।
सामान्यातिदेशोऽयं विशेषोऽत्रातिदिश्यते ।।
अर्थित्वमत्र सामर्थ्यमस्मिन्नर्थो न भिद्यते ।
शास्त्रात् प्राप्ताधिकारोऽयं व्युदासोऽस्य क्रियान्तरे ।।
इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभिः ।
क्रमोऽयमत्र बलवानस्मिंस्तु न विवक्षितः ।।
इदं पराङ्गैः सम्बद्धमङ्गानामप्रयोजकम् ।
प्रयोजकमिदं तेषामत्रेदं नान्तरीयकम् ।।
इदं प्रधानं शेषोऽयं विनियोगक्रमस्त्वयम् ।
साक्षादस्योपकारीदमिदमाराद् विशेषकम् ।।
शक्तिव्यापारभेदोऽस्मिन् फलमत्र तु भिद्यते ।
सम्बन्धाज्जातभेदोऽयं भेदस्तत्र विवक्षितः ।।
प्रसज्य प्रतिषेधोऽयं पर्युदासोऽयमत्र तु ।
इदं गौणमिदं मुख्यं व्यापीदं गुरुलघ्विदम् ।।
भेदेनाङ्गाङ्गिभावोऽस्यात्र बहुधेदं विकल्प्यते ।
इदं नियम्यतेऽस्यात्र योग्यत्वमुपजायते ।
अस्य वाक्यान्तरदृष्टाल्लिङ्गाद्भेदोऽनुमीयते ।
अयं शब्दादपोद्धृत्य पदार्थः प्रविभज्यते ।। इति ।

उपर्युक्तकारिकासु ते वाक्यधर्माः क्रमशः- प्रासङ्गिकम्, तन्त्रम्, आवृत्तिः, भेदः, बाधा, समुच्चयः, ऊहः, सम्बन्धाबाधा, सामान्यातिदेशः, विशेषातिदेशः, अर्थित्वम्, सामर्थ्यम्, अर्थाभेदः, अधिकारः, क्रियान्तरव्युदासः, श्रुत्यादिक्रमः, क्रमबलाबलम्, अविवक्षितक्रमः, पराङ्गम्, अप्रयोजकम्,

प्रयोजकान्तरीयकम्, प्रधानम्,शेषः, विनियोगक्रमः, साक्षादुपकारी, आराद्विशेषकम्,शक्तिव्यापारः, भेदः, फलभेदः, सम्बन्धजभेदः, अवविक्षितभेदः, प्रसज्यप्रतिषेधः, पर्युदासः, गौणम्, मुख्यम्, व्यापि, गुरुः, लघुः, अङ्गाङ्गिभाव, विकल्पः नियम्, योग्यत्वम्, लिङ्गभेदः, अपोद्धारः । इति ।

भोजोक्त वाक्यधर्माः-

[२१] भोजराजोऽपि श्रृङ्गारप्रकाशस्य नवमे प्रकाशेऽखण्डवाक्यवाक्यार्थपक्षे वाक्यधर्मान् निरूपयन्नाहअपि चाखण्डवाक्यार्थपक्षे य एते पदपदार्थोपनिबन्धनावाक्यार्थविशेषप्रतिपत्तिहेतवो वाक्येषु धर्मास्संदृश्यन्ते तेऽपि पदानामानर्थक्यात् न प्राप्नुवन्ति । के पुनस्ते ?

प्रधानम् ,शेषः, प्रयोजकम्, अप्रयोजकम्, नान्तरीयकम्, मुख्यम्, गौणम्, व्यापकम्, लघुः, गुरुः, अर्थवादः, अनुवादः, भेदविवक्षा अभेदविवक्षा, व्यवहितकल्पना, उपचारकल्पना, तद्भावापत्तिः, सम्बन्धाबाधनम्, विकल्पः, समुच्चयः, नियमः, निषेधः, प्रतिनिधिः, ऊहः बाधः, तन्त्रम्, प्रसंङ्गः, आवृत्तिः, भेदः सामान्यातिदेशः विशेषातिदेशः, अधिकारः, अध्याहारः,विपरिणामः, वाक्यशेषः, अवधिः, अपोद्धारः, अनिर्ज्ञातप्रश्नः, क्रियान्तरव्युदासः, लिङ्गादिभेदः, लिङ्गाद्विभेदः, शब्दान्तरादिभेदः, शक्त्यादिभेदः, श्रुत्यादिविनियोगः, श्रुत्यादिबलाबलम्, श्रुत्यादिक्रमः क्रमसम्भेद इति ।

एषु बहवो धर्मास्तावद्वाक्यपदीये स्वोपज्ञे [२२] च यत्र-यत्र द्रष्टुं शक्यन्ते[२३] । भोजेन संकल्प्यैकत्र व्यवस्थापितास्त इति वाक्यपदीयेसामर्थ्यम्, अर्थभेदः, पराङ्गम्, विनियोगक्रमः, साक्षादुपकारी,आराद्विशेषकम्,फलभेदः, सम्बन्धजभेदः, प्रसज्यप्रतिषेधः, पर्युदासः, अङ्गाङ्गिभावो विशिष्य दृश्यन्ते। श्रृङ्गारप्रकाशे इमान्विहायापरे वाक्यधर्मास्तिष्ठन्ति। तत्र ये विशिष्टनिर्दिष्टाः अनुवादः, विवक्षितभेदः व्यवहितकल्पना, उपचारकल्पना, तद्भावापत्तिः, प्रतिनिधिः, अध्याहारः विपरिणामः, वाक्यशेषः, अवधिः, अनिर्ज्ञातप्रश्नाः, लिङ्गाद्भेदः, शब्दान्तरादिभेदः शक्त्यादिविनियोगः, श्रुत्यादिबलाबलम्सन्ति।

इदानीं तावद्भर्तृहरिसम्मतधर्माः क्रमशो व्याख्यायन्ते –

१– [२४] **प्रासङ्गिकम्** – एतल्लक्षणं कृतवान्पुण्यराजः [३] द्वयोरर्थिनोः कार्येण संभविना प्रयोजकत्वेन निर्ज्ञातसामर्थ्ययोरत्रान्यतरप्रयुक्तेनार्थेनापरोऽभिसंबध्यमानः कृतार्थत्वात् पृथक् प्रयोजकत्वं नोपैति स प्रसङ्गः। तत्प्रयोजनकं प्रासङ्गिकमित्युच्यते। भोजकृतलक्षणेन पूर्वोक्तस्य स्पष्टीकरणं जायते। तद्यथा यत्र[२५] सम्भविना कार्येण द्वयोरर्थिनोः प्रयोजकत्वेन निर्ज्ञातसामर्थ्ययोरन्यतरप्रयुक्तेनाप्यपरोऽपि सम्बध्यमानः कृतार्थत्वात् पृथक् प्रयोजनवतां न प्रतिपाद्यते तत्प्रासङ्गिकम् । तदुदाहरणं तु लौकिकम्-

संघाताध्ययनम्' -तद्धि अयमुपाध्यायोऽस्माभिरात्माध्यापनार्थमानीतः, त्वमप्यत्रैवा- धीष्व' इति अन्यत्रापि एतेन धनवन्तः कान्तारेषु गृहीतानुयात्रिकाः प्रतिष्ठन्ते तदेतैरेव कृतरक्षाक्षविधानो गच्छ इत्यत्र संघातगमनमभ्युपगन्तव्यमिति। एवं [२६] **यच्चान्यदाचक्षाणोऽन्प्याचष्टे तदपि प्रमाणम् तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता इति भाष्योक्तिः** संगच्छते[२७] पुनरपि कुमारसम्भवे कामसंस्थानं कथयन् धनुश्शिक्षामुपदिशति । भट्टिकाव्ये राम-कथां वर्णयन्[२८] शब्दानुशासनमुदाहरति । अथ[२९] च धर्माभ्युदयादौ धर्मशास्त्रम्, मुद्राराक्षसादावर्थशास्त्रम् मालतीमाधवादौ कामशास्त्रम्, उत्तररामचरितादौ मोक्षशास्त्रम् महाभारतादौ धर्मकाममोक्षशास्त्राणि प्रासङ्गिकानीव वर्तन्ते ।

प्रसङ्गो यथा वेदे-[३०] अग्निसोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमेकादशकपालं निर्वपन्ति । अत्र अग्नीषोमीयं पशुमालभन्ते, तस्य वपया प्रचर्याग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपन्तीति । अत्र[३१] अग्नीषोमीयपश्वर्थः प्रयाजानुयाजविध्यन्तः प्रसङ्गादग्नीषोमीयं पशुपुरोडाशमप्युपकरोति । शब्दशास्त्रे सर्वादीनि [३२] सर्वनामानि अत्र णत्वाभावंप्रासङ्गिकं वदन्ति वैय्याकरणास्तत्र हि संज्ञासंज्ञिसम्बन्धविधानपरे वाक्यं रूपविशेषमात्रादकृतणत्वादुभयसाधनत्वं विज्ञायते। शक्यो ह्यस्य स्वरूपनिर्देशात् पृथक् णत्वप्रतिषेधो वक्तुमित्येकेनैव प्रयत्नेनोभयमत्र वर्तत इति पुण्यराजः।

२– [३४] **तन्त्रम्**– तल्लक्षणम् [३५] यत्रार्थिनः सर्वे प्रयोजकाभेदेनावृत्त्या वा योऽर्थः प्रतिपत्तव्यस्तमर्थमेकमेव संभवाल्लाघवाच्च प्रयोजयन्ति तत्तन्त्रम् इति । [३६] भोजोऽपि एतादृशमेव लक्षणं करोति ।' तद्धिकठाध्ययनं शतपथिकायां शालायामेकं प्रदीपं व्याकरणाध्यायिनोऽपि प्रयोजयन्ति।''श्वेतो

धावतीत्यत्र'' श्वेत शब्दोऽनेकशक्तियुक्तोऽवलोक्यतेऽत्रैव भर्तृहरिरेतस्मिन्वाक्ये तन्त्रं मनुते । सूत्रेष्वपीदन्तन्त्रमुपादेयं दृश्यते, तद्यथा -

[३७] तपरस्तत्कालस्य इग्यणः सम्प्रसारणम् [३८] वृद्धिरादैच् न [३९] बेति विभाषा

[४०] हक्रोरन्यतरस्याम् इति प्रभृतिसूत्रेषु तन्त्रेणैव शास्त्रप्रक्रिया निर्वाहो भवति ।

तपरसूत्रमधिकृत्य पुण्यराजो[४१] वदति भिन्नार्थयोस्तपर-शब्दयोस्तपरतत्कालस्येति तन्त्रिणः सूत्रं उपादानं क्रियत इति। एवं च तत्र तत्र लक्षणेष्वपि तन्त्रलक्षणं प्रभवत्येवेति विज्ञेयम् [४२] ।

[४३] भोजमतेन प्रकरणं प्रबन्धो वेति तन्त्रम् यथैकं वाक्यं द्वयोरर्थयोः प्रयुज्यते, तद्वत् प्रकरणस्य प्रबन्धस्य वा प्रयोगे तन्त्रमुच्यते । एवमेकत्वसंख्यं परसंख्यया सह तन्त्रिणी भवति यथा -''आस्यते भवद्भ्याम्'' आस्यते भवद्भिरिति । प्रश्नप्रसङ्गेऽपि बहुत्वसंख्या एकद्विसंख्यायास्तन्त्रिण्युच्यते- यथा 'कति भवतः पुत्राः' । नपुंसकस्य स्त्रीपुंसयोस्तन्त्रम्, यथा किं जातमस्येति प्रश्ने पुत्रो जातः पुत्री जातेति । क्वचिद्विभक्तिरपि तन्त्रिणी दृश्यते, यथा - 'गवां स्वामी व्रजति' एतेन स्वस्वामिभावः षष्ठयन्तेन लक्ष्यते। 'गोस्वामी व्रजतीत्यत्राख्यातपदस्याक्षेपः संबन्धविशेषेण ज्ञायते । 'इष्यते ग्रामो गन्तुमित्यत्र' तिङन्तप्रत्ययः प्रधानक्रियाः, गन्तुमप्रधानक्रियामपि अन्तःसात्करोति। क्वचिद् प्रधानपि तन्त्रम्, यथा 'पक्त्वा अत्रौदनो भुज्यते,' इत्यत्र भोजनं प्रधानक्रिया पाकश्चाप्रधानभूता क्रिया दृश्यते। अन्यत्रापि एक एव पुरा शब्दः पुराऽर्थे, सहवचनार्थेऽपि भवति, आराच्छब्दः सन्निकृष्टविप्रकृष्टार्थयोः प्रयुज्यते । शब्दस्य शक्तिस्तन्त्रेण शक्त्यवच्छेकत्वमुपजायते।

[४४] वेदेऽपि प्रधानभूता ये षड्यागा आग्नेयादयस्तदर्थं ये प्रयाजादयस्ते पूर्वं पश्चाद्वा कृताः सर्वेषां तन्त्रेण साधारण्येनोपकारकाः भवन्तीत्युच्यते ।

[४५] तपरस्तत्कालस्येत्यत्र तपरशब्दस्तन्त्रेणैव बहुव्रीहितत्पुरुषसमासेन गृह्यते, नान्यथा तत्सम्भाव्यते तन्त्रं हि नाम अनुशासनम्, यत्र

लक्ष्येऽनेकानुग्राहकाः भवन्ति तत्र तन्त्रमनुभाव्यते । लोके हि प्रसारिततन्तवः तन्त्रम् । भाष्येऽपि बहुधा तन्त्रशब्दप्रयोगः दृश्यते यथा - [४६] तन्त्रं तरनिर्देशाः एवं तत्र यः प्राधान्ये वर्तते तन्त्रशब्दः, तस्येह ग्रहणम् ।

[४७] मीमांसकेष्वपि तन्त्रशब्दः प्रचलितोऽस्ति सामान्यधर्मसमुहार्थं इति। तदुक्तम् तन्त्रं साधारणो धर्मग्रामः ।

३- [४८] **आवृत्तिः**- आवृत्तिभेदयोस्तन्त्रप्रसङ्गप्रतियोगिनोर्निदर्शनमुच्यते। आवृत्तौ तावत्तन्त्रप्रतिपक्षभूतायां निदर्शनम् । यथा 'एकं वस्त्रमाभरणं वा रणभूमिषु भटानामुपयोगाय कल्पत'' इति पुण्यराजः ।

भोजस्य लक्षणमधिकं स्पष्टं लक्ष्यते -[४९] एकस्य कारकक्रियादेः पदार्थस्या- भिन्नरूपस्यैव पर्यायेणानेकत्र वर्तमानत्वमावृत्तिः यथा- '' एकं पात्रमसहभुजां भुजि क्रियायामधिकरणभावमावृत्त्या प्रतिपद्यते'' अन्यदपि एकं वस्त्रमाभरणं शस्त्रं वा रङ्गभूमिषु रणभूमिषु वा भटानां नटानां वोपयोगाय कल्पत इति एवं व्यायामाङ्गमायुधजीविनामभ्यासं प्रत्युपकरोति, पुनरपि सहस्रमृषयः एकां कपिलामावृत्त्या दत्त्वा सर्वे सहस्रदक्षिणा बभूवुः तथैवैकं क्रियापदं कारकपदं वा प्रतिवाक्यमावर्तमानमाकांक्षां निराकरोति। कात्यायनः आवृत्तिः शब्दः आवृत्तिसंख्यानेत्येवं व्यवहरति, भाष्ये [५०]वृद्धिरादैचसूत्रवार्तिकेएकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात् तत्रैकाजनेकाज्ग्रहणेषु चावृत्ते संख्यानादनेकाच्त्वं भविष्यति । तद्यथा 'सप्तदश सामधेन्यो भवन्ति'' तत्र विकृतियागे त्रयोदश सामधेन्यः प्रथमोत्तमस्त्रिरावृत्त्या सप्तदश सम्पद्यते। एवं 'घटेन तरतीति' वाक्ये द्वयज् लक्षणष्ठन् भवति तत्सर्वं आवृत्तिसिद्धम्। भवेदावृत्तितः कार्यं परिहृतमिति भाष्यम् -

[५१] इग्यणः सम्प्रसारणमित्यत्र कस्य सम्प्रसारणसंज्ञेति प्रश्ने वर्णस्य वाक्यस्य वेत्यत्रावृत्त्या कृत्स्नस्य भिन्नप्रतीयमानोपस्कारा प्रवृत्तिराख्यायते। [५२] क्रियाकारकपदावृतिः काव्यादौ सर्वत्र दृष्टिपथमायाति ।

४- [५३] **भेदः** - भेदस्य तन्त्रप्रतियोगिनो निदर्शनम् यथा भिन्नानि पात्राण्यसहभुजां भुजिक्रियायां भेदेनाधिकरणभावं प्रतिपद्यन्त इति [५४] पुण्यराजः । [५५] भोजमतेन यत्र भेदेनाप्युपात्तोऽर्थः शब्दो वा स्वरूपसामर्थ्यादिभिरनेकत्वमापद्यते स भेदः । तत्रार्थभेदो यथा - 'ब्राह्मणेभ्यः पाद्यमाचमनीयं भोजनं च दीयताम्,' इत्याभेदेन श्रुतान्यपि पाद्याचमनभोजनादीनि

स्वरूपेण भेदमुमगच्छन्ति क्वचिच्च साक्षादभेदेनापि अधिकरणभावं प्रतिपद्यते यथा - पितृणां राजतं देवानां तु हिरण्यमयमित्यभेदेनापि उपादाने भिन्नान्येव पात्राणि ब्राह्मणानां सहभुञ्जतां भुजि क्रियायां अधिकरणभावं प्रतिपद्यन्ते । [५६] उत्तरभारतस्य कामपि परम्परामभिलक्ष्य भेदस्य लौकिकमुदाहरणं भोजेन प्रस्तुत मृगृहस्था पत्न्य आयावर्ते संभोगसंपादनाय भेदेनैवोपासत इति । वेदेऽपि यथा ग्रहं समार्ष्टि: इत्यत्र य: संसर्ग: ग्रहविषये प्रतिपादित: स भेदेनैव ज्ञायते । शब्दशास्त्रे न वेति विभाषेत्यत्र सूत्रे विभाषाणां प्रत्याख्यानमुभयत्र विधिमुखेन निषेधमुखेन भिन्नैव तत्प्रवृत्ति: दृश्यते "ह्क्रोरन्यतरस्यामित्यत्र सूत्रे विभाषोभयत्र कारयति कटं चैत्रं चैत्रेण वा" विधिमुखप्रवृत्ति:, "विकारयति सैन्धवान्" इत्यत्र निषेधमुखमप्रवृत्ति: दरीदृश्यते । अतो हि पदार्थ: वाक्यार्थो वा स्वरूपेण यत्रानेकत्वं प्राप्नोति, तद्भेदेन सम्भाव्यते ज्ञातुम्। भेद: [५७] क्वचित्क्रियात्मक: क्वचित्कारकात्मकश्चेति । यथा शब्दस्य पदवाक्यभेदौ तथैव वाक्यस्य प्राकृतवैकृतभेदौ भवत: । प्राकृतस्योदाहरणम् पश्य मृगो धावति, इत्यत्र पश्येत्येकं वाक्यम्, मृगो धावति तु द्वितीयम् । वैकृतस्योदाहरणं लोके शास्त्रे वेदे च-ऋताषाड्तधामाग्निर्गन्धर्वस्तस्योषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्य: स्वाहा लिङ्गविभक्तिपरिणामो वैकृतम् ।

शास्त्रे यथा -

[५८] यस्तु प्रयुङ्क्ते कुशलो शब्दान्यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योविग्वद्दुष्यति चापशब्दै: ।।

इत्यत्र वाग्योगविदिति यावदेकं वाक्यम्, दुष्यति चापशब्दै: यावद् द्वितीयम् । किन्त्वत्र वाग्योगविदेव दुष्यति? नैवं अवाग्योगविदित्यस्य वैकृतत्वाद्वाक्यशेष: क्रियते । यतो हि यो वाग्योगवित् स नापशब्दं भाषते, तस्य तु ज्ञानमेव शरणं भवति। एतेनावाग्योगविदोऽज्ञानं शरणम्, यदि जानन्नपशब्दं प्रयुङ्क्ते तदा दुष्ट: स्यात्, न पुनरजानन्नेवम् । नहि अज्ञानमत्यन्ताय शरणं भवति । यो ह्यजानन् ब्राह्मणं हन्यात्सोऽपि मन्ये पतित:स्यादिति । अनेन तत्र व्याकरणशास्त्रस्याध्ययनोत्कर्ष: प्रतिपादित:। यथा- एक एव अश्वशब्द: क्वचिदर्थे जातिवाचक: क्वचिदस्वेति धनाभावनिमित्तक इति कैय्यट: अतोहि शास्त्रेऽपि भेदोऽभिलक्ष्यते। लोकेऽपि- जायन्ते म्रियन्ते च मद्विधा: क्षुद्रजन्तव: इत्यस्मिन् वाक्ये " क्षुद्रजन्तव:"

इत्यत्र क्षुद्र जन्तवः इत्येवं पदभेद एवाङ्गीक्रियते ।

५- **बाधा** - [५९] अर्थित्वात् सामान्योपदेशाद्वा सति प्रवृत्तिसंभवे दृष्टादृष्टा- र्थमप्राप्त्यनुमानमात्रं यत्र सा बाधा । तत्र वैदिकोदाहरणेन " अभक्ष्यो ग्राम्य कुक्कुटः" इति ग्राम्यकुक्कुटभक्षणं क्षुत्प्रतिघातार्थमर्थित्वात् प्राप्तमनेन बाध्यते । [६०] भाष्येऽपि शब्दानुशासनप्रसङ्गे 'अन्यतरोपदेशेन कृतं स्यात् । तद्यथा- भक्ष्यनियमेनाभक्ष्य प्रतिषेधो गम्यते । पञ्च पञ्चनखा भक्ष्याः इत्युक्ते गम्यत एतत् अतोऽन्येऽभक्ष्या इतिं अभक्ष्यप्रति- षेधेन च भक्ष्यनियमः । तद्यथा- अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतत् - अरण्यो भक्ष्य इति । अत्र [६१] कैय्यटोक्तमपि संगच्छते तद्यथा - अर्थित्वाद्भक्षणं प्राप्तं पञ्चसु नखेषु नियम्यमानं सामर्थ्यादन्येभ्यो निवर्वते । बाधैव तत्र परिलक्ष्यते न त्वयं विधिरिति।

भोजलक्षणे बाधायाः प्रयोजनान्यपि प्रदर्शितानि सन्ति । तद्यथा [६२] अर्थित्वात्सामान्योपदेशाद्वा सति प्रवृत्तिसम्भवे वचनादसम्भवाच्चरितार्थत्वात् फलाभावाद्विशेषे प्रत्यक्षश्रुते परिसंख्यादिभ्यश्च दृष्टादृष्टार्थेषु क्रमसु तुल्यबलानां विरोधिनामविरोधिनां वार्थानामप्राप्त्यनुमानं बाधः ।

१- अभक्ष्यो ग्राम्यकुक्कुट इत्यादिवाक्ये अर्थित्वात् सामान्येन प्रवृत्तं मांसभक्षणं वचनं बाध्यते ।।

२- गुरुवद्गुरुपुत्रे वर्तितव्यमिति वाक्ये सामान्योपदेशात्प्रवृत्तस्योच्छिष्टभोजनं बाध्यते । एवं अष्टाश्रिर्यूपो भवतीति अष्टाश्रित्वं चतुरश्रो वाजपेययूपःद्वयोरभावे तद्विरोधी बाध्यते ।

३- ब्राह्मणेभ्यो दधि दीयताम् इत्यादिवाक्ये सामान्योपदेशात्कौण्डिन्येऽपि प्रसक्तं दधिदानं विशेषेण प्रत्यक्षश्रुत्या च तक्रदानेन बाध्यते ।

४- पञ्चनखा भक्ष्याः इत्यत्रार्थित्वादपञ्च नखानां भक्षणविरुद्धमपि पञ्चनखाः भक्ष्या इति परिसंख्यया बाध्यते ।

५- ब्रीहीनवहन्तीति वाक्ये चरितार्थत्वेन बाधा ।

६- शतकृष्णलश्चरुर्भवतीति फलाभावेन नावघातः क्रियते इति । व्याकरणेप्युत्सर्गनियमः अपवादेन बाध्यते । यथा [६३] कर्मण्यण् सामान्यनियमः [६४]आतोनुपसर्गे कः इत्यादिना विशेषेण नियमेन बाध्यते ।

तत्र हरिरप्याह-

[६४] विशेषविधिनाऽर्थित्वाद् वाक्यशेषोऽनुमीयते ।
विशेषवन्नित्येऽर्थे तस्मात्तुल्यं व्यपेक्षणम् ।।

तत्रापि " ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यन्यायेनेत्यादौ । एवं कर्मण्यण् आतोनुपसर्गे कः " इत्यादौ पूर्वोक्तं शास्त्रमुत्सर्गवाक्यम्, उत्तरोक्तमपवादवाक्यमिति वदन्ति । बाधासमुद्देशोऽपि नाद्यपदकाण्डे दृश्यते।

६- [६५] **समुच्चयः** तुल्य [६६] बलानामविरोधिनां समुच्चयः तद्यथा देवदत्तं भोजय लवणेन सर्पिषा शाकेन वेति, वेदे यथा ब्राह्मणेभ्यः पाद्यमाचमनं च दीयताम् । शास्त्रेऽप्यविरोधात् फलभेदाच्च प्रत्ययकृत्कृत्यसंज्ञाः प्रत्ययतद्धिततद्राजसंज्ञाश्चैकत्र समुच्चीयन्त इति पुण्यराजः । भोजमतेन [६७] तुल्यविधानमविरोधिनां भिन्नप्रयोजनानामेकार्थपरतयोपादानं समुच्चय इत्यत्र विशिष्यगुणादिसमुच्चयः पुनरभेदेन भेदेन च दृश्यते । एतत्काव्योदाहरणेन स्पष्टम् ।

शब्दशास्त्रेऽपि फलभेदात् कृत्कृत्यसंज्ञाः, तद्धितप्रत्ययः, तद्राजसंज्ञादीनामेकत्र समुच्चयोऽपि विरोधाभावेन फलभेदेन च दरीदृश्यते । अगतिका ह्येषा [६८] गतिः। यत् कृत्स्नसंयोगे सति विकल्पसमुच्चयौ स्याताम् । सत्यां हि गतौ न तौ आश्रयणीयौ स्तः ।

[६९] 'समुच्चयेऽन्यतरस्यामि'त्यनेनानेकक्रियाऽध्याहारः समुच्चयो भवतीति निर्दिश्यते । समभिव्याहारस्तु कश्चन भिन्नपदार्थः, यथा क्रिया [७०] समभिहारे लोलोटो हिस्वौ वा च तध्वमोः इत्यत्र क्रियासमभिहारः पौनः पुण्येन भृशार्थश्च भवति, स चैकक्रियायामेव विहरति, समुच्चयस्त्वनेकक्रियासु अध्याह्रियते । अयमेवोभयार्मौलिकः भेदः दृश्यते ।[७१] काशिकायामपि अनेकक्रियाध्याहारः समुच्चयः इति । "समुच्चितिरेव समुच्चय इति" न्यासकारो वदति ।

७-[७२] **ऊहः**- [७३] प्रकृतो समर्थानां विकारे सामर्थ्याभावात् प्रकृतिरूपलिङ्ग-वचनान्तरोपादानेन क्रियते । तदुदाहरणम्- "अग्नये त्वां जुष्टं निर्वपामि" अत्र प्रकृत्यूहः अग्निशब्दश्चात्राङ्गारवाचके समर्थोऽस्ति। विकृत्यूहश्च 'सूर्याय चरु निर्वपेत्' बहुप्रकारकः ऊहो भवति प्रकृतिलिङ्गवचनरूपकः ।

विभक्त्यूहोऽपि लोके यथा - [७४] देवदत्तस्योच्चानि गृहाणि आढ्यो वैधवेयः । इत्यत्र षष्ठ्यन्तमपोह्य निमित्तवशात्प्रथमान्तं ऊह्यते । [७५] भोजमतम्-प्रकृतौ समर्थानां मन्त्रवाक्यानां विकारेषु सामर्थ्याभावात्सर्वलोप एकदेशनिवृत्तावपि क्रियायां मुख्यवृत्तिव्यतिक्रमेण पदार्थान्तरोपादाने प्रसक्ते शब्दान्तरस्यार्थान्तरवृत्तेः समर्थस्योपादाने प्रकृतिरूपलिङ्गविभक्तिवचनान्तराणां विमृश्योपादानमूहः इति । भोजोक्तं लक्षणं पूर्वोक्तस्य व्याख्यानमेव प्रतिभाति। [७६] भोजः पुण्यराजकृतलक्षणं मीमांसाशास्त्रकृतलक्षणं उभयमपि विमृश्यैतत्प्रस्तौति, तस्योदाहरणान्यपि अपेक्षाकृतमधिकान्येव भवन्तीति[७७] ।

तन्मते प्रकृतिः शब्दवती, विकारश्च अशब्दो भवति । [७८] एवमिति-कर्त्तव्यताकसकलावयवसमूहोपदेशः प्रकृतिः यथा- दशपौर्णमासः यत्रैषां नोपदेशः स विकारः यथा 'सौर्यायेति- । प्रकृतिवदेव विकृतिः कर्तव्येति मीमांसासिद्धान्तः । प्रकृतौ यत्मन्त्रोऽभिधेयोऽस्ति विकृतौ सन्नोपलभ्येत्तदा सम्पूर्णमन्त्रनिवृत्तिः भवति। एकादेशाभिधेयाभावे तु एकादेशस्य निवृत्तिरिति।

व्याकरणे ऊहः-

[७९] व्याकरणेऽप्यूहविषयत्वमापन्नाः सर्वे विभक्तिविपरिणामाः । तेषु हि योगान्तरे यथा विभक्त्या सम्बद्धो यः शब्द उपलब्धस्तत्सम्बन्धत्यागेनैव विभक्त्यन्तरयोगं स प्रतिपद्यत इति । तदुदाहरणानि ' क्रमशः उपदेशेऽजनुनासिक इत' तस्य लोपः भूवादयो धातवः अनुदात्तङित आत्मनेपदम् धातोः इति सूत्राणि सन्ति । सूत्रेषु सर्वत्र विभक्तिविपरिणामः प्रतिपद्यते । भाष्ये - [८०] रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति ते चावश्यं यज्ञगतेन यथाऽर्थं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथार्थं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।

''देवीरापः शुद्धा यूयम्'' इत्यत्र लिङ्गोहः, 'देव आज्यं शुद्धं त्वम्,' पूर्वत्र स्त्रीलिङ्गम्, अपरत्र शुद्धा स्थाने शुद्धमिति लिङ्गोहः कथ्यते ।

'आयुराशास्ते' स्थाने ' आयुराशासाते' 'आयुराशासते' वेत्यत्र विभक्त्योहः सम्पद्यते ।ऊहविषये व्याकरणस्यापेक्षा क्रियते । तस्य प्रतिषेधोऽपि हरिणा कथ्यते-

[८१] **अङ्गानि ज्ञातिनामान्युपमा चेन्द्रियाणि च ।**
एतानि नोहं गच्छन्ति अध्रिगौ विषमं हि तत् ।।

वस्तुत ऊहविषयः प्रकृतिविकृतिभावः, स च व्याकरणशास्त्रचिन्त्यो भवति अन्यत्रोहविषयः वेदमीमांसादिषु द्रष्टव्यः । भाषायामपि ऊहप्रयोगो भवति यथा भोजो वदति' ।

८- [८२] **सम्बन्धाबाधनम्** - ऊहप्रतिपक्षभूतं सम्बन्धबाधनम् इति [८३] पुण्यराजः। देवदत्तस्योच्चानि गृहाणि युक्तं तान्यभिजातस्येति वाक्ये देवदत्तस्याभिजातकुलजातस्य तस्य उच्चानि गृहाणि सन्तीति युक्तम्, तदत्र पूर्वपदस्य उत्तरपदेन सह सम्बन्धः जायते । एवं 'बदरीसूक्ष्मकण्टका मधुरावृक्षाः, पाञ्चालाः जनपदः इत्यादिष्वेव सम्बन्धबाधनमुपतिष्ठते । बदरीत्यस्य मधुरासूक्ष्मकण्टका शब्दाः विशेषणानि बदरीस्त्रीलिङ्गेन तेषामपि योगो भवति, यदि वृक्षशब्देन योगस्तदा वृक्षगतयोगो भविष्यतीति । जातिबलेन विशेषणेषु युक्तवद्भवो न भवति, अतः पाञ्चालाः जनपदः प्रभृतिवाक्यमपि प्रतिपद्यते ।

भोजस्यात्र भिन्नः पन्था, तन्मतम् - 'विशेषश्रुत्यापि' [८४] सामान्यश्रुते-रबाधाः सम्बन्धबाधनम् । यथा ब्राह्मणा भुञ्जतां माठरकौण्डिन्यौ परिवेविष्टामिति । तत्र भाषागतमुदाहरणमपि दृश्यते ।

[८५] बहुगणवतुर्डतिसंख्येति योगे विधीयमानसम्बन्धस्य स्वरूपपदार्थकस्य संख्याशब्दस्य श्रुतस्य योगान्तरे संज्ञिविशेषणत्वं विज्ञायते ''ष्णान्ता संख्या'' षट् संज्ञा भवतीति पुण्यराजः ।

सुधानिधौ [८६] तु-उभयगतिरिह शास्त्रे भवतीति । अत एव बहुगणशब्दयोर्वैपुल्यसङ्गार्थयोर्नेह ग्रहणम्, किन्तु संख्यार्थयोरेव । एवं ''ष्णान्ता षट्' इत्यत्र स्त्रीलिङ्गविशेष्यस्याकांक्षितत्वादस्वरितस्यापि संख्यापदस्यानुवृत्याशब्दाधिकारेण तस्याभिमतार्थपरत्वसिद्धेः । एतच्च पूर्वसूत्रे भाष्ये स्पष्टम् । बहुगणशब्दयोर्वैपुल्यस्य सङ्गस्य वाऽर्थो न ग्रहणमपि तु संख्यायां ग्रहणमिति सुवचः । द्वितीयसूत्रे स्त्रीलिङ्गनिर्देशात्संख्यैव सम्बध्यते । वेदेऽपि ' यजमानं दण्डेन दीक्षयति' इत्यत्र यजमानमित्यस्य संबन्धाबाधनमेव पश्यामः ।

९- सामान्यातिदेशः [८७] - अन्यत्र रूढ़सम्बन्धा धर्मानिर्ज्ञातभेदेष्वर्थेषु प्रसिद्धेरनुमेयभेदसम्भवै : सम्बन्धिभिर्व्यपदिश्यन्ते। तद्यथा-ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र यावानर्थो ब्राह्मणशब्दं न व्यभिचरति तावत्यर्थे

यानि सम्बद्धानि कार्याणि तान्यत्यन्तमलब्धब्राह्मणव्यपदेशे क्षत्रियेऽनिर्दिश्यन्ते। भोजमतेन यत्र अन्यरूढ़सम्बद्धा धर्मा प्रसिद्धैरनुमेयभेदसम्भवैःसम्बन्धिभिर्व्यपदिष्टा निर्ज्ञातभेदेष्वर्थेषु प्राप्यन्ते स सामान्यातिदेशः। एतदुदाहरणन्तु पूर्वोक्तमेव दत्तमस्ति । तदनुसारं सामान्यब्राह्मणशब्दो न व्यभिचरति। माठरादिभिस्तु व्यभिचरति, परन्तु कटे माठरत्वं नास्ति। एवं निर्ज्ञातशब्दः कञ्चिदेवार्थभागं संस्पृशति, अर्थस्य यावन्तं वैशिष्ट्यं न तावच्छब्देन प्रतिपादयितुं शक्यते । माठरवदस्मिन्कटे वर्तितव्यमित्यत्र सामान्यातिदेश आनुमानिक एवास्ति । माठरस्याभिरूपादयोविशिष्टधर्माः नात्राश्रीयन्ते, एवं क्वचिद् "विशिष्टवदस्मिन्न वर्तितव्यमित्यत्रापि" विशिष्टस्य यद्विशिष्टत्वं तदेवात्राश्रीयते, तस्मात्सोऽपि सामान्यातिदेश एव भवति, न च विशेषातिदेश इति । एवंहि।

" सामान्यमात्रं शब्दार्थो विशेषा व्यभिचारिणः ।
सामर्थ्यमन्तरेणातो विशेषो नातिदिश्यते ।।

शब्दस्यार्थाः केवलं सामान्य एव भवति, विशेषास्तु व्यभिचरिता भवन्ति। यावत्सामर्थ्यं तावद्विशेषो नातिदिश्यते। एवं स्वीकृते गुरुवद् गुरुपुत्रे वर्तितव्यमित्यत्रापि सामान्यातिदेश वास्ति स्थानिवदादेशोऽनल्विधौ, [८९] इति शास्त्रे सामान्यातिदेशे विशेषानतिदेशः इति वार्तिकबलेन विशेषाति देशो नातिदिश्यते ।

१२ - अधिकारः[९०] अधिकारी- अर्थित्वं सामर्थ्य शास्त्रपर्युदासयोगित्वमधिकारः स विद्यते यस्यासावधिकारीति । मीमांसायामपि अर्थिनोऽधिकारः, तत्र भोजोऽपिक्रियासु योग्यत्वमधिकारः, कः पुनर्योग्यः।

अर्थी समर्थः शास्त्रेणापर्युदासः इति ।अधिकारोऽत्र योग्यता, सा चात्र कारणत्वशक्तिस्वरूपा, लोके च सा कर्तृत्वरूपा भवति ।एवं अर्थित्वं, सामर्थ्यं शास्त्रापर्युदासयोगित्वं यत्र त्रिविधं तत्राधिकारः, स यस्य तदधिकारीति हेलाराजः[९१] येनार्थेनार्थित्वमधिक्रियते तदपवर्गमाचक्षते । अर्थिनोऽसामर्थ्यात्क्वचित्सामर्थ्यमपि अधिकारस्य कारणं भवति । यथा - उत्पन्नायामपि ह्यभिनयदिदृक्षायामन्धो दर्शनि नाधिक्रियते । क्वचित्सामर्थ्येऽपि केषुचित्कर्मशास्त्रेण पर्युदासः यथा शूद्रास्त्रय्यां नाधिक्रियते । सामर्थ्यमसामर्थ्यञ्च केवलं शास्त्रेणैव

समधिगम्यते । एतस्माच्छास्त्रोपदेशादेव कर्मसु प्रधानस्याधिकारकारणं जायते। लोकेऽपि अद्य प्रभृति त्वमत्र ग्रामे नगरे वाऽधिकृत इति राजा नियुङ्क्ते।

एतस्मिन्प्रसङ्गे पुण्यराजभोजयोः समानवाक्यानि दृश्यन्ते । तानि पुण्यराजस्यैव भोजेनोदृतानि भवेयुरिति । तद्यथा –

पुण्यराजः– अर्थित्वमधिकारकारणम् ।

भोजः– अर्थित्वमधिकारकारणम् ।

पुण्यराजः– सत्येवार्थित्वे सामर्थ्यमधिकारकारणम् ।

भोजः– सत्यपि चार्थित्वे सामर्थ्यमधिकारकारणम् ।

पुण्यराजः– [९२] अदृष्टार्थविशेषे हि सामर्थ्यासामर्थ्यं शास्त्रादेव समधिगम्यते । तस्मात् प्रधानमधिकारकारणं शास्त्रोपदेशमाचक्षेते ।

भोजः– [९३] अदृष्टार्थविषये हि सामर्थ्यासामर्थ्ये शास्त्रादेव समधिगम्येते। तस्मात् प्रधानमधिकारकारणं शास्त्रोपदेशमाचक्षते। इत्यत्र पुण्यराजस्य वाक्यानि भोजेन तद्वदेवोपस्थापितानि सन्ति । अधिकारो यथा वेदे – अग्निहोत्रं जुहुयात् स्वर्गकामी ब्राह्मणः अत्र ब्राह्मणस्यैव अर्थित्वादधिकारो वर्तते, न तु क्षुद्रा शूद्रा श्रोत्रियादयः नाधिक्रियन्ते व्याकरणशास्त्रेऽधिकारस्य सम्बन्धः शब्देन, अर्थेन, पुरुषधर्मेण चास्ति। अमुं विषयं समधिगम्य पुण्यराजेन शब्दार्थयोः भेदविचारोऽपि सावसरं प्रस्तावितोऽस्ति। तद्यथाशब्दः षोढा विभज्यते साधुरसाधुश्च। प्रथमः साधुरपि शास्त्रीयः प्रायोगिकश्च एवं शास्त्रीयोऽपि त्रिधाप्रतिपाद्यः प्रथमः, प्रतिपादकः द्वितीयः, उभयरूपश्च तृतीयः प्रतिपाद्यस्योदाहरणम् – "दाधर्त्यादिनिर्पात्यमानः" । प्रतिपादिकस्योदाहरणम्– प्रकृतिप्रत्याादिः, एतेनैव कुम्भकारादिः प्रयोगस्य प्रतिपाद्यते। उभयरूपस्योदाहरणम् इतव्यशब्द्ः, अयं तव्यशब्देन प्रतिपाद्यते । स च प्रयोगस्थं इतव्यशब्दं प्रतिपादयति ।प्रायोगिकोऽपि लौकिकवैदिकभेदरूतत्र लौकिको देवैरिति, वैदिको देवास इति। सर्वमाहत्य शब्दः षोढ़ा कथितः पुण्यराजेन ।

संस्कृत [९४] व्याकरणदर्शनेऽपि तथैव गणितः । पञ्चप्रकारकः साधुशब्दोऽ साधुना सह षट् प्रकारको भवति । एषु शब्देषु प्रतिपाद्येषु व्याकरणस्याधिकारः सङ्गच्छते, तथैव तेषां फलदर्शनात् । न चैते प्रकृतिप्रत्ययादिषु दृश्यन्ते यतो हि प्रकृतिप्रत्ययादया व्याकरणशास्त्रेण न व्याक्रियन्ते । ते तु परिनिष्ठताः भवन्त्येवेति।

यथावद्भारमत्रार्थोऽप्याष्टादशधा कीर्तितोऽस्ति [९५]तद्भेदाः यथा- वस्तुमात्रम् अभिधेयः, शास्त्रीयः, लौकिकः, विशिष्टावग्रहसंप्रत्ययहेतुः, अविशिष्टावग्रहसंप्रत्ययहेतुः, मुख्यः, परिकल्पितरूपविपर्यासः, व्यपदेश्यः, अव्यपदेश्यः, सत्वभावापन्नः, असत्वभूतः, स्थितलक्षणः, विवक्षाप्रापितसन्निधानः, अभिधीयमानः, प्रतीयमानः, अभिसंहितः, नान्तरीयकः, ।

भोजेनापि [९६] द्वादशार्थाः व्याकरणदृशा क्रियाद्यर्थाः प्रस्तुतास्सन्ति । ते च - क्रिया, कालः, कारकम्, पुरुषः, उपाधिः, प्रधानः, उपस्कारार्थः, प्रातिपदिकार्थः, विभक्त्यर्थः, वृत्त्यर्थः, पदार्थः, वाक्यार्थश्चेति ।

पुण्यराजस्याधारो भर्तृहरेरुक्तार्थविषय एवास्ति यतो हि हरिणैवैतेऽर्थाः कुत्रचिद्व्याख्यातास्स्युरिति । न हि तावदिमे क्वचिल्लभ्यन्त इति । क्रमेणाष्टादशार्थाः संक्षिप्य लिख्यन्ते -

१- **वस्तुमात्रम्** [९७]- बाह्योऽयमर्थः वस्तुमात्रमिति । तत्र वस्तुमात्रं बाह्यार्थो यो वक्तुं प्रतिपादयितुं न समीहितः ।

२- [९८] **अभिधेयः**- यः समीहितः स एवाभिधेयोऽर्थः । समीहितपदे न तात्पर्यं वक्तुं प्रतिपादयितुं वा इष्टोऽर्थः व च बौद्धार्थो भवति । शब्दस्याधिकारस्तत्रैव दृश्यते। पुनरपि शास्त्रीयलौकिकभेदेन द्विविधा प्रोक्तः ।

३-[९९] **शास्त्रीयः**- अयमर्थः आवापोद्धारिको भवति । प्रकृत्यर्थप्रत्ययार्थादिरेवावापोद्धारिकः कथ्यते, आवाप+उद्धारपद्धत्या संस्कृतो भवति । वेदशास्त्रादिभिः प्रतिपाद्योऽर्थाच्छास्त्रीयो विनिगद्यते । अस्मिन्नेकस्यार्थस्य निष्पत्तिः, तदार्थान्तरस्य चाक्षेपः क्रियते । शास्त्रीयो हि अर्थः पौरुषेयः परिकल्पितरूपो वर्तते । व्यभिचरितोऽपि सन् सोऽव्यभिचाररूपः मुनित्रयातुगन्तॄणां कृते भवति, तस्माद्बहुधा विभक्तोऽवलोक्यते । अतथाभूतोऽपि असौ शब्दसाधुत्वस्य निमित्तभावेन प्रतिपादको व्यवस्थाप्यत इति ।

४- [१००] **लौकिकः**- असावर्थस्त्वखण्डः कथितपूर्वः अस्मिन्नेव शब्दस्याधिकारो प्रतिपादितः, न च शास्त्रीयेऽर्थे । लौकिकोऽयमर्थो वाक्यार्थरूपो भवति। न चायं शास्त्रीयवद् आवपोद्धारिक इति ।

[१०१] सीरदेवोऽपि त्रेधा अर्थविभागं कृतवान् - १- लौकिकः, २- अन्वयव्यतिरेकसमधिगम्यः, ३- प्रतिज्ञाज्ञापितः । तत्र लौकिको यथा- लौकिकस्तावत् पद एव नास्ति। प्रवृत्त्या निवृत्त्या वा शंब्दो लोकेऽर्थवान् भवति। वाक्य एव प्रवृत्तिनिवृत्ती दृष्टे इति तस्यैव लौकिकत्वं स्पष्टमत्र यल्लौकिकोऽर्थः न पदे तिष्ठति लोके प्रवृत्तिनिवृती द्वारैव शब्दोऽर्थवान् दृश्यते ।

लोके तु वाक्य एव प्रवृत्तिनिवृत्ती श्रूयेते, तस्माद्वाक्यं सार्थकं, अतो हि वाक्यार्थः, लौकिको बुधैः कथितः । [१०२]हरिणापि विषयोऽयं अस्यां कारिकायां समर्थितः -

तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम् ।
वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते ।।

५-[१०३] **विशिष्टावग्रहसंप्रत्ययहेतुः**- विशिष्टस्य [१०४] 'विशिष्टाकारस्यावग्रहः परिग्रहो यस्मिन् संप्रत्यये तादृशस्य संप्रत्ययस्य विषयविधया हेतुरर्थः । एतदुदाहरणम्। यथा कंसं घातयति एवं बलिं बन्धयति इत्यादौ ह्यर्थः न तथाभूतोऽस्ति यादृशो हि लोके दृश्यते । अत्र कंसः बलिश्चातीतपुरुषौ, सम्प्रति कंसघातः, बलिबन्धश्च नितान्तासम्भवोऽस्ति। अत्र ह्यर्थस्तदरूपो नास्ति, स चाविद्यमानेऽप्यत्र विद्यमानतां बोधयति । वस्तुतोऽयं काल्पनिकोऽर्थः विशिष्टाकारेणैव सम्प्रत्ययेन गोचरीकृतो व्यवहारविषयतामनुपतति। असत्योऽप्ययमर्थः लोके सत्यो भवति, दृश्यते हि लोकेऽभिनये कथायां च यदद्य कंसो घातितःघात्यते, घातयिष्यते वा, बलिर्बद्धः बध्यते, बन्धिष्यते वेति । एतादृशोऽर्थः बौद्ध एव न तु बाह्योऽस्ति । तत्र भूतकालिकव्यापाराः पुरुषद्वारा वर्तमानकाले प्रदर्श्यन्ते ।

६- **अविशिष्टावग्रहसंप्रत्ययहेतुः**- [१०५] यो बहिरेव[१०६] तथा व्यवस्थित इति पुण्यराजः। नासावसत्यः न च काल्पनिकोऽर्थः सर्वदा वास्तविकोऽर्थः यथागौः शुक्ल इति। एतस्य यो बहिरर्थः स एव प्रतीतिविषयोऽप्यस्ति ।

७- [१०७]**मुख्या** शब्दस्य अभिधावृतिद्वारा योऽर्थः बुध्यते, स एव मुख्यो भवति। यथा सास्नादिमान्गौरिति सास्नायुक्तेन गौः मुख्ययार्थस्य गोशब्दस्यैव प्रतिपादकः ।

८- **परिकल्पितरूप** [१०८] **विपर्यासः**- परिकल्पिता [१०९] निमित्तवशेन रूपविपर्यासो यस्यासौ परिकल्पितः विपर्यासोयो गौणोऽर्थ उच्यते । यथा गौर्बाहीकः इति लक्षणया व्यञ्जनया वा योऽर्थः लक्ष्यते व्यज्यते सोऽर्थ इति। वास्तविकर्थस्य निमित्तवशेन परिवर्तनं क्रियते तस्मादयं गौणोऽप्यत्र कथितः । एष गौणविषयः हरिवृत्तौ [११०]विशदं निरूपितः ।

९- **व्यपदेश्यः** [१११] - आवापोद्धारिक [११२]एव जातिर्द्रव्यं वेत्युक्तम् इति पुण्यराजः । यद्वर्णयितुं शक्यं, यथा जातिः द्रव्यञ्चेति । क्वचित्समाख्येयपदेनापि व्यवह्रितोऽयं दृयते।

१०- अव्यपदेश्यः- [११३] अखण्ड एव वाक्यार्थलक्षण इति । योऽवर्ण्यः सोऽर्थोऽव्यपदेश्यः कथ्यते । असमाख्येयत्वेन हरिणा व्यवहृतः।

११- सत्त्वभावापन्नः- [११४] सत्त्वभावमापन्नो व्यदेश्य एवावापोद्धारिक संज्ञकः सद् वस्तुबोधात्सद्रूपको भवति। बाह्यार्थबोधकः दृश्यकारणभूतः सोऽर्थः ।

१२-असत्त्वभूतः-[११५] असत्त्वभूतो वाक्यार्थलक्षण एव । योऽर्थः असत्पदार्थं बोधयति स एवासत्त्वभूतोऽर्थः । न बहिः सत्पदार्थदर्शनं जायते। उक्तिभेदादेवात्र (शब्दभेदादेवात्र) प्रायः भेदकथनं सङ्गच्छते ।

१३ -[११६]**स्थिरलक्षणः** - स्थिरं अव्यभिचारि, लक्षणं स्वरूपं यस्य स तथाभूतः । यथा राजपुरुष इत्यत्र राजसम्बन्धित्वं पुरुषस्य स्थिरलक्षणोऽर्थः न व्यभिचरति इत्युक्ते पुरुष एव नियमेन वर्तते क्वचिद् राजसम्बन्धित्वं पुरुषस्य, क्वचित्पुरुषसम्बन्धित्वं राज्ञः इति । अत्रार्थः सर्वदास्थिरो भवति।

१४ - [११७]**विवक्षाप्रापितसन्निधानः** - स्थिरलक्षणस्य विपरीतमत्र अर्थो विवक्षाधीनस्तस्मादयं विवक्षाप्रापितसन्निधानः कथ्यते । अस्मिन्नर्थे विशेषणविशेष्ययोर्यथेष्टः प्रयोगः कर्तुं पार्यते, यथा राज्ञः पुरुषस्येति । उभयमप्यत्र षष्ठयन्तं पदं उभावपि विशेषणविशेष्यौ भवतः, अर्थनिष्पत्तिः विवक्षया भवति। विवक्षां विना अर्थस्यानिश्चयो जायते ।

१५ -[११८]**अभिधीयमानः-** योऽर्थः प्रस्तुतेन [११९]रूपेण वर्ण्यते सोऽभिधीयमानः कथ्यते । तद्यथा राजसखः इत्यत्र राज्ञः सखाऽयमित्यर्थोऽ-भिधीयते ।

१६- [१२०]प्रतीयमानः- [१२१]तस्मिंस्त्वभिधीयमाने राजा सखाऽस्येत्ययमर्थः प्रतीयमान एवेति पुण्यराजः । योऽर्थः प्रस्तुतातिरिक्तः व्यञ्जनया ध्वनितो वा निष्पद्यते सोऽर्थः प्रतीयमानो भवति। तद्यथा- 'राजसखा' इत्यत्र राजा सखाऽस्यायमर्थः बहुव्रीहिना प्रतीयते तस्मादयं प्रतीयमानोऽर्थः कथ्यते ।

१७-[१२२]**अभिसंहितः** - शब्दशक्या [१२३]प्रतिपादयितुमभिप्रेतोऽर्थः। यथा गो शब्दे जातिर्द्रव्यं वेति, अत्र गोशब्दे गोत्वरूपा जातिः, व्यक्तिरूपं द्रव्यं वेति । अभिसंहितो वाच्योऽर्थो भवति ।

१८ - [१२४]**नान्तरीयकः-** [१२५]नान्तरीयको यथा तत्रैव वर्णसंस्था-नादिः ।[१२६]अविनाभावेन प्रवर्तमानोऽर्थः नान्तरीयकः कथ्यते । यथा गौः शुक्लः इत्यत्र वर्णः शुक्लत्वादिः, संस्थानं हि नाम सास्नालाङ्गूलककुत्खुरविषाणादिरूपमिति।

उपर्युक्तप्रकारेणाभिधेयस्य अष्टादशभेदाः क्रियन्ते । "पूर्वोक्तं शास्त्रस्य तु शब्दार्थरूपधर्मेष्वधिकारः" इति सङ्गच्छते ।

सभेदो हि शब्दार्थः इत्येवं निरूप्य तत्रैव पुरुषधर्मा [१२७] क्तृत्वप्रतिपृत्तत्वप्रभृतयः, तत्र वक्तृधर्मा आबाधः, असूयाऽसम्मतिकोपकुत्सनभर्त्सनादयश्चेति । प्रतिपत्तृधर्मास्तु कुत्स्यमानन्वप्रभृतया एव । [१२८] वाक्यादेरामन्त्रितस्या-सूयासम्मतिकोपकुत्सनभर्त्सनेषु" सूत्रे भाष्ये काशिकायां वा प्रयोक्तृधर्मा ह्यसूयादयो वाक्येनैव द्योत्यन्ते नामन्त्रितेनेति ।

तत्रासूया - परगुणानामसहनम् सम्मतिः- पूजनम् कोपः- क्रोधः, कुत्सनं- निन्दनम्, भर्त्सनं अपकारशब्दैर्भयोत्पादनम् । एते प्रयोक्तृधर्मा भवन्ति न चाभिधेयधर्माः । वार्तिककारमतेनअसूयकुत्सनयोः [१२९] कोपभर्त्सनयो-श्चैकार्थत्वात्पृथक्त्वनिर्देशानर्थक्यमिति । भाष्यमतेन पृथग् निर्देश एव समीचीनः तद्यथा आह्ननु च भो अकुपिता अपि दृश्यन्ते दारकान् भर्त्स्यमानाः। अन्ततस्ते तां शरीराकृतिं कुर्वन्ति या कुपितस्य भवति । एवं तर्याह -

[१३०] सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः ।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ।।
प्रदीपेऽप्याह -
गुरवो हि हितैषित्वाद्कुप्यन्तोऽपि भर्त्सनम् ।
कुर्वते भर्त्स्यमानास्तु कुपितान् प्रतिपयन्ति तान् ।।
विनाऽप्यसूयया कुत्सां कुर्वन्तीति पृथक्तयोः ।
निर्देशः सूत्रकारेण विहितः सूक्ष्मबुद्धिना ।।

अतो हि असूयाकुत्सनयोः पृथग्ग्रहणं कर्तव्यमिति निश्चितम् । काशिकायां तेषामुदाहरणानि यथा -

असूया तावत्- माणवक ३ माणवक ३ अभिरुपक ३ अभिरुपक ३ रिक्तं ते आभिरूप्यम् ।

सम्मतिः- माणवक ३ माणवक आभिरूपक३ अभिरूपक शोभनः खल्वसि ।

कोपः- माणवक ३ माणवक अविनीतक ३ अविनीतक ३ इदानीं ज्ञास्यसि जाल्म ।

कुत्सनम्- शक्तिके शक्तिके यष्टिकेऽरिक्ता ते शक्तिः ।

भर्त्सनम्- चौर ३ बृषल ३ वृषल ३घातयिष्यामि त्वा, बन्धयिष्यामि त्वा इत्यादिषु पूर्वपदस्य प्लुतस्वरः स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु

इत्यादिना सूत्रेण भवति । नवीनभाषाशास्त्रिणां अर्थलक्षणान्यपि दृष्टिपथमायान्ति । तत्र भाषाशास्त्रे सी. के. ओग्डेन एवं आइ. ए. रिचर्ड इति द्वाभ्यां स्वीयं [१३१] निबन्धे स्वीकृतानां लक्षणानां एका सूचिका प्रस्ताविता वर्तते इमानि लक्षणानि प्रत्यंक्षपरोक्षतया पुण्यराजकृतैर्लक्षणैः सह साम्यं वहिन्त । अर्थगवेषकैरियं सूची सादरं स्वीक्रियते । [१३२] तान्यर्थलक्षणानि-

१- अर्थो हि प्राकृतिकशक्तिः, तात्विकशक्तिर्वेति ।

२- अर्थस्य परपदैः सह कश्चन विचित्रोऽविश्लेषणीयश्च सम्बन्धो भवति ।

३- अभिधानेषु (शब्दकोशेषु) एकेन शब्देन युक्तोऽपरः कश्वन शब्दोऽर्थरूपः।

४- शब्दलक्ष्योऽर्थ एव भवति । (शब्दस्य संकेतोऽर्थः)

५- अर्थो ह्योकोऽभिप्रायः मूलतत्त्वञ्चास्ति । (सारांशोऽर्थः)

६- अभिमततथ्योऽर्थः, सङ्कल्पो वार्थः ।

७- शास्त्रीयपद्धतौ निर्दिष्टभावोऽर्थः ।

८- भविष्यदनुभवानां कश्चिद्वस्तुक्रियात्मकः परिणामोऽर्थः ।

९- कस्मिश्चद्वक्तव्ये वाच्ये लक्ष्ये वा निहितविचारात्मको परिणामः।

१०- वस्तुनोद्बोधितः मनोभावोऽर्थः ।

११- नियतसम्बन्धेन केनचित्संकेतेन सम्बद्धपदार्थोऽर्थः ।

१२-प्रेरितस्य स्मरणोद्बोधकः परिणामोऽर्थः यो हि अर्जित-सम्बन्धः ।

काचिद्घटना यया सहान्यघटनायाः स्मरणोद्बोधकस्य परिणामसम्बद्धः।

कस्यचित्संकेतस्याभिमतपदार्थोऽर्थः ।

यमर्थं प्रसङ्गः व्यनक्ति सोऽर्थः । वस्तुतोऽर्थः सांकेतिकः ।

१३-यं निदर्शयन् प्रतीकप्रयोक्ता स्वं विश्वसीति सोऽर्थः ।

१४-संकेतप्रयोक्त्रा यन्निर्दिश्यते सोऽर्थः ।

१५-संकेताभिमतोऽर्थः । संकेतेन यद् हृदि विभाव्यते । येन संकेतेन वक्तुस्तात्पर्यं अवगम्यते सोऽर्थः कथ्यते ।

१३- [१३३] **क्रियान्तरव्युदासः**- य एवं [१३४] धर्माः शब्दानां शास्त्रस्य वाऽनधिकारविषयत्वेनोक्तास्तानेवापेक्ष्योच्यते - व्युदासोऽस्य क्रियान्तर इति पुण्यराजः । [१३५] भोजमतेन सामर्थ्यार्थित्वादेः क्वचिद्योग्यता क्रियान्तरव्युदासः यथोच्यते -

क्वचित्कश्चिन्प्रगल्भते, न सर्वः सर्वं जानाति ।
किमपि कस्मैचिद्रोचते, भिन्नरुचिर्हि लोकः ।।
पुनरपि –
कुमुदान्येव शशाङ्कः सवित्रा बोधयति पङ्कजान्येव ।
वशिनां हि परपरिग्रहसम्पर्क पराङ्मुखी वृत्तिः ।। इति

क्रियान्तरव्युदासस्य स्वीकारेणैव इमानि वाक्यानि प्रसिद्धानि सन्ति ।

१४- [१३६] **श्रुत्यादिक्रमः**- इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादिभिः इत्यादिना श्रुत्यादिभेदेनायं क्रमोऽष्टप्रकारकः प्रतिपादितः [१३७] पुण्यराजेन । तत्र श्रुतिक्रमः, अर्थक्रमः, पाठक्रमः, काण्डक्रमः, प्रवृत्तिक्रमः, प्रतिपत्तिक्रमः, प्रयोगक्रमः, बुद्धिक्रमश्चेति आहत्याष्टौ । [१३८] भोजमतेन श्रुत्यादयः षड्- श्रुतिः- लिङ्गं- वाक्यं-प्रकरणं-स्थानं-समाख्येति पुनरपि तत्रैव-श्रुतिक्रमः, अर्थक्रमः, पाठक्रमः, स्थानक्रमः, मुख्यक्रमः, प्रवृत्तिक्रमश्च प्रतिपादितोऽस्ति। एषामन्योऽन्यसंकरः क्रमसम्भेदः ।

१-[१३९] **श्रुतिक्रमः**- पदार्थानां यागादिकर्मसु परिपाट्यावस्थापनं श्रुत्यादिक्रमः इति [१४०] **भोजः । " स्नात्वा व्रजति"** इत्यत्र क्त्वा प्रत्ययद्वारा श्रुतिक्रमः कथितः, तद्धि पूर्वं स्नाति ततो व्रजतीति बोधः । पाणिनिसूत्रम् [१४२] परस्मैपदानां "णलतुस्" इति सूत्रे णलादीनां **"यथासंख्यमनुदेशः समानामिति"** सूत्रश्रुत्यैव क्रमः निर्धार्यते । वेदेऽपि [१४३] हृदयस्याग्रेऽवद्यत्यथ जिह्वायाः अत्र अग्रेऽथशब्दाभ्यां श्रुत्यैवावदानक्रमः कथितः । [१४४] श्रृंगारप्रकाशे अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति उदाहरणमुखेन श्रुतिक्रमः प्रतिपादितोऽस्ति ।

(२) [१४५] **अर्थक्रमः**- अर्थ [१४६] सामर्थ्यतन्निमित्तः क्रमोऽर्थक्रमः कथ्यते, **तद्यथा "भुक्त्वा स्नात्वा व्रजतीत्यादौ"** लोके स्नानं भोजनं गमनमिति क्रमो व्यज्यते । नह्ययं क्रमः वाक्ये परिलक्ष्यते । अर्थस्य स्वरूपपर्यालोचनेनैव तत्क्रमो वक्तुं शक्यते । अर्थस्वरूपपर्यालोचनं हि नाम अर्थक्रमः, तेनैव स्नानादिक्रमः व्यवस्थाप्यते । **"अग्निहोत्रं जुहोति यवागुं श्रपयती "** त्यत्र पूर्वं यवागुश्रवणं ततश्चाग्निहोत्रमिति व्यवहारः। भोज [१४७] ग्रन्थेऽपीदमुदाहरणमस्ति ।

शब्दशास्त्रेऽपि - **"गुणकर्मणि लादिविधिः"** इत्युक्तम् । गां दोग्धि पयः इत्यादौ पूर्वं दुहेर्योगस्ततः पयसः । किमुपादानं विनैव कश्चित् गां पयः गोः स्तनेभ्यः पयो निष्पीडयितुं शक्नोति तत्र दुहिना गोपयसोर्यः क्रमेण सम्बन्ध सोऽर्थसामर्थ्यादुपजायते।

(३)[१४८] **पाठक्रमः**- उच्चारणक्रम एव पाठक्रमो भवति, तद्यथा-

[१४९] **इन्दुस्वर्णेणमातङ्गपुंस्कोकिलकलापिनः**
वक्त्रकान्तीक्षणगतिस्वरकेशैस्त्वया जिताः ।।

इत्यत्र यथा पठितेनैव यथा पठितस्य सम्बंन्धो व्यवस्थाप्यत इति । [१५०] तैत्तिरीये यथा द **'समिधो यजति तनूनपातं यजति इडो यजति'**, बर्हिर्यजति,स्वाहाकारं यजतीत्येवरूपेषु प्रयाजेषु यथापाठमेव क्रमेव तदनुष्ठानमिति । व्याकरणे-यथासंख्यनियम एव पाठक्रमस्तत्र [१५१] विप्रतिषेधे परं कार्यम्' पूर्वत्रासिद्धम् चेति शास्त्रपाठमेवापेक्ष्येदं पूर्वमिदं परमिति नियम्यते । धर्मार्थकाममोक्षाणां समवाये पूर्वः पूर्वो गरीयान् इति [१५२] भोजोक्तं वाक्यम् ।

(४)[१५३] **काण्डक्रमः**- **'येनैव क्रमेण ब्राह्मणक्षत्रियविशं वर्णसमाचारप्रतिपादकानि प्रकरणान्युद्दिष्टानि तेनैवाभिधीयन्त इति'** । वेदेऽपियेन कण्डिकाक्रमेण कर्माणि कथ्यन्ते तेनैव क्रमेण क्रियन्ते, यथा याज्यानुवाक्यानामग्नेयादीनां क्रमो निर्दिश्यते । तत्र याज्यानुवाक्यानां येन क्रमेण सन्निवेशः तेनैव च क्रमेण आग्नेयादीनां सन्निवेशः भवति। तत्सर्वं काण्डक्रमेण सम्बद्धयते । शास्त्रे च द्विर्वचनकाण्डात्षष्ठाध्यायस्यादितो द्वादशसूत्रं यावत् द्विर्वचनकाण्डं कथ्यते तस्मात् प्रभृति, सम्प्रसारणकाण्डमिति- तत्रैव त्रयोदश सूत्रतः चतुश्चत्वारिंशसूत्रं यावत् सम्प्रसारणकाण्डम् तत्र विप्रतिषेधे जाते परं कार्यं शास्त्रबलेन सम्प्रसारणकाण्डसूत्रं यतो हि द्विर्वचनकाण्डात् प्राक् वर्तते । [१५४] भोजेन तत्र स्थानक्रमशब्दः व्यवह्रियते ।

(५) [१५५] **प्रवृत्तिक्रम** - यो हि प्रतिपत्तुरिच्छावशात् प्रवृत्तः क्रम स एव प्रवृत्ति क्रम उच्यते, यथा- येनैव क्रमेण ब्राह्मणाः समानाः प्रविशन्ति तेनैव क्रमेण यथास्वं चोदितं कार्यं प्रतिलभन्त इति [१५६] पुण्यराजः । **'प्रागवदनोऽघमर्षणानि जपति'** इत्यादौ प्रवृत्तिक्रमो भोजेन प्रतिपाद्यते । वेदे- 'सप्तदश प्राजापत्यान् पशूनालभेत' इत्यादौ सप्तदशानामजानाम् प्रोक्षणविशसनपर्यग्निकरणक्रमेण चोदितानि । शास्त्रेऽपि

[१५७] **आरभ्यमाणे नित्योऽसौ वार्तिकव्याख्याने भाष्य उक्तं ययैवानुपूर्व्यर्थानां प्रादुर्भावः तयैव शब्दानामपि । यथा पट्व्या मृद्वयेति प्रथमतः लिङ्गात् स्त्रीप्रत्ययोदयः ततश्च एकवचनं जायते । एवमेव यणादेशादिकार्यमपि प्रवृत्तिक्रमेणैव प्रवर्तते ।**

(६)[१५८] **प्रतिपत्तिक्रमः** - अवबोधक्रम एव प्रतिपत्तिक्रम उच्यते। यथा अभूत् प्रयोगे पूर्वं [१५९] **लुङ्लङ्लृङ्क्ष्वडुदात्तः**' इत्यादिना अडागमस्तत्पश्चाद्धातोः लादेशाः प्राप्नुवन्ति, परन्तु शास्त्रे विधिवाक्यार्थपूर्वं अडागमश्चोर्ध्वमिति व्यवस्था । पुरुषः राज्ञः इत्यत्रोच्चारणक्रममतिक्रम्य राजार्थत्वेनैव पुरुषस्यार्थनिश्चयो भवति। अयमेव प्रतिपत्तिक्रमः वेदे-दक्षिणीयादीनां सोमस्य च अत्र प्रधानयागानां पूर्वप्रसङ्गः ततोऽवान्तरयागस्येति तेन दक्षिणीयादीनां सोमस्य च निश्चयो भवति । सोमयज्ञप्रधानोऽस्ति अतो हि दीक्षणीयादीनां निवर्तनपूर्वकमेव सोमयागस्य प्रतिपत्तिः दृश्यते। भोजेनायं क्रमो नोल्लिखितः । **प्रतिपत्तिक्रमोऽयं- श्रोतुरभिधातुर्वा न व्यवस्थित** इति [१६०] भर्तृहरि : ।

(७) **प्रयोगक्रमः** - येन क्रमेण धातुषु अनुबन्धास्तेनैव क्रमेणतत्संज्ञेति प्रयोगक्रमः। यथा डुकृञ्करणे धातौ ययाऽऽनुपूर्व्या क्रमेणानुबन्धा प्रयुज्यन्ते तत्क्रमेणैव ते संज्ञां लभन्ते । नास्य प्रयोगो भोजेनान्येन वा केनचित्कृतोऽस्ति।

(८) **बुद्धिक्रमः** - नायं पृथक्त्वेन परिगण्यते, वस्तुतोऽस्यान्तर्भावऽ प्रतिपत्तिक्रमे कर्तुं शक्यते, अत एव भोजादिना नायं समुल्लिख्यते । तत्र मुख्यक्रमस्य चर्चा दृश्यते । एतदुदाहरणं शास्त्रे **'इको यणचीत्यादौ'** इग् वर्णानां यणादीनां च बुद्धया पौर्वापर्यं कल्प्यते ।

[१६१] **भाष्ये-**

[१६२] **बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तन्वन्नीतिः ।**
शब्देनार्थान् वाच्यान्दृष्टवा बुद्धौ कुर्यात्पौर्वापर्य्यम् ।।

बुद्धिविषयमेव शब्दानां पौर्वापर्यम् । इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः, अस्मिंस्तावच्छब्देऽयं तावद्वर्णः ततोऽयं ततोऽयमिति ।

लोकेऽपि- विद्युतक्रमेण प्रवृत्तः पुरुषः पूर्वमर्थान् बुद्धौ संकलयति। तत्र लोकः विद्युतः समूहालम्बनं संकलय्य एव प्रवर्तते । वेदेऽपि प्रयाजादीनां यागानां उत्पन्नध्वंसिन्या बुद्धयैव संकलनं बौद्धक्रमः कथ्यते । सर्व एव वा बौद्धक्रमः न वस्तुसमुत्थ इति यदाहुः प्रतिपत्तिक्रमो न वस्तुसमुत्थ इति पुण्यराजः ।

उपर्युक्तक्रम बलाबलचिन्तनमपि सावसरं संसूच्यते पुण्यराजेन । भोजोक्तः श्रुत्यादिन्याय एवात्र निर्णायको विद्यते । क्वचिन्निमत्तवशाद्वेदे,

लोके, शास्त्रे च कैश्चित् कारणैः क्रमो विवक्षितवद्भवतिति व्यवहारः सम्पद्यते ।

१५-[१६३] **पराङ्गः** [१६४] पाराङ्गवद्भावो हि पराङ्गेन तात्पर्य्यम् ।

१६- [१६५] **अप्रयोजक** :- स्वयं प्रयोक्तुमसमर्थोऽन्यप्रयुक्तेन कर्मणा यः सम्बध्यते सोऽप्रयोजकः इति [१६६] भोजः । तद्यथा - राजा छत्रच्छायायाः। प्रयोजकः हस्त्यादयस्तदाधारा अप्रयोजका । पुनरपि यथा मांसपाके प्रवृते घृतादिभिस्सह अस्थीन्यप्रयोजकानि स्नातृप्रयुक्तेन स्नानीयेनाप्रयोजिका शाटिका युज्यते । अप्रयोजकत्वं तु अवास्तविकं भवति । एतद्विषये श्रृङ्गारप्रकाशे विस्तरेण प्रकाशः ।

[१६७] **प्रयोजकः** - [१६८] ये प्रयुक्तः प्रवर्तते तत्प्रयोजकम् यथा - 'स्वर्गो यागस्य' 'गार्हस्थ्यं वित्तार्जनस्य', अतिथयः पाकस्य, राजा छत्रच्छायायाः। प्रयोजकाप्रयोजकयोः निर्णयः सामर्थ्याधीन इति [१६९] हरिकारिका-

व्यर्थानां सन्निधानेऽपि सति चैषा प्रकाशते ।
प्रयोजकोऽर्थः शब्दस्य रूपाभेदेऽपि शस्यते ।।

१८-[१७०] **नान्तरीयकम्**- [१७१] यत्सम्बन्धमन्तरेण क्रिया प्रधानेन च यः सम्बंध्यते तन्नान्तरीयकमिति भोजः । यथा 'तप्ते पयसि दध्यानयति, स वैश्वदेव्या भिक्षा, वाजिभ्यो वाजिनाम्' ओदनार्थेन पाके नान्तरीयकेण धूमेन होतुरक्षिणी अपहन्यते । नान्तरीयकं क्वचिद्वास्तविकं क्वचिदवास्तविकमिति। येन विना कार्यं न निष्पद्यते तननान्तरीयकम् **तद्यथा**- पदार्थप्रतिपादनं विना वाक्यार्थप्रतिपादनं न सम्भवति तस्मान्पदार्थप्रतिपादनस्य नान्तरीयकत्वमुच्यते [६] नागेशेनेति ।

१९ - [१७२] **प्रधानम्** -[१७३] तत्र साध्यमापरार्थं प्रधानं सिद्धिमिति भोजः। तत्र साध्यत्वात् प्रधानं क्रिया, सिद्धत्वादप्रधानानि कारकाणि भवन्ति ।

२०- [१७४] **शेषः**- [१७५] परार्थं एव शेषः । क्वचिक्रियायाः अपि शेषत्वं विवक्षते । व्याकरणे प्रधानशेषयोर्भावो विवक्षया ज्ञातुं शक्यते ।

२१- [१७६] **विनियोगक्रमः**- शेषिशेषभावस्येति कर्तव्यता विनियोगक्रमो भवतिति [१७७] पुण्यराजः ।

[१७८] **विनियोगादृते शब्दो न स्वार्थस्य प्रकाशकः ।**
अर्थाभिधानसम्बन्धमुक्तिद्वारं प्रचक्षते ।।

वक्त्रा बह्वार्थकोऽयं शब्दो यथा अर्थेन नियुज्यते तथैव स तमर्थं प्रकाशयतीति व्यवहारसिद्धम् । अत एव शब्दस्य स्वीयार्थप्रकाशनयोग्यता केवलं उक्ति (वाक्य) माध्यमेन एव वैय्याकरणा आहुः । बौद्धशब्दस्य बौद्धर्थेन सह विनियोगः । वक्त्रा अर्थविविधेषु अभिप्रेतार्थविशेषो विनियोगद्वारैव सम्भाव्यते कर्तुमिति । [१७९] भोजेनायं क्रमः श्रुत्यादिविनियोगत्वेन व्यवहृतोऽस्ति ।

२२- [१८०] **साक्षादुपकारकम्** - [१८१] साक्षादस्योपकारीदमाराद् विशेषकमिति । यथा **'स्वात्म्यलङ्कारादिकम्'** अलङ्कारादिकं साक्षात्स्वमर्थमुपकारकमिति लोकसिद्धम् । शास्त्रेऽपि प्रकृत्ययादिप्रत्ययस्य साक्षादुपकारकं भवति । वेदे दर्शपूर्णमासयोरवघातादिकं साक्षादुपकारकं विद्यते ।

२३-[१८२] **आरादुपकारकम्** - आराद्-दूरत उपकारकम्, यथा स्वात्म्यलङ्कारादिकं साक्षादुपकारकं आरात्पुत्रदारादीनां दूरत उपकारकत्वमनुभूयते। शास्त्रे-प्रकृतिः प्रत्ययस्योपकारकं, प्रकृतिविशेषणं तदारादुपकारकमिति ब्रुवन्ति । यथा अष्टाध्याय्याम्- [१८२] एरच् हरतेर्दृतिनाथयोः पशौ इत्यादौ इवर्णान्तत्वादि धातु विशेषणम् कर्तृविशेषणं प्रत्ययस्य आरादुपकारकम् । वेदे प्रयाजादिकं दर्शपूर्णमासस्यारादुपकारकं निश्चियते । आरच्छब्दः हरिणा आराद्विशेषकत्वेन प्रयुक्तः । श्रृंगारप्रकाशे साक्षादाराच्छब्दयोः न प्रयोगो दृश्यते । क्वचिदाराच्छब्दः समीपस्यापि वाचक इति पठ्यते हरिणा वृत्तिसमुद्देशे ।

२४ [१८३] **शक्तिव्यापारभेदः** [१८४] (अपादानाधिकरणकर्तृशक्तीनां भेदः शास्त्रे) विवक्षावशाद् व्यापारभेदश्चेत्येवं शक्तिव्यापारभेदः । तद्यथा बलाहकाद् विद्योतते, बलाहके विद्योतते, बलाहको विद्योतत इति अत्र शक्तिभेदः विवक्षया एवं व्यापार भेदोऽपि विवक्षया कर्तुं शक्यते । शक्तीनां भेदः शक्तिव्यापारयोर्भेद इति विग्रहं कृत्वा शक्तिभेदः शक्तिव्यापारभेदश्चार्थद्वयं समुह्यते । शक्तिव्यापारभेदाश्रयणेनैव बहुविधो भेदः कर्तुं पार्यते ।

धनुषा विध्यतीति वाक्ये केवलं शक्तिमात्रमुच्यते, न तु व्यापारभेदोऽत्र दृश्यते यतो हि अपादानशक्तिरत्र गर्भीभूता केवलं करणशक्तिरेव विध्यर्थभेदेन संतिष्ठते । धनुषः करणत्वभसम्भवम् करणापादान संज्ञयोरत्र विप्रतिषेधः प्रतिपाद्यते। केवल व्यापार भेदस्तु वक्तुमशक्यः यतो हि शक्तिभेदं विना व्यापारभेदोऽपि न सम्भाव्यते।

[१८५] **भोजमतेन** - 'शक्तिः शक्तिव्यापारः क्रियाफलं क्रियासम्बन्धिनः सहचारिण इति शक्त्यादयः । तेषां वास्तव औपाधिको वा

भेदेनावभासः शक्त्यादिभेदः । वास्तविकः शक्तिभेदः- 'अग्निः काष्ठानि दहति, ओदनं पचति, पदार्थान्प्रकाशयति, सर्पिरग्निं दीपयति, पित्तं शमयति, शरीरमप्याययतीति । तत्र शक्तिव्यापारश्च - आभ्यां क्रीतम्, आभ्यां पक्वः, आभ्यां दत्तमित्यत्र आभ्यामित्यस्य लब्धादिपदसन्निधेरपादानक-रणकर्तृसम्प्रदानविषयेऽभिधाव्यापारो भिद्यते ।

२५ - [१८६] **फलभेदः**- फलभेदेन यो भेदः स फलभेदः । तद्यथैकस्य दानस्यायुरारोग्यैश्वर्याणि भिन्नानि फलानि फलस्य भेद एवास्ति । फलभेदस्तु द्विविधः [१८७] प्रोक्तः कर्मभेदसमानाधिकरणस्तद्विपरीतश्चेति । प्रथमोऽश्व-मेधराजसूयादीनां फलभेदः द्वितीयस्तु दानस्य भिन्नानि फलानि कथितानि। केषाञ्चिन्मतेन आयुष्यप्रवृतिषु सत्स्वपि प्रीतिविशेषमेवैकं फलं भवति । यथा बहवीनां क्रियाणामेकं फलम्, यथा- एकस्मिन्नेव यागे यजमानस्य धर्मः, ऋत्विजामर्थः, अन्नभुजां कामः, पशूनां मोक्षः । एकस्मिन्नेव संग्रामे भृत्यानां राज्ञामर्थः क्रयाणां कामः अभिमुखहतानां मोक्ष इति । क्रियाफलभेदोऽत्र प्रदर्श्यते - उष्ट्रिका आस्यन्ते, हतशायिकाश्शाय्यन्ते, रैपोषं पुष्यति, समूलकाषं कर्षति, इत्यादिषु क्रियाफलभेदेनैवौपाधिकभेदो ज्ञायत इति [१८८] भोजः ।

२६ -[१८९] **सम्बन्धभेदः** - [१९०] सम्बन्धाज्जातो भेदो भवति, तद्यथा पचतः पचन्ति इत्यादिषु धातूपात्तायाः क्रियायाः प्रत्ययवाच्यकर्तृभेदे विद्यमाने तेनैव सम्बन्धेन क्रियायाः भेदोऽपि लक्ष्यते । तस्मादुच्यते - साधनभेदात् तिङ्प्रत्ययेषु फलस्याभावात् फलं भवतीति बुध्यते, पुण्यराजीये यथोक्तम्- साधनभेदात्-तिङ्क्षु फलाभावात् फलं भवत्येवावबोधश्चेत् साधनेभ्यः- प्रसिद्धोऽसौ इति । [१९१] भोजमतेन सम्बन्धभेदस्तु औपाधिक एवास्ति- यथोदाहरणम्- सम्पन्नो यवो यवनेषु शुष्कस्तरुष्केषु विनष्टः सुराष्ट्रेषु परं भवान्पटुरासीत् पटुतर एषमोऽन्य एवास्ति सम्पन्न इति, यथा -

तासु श्रिया राजपरम्परासु प्रभाविशेषोदपटुर्निरीक्षः ।
सहस्रधामा व्यचरिद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ।।

सम्बन्धिभेदेन सह भोजः सहचारिभेदोऽपि निर्दिष्टवान्, यथा-

मगधेषु स्तनौ पीनो कलिङ्गेष्वक्षिणी शुभे ।
बाहू प्रलम्बावङ्गेषु वङ्गेषु चरणौ दृढौ। ।। इति ।

२७ - [१९२] **अविवक्षितभेदः** - प्रतिपक्षभूतभेदोऽविवक्षितभेदः सम्बन्धभेदाद्यत्र न भेदः सोऽयमिति । पक्त्वौदनं भुङ्क्ते इत्यत्र क्रियाभेदेन

प्राप्तः शक्त्यभेदोऽविवक्षितोऽस्ति, यत्र शक्त्यभेदस्तत्र भेदस्याविवक्षा कथ्यते । सम्बन्धाज्जातभेदः । यथा - आस्यते देवदत्तेन इत्यादौ क्रियाया एकत्वं न हन्यते 'देवदत्त यज्ञदत्ताभ्यां आस्यते इत्यत्रापि कर्तृभेदेऽपि क्रियैकत्वप्रतीतिरभ्युपगन्तव्येति । [१९३] पुण्यराजानुसारं शक्त्यादिभेदेन बहुविधोऽयं भेद इति लक्ष्यैः स्वयमेवोत्प्रेक्ष्यः। तत्प्रतिपक्षभूतस्तद्वदभेदोऽपि विज्ञेयः। वेदेऽपि भेदव्यवहारे दृश्यते । भेदाभेदयोस्तु क्वचिद्वास्तविकत्वम्, क्वचिद् विवक्षामात्रगोचरत्वम् । विवक्षापि द्विविधा लौकिकी प्रायोक्त्री च भवेदिति निर्दिष्टम् ।

अनया शैल्या वाक्यधर्माणां यानि षड् द्वादश - चतुर्विंशति लक्षणानि कथितान्यासन् तानि प्राकृतानि-वैदिकानि प्रकृतिमूलानि वैकृतानि-विकृतिमूलानि च सोदाहरणानि प्रदर्शितानि सन्ति। तत्रैव एतद् व्यतिरिक्ता अप्यमी बहुप्रकार न्यायाः पदार्थप्रतिपत्तिहेतुभूतास्सन्ति तं एवेदानीं सावसरं प्रौढिवादितया भर्तृहरिणा प्रदर्शिताः पुण्यराजेन भोजादिभिश्च व्याख्यातास्सन्ति। तेषां मतेन इमेऽपि वाक्यधर्मा एव विद्यन्ते। वस्तुतः मीमांसाशास्त्रतोऽतिरिक्ताऽमी धर्माः पदार्थनिश्चये सत्यभूता हेतवो वर्तन्त इति, त एव च वाक्यवाक्यार्थयोरखण्डपक्षे प्रतिपक्षभूताः भवन्ति । ते चोक्ताः -

१- [१९४] **प्रसज्यप्रतिषेधः**- [१९५] यत्र क्रियापदेन नञः सम्बन्धो वाक्यभेदश्च तत्र प्रसज्यप्रतिषेधोऽयमिति पुण्यराजः । यथा [१९६] नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः इत्यत्र दृप्तनिशाचरत्वाभाववानिति वस्तुतः अस्तिर्भवन्तीपरः सर्वत्र प्रयुज्यते अनेनाभ्युपगमेन अस्ति क्रिययैवात्र नञः सम्बन्ध इति युज्यते । अयं दृप्तनिशाचरो नास्ति, न भवतीति गम्यते शास्त्रे यथा [१९७] अकर्त्तरि च कारके संज्ञायाम् अनेन [१९८] कर्तृभिन्ने कारके घञ् क्रियते, इत्यत्र नञ् क्रियया सम्बद्धयते । वेदे ब्राह्मणो न हन्तव्यः, नानृतं वदेत् इत्यत्र प्रसज्यप्रतिषेधः । लोकेऽपिअसूर्यं पश्या राजदारा इति अत्र क्रियासम्बन्धेन प्रसज्यप्रतिषेधोऽसमर्थसमासश्च यतो हि सूर्यं न पश्यन्तीति बोधः। [१९९] भोजेन प्रसज्यप्रतिषेधपर्युदासो वा निषेधः । तयोर्यत्र सामर्थ्यं वाक्यभेदश्च स प्रतिषेधः । सुडनपुंकस्य इत्यत्र [२००] सुट् स्त्रीपुंसयोः इति कैय्यटः। तेन असूर्यं पश्यानि मुखानीत्यादि सिद्धम् । न ह्यत्र प्रसज्यप्रतिषेधोऽपि तु पर्युदास एव (यत्रोत्तरपदेन घञ् इति । अत्रैव अकर्तरि च कारके इति देयम्, तेन तत् सूत्रेऽपि प्रसज्यप्रतिषेधः सिद्धो भवेत् ।

२- [२०१] **पर्युदासः** -[२०२] प्रसज्यप्रतिषेधाद् विपरीतोऽयम्, तत्र उत्तरपदेनैव नञः सम्बन्ध एकवाक्यतां चेति पुण्यराजः । यत्र सामर्थ्यमेकवाक्यता

च स पर्युदासः । यथा अब्राह्मणः ।

अनेकः, अपचसि त्वं वृषलेति [२०३] भोजः । व्याकरणे [२०४] आतोऽनुपसर्गे कः इत्यत्र अनुपसर्गे उपसर्गाभिन्ने उपपदेऽयमत्र पर्युदासः । वेदेअब्राह्मणः सोमविक्रियीति । लोके तु अब्राह्मणमानयेति ।

३- [२०५] **गौणम्**- गुणादागत इति । गौर्वाहीक [२०६] इत्यत्र गोशब्दस्य जाादिगुणनिमित्तोऽर्थो वाहीकः, अप्रसिद्धश्च संज्ञादिरपि तदुणारोपादेव-बुध्यत इति नागेशः । गोशब्द एव तिष्ठन्मूत्रादिसम्पदा बाहीके वर्तमानो गौणी वृत्तिमनुभवतीति [२०७] भोजः । एवं सिंहो माणवकः, गङ्गायां घोष इत्यत्र सदृशलाक्षणिकं शुद्धलाक्षणिकं गौणम् । शास्त्रे तत्पुरुषः [२०८] समाना-धिकरणः कर्मधारयः इत्यत्र समानाधिरणं द्विविधं- [२०९] शाब्दमार्थञ्चेति । समानाधिकरणपदेन सादृश्यमूलकं गोणमिति गृह्यते ।

४- [२१०] **मुख्यम्** - मुखमिव प्रधानत्वान्मुख्यम् । यथा शूरो माणवक इत्यत्र शौर्यं शरीरधर्मः, साहसिकत्वञ्चेति । श्रृणोति इति शूरः, औणादिकप्रयोगः । यो हि शूरः स एव माणवक इति मुख्यम् । शास्त्रे धातोः प्रतिपदिकात् इत्यत्राभिधेयस्य मुख्यत्वम् । वेदे च यजमाना-ध्वर्युमन्वालभते इत्यत्राध्वर्युयजमानौ मुख्यौ भवतः ।

५-[२११] **व्यापि**- अनेक [२१२] विषयं व्यापकमिति । व्यापकमिति भोजप्रयुक्तच्छब्दः । व्यापकमेव शास्त्रे पदार्थान्निश्चिनोति । एकश्रुति दूरात् सम्बुद्धौ इति सूत्रे दूरात्संबोधने वाक्यमेकश्रुतिः स्यात् आगच्छ माणवक एकश्रुत्या दूरात्सम्बोधनं व्यापकत्वेन द्योत्यते । आतुरानातुरयोर्भोजनप्रक्लृ-प्तावातुरभोजनमनातुरोऽपि प्रतिपद्यते तदेव भोजोक्तं व्यापकलक्षणोदाहरणम्।

हर्युक्तं [२१३] व्यापकं यथा -

विषयं कृत्रिमयापि लौकिकः क्वचिदुच्चरण् ।
व्याप्नोति दूरात्सम्बुद्धो तथा च ग्रहणं द्वयोः ।।

सम्बुद्धो लौकिक्याः सम्बुद्धेर्ग्रहणं व्यापित्वाद् भवति लौकिक्या सह शास्त्रीया अपि सम्बुद्धौ गृह्यते । लौकिका- अकृत्रिमा, शास्त्रीया च -कृत्रिमा सम्बुद्धिः। वेदे - सर्वे प्रधानयागविषया ज्योतिष्टोमे न इत्यादौ व्यापित्वादेव व्यवहारः लोके-

उपोष्य रजनीमेकां सन्निहन्यां नरोत्तमः ।
सौर्ये तमसि गङ्गायां चान्द्रे चापि विमुच्यते ।।

इत्यादौ कदाचिदितिकर्तव्यतायां सन्निहत्यां सिन्धुस्नानम् । इत्यत्र सकृदेव स्नानात् त्रैलोक्याभ्यन्तरगतसर्वतीर्थस्नानफललाभस्तत्र व्यापित्वस्य प्रसङ्गादेव प्रतिपादितम् पुण्यराजेन ।

६-[२१४] **गुरुः** असंक्षिप्ताभिधानः गुरुः, अवीप्सा अनेकशेषः असंज्ञा कर्मधारयान्मत्वर्थीय इति । अनेकशेषेणापि गुरुः । शास्त्रेपृषोदरादीनि यथोपदिष्टमिति सूत्रे-प्रातिपदिकादनभिहितकर्मादिगतेत्यादौ स्वादय इत्यादिना गुरुरूपाय इति [२१५]पुण्यराजः । येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्चार्यन्ते तानि पृषोदरादीनि भवन्ति । इमे वर्णाः शिष्टैरुपदिष्टाः, शिष्टाः के ? शास्त्रपूर्विका हि शिष्टिः निवासतश्चाचारतश्च वैय्याकरणा एव शास्त्रज्ञाः । पुनरपि प्रागादर्शात् प्रत्यक्कालकवनात् दक्षिणेन हिमवन्तम् - उत्तरेण पारियात्रम् । एतस्मिन् आर्यावते आर्यनिवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमानकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः परिगतास्तत्र भवन्तः शिष्टा इति भाष्यम् ।

[२१७]तत्र प्रदीपे-

आविर्भूतप्रकाशानामनुपालुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशेष्यते ।।
अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
यं भावान् वचनं तेषां नानुमानेन बाध्यते ।। इति ।

शिष्टवचनविरुद्धमनुमानं नास्मत्कृते प्रमाणमिति भावः । तत्र शिष्टवचनं प्रमाणं तदा किमष्टाध्याय्या क्रियते, तत्रोच्यते शिष्टपरिज्ञानार्थाऽष्टाध्यायीति। अष्टाध्यायीमधीयानोऽयं पश्यत्यनधीयानं, यं वाऽस्यां विहिताः शब्दास्तान् प्रयुञ्जानम् । स पश्यति नूनमस्य देवानुग्रहः स्वभावो वा, योऽयं न चाष्टाध्यायीमधीते, ये चास्यां विहिताः, शब्दास्तांश्च प्रयुङ्क्ते । नूनमयमन्यानपि जानाति एतस्मादेषा शिष्टा परिज्ञानार्थाष्टाध्यायीति ।

लोके गुरुर्यथा - लोहितशालिमानयं ग्राम इत्यत्र कर्मधारयमत्वर्थीययोः समासयोरेकत्र दर्शनमेव गुरुप्रक्रम उपजायते । आवृत्तावपि गुरुप्रक्रमस्य प्रारम्भः जायते -

७- [२१८] **लघुः**- संक्षिप्ताभिधानं लघुत्वं भवति । [२१९] शिष्टाप्रसिद्ध साधुशब्दौघ प्रतिपादने लघुरूपाय इति पुण्यराजः । एकशेषेण लघुः। शास्त्रेऽपि [२२०] वीप्सा एकशेषः संज्ञा कर्मधारया (मत्वर्थीया) बहुव्रीहिरित्यादि भवति। वेदे तु गुरुलाघवव्यवहारतन्त्रप्रसङ्गावृत्तिषु । तन्त्रप्रसङ्गयोर्लाघवव्यवहारो निर्दिश्यते ।

८- [२२१] **अङ्गाङ्गिभावः**- संयुक्तविधानेषु भेदेनाङ्गाङ्गिभावः । शास्त्रे [२२२] 'तस्यापत्यम्' कर्तरि कृदिति सामान्यसूत्रेषु विशेषविधिसूत्रेष्व-ङ्गत्वेनान्वयः क्रियते । [२२३] वेदे तु एकस्यैवावयवः व्यवहृतैरपि वाक्यैः सम्बद्धमानो वाक्यान्तरैः सह सम्बन्धमुपयाति । यथा- अच्छिद्रेणेत्यादिश्चित्पत्यादिभिरपि । [२२४] चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा पुनातु अच्छिद्रेण पवित्रेणात्र चित्पत्यादिभिः सर्वैः सम्बद्धयते। एकैकस्याङ्गाङ्गिभाव उच्यत इति स्थितम् । बहुनामप्ययं नाननुपादीयते- लोके तथोक्तम्-

मणिः शाणोल्लीढः शरदि सरिता श्यानपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदिता बालललना ।।
मदक्षीणो नामः समरविजयी हेति दलित-
स्तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ।

इत्यत्र दीपकालङ्कारेषु एकस्या एव क्रियाया बहुभिर्वाक्यैः सम्बन्ध इति । दीपकालङ्कारेऽङ्गाङ्गिभावो निगद्यते । अत्र प्रस्तुतानां नराणां सर्वदा निरुपमतुल्यधर्मेण औपम्यस्य गम्यमानत्वाद् दीपकालंकारः- प्रस्तुतानां तथान्येषां सामस्त्येतुल्यधर्मतः । औपम्यं गम्यत यत्र दीपकं तन्निगद्यते ।

९-[२२५] **विकल्पः**-[२२६] द्वयोस्तुल्यबलयोः पर्यायेण प्राप्तिर्विचारणा वा विकल्पो भवतीति [२२७] भोजः। शास्त्रे क्वचित्प्राप्तविकल्पः क्वचिदुभयविकल्पोऽयं बहुभेदं विकल्प्यते इति [२२८] पुण्यराजः। अनुस्वारस्य ययि परसवर्णः वा पदान्तस्य (इत्यत्र प्राप्तविकल्पः) विभाषा धेट्शव्योरिति [२२९] च्लेश्चङ (अप्राप्तविकल्पः) हक्रोरन्यतरस्याम् (उभयप्राप्तविकल्पः) तेषामुदाहरणानि कथ्यन्ते । वेदे यत् [२३०] किञ्च प्राचीनं तदुपांशु चरन्ति अत्र दीक्षणीयाणामुपांशुस्वरे प्राप्ते यथेष्टमुच्चैः स्वरविधानमितीच्छातो विकल्पः। लोकेऽपि-

[२३१] **किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा मञ्जरी**
लीलाप्रोच्छलितस्य किं लहरिका लावण्यवारानिधेः ।
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविश्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य श्रृंगारिणः ।। इति ।

उत्प्रेक्षाधीनाः विकल्पाश्चात्र कथ्यन्ते ।

ब्रीहिभिर्यजेत् यवैर्वा यजेदत्र विकल्पः । एवं दधितक्रे कौण्डिन्याय दीयतामिति चिन्त्यम् । विकल्पो विभाषा चापि त्रिविधा- प्राप्ताप्राप्तोभयरूपा।

१०-[२३२] **नियमः**- अनेकप्राप्तावयोगान्ययोगव्यवच्छेदेनावधारणं नियमो भवतीति [२३३] भोजः । [२३४] तच्छास्त्रे-पतिः समास एव (ते प्राग्धातोः इत्यत्र नियमः द्रष्टं शक्यते । नियमस्तत्र उपसर्गाः धातोः प्रागेव प्रयुज्यन्त इति। बहूनि सूत्राणि नियमविधायकानि सन्ति । [२३५] वेदे नक्षत्रं दृष्ट्वा वाचं विसृजेत् इत्यत्र लिङर्थे लेट्लकारप्रयोगः नियमकथित एवास्ति। रात्रावेव तत्र वाग्विसर्गः न तु दिवसे तद्योग्यकाल इति । लोके च -

विवादोऽपार्थ एवायं पार्थ एव धनुर्धरः ।
यो न केवलमात्मीयैः परैरप्यभिधीयते ।।

पार्थ एवात्र धनुर्धरस्त्वस्य नियमः । अयं क्वचित्सार्वकालिकः क्वचिच्चनियतकालिक इति प्रतीयते ।

११- [३३६] **योग्यता**- यो यः कश्चिदर्थी समर्थः शास्त्रेणापर्युदासः कृतः स योग्य [२३७] इत्युक्तम् व्याकरणे यथा - उः स्थानेऽणः प्रसज्यमानस्यैव रपरत्वं प्रतियोग्यत्वमुपजायते। एवमन्यत्र पद एकस्मिन्नुदात्ते स्वरिते वा क्रियमाणे वर्ज्यमानशेषस्य निघाते योग्यत्वमुपजायत इति । वेदेऽपि- ज्योतिष्टोमेन यजते स्वर्गकामः इत्यत्र त्रैवर्णिकस्यैव योग्यता । लोके चेयम्-

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते ।
असञ्जातकिरणस्कन्धः सुखं स्वपिति गौर्गलिः ।।

अत्र धुर्यो धूर्वहनयोग्यः । अर्थी- समर्थस्य वृषभस्यैव धुरि नियोगः योग्यतया क्रियते ।

१२ - [२३८] **लिङ्गाद्भेदः**- शब्दान्तरोपलब्धवस्तुसामर्थ्यात्सामान्याक्षिप्तस्य विशेषेऽवस्थापनं लिङ्गाद्भेद इति [२३९]भोजः । लिङ्गादयः - लिङ्गमर्थः प्रकरण- मौचित्यं देशः कालश्चेति । वाक्यान्तरे दृष्टाल्लिङ्गाद्भेदः प्रतीयते,

शास्त्रे यथा ओ:पुयण्ज्यपरे इति वचनात् गौ कृत: स्थानिवद्भावो भवतीति पुण्यराज: । वेदे-अक्ता:शर्करा उपदधाति इत्यत्र केनाक्ता इति जिज्ञासायां 'तेजो वै घृतम्' इत्यादिना घृतस्तुतेर्वाक्यान्तराल्लिङ्गाद् घृतेनाक्तेति विशेषप्रतीति: । लोके तु रामोऽसौ इत्यादौ दाशरथि: परशुरामो वेति संशये एकवाणहतश्रेणिभूतविशालतालविवरोद्गीर्णै: स्वरै: सप्ताभिरित्यादिना वाक्यान्तरेण लिङ्गाद् दाशरथिराम इत्यर्थस्य निश्चयो जायते ।

१३-[२४०] **अपोद्धार:**- य: [२४१] शब्दादपोद्धृत्य प्रविभज्यते स अपोद्धार: यच्छास्त्रे - [२४१]धृषि शसी वैयात्ये अत्र वैयात्यशब्दो वियात्यष्यञ् इति प्रकृतिप्रत्ययावपोद्धृत्य विभज्येते । वियातभावो वैयात्यमिति । वेदेऽपि वायव्यं श्वेतमालभेतेत्यस्माद्वाक्याद्वायव्यपदार्थादपोद्धृत्य 'वायुर्वै क्षेपिष्ठा देवता' इति प्रविभाग: । लोके तु राजपुरुष इत्युक्ते कस्य राज्ञ: ? प्रश्ने शूद्रकस्य क्षुद्रकस्य वेति राजपदार्थ: प्रविभज्यते । भोजकृत [२४२]लक्षणं यथा पदार्थसमवायिनोऽर्थविशेषस्य शब्दान्तरात् पृथक्करणमपोद्धार:, यथा-

[२४३] **पत्युश्शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् ।**
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान।।

अत्रानेनेति सर्वनाम्ना रञ्जदियत्वेति श्रुतौ समवेतश्चरणराग: पृथगपोद्ध्रियते ।

भोजोक्तवाक्यधर्मा:-

१४- भर्तृहरिप्रोक्तानां वाक्यधर्माणां पुण्यराजव्याख्यानतोऽतिरिच्य भोजेन [२४४] श्रृंगारप्रकाशे केऽपि वाक्यधर्मा: समुल्लिख्यन्ते । यद्यपि तेऽत्र सावसरं सोपपत्तिका: नोल्लिख्यन्ते तथापि यत्र तत्र प्रत्यक्षपरोक्षरूपेण ते समुपलभ्यन्त इति । केषाञ्चिदन्तर्भावस्तै: कृत:, अपरे च क्वचिद् अनावश्यका इति ज्ञात्वा परित्यज्यन्ते। पुनरपि तेऽतिसंक्षेपेण दीयन्ते-

(१) **अर्थवाद:**- [२४५]स्तुतिनिन्दार्थमतिशयोक्तिरर्थवाद: । यथा- मनोजवोऽश्वां विश्वव्यापिनी तृष्णा ।

(२) **अनुवाद:**- सिद्धस्य विधिनिषेधार्थमुच्चारणमनुवाद:, तद्यथा- कथमीदृशमनीदृशोऽभिदधीत, कथमेवं विधायास्तवायमेवंविध: पतिरिति ।

(३) **व्यवहितकल्पना**- [२४६] यत्र सन्निहितस्यायोग्यतायां व्यवहितमाश्रीयते सा व्यवहितकल्पना' प्रविश पिण्डीमिति' ।

(४) **उपचारकल्पना**– [२४७] यत्रान्यधर्माः सति निमित्तेऽन्यत्रोपचर्यन्ते सा उपचारकल्पना । यथा- कालोऽतिक्रामति, मञ्चा क्रोशन्ति ।

(५) **वाक्यशेषः**– [२४८] सर्ववाक्यानां विधिनिषेधपर्यवसायित्वात्साक्षादश्रुतादपि तदुपकल्पनं वाक्यशेषः । यथा-आर्यनिवासोऽयं देश इत्युक्ते इहैव स्थातव्यं मध्याह्नो वर्तते इत्युक्ते इहैव भोक्तव्यं स चौरः पन्था इत्युक्ते न गन्तव्यं ग्राहा सरिदित्युक्ते न स्नातव्यमिति वाक्यशेषो भवति ।

(६) [२४९] **विपरिणामः**– लिङ्गविभक्तिवचनादेरन्यथोपात्तस्यार्थान्तरानुरोधा दपुनरुच्चारितस्यैवान्यथाभिसम्बन्धो विपरिणामः ।

(७) **अवधिः**– अस्यैतावतः [२५०] शब्दस्यायमर्थोऽस्मिन्नर्थे चायमेतावाञ्छब्द इति बुद्धिनिबन्धनमेवावधिः, तद्यथा- काले नगदन्ति नागाः, श्वेताश्वो धावति, अलम्बुसानां यातेति ।

[२५१] वाक्येषु ये पदार्थोपनिबन्धनाः वाक्यस्य विभिन्नधर्मा वाक्यार्थविशेषधारकाः न्यायास्ते सर्वेऽपि पदस्यावाचकत्व एव वाक्यार्थविशेषावधारणे शक्ताः भवन्तीति । यदि पदमेव सत्यं स्यात्तदा नामी प्रतिष्ठां न लभेरन्। अतो ह्यमी वाक्यार्थविशेषस्य प्रतिपत्तौ सहायकाः भवन्ति । इमे वाक्यधर्माः सम्भवतो वाक्यलक्षणान्येव प्रतीयन्ते । पूर्वोक्तं षड्-द्वादश-चतुर्विंशति लक्षणानि मीमांसोक्तानि लक्षणपदेनैव व्यवस्थितानि । मन्मतमप्यत्रेदमेव संतिष्ठते-

वाक्यधर्माः प्रत्यक्षपरोक्षतया वाक्यलक्षणान्येव स्वीकर्तव्यानीति

वाक्यदोषनिरूपणम्-

वाक्यधर्मान् पर्यालोच्य वाक्यदोषोद्भावनं वाक्यार्थदोषोद्भावनञ्च सावसरं निर्दिश्यते । नायं विषयः भर्तृहरिपुण्यराजाभ्यां प्रतिपादितः, यतो हि दोषोद्भवस्तु काव्यनिर्माणविषयः । शाब्दिकानां नये नायं समाख्यायते। साहित्ये वाक्यस्य प्रयोगयोग्यता प्रयोगानर्हता च निश्चीयते । यदाह- एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति, दुष्प्रयुक्तश्चेत् पुनरधर्माय सम्पद्यते । सम्यक् प्रयोगो यदा दोषहानये तदोपपद्यते - यतो हि-कमनीयरूपमुपजातमपि वपुः कुष्ठबिन्दुनैकेनापि दौर्भाग्यमनुभवति यथोक्तं

तदल्पमपि नोपेक्ष्यं काव्यं दुष्टं कथञ्चन ।

स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ।। इति भोजः ।

ते च [२५२] वाक्यदोषाः षोडश सन्ति- शब्दहीनं, पुनरुक्तिमत्, अपक्रमं,

भिन्नवृत्तं, यतिभ्रष्टं, विसन्धिः, व्याकीर्णं, गर्भितं, अपदं, अशरीरं, ऊनोपमं, अधिकोपमं, भिन्नलिङ्गं, भिन्नवचनं, श्लेषादि गुणविपरीतञ्चेति । एते तत्र केवलं परिगणय्य लौकिकोदाहरणानि प्रदाय, लक्षणानि दर्शयन्नेव भोजः [२५३] कथितवान् ।

शब्दहीनम्- अपशब्दवच्छब्दहीनं भवति। तद्यथा-

समुश्चसत्पंकजकोशकोमलैरुपाहितश्रीव्युपनीविनाभिः ।

दधन्ति मध्येषु वली विभङ्गिषु स्तनाति भरादुदराणि नम्रताम्।।

[२५४] **पुनरुक्तिमत्**-

२- अभिन्नं पदपदार्थं पुनरुक्तिमद् भवति । तद्यथा-

उत्कामुन्मनयन्त्येते गम्भीराः स्तनयित्नवः ।।

अम्भोधरास्तटिद्वन्तो गम्भीराः स्तनयित्नवः ।

३- [२५५] **अपक्रमम्** - क्रमभ्रष्टमेवापक्रममिति कथ्यते । तद्यथा-

कान्तिप्रतापौ भवतः सूर्याचन्द्रमसोः समौ ।

तुरङ्गरथमातङ्गं प्रयच्छास्मै मदालसम् ।।

४- **भिन्नवृत्तम्** - यथा छन्दोभङ्गभिन्नं तथैवेदं भिन्नवृत्तम् ।

५- **यतिभ्रष्टम्**- यत्रास्थानविरतिस्तत्र यतिभ्रष्टता । यथा-

ब्रह्मेन्द्रोपेन्द्रादिगीर्वाणवन्द्यो भक्तानां भूयाच्छ्रिये चन्द्रचूडः ।

स्त्रीणां सङ्गीतं समाकर्णयकेतूदस्ताम्भोदं सदोऽध्यास्त ईशः ।।

६- **विसन्धिः**- विसंहितं विरूपसन्धिश्च यत् तद्विसंन्धिः विनिगद्यते-

मेघानिलेन अमुना एतस्मिन्नद्रिकानने ।

मञ्जर्युद्गमगर्भासौ तर्वाल्युर्वी विधूयते ।।

७- **व्याकीर्णम्**- विभक्तिघटितत्वं व्याकीर्णत्वमिति, यथा-

दण्डे चुम्बति पद्मन्या हंसः कर्कशकण्टके ।

मुखं वल्गुरवं कुर्वन्तुण्डेनाङ्गानि घट्टयन् ।।

८- **सङ्कीर्णम्**- वाक्यान्तरपदव्यामिश्रं ह्युच्यते सङ्कीर्णम् । यथा तत्र अपभ्रंशोदाहरणम् -

काअंका अइचुहि ओकरं खल्लेई णिब्भरं रुठठो ।

सुणपि गह्नइ कंठे हकेइ अणत्तिअंथेरो ।।

९- **गर्भितम्**- वाक्यान्तरगर्भमुच्यते गर्भितमिति, यथा-

योग्यो यस्ते पुत्रः सोऽयं दशवदनलक्ष्मणेन मया ।
रक्षैनं यदि शक्तिर्मृत्युर्वशं नीयते विवशः ।।

१०- **अपदम्**- भिन्नभाषोप्रकृत्यादिकमुच्यतेऽपदम् । यथापभ्रंशपाठः-

आउज्झिअ चास्थिअए जह कुकुलिणा ममज्झ भत्ताले ।
पेच्छंत हलाउलकं णिआहहा कस्स कं देहि ।।

११- **अशरीरम्**- निष्क्रियमशरीरमुच्यते । यथा-

सेस्लु सुआरुद्धद्धं दुद्धाणाबद्धमुद्ध ससिलेहं ।
सीसपडिच्छि अगंगं संसापणअं पमहणाहं ।।

१२- **ऊनोपमम्**- ऊनोपमानविशेषणमेवोनोपमं कथ्यते, यथा-

संगअ चक्रा अजु आवि असिअकमला मुणोल संछन्ना।
वापी बहुव्वरो अण विलित्तथणे आसुभावे इ ।।

१३- **अधिकोपमम्**- अधिकोपमनविशेषणमुच्यते, तद्यथा-

अहिणवमणहाविरइअवल अविहूसाविहाइण ववहुआ ।
कुंदल एव्वसमुप्पुल्ल गुच्छ परिलेत भमरगणा ।।

१४- **भिन्नलिङ्गम्**- भिन्नलिङ्गोपमं भिन्नलिङ्गम्भवति, तद्यथा-

अविगाह्योऽसि नारीणामन्यमनसामपि ।
विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षताम् ।।

१५- **भिन्नवचनम्**- भिन्नवचनोपममेव तदिति । यथा-

सरांसीवामलं व्योमकाशा इव सितः शशी ।
शशीव धवला हंसा हंसीव धवला दिशः ।।

१६- **श्लेषादिगुणविपरीतम्**- गुणविपर्ययो हि त्रिधा विभज्यते । शब्दार्थोभय प्रधानास्ते भवन्ति । शब्दप्रधानस्तु -श्लेषसमतासौकुमार्यविपर्यादयः ते च यथा-

[२५५] **श्लेषविपर्याच्छिथिलं यथा -**

आलीयं मालतीमाला लोलालिकलिलामनः ।

निर्मूलयति मे मनः मूलान्नूमालमलिने वने ।।

समता विपर्ययः- कोकिलालापवाचालो मामेति मलयानलः ।

विषमम्- उज्चलच्छीकराच्छच्छनिर्झराम्भः कणोक्षितः ।।

सौकुमार्यविपर्ययोऽसुकुमारम् भवति, यथा-

अधिकर्तृतुगद्रिच्छित्स्वः क्षितांपतिरद्विदृक् ।

अर्कभिः शुभ्रदृग्दृष्टैर्द्विषो जध्नायिषीष्टवाः ।। इति ।।

[२५६] **सामान्यातिदेशः**- [२५७] अन्यत्र रूढसम्बन्धा धर्मानिर्ज्ञातभेदेष्वर्थेषु प्रसिद्धेरनुमेयभेदसम्भवैः, सम्बन्धिभिर्व्यपदिश्यन्ते । तद्यथा- ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमित्यत्र यावानर्थो ब्राह्मणशब्दं न व्यभिचरति तावत्यर्थे यानि सम्बद्धानि कार्याणि तान्यत्यन्तमलब्धब्राह्मणव्यपदेशे क्षत्रियेऽतिदिश्यन्ते । भोजमतेन यत्र अन्यरूढसम्बद्धधर्मा प्रसिद्धैरनुमेयभेदसम्भवैः सम्बन्धिभि-र्व्यपदिष्टा निर्ज्ञातभेदेष्वर्थेषु प्राप्यन्ते स सामान्यातिदेशः । एतदुदाहरणन्तु पूर्वोक्तमेव दत्तमस्ति । तदनुसारं सामान्यब्राह्मणशब्दो न व्यभिचरति। माठरादिभिस्तु व्यभिचरति, परन्तु करे माठरत्वं नास्ति । एवं निर्ज्ञातशब्दः कश्चिदेवार्थभागं संस्पृशति, अर्थस्य यावन्तं वैशिष्टयं न तावन्तं शब्देन प्रतिपादयितुं शक्यते । माठरवदस्मिन्कटे वर्तितव्यमित्यत्र सामान्यातिदेश आनुमानिक एवास्ति । माठरस्याभिरूपादयो विशिष्टधनीः नात्राश्रीयन्ते, एवं क्वचिद 'विशिष्टवदस्मिन्न वर्तितव्यमि' त्यत्राधिविशिष्टस्य द्वयद्विशिष्टत्वं तदेवात्राश्रीयते, तस्मात्सोऽपि सामान्यातिदेश एव भवति, नच विशेषाति देश इति । एवं हि -

[२५८]**सामान्यमात्रं शब्दार्थो विशेषा व्यभिचारिणः ।**

सामर्थ्यमन्तरेणातो विशेषो नातिदिश्यते ।।

शब्दस्यार्थः केवलं सामान्य एव भवति, विशेषस्तु व्यभिचरितो भवति। यावत्सामर्थ्यं तावद्विशेषो नातिदिश्यते । एवं स्वीकृते 'गुरुवद् गुरुपुत्रे वर्तितव्यमि' त्यत्रापि सामान्यातिदेश एवास्ति ।

'स्थानिवदादेशोऽनल्विधौ' इति शास्त्रे 'सामान्यातिदेशे विशेषानातिदेशः' इति वार्तिकबलेन विशेषातिदेशो नातिदिश्यत इत्युक्तम्

[२५९] **विशेषातिदेशः** - निर्ज्ञातसामान्यकार्येषु ब्राह्मणादिषु पुनरतिदेश-सामर्थ्याद्विशिष्टप्रकृतिगतकार्यातिदेशः । तद्यथा -'ब्राह्मणवदस्मिन्ब्राह्मणे वर्तितव्यमिति' । अत्रातिदेशः नियमश्च दृश्यते, ये ब्राह्मणे ब्राह्मणवदेव वर्तन्ते तान् प्रत्येवंभूतोऽतिदेशः ज्ञायते । ये तु भेदात् प्रसग्ङाद्वा व्यतिकुर्वन्ति तेषां कृते नियमः क्रियते ।

'आग्नेयवत् सौर्यम्' इत्यत्र वेदे एकदेवताकत्वेणैकदेवताकाग्नेययाग विकृतिभूतस्य सौर्ययागस्यैकदेवताकाग्नेयसम्बन्ध्येव विध्यन्तोऽतिदिश्यते ।

शब्दशास्त्रे विशेषातिदेशस्तु षड्भिप्रकारैः रूपातिदेशादिभिः संदृश्यते। रूपातिदेशः, निमित्तादिदेशः, तादात्म्यातिदेशः, शास्त्रातिदेशः, कार्यातिदेशः, व्यपदेशातिदेशश्चेति ।

१- **रूपातिदेशः** - [२६०] द्विर्वचनेऽचि' त्यत्र तु धातुरूपमेवादेशस्यातिदिश्यते। च ययतुः, चक्रतुः, इत्यत्र 'या' 'कृ' प्रभृतीनामेव द्विर्वचने जाते रूपं सिद्धयति

२- **निमित्तातिदेशः**- पूर्वत्सनः' इत्यत्र पूर्वस्य सन्नन्तस्य यन्निमित्तं आत्मनेपदे तदेव ङकारादिसन्नन्तस्यातिदिश्यते । 'एदिधिषते' इत्यत्र सन्नन्तादेवात्मने पदम् ।

३- **तादात्म्यतिदेशः** - 'सुबामन्त्रिते परवत् स्वरे' इत्यादिना सुबन्तं तस्य मृत्मासूदकवत् तादात्म्यमापद्य तत्स्वरं लभत इति ।

४- **शास्त्रातिदेशः** - 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यादिना शास्त्रातिदेशे सार्थकः ।

५- **कार्यातिदेशश्च** बाधो न स्यादिति, तत्र कर्मकव्यथा संख्यानमाश्रीयते। शपो विप्रतिषेधाद् इति स्वीक्रियते । कार्यातिदेशे प्रकृतसूत्रेण यको विधानं क्रियते। यगाभावे न शपाबाध्यते, उपाख्याते नोपेक्षते । शास्त्रातिदेशस्तु तत्सूत्रस्थः, कार्यातिदेशस्तु अतिदेशवाक्येनैव भवति । कार्यातिदेशस्य सर्वेष्वतिदेशेषु प्रधानता वर्तते ।

११ **व्यपदेशातिदेशः**- अयं लोके भवन्नपि शास्त्रे न भवति। यथा ' अयं क्षत्रियो ब्राह्मणवद् व्यपदेश्य' इत्यत्र व्यपदेशस्तु व्यवहारमात्रमेव प्रतिभाति । ब्राह्मणे कर्तव्यग्रासनादिकार्यं क्षात्रियोऽतिदिश्यते । न व्याकरणे अयं व्यवहारः।संज्ञा पक्षाद् विशेषात् संज्ञासज्ञिनोस्तादात्मये वत्करणं विफलं सूच्यते ।

१२- **अर्थित्वम्,** सामर्थ्यम्, अर्थाभेदश्चैते त्रयोऽपि अधिकारे निर्दिश्यन्ते। पृथक्कारेण नैषां पुण्यराजेन [२६१] निर्देशः क्रियते । अधिकारे प्रत्यक्षपरोक्षन्तर्भावः प्रतीयते । अधिकारलक्षणं 'अर्थित्वं सामर्थ्यं

शास्त्रापर्युदासयोगित्वमधिकारः' इत्यत्र अर्थित्वादीनामन्तर्भावत्वेन प्रयोगः दृश्यते । परन्तु 'अर्थित्वं सामर्थ्यमि'त्यादि कारिकया हरिणा वाक्यधर्मेषु सामर्थ्यस्यार्थाभेदस्य चोल्लेखो विधीयते । पुनरपि वृत्ति [२६२]

वाक्येऽपि नियताःधर्माः केचित् वृत्तौ द्वयोस्तथा ।
तेऽर्थभेदेन सामर्थ्यमात्र एवोपवर्णिताः ।।
अर्थभेदः, सामर्थ्यं स्पष्टमेकोक्तं वाक्यधर्मत्वेनेति ।

अर्थित्व [२६३] मित्रैकार्थाभावपरः। सामर्थ्यं भेदः, संसर्गश्च कैश्चिदुभयमिति प्रतिपाद्यते। वृत्तौ भेदस्य संसर्गस्य चाभावे सामर्थ्याभावः प्रतिपद्यतेऽयं भेदः संसर्गात्मको भवति। परन्तु क्वचिद्भेदे सामर्थ्य संसर्गश्चानुमेयो भवति, क्वचिद्विपरीतमपि भवति। युगपदुभयाश्रितत्वात् सामर्थ्यं प्रकाशयति । भाष्येऽपि भेदसंसर्गौ अन्वयव्यतिरेकाभ्यां कल्पितौ दृश्येते । अर्थाभेदो वाक्यस्य वृत्तेर्यवद्विरर्थस्य अभेदरूपस्य प्रतीकमात्रमिति ब्रुवन्ति ।

वाक्यभेदनिरूपणम्-

भाष्ये ' अनुदात्तं सर्वमपदादौ इत्यत्र 'समानवाक्ये निघातयुष्मदस्मदादेशा इति वार्तिकम्', युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वा नावौ वाक्यस्य टेःप्लुत उदात्तः इत्यादिषु वार्तिककारपठितं पारिभाषिकं वाक्यलक्षणं- 'आख्यातं साव्ययकारकविशेषणं वाक्यम्' एकतिङिति अत्रापूर्ववाक्यलक्षणानुसारं एकतिङ् वाक्यमिति व्यवहारः । आख्यातपदेन क्रिया-पदस्य प्राधान्यं भवति। क्रियैव वस्तुतो वाक्यस्य सर्वस्य भवति । एकतिङ्पदेन केषाञ्चिद्विरोधोऽपि लक्ष्यते। तेषाम्मतेन तिङ्तिङ् इत्यत्र पाणिनिमते अतिङ्पदेन पचति करोति इत्यादिष्वेकतिङन्तमपि वाक्यार्थसाकाङ्क्ष्ये भवितुमर्हति, परन्तु पदप्येकवाक्यमेवाङ्गीकरणीयमिति । यद्यप्यत्र सूत्रकारवार्तिककारयोः कश्चिद्विरोधो नास्ति तथापि कैश्चिदाचार्यैः भेदाभेदरूपव्यवहारः चिन्त्ये। [२६४] हरिणाप्युक्तमेतत्सङ्गच्छते ।

तिङन्तान्तरयुक्तेषु युक्तयुक्तेषु वा पुनः ।
मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः ।।

कैय्यटानुसारं अर्थैकत्वादेकं वाक्यं साकांक्षं चेद् विभागे स्यात् इति मीमांसकोक्तलक्षणमादृत्य एकार्थपरपदसमूहो वाक्यं भवति । एकवाक्ये आख्यातद्वये सति वाक्यद्वयं ब्रुवन्ति स्माचार्याः, तत्र वाक्यकारेण निघातादि-

निषेधो व्यवस्थापकः समानवाक्यं शब्दः प्रयुञ्जते ।

तत्र एकतिङ्तेकतिङ्यवस्थायां हि पश्यामो यच्छास्त्रे वाक्यस्यैकाख्यातानेकाख्यातविषयक एव विचारोऽधिकृतः। हरिवृत्तौ यथा- तत्र भवन्तः मन्यन्ते बहुष्वपि तिङन्तेषु येषु- अर्थलक्षणा काचिद् आकांक्षा विद्यते तेषाम् एकवाक्यत्वं न व्यावर्त्यते, अत्रानेकाख्यातयोगेऽपि वाक्यस्यैकत्वं न हन्यते। वस्तुतस्तु [२६५] युक्तमुक्तत्वाद् बहुष्वपि तिङन्तेषु सत्सु वाक्यभेदो नोपपद्यते। पश्यत मृगो-यातीति वाक्ये मृगशब्देन यातिपदस्य योगः, तद्युक्तेन यातिपदेनाख्यातान्तरस्य योगः, तेनात्र पदेनाख्यातान्तरस्य योगः । तेनात्रमृगकर्त्तृकं सरणं पश्यतेति दृशिक्रियापेक्षया एकमेव वाक्यमिति केचित्। पश्यतेति बहुवचनं वृत्तानुरोधात् तत्रैवानयोर्मतभेदनिरसनं करोति टीकाकारस्तद्यथावार्तिककारस्याप्येकतिङित्यत्रैकतिङित्यत्रैकतिङत्वं प्रधानतिङ्-न्तापेक्षया प्रतिपाद्यमानं सूत्रकारमतानुगुण्यं भजत एवमनयोर्नास्ति मतभेदः। तदपरेषामेव मतभेदो बोद्धव्य इति ।

राजशेखरमतेनापि - [२६६] आख्यातपरतन्त्रा वाक्यवृत्तिरतो यावदाख्यातमिह वाक्यानि' इत्याचार्याः । एकाकारतया कारकग्रामस्यैकार्थतया च वचोवृत्तेरेकमेवेदं वाक्यमिति यायावरीयः । तत्र ह्यसौ प्राचीनाचार्य्यमतं समुदृत्य तत्परिहरति - प्राचीनः वाक्यान्तर्यावन्ति क्रियापदानि तावन्ति वाक्यानीति ब्रुवन्ति स्म । परन्तु राजशेखरः- एकमेवेदं वाक्यमिति यस्मात् कारकपदस्य अर्थात् कर्तुः प्रतिपत्तुश्च एकाकारतया अर्थात् वाक्यमिति यस्मात् साधि गच्छति तस्मादेकमेव वाक्यं नानेकमिति । यायावरीयोऽत्र वस्तुतो वार्तिककारपक्षेण सन्तोषमावहते ।

प्रकृमनुसरामः 'भाष्ये-[२६७] तद्राजस्य बहुषु तेनैवास्त्रियाम्' 'वेरपृक्तस्य' इत्यत्रैकं वाक्यं समुपलभ्यते - भवति वै किञ्चिद् यदाचार्याः क्रियमाणमपि चोदयन्ति। तद्वा कर्तव्यमित्युभयत्र समानवचनं पठितम् । कैय्यटमतेनात्र वाक्यद्वयं वरीवर्ति ।

१ - भवति वै किञ्चित्, २- आचार्याः क्रियमाणमपि चोदयन्तीति। अथवा चोदनक्रिया भवति - क्रियाया कर्त्री भवतीति एकमेव वाक्यम्। कैय्यटस्तु अनेकाख्यातपक्षमवलम्ब्यात्र स्वीयाशयं प्रकटयाम्बभूव । एतत्पुनरपि भाष्यप्रसङ्गेन प्रत्याख्यातुं शक्यते । तद्यथा - 'न मुने' इति सूत्रे द्विगता अपि हेतवो भवन्ति। यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता भवन्ति।

तथा वाक्यान्यपि द्विगतानि दृश्यन्ते-श्वेतो धावति, अलम्बुसानां यातेति वृद्धकुमारी वाक्यवदिदं द्रष्टव्यम् । तद्यथा- वृद्धकुमारीन्द्रेणोक्ता वरं

वृणीष्वेति, सा वरमवृणीत - पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति । न तावदस्याः पतिर्भवति कुतः पुत्राः कुतो वा गावः, कुतो वा धान्यम् ? तत्रानयैकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्व संगृहीतं भवति । एवमाचार्य्या एकेन वाक्येन सर्वमर्थजातं संगृहीतं कुर्वन्तीति स्थितम् ।

वाक्यानामेकत्वनानात्वप्रदर्शनम् -

भर्तृहरिमतम् -

वाक्यपदीये भर्तृहरिणाऽपि वाक्यभेदविचारप्रस्तावे वाक्यानामेकवाक्यत्वं नानावाक्यत्वं वेति मतभेदेन प्रतिपादितमस्ति । वाक्यपदीये कतिपयकारिकाः सन्ति, तास्तु यथा-

२६८ बहुष्वपि तिङन्तेषु साकांक्षेष्वेकवाक्यता ।
तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवान् ।।
एकतिङ्यस्य वाक्यं तु शास्त्रे नियतलक्षणम् ।
तस्यातिङ् प्रहणेनार्थो वाक्यभेदान्न विद्यते ।।
तिङन्तान्यतरयुक्तेषु युक्त युक्तेषु वा पुनः ।
मृगः पश्यत यातीति भेदाभेदौ न तिष्ठतः ।।
इति कर्तव्यतार्थस्य सामर्थ्याद्यस्य काङ्क्ष्यते ।
अशब्दलक्षणाकाङ्क्षसमाप्तार्थं तदुच्यते ।।
तत्त्वान्वाख्यानमात्रे तु यावानर्थोऽनुषज्यते ।
विनापि तत्प्रयोगेण श्रुतेर्वाक्यं समाप्यते ।।
चङ्क्रम्यमाणोऽधीष्वात्र जपश्चङ्क्रमणं कुरु ।
तादर्थ्यस्याविशेषेऽपि शब्दाद्भेदः प्रतीयते ।।
फलवन्तः क्रियाभेदाः क्रियान्तरनिबन्धनाः ।।
निवृत्तभेदा सर्वैव क्रियाऽऽख्यातेऽभिधीयते ।
श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना ।।
अश्वमेधेन यक्ष्यन्ते राजानः सत्रमासते ।

ब्राह्मणा इति नाख्यातरूपाद्भेदः प्रतीयते ।।
सकृच्छ्रुता सप्तदशस्वनावृत्तापि या क्रिया ।
प्राजापत्येषु सामर्थ्यात् साभेदं प्रतिपद्यते ।।
देवदत्तादिषु भुजिः प्रत्येकमवतिष्ठते ।
प्रतिस्वतन्त्रं वाक्यं वा भेदो न प्रविभज्यते ।।
उच्चारणे तु वाक्यानामन्यद्रूपं निगृह्यते ।
प्रतिपत्तौ तु भिन्नानामन्यद्रूपं प्रतीयते ।।
एके ग्रहणकं वाक्यं सामान्येनाभिधीयते ।
कर्तरीति यथा तच्च पश्वादिषु विभज्यते ।।
यद्याकाङ्क्षा निवर्तेत तद्भूतस्य सकृच्छ्रुतौ ।
नैवान्येनाभिसम्बन्धं तदुपेयात् कथञ्चन ।।
एकरूपमनेकार्थं तस्मादुपनिबन्धनम् ।
योनिर्विभागवाक्यानां तेभ्योऽन्यदिव स्थितः ।
क्वचित् क्रिया व्यक्तिभागैरुपकारे प्रवर्त्तते ।
सामान्यभाग एवास्याः क्वचिदर्थस्य साधकः ।।
कालभिन्नाश्च भेदा ये ये चाप्युष्ट्रासिकादिषु ।
प्रक्रमे जातिभागस्य शब्दात्मा तैर्न भिद्यते ।। इति ।

एतासु कारिकासु भेदाभेदपक्षः क्रियामधिकृत्यैवोपस्थापितः । क्रियाभेदेन वाक्यभेदोऽपि जायते । क्रियैवाख्यातम् –[२६९] क्रियाप्रधानमाख्यात-मित्युच्यते भाष्ये 'प्रशंसायां रूपप्' इति सूत्रे सिद्धं तु क्रियाप्रधानत्वात् इति वार्तिके क्रियाप्रधानमाख्यातं भवति, एका च क्रिया । तत्र प्रदीपे-आख्यातशब्दात् क्रियाभेदस्यानवगमात् क्रियाया एकत्वमुच्यते, भवद्भिरास्यते इत्यादौ तु केवलक्रियावचने द्विवचन बहुवचनदर्शनात्। पचतः पचन्तीत्यादौ लकारवाच्ये कर्तृसमवेतद्वित्वबहुत्वाश्रयो वचनभेद इति न ततः क्रियाभेदसिद्धिरिति । दश दिनानि देवदत्त पचति, तण्डुलान् इत्यत्रैकवचनमेवेति भावः ।

आख्यातनिर्वचनम् –

'धातुः साधने दिशि पुरुषे चिति तदाख्यातमिति ' काशकृत्स्नसूत्रं

[२७०] श्रीमता- ऽभिनवगुप्तपादेन समुद्धृतमीश्वप्रत्यभिज्ञाविवृत्तिविमर्शिन्याम् । [२७१] आख्यायतेऽनेन क्रियाप्रधानभूतेनाख्यातस्तिङन्तः इत्यत्र बहूनां लक्षणानां सन्निवेशो भवितुमर्हति पृथक्त्वेन तेषा निदर्शनं नावश्यकमिति मत्वैकेव लक्षणं समुपपद्यते ।

अनेनाख्यातेनैव तत्र तत्र वाक्यभेदपक्षः समुद्भाव्यते । प्रधानवाक्याप्रधानवाक्यभेदेनापि वाक्यस्य भेदो दृश्यते । प्रधानवाक्यन्तु महावाक्यमुच्यते, अप्रधानवाक्यं तु अवान्तरवाक्यत्वेन व्यवह्रियते । तस्यापि विषये हरिणा विचारः प्रस्तुतोऽस्ति । तद्यथा -

[२७२] वाक्यानां समुदायश्च य एकार्थप्रसिद्धये ।
साकांक्षावयवस्तत्र वाक्यार्थोऽपि न विद्यते ।।

तत्र ह्युक्तं न च वाक्यरूपावधिपरिग्रहे नियमोऽस्ति कदाचिद् गामभ्याजेति वाक्यं भवति, कदाचिद्देवदत्त गामभ्याजेति, कदाचिद् देवदत्तगामभ्याज शुक्लामिति। तत्र पुण्यराजोऽप्युक्तवान् -'एकस्य मुख्यार्थस्य प्रसिद्धये प्रतीयते योऽयमवान्तर-वाक्यानां समुदायः साकांक्षावयवः, साकाङ्क्षा अवयवा यस्मिन् समुदाये स तथाभूतो 'अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः' इत्याद्यात्मकोऽत्रावयवार्थोऽवान्तर- वाक्यार्थात्मको न विद्यते कश्चिदिति । तस्मादवान्तरवाक्यानां महावाक्येष्वेवान्तर्भावः भवति।

[२७३] **अनेकाख्यातम्** - अनेकक्रियायुतं वाक्यमनेकाख्यातमुच्यते । तच्च द्विधा सान्तरं निरन्तरञ्चेति राजशेखरः । भोजेन एकान्ताख्यातनिरन्ताख्यातयोः पृथग्निर्देशः क्रियते, स स्वतन्त्रमाख्यातमाख्यातवान् । तत्रानेकाख्यातं यथा-

यदेव रोचते मह्यं तदेव कुरुते प्रिया ।
इति वेत्ति न जानाति तत्प्रियं यत्करोति सा ।।

अनेकाख्याते [२७४] सान्तरं निर्दिशति - यत्राख्यातपदेषु सुबन्तपददर्शनमपि भवेदिति, तत्सान्तरमुच्यते यथा -

देवासुरास्तमथ मन्थगिरां विरामे
पद्मासनं जय जयेति बभाषिरे च ।

द्राग्भेजिरे च परितो बहु मेनिरे च
स्वाग्रेसरं विदधिरे च ववन्दिरे च ।।

[२७५] भोजग्रन्थे च -

तेनाद्रिबन्धो ववृधे पयोधिस्तुतोष रामो मुमुदे कपीन्द्रः ।
तत्रास शत्रुर्ददृशे सुवेलः प्रोचे जलान्तो जह्रुषु सुधाशाः ।।

[२७६] **निरन्तरञ्च** - यस्मिन्केवलं क्रियापदानि स्युर्न सुबन्तपददर्शनं तन्निरन्तरमुच्यते । यथा [२७७] राजशेखरे-

त्वं पासि हंसि तनुषं मनुषे बिभर्षि,
बिभ्राजसे सृजसि संहरसे विरौषि ।
आस्से निरस्यसि सरस्यसि रासि लासि,
सङ्क्रीडसे ब्रुडसि मेधसि मोदसे च ।।

[२७८] भोजग्रन्थे च -

भ्रेमुर्ववल्गुः ननृतुर्जहर्षुर्जगुस्समुत्पुप्लुविरे निषेदुः ।
आस्फोटयाञ्चक्रुरभिप्रणेदूरेजुर्ननन्दुः प्रययुस्समीयुः ।।

इत्यादिषु सर्वत्र क्रियापदानां निरन्तरं संदर्शनं जायत इति । अत्र नानावायत्वेऽपि एकवाक्यत्वस्वीकारः ।

आख्यातभेदेन ग्रन्थान्तरेष्वपि वाक्यप्रकारं विभज्यते [२८९] । तद्यथा राजशेखर- भोजयोरित्यत्र ग्रन्थसङ्गमः द्रष्टुं शक्यते तत्राख्यातपदमाधी-रीकृत्य वाक्यस्य भेदप्रकारोऽक्षिलक्षी भवति । राजेशेखरो वाक्यस्य दशप्रकारांल्लिलेख । तद्यथा- तत्र वाक्यं दशधा-

१- एकाख्यातम्,

२- अनेकाख्यातम्,

३- आवृत्ताख्यातम्,

४- एकाभिधेयाख्यातम्,

५- परिणताख्यातम्,

६- अनुवृत्ताख्यातम्,

७- समुच्चिताख्यातम्

८- अध्याहृताख्यातम्,

९- कृदभिहिताख्यातम्,

१०-अनपेक्षिताख्यातम् । इति ।

एवं [२९०] भोजग्रन्थे तत् समस्तमपि वाक्यजातमाख्यातोपादेरेकादशप्रकारतया विप्रथते । तद्यपि - एकाख्यातमनेकाख्यातमावृत्ताख्यातमनुवृत्ताख्यातं विपरिणताख्यातमेकार्थाख्यातं समुच्चितख्यातं कृदभिहिताख्यातमपेक्षिता-ख्यातमेकान्तराख्यातं निरन्तराख्यातमिति । भोज एकादश वाक्यप्रकारन् स्वीचकार । तत्र क्रमशस्तानि आख्यातपदान सेदाहरणानि प्रदर्श्यन्ते ।

१- [२९१] **एकाख्यातम्** - आख्यातं हि क्रियापदम् । एकक्रियापदमेकाख्यातमित्युच्यते वाक्यम् । तद्यथा [२९२] राजशेखरः -

जयत्येकपदाक्रान्तसमस्तभुवनत्रयः ।
द्वितीयपदविन्यासव्याकुलाभिनयः शिवः ।।

[२९३] भोजग्रन्थे च -

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

अन्यत्र प्रथमपद्ये जयति द्वितीये 'वन्दे' रूपमेकाख्यातमेव । तत इदमेकाख्यातमिति ब्रुवन्ति ।

३- [२९३] **आवृत्ताख्यातम्** - यत्र वाक्यगतैका क्रिया कर्तृकारकादिभिः सह पौनः पुन्येन प्रवर्तते तदावृत्ताख्यातमुच्यते । तद्यथा राजशेखरग्रन्थे -

जयत्यमलकौस्तुभस्तवकितांशपीठो हरि -
र्जयन्ति च मृगेक्षणाश्चलदपाङ्गदृष्टिक्रमाः ।
ततो जयति मल्लिका तदनुसंवेदना
विनाशकरणक्षमो जयति पञ्चमस्य ध्वनिः ।।

भोजग्रन्थेऽपीदमेवोदाहरणं दृश्यते । श्लोके 'जयति' एकाख्यातस्यानेक-कर्त्तृकारिकादिभिस्सहावृत्तिः द्रष्टुं शक्यते ।

४- [२९४] **एकाभिधेयाख्यातम्** - एतत् पूर्वोक्तस्य विपरीतम् चरति। वाक्ये यत्रैककारकस्य अनेकाख्यातादिभिस्सह सम्बन्धो भवति, तदेकाभि-धेयाख्यातमुच्यते । यथा [२९५] राजशेखरग्रन्थे-

हृष्यति चूतेषु चिरं तुष्यति बकुलेषु मोदते मारुति ।
इह हि मधौ कलकूजितेषु पिकेषु च प्रीयते रागी ।।

[२९६] भोजग्रन्थे चेदमाख्यातमेकार्थाभिधेयत्वेन प्रस्तुतमिति । तद्यथा-

विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।
उन्मीलन्ति च कन्दलयो दलन्ति ककुभानि च ।।

पदेष्वत्र सर्वत्र एकार्थाभिधेयत्वं स्फुटं परिलक्ष्यते ।

५- [२९७] **परिणताख्यातम्** - तद्धि परिणामाख्यातं विपरिणामाख्यातमिति वा पदद्वयेनापि व्यवह्रियते । यत्रैका क्रिया एकेनैव कर्त्रा सह सम्बुद्ध्यते, सा पुनरपि द्वितीयेन कर्त्रा सहापि क्रियारूमेणैव परिणमेत्तत् परिणताख्यातमुच्यते। तथा राजशेखरीये ग्रन्थे -

[२९८] **सोऽस्ञ्जयति जीवातुः पञ्चेषो पञ्चमध्वनिः ।**
ते च चैत्रे विचित्रैलाकक्कोलीकेलयोऽनिलाः ।।

भोजग्रन्थेऽपीदमेवोदाहरणं समुपलभ्यते । तत्र किञ्चिन्मात्र पाठभेदो दृश्यते। यथा द्वितीयपङ्क्तौ ते च चैत्रे विकीर्णे वा तक्कोलीकेलयोऽनिला इति । अत्र कोकिलस्य पञ्चेषोः पञ्चमध्वनिरित्यर्थः 'जयति' क्रिया पदस्य केलयोऽनिलाः इत्यर्थमपि क्रियायाः परिणतिरवलोक्यते ।

६- [२९९] **अनुवृत्ताख्यातम्** - येनाख्यातेनेकवाक्यं निर्मीयते, द्वितीयमपि वाक्यमनुवर्तते । तद्यथा राजशेखरग्रन्थे-

[३००] **चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः ।**
चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ।।

[३०१] भोजग्रन्थेऽपीदमेवोदाहरणमवलोक्यते । अत्र चरन्ति इत्याख्यापदं हस्तिनां कृते प्रयुक्तं गुणैरपि तदनुवर्तते ।

७- समुचिताख्यातम् - यत्राख्यातस्य समुचितो व्यवहारस्तदुच्यते। तद्यथा राजशेखरग्रन्थे-

[३०२] परिग्रहभराक्रान्तं दौर्गत्यगतिचोदितम् ।
मनो गन्त्रीव कुपथे चीत्करोति याति च ।।

इत्यत्र चीत्करोति याति चेति समुचिताख्यातं भवति । यथा गन्त्री शकटं कुपथे दुष्टगत्या प्रवृत्ते सति चीत्करोति पुनरपि याति तथैव मनोऽपि परिग्रहभाराक्रान्तं दौर्भाग्येन प्रेरितञ्च तद्गन्त्रीव कुपथेऽपि गते स चीत्करोति पुनश्च यात्यपि । अत्रोभयाख्यातं समुचितदशायामेव प्रयुक्तमिति पश्यामः।

[३०४] भोजग्रन्थेऽपीदम्-
तामवातारयन्पत्नीं रथादवततार च । इति ।
पुनरपि राजशेखरे -
स देवः सा दंष्ट्रा कृतकिटिविलासस्मितसिता,
द्वयं दिश्यात्तुभ्यं मुदमिदमुदारं जयति च ।
उदञ्चद्भिर्भूयस्तरलितनिवेशा वसुमती
यदग्रे यच्छ् वासैर्गिरिगुडकलीलामुदवहत् ।। इति ।

उदवहत् इति क्रिया पदमत्र सर्वत्र समुचिताख्यातं प्रतीयते ।

८- [३०५] **अध्याहृताख्यातम्** - यत्राख्यातपदं साक्षान्नोपदिष्टं स्यात्तथा वाक्यपूर्त्तये तदध्याहारः क्रियते, तदध्याहृताख्यातमुच्यते । यथा - [३०६] राजशेखरग्रन्थे-

दोर्दण्डताण्डवभ्रष्टमुडुखण्डं बिभर्ति यः ।
व्यस्तपुष्पाञ्जलिपदे चन्द्रचूडः श्रिये स वः ।।

अत्र 'अस्तु' 'भवतु' क्रियापदं नोल्लिखितं ततस्तस्याध्याहारेणैव वाक्यपूर्तिः सञ्जायते । [३०७] भोजग्रन्थे च -

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याभ्यां सर्वत्र कटुरेव सः ।। इति ।

अत्र सेवते इत्याख्यातपदमध्याह्रियते वाक्यपूर्त्तये ।

९- [३०८] **कृदभिहिताख्यातम्** - तिङन्तक्रियापदस्थाने कृदन्तक्रियापदैराख्यातस्य कार्यनिर्वाहः तत्र कृदभिहिताख्यातं भवति । तद्धि [३०९] राजशेखरग्रन्थे-

अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकथोदयम् ।
विनयबाधितवृत्तिरतस्तया न विवृतो मदनो न च संवृत्तः ।।

अत्र संहृतं, ईक्षितं, हसितं, विवृत्तं, संवृत्तं, प्रभृतिकृदन्तैः पदैरेव ह्याख्यातादीनां कार्यनिर्वाहो भवतीति सङ्गच्छते ।

भोजग्रन्थे च -

ततः कुमुदनाथेन कामिनी गण्डपाण्डुना नेत्रानन्देन चन्द्रेण माहेन्दी दिगलंकृता ।

१०- **अनपेक्षिताख्यातम्** - आख्यातमन्तरैव निराकांक्षसद् वाक्यमनपेक्षिताख्यातमुच्यते । भोजेन तद्गणनायामपेक्षिताख्यातमुच्यते । मन्मतेनेतदुपेक्षिताख्यातं भवितुमर्हति । आख्यातेन हि तत्रावश्यं भाव्यं परं न हि दृश्यते । अर्थबोधावसरे तदन्विष्यतेऽतो हि तदुपेक्षितं वक्तव्यमिति।

अनपेक्षितं तु न सङ्गच्छते । तदुदाहरणं राजशेखरे भोजग्रन्थे च समुपलभ्यते राजब्राह्मणयोः प्रश्नोत्तरकाले । तद्यथा -

कियन्मात्रं जलं विप्र जानुदघ्नं नराधिप ।
तथापीयमवस्था ते न सर्वत्र भवादृशाः ।।

प्रश्नोत्तरप्रसङ्गेऽत्र सर्वदा ' अस्ति ' विद्यते 'वर्तते' प्रभृतीनामाख्यातानां उपेक्षितत्वात्पुनरर्थावगतौ व्यवहारो लभ्यते ।

शक्तिभेदेन वाक्यविभागः -

शब्दाभेदवादिनां मतेऽर्थभेदेऽपि अक्षा भज्यन्तामित्यादौ द्विष्ठानां वाक्यानां शब्दतन्त्रमाश्रित्य न वा शब्दभेदेन साधारणवाक्याद् विभागः संभवतीति तत्र वाक्येऽर्थभेदेन शक्तिभेदमादाय शक्तितन्त्रञ्चाश्रित्य शक्तिभेदेनैव विभागं कर्तुमुद्यते। वाक्यानि शास्त्रीयानि लोकिकानि च गृह्यन्ते। तद्यथा [३१०] शास्त्रीयाणि इग्यणः सम्प्रसारणम्, द्विर्वचनेऽचि', तद्धरति

वहत्यावहितभाराद् वंशादिभ्यः, तदस्य ब्रह्मचर्यमित्यादीनि एवं लौकिकानि श्वेतो धावति, अलम्बुसानां यातेत्यादीनि सन्ति। एतेषु - अर्थद्वयप्रतिपादनाय शक्तिरेव विभज्यते । तदुक्तं हरिणा -

[३११] द्विष्ठानि यानि वाक्यानि तेष्वप्येकत्वदर्शिनाम् ।
अनेकशक्तेरेकस्य स्वशक्तिः प्रविभज्यते ।।

द्विष्ठानीत्यने द्वावर्थौ यत्र तिष्ठतः, तानि द्वयोरर्थयोः स्थितानीति वा द्विष्ठानि वाक्यानि तेष्वपि शब्दैकन्वदर्शिनां मते एकस्यैव तस्य प्रतिपादकस्य शब्दस्यानेकशक्तेरसौ स्वशक्तिरेव प्रविभज्यत इति टीका । तद्यथा - उपर्युक्तेषु इग्यणः, प्रभृतिषु सूत्रेषु अर्थद्वयमुपलभ्यते तथैव श्वेतो धावतीत्यादिष्वपि अर्थद्वयोपलब्धिर्जायते । इग्यण इत्यत्र भाष्ये वाक्यस्य सम्प्रसारणसंज्ञा आहोस्विद्वर्णस्येति। इग्यण इत्येतद्वाक्यं सम्प्रसारणंसंज्ञं भवतीति प्रथमो पक्षः, इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति द्वितायोऽर्थः । द्विर्वचनेऽचीत्यत्रापि अचि द्विर्वचने, अचि न तदित्यर्थद्वयम्। तद्धरतीत्यस्यापि 'तत्' पदं हरति इत्यादिषु क्रियापदत्रये प्रत्येकं संबद्धयते। तदस्यापि तत्पदस्य मासार्धमासवर्णाद्यर्थेषु शक्तिरेकार्थभूता भवति । लौकिकेष्वपि वाक्येष्वर्थद्वयकल्पनं शक्तिविभागेनैव वक्तुमुचितमिति । अलम्बुसानां पातेत्यादौ देशविशेषाणां रक्षकः बुसानां तृणविशेषाणामलमत्यर्थे पातेत्यर्थद्वयं भवति ।

भेदवादिनां मतमपहर्तुं पुनः कारिकाद्वयमुपस्थापयति [३११] हरिः । तद्यथा-

अत्यन्तभिन्नयोर्वा स्यात् प्रयोगस्तन्त्रलक्षणः ।
उपायस्तत्र संसर्गः प्रतिपत्तृषु भिद्यते ।।
भेदेनावगतौ पूर्वं शब्दौ तुल्यश्रुती पुनः ।
तन्त्रेण प्रतिपत्तारं प्रयोक्त्रा प्रतिपादिताः ।।

यथा यणः स्थानिकस्येग्रूपस्य अथवा वर्णस्य का संज्ञेति प्रश्नद्वये सत्युत्तरं लाघवात्, तन्त्रन्याससमाश्रयणादेकेनैव संप्रसारणशब्देन व्यवहरति। एवं किञ्जातीयो धावति, कि वर्णो धावति इति द्वयोरपि प्रश्नयोर्लाघवात् श्वेतो धावति इति तन्त्रेणैकमेवोक्तमिति वदत्याचार्यः । भेदाभेदवादिनाम्मते शब्दःसाधारणत्वाच्छक्तिद्वययुक्त एव प्रकाशते । तत्राह -

३१३ **एकस्यापि विवक्षायामनुनिष्पद्यते परः ।**
विनाऽभिसंधिना शब्दः शक्तिरूपः प्रकाशते ।।
अनेकशक्तिरेकस्य युगपच्छ्रीयते क्वचित् ।
अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते ।।

यथा क्वचिदवसरे दाहप्रकाशाभ्यां युक्तोऽग्निरैकत्रापि प्रकाशे दाहे वा नियुज्यते उपयोगवशाद्धर्मद्वयायाव्युपादीयत इत्यर्थः । तथैव - अनेकशक्तियोगाद्युगपदर्थद्वयप्रकाशनाय शब्दः समाश्रीयत एवेति भावः।

शक्तिभेदादार्थनिर्णयः-
आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते ।
लिङ्गाद्वा तन्त्रधर्माद्वा विभागेनावतिष्ठते ।।
सम्प्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः ।
प्रविभागस्तत्र सूत्रे एकस्मिन्नेव कल्पते ।।
तथा द्विर्वचनेऽचीति तन्त्रोपायादिलक्षणः ।
एकशेषेण निर्देशो भाष्य एवोपवर्णितः ।।

यथा लोके तु अनेकशक्तियुक्तस्य सकृदेवानेकार्थबोधः जायते तथैव शास्त्रेऽपि इग्यणः सम्प्रसारणम् इति वाक्ये आवृत्तिशक्तिभ्यां भिन्नार्थे (तत्राभेदवादिमते आवृत्त्या, एकत्ववादिमते च शक्त्या) सकृच्छ्रुते लिङ्गाज्ञापकाद्वा तन्त्रधर्माद्वा शक्तिभेदेन विभागेनैवावतिष्ठत इति । तत्रोक्तं सूत्रं युगपदेव सम्प्रसारणशब्दः शक्तिद्वयेन वर्णवाक्यरूपमर्थद्वयं कल्पयति । संप्रसारणसंज्ञायां लिङ्गाभ्यामुपदर्शिताभ्यां भाविभूतविभक्ति-निर्देशलक्षणाभ्यां तत्र एकस्मिन्नेव सूत्रे वर्णवाक्ययोः संज्ञिणोः प्रयोगो लभ्यते।

भाष्यकारमतेनापि तत्तथा द्विर्वचनेऽचीतीत्यत्र अर्थतन्त्रां सिद्धिमुपपादयति। द्विर्वचनेऽचीति इत्यत्र द्विर्वचननिमित्तेऽपि योऽजादेशः स द्विर्वचन एव कर्त्तव्ये स्थानिवदिति सूत्रार्थो व्याख्याते, तत्रोक्तं यत् पुनर्द्वितीयं द्विर्वचनग्रहणं कर्तव्यं न कर्त्तव्यमित्याह एकशेषनिर्देशात् सिद्धमिति यद्येकशेषस्तदा द्विर्वचनं प्राप्नोति अत एकशेषसमानफलसाधारणलक्षणतन्त्रमेवात्रैकशेषशब्देनोक्तम् । द्विर्वचनेऽचीति सूत्रार्थसङ्गतेरेकशेषसमानफलभूतं तन्त्रमभ्युपगतं भाष्ये सिद्धम्।

द्वितीयाध्यायस्य पादटिप्पणयः

१- वाक्यप. - २/८७

२- तदेव- २/८७

३- शृं. प्र. ३०७

४- वाक्यप. २/२७ पुण्य

५- वाक्यप. २/८६

६- सं व्या द. पृ. ३७७भर्तृहरि ने वाक्यपदीय के तृतीय काण्ड में इन धर्मो पर विशेष विचार किया था। किन्तु यह भाग (लक्षण समुद्देश) दसवीं शताब्दी तक लुप्त हो चुका था ।

७- सं. व्या. द. पृ. ३७७ वाक्य काण्ड में लक्षणों की एक लम्बी सूची वाक्य के धर्म के रूप में मिलती है । पुण्यराज ने उन्हें स्पष्ट करने का प्रयत्न किया है ।

८- शृं. प्र. ३०७

९- वाक्यप. २/७७

१०- भोजाज श्रृ. प्र. &13 Punyaraja says that these are called Nyayas and laksanas in the Mimansa Sastra. He also points out where and now Jamini speaks of these in the 12th Chapter.

११- वाक्यप. २/७७ पुण्य

१२- वाक्यप. २/७७ पुण्य.- तथा च तत्र अथातो धर्मजिज्ञासा इत्युपक्रम्य को धर्मः किं लक्षणञ्चेत्याद्याशंक्य निरासार्थं चोदना लक्षण इत्युक्त्वा प्रथमेनाध्यायेन चोदना लक्षणोक्ते चोदनेव प्रमाणम् । मतभेदेनापि विधिनियोगेत्यादिका अप्यत्रास्याः संज्ञा उपवर्णिताः । तत्रैव च स्वतः प्रामाण्यं व्यवस्थापितम् । तदनुरोधेन च प्रत्यक्षादीनामपि स्वत एव प्रामाण्यमुपपादितम् । चोदना च शब्दादिवैचित्र्याद् भिन्नरूपेति भेदप्रतिपादनायास्या एव द्वितीयोऽध्यायः । भिन्नस्य च शेषशेषिभावेन विनियोगप्रतिपादनाय तृतीयोऽध्यायः । विनियुक्तस्यप्रयोजकाप्रयोजक भावप्रतिपादनाय चतुर्थः। श्रुत्युच्चारणादिभिः क्रमेण विनियोग इति। तदर्थं पञ्चमः । एतत्समग्रं यदर्थमसावर्थो समथशास्त्रेणापर्युदासस्त-

तोऽधिकारीति तत्प्रतिपादनाय षष्ठ इति ।

१३- वाक्यप०, २/७७ पुण्य०- सामान्यातिदेशादिति प्रतिपादनाय सप्तमः । क्वचित्सामर्थ्याद्विशेष एवातिदिश्यन्त इति निरूपणायाष्टमः। अतिदेशप्राप्ते मन्त्रे प्रकृतिदेवता विकृतियागदेवतात्वेन विपरिणमयिव्येत्यादिसमर्थनाय नवमः । सामान्यस्य विशेषेण बाधाभिघानाय दशमः। येन सकृदनुष्ठानादुभय-सिद्धिस्तत्तन्त्रं तदर्थमेकादशः । यदन्यार्थमारब्धमन्यदप्येकेनैव प्रयत्नेन संभवलाघवाभ्यां निष्पादयति तत्प्रासंगिकम् । तदुक्तये द्वादशोऽध्याय इत्यनेनातिदेश षट्केन सह द्वादशलक्षणानि ।

१४- Bhoja's Sringar Prakasa, pp. 713- Thus the Vakyadharmas are found in the sutras of Jaminia and sabra's Bhasya there on. The credit of having collected them in this form with difinations and illustrations, one may be inclined to give to Bhoja, but the work of collecting them toghether in this manner was done by Bhartrihari from whose V.P. Bhoja borrows these.

१५- वाक्य प.- २/७७ पुण्य.

१६- प्रमाणस्य प्रतिपक्षोऽसंभवः ।

१७- भेदस्य तु शास्त्रादिभेदभिन्नस्य तदभेदाभेदः प्रतिपक्षः ।

१८- शेषशेषिभावस्य गुणप्रधानभावाविवक्षा प्रतिपक्षाः ।

१९- प्रयुक्तेरप्रयोजकः प्रतिपक्षः ।

२०- क्रमस्याविवक्षा प्रतिपक्षः ।

२१- क्रमोऽयमत्र बलवान् अस्मिंस्तु न विवक्षितः इति प्रतिपक्षः ।

२२- सामान्यातिदेशस्य अनयोरपवादरहितं स्वरूपं निर्दिष्टम्

२३- विशेषातिदेशस्य निर्दिष्टम् ।

२४- ऊहस्य सम्बन्धाबाधोऽपवादः ।

२५ - तुल्यबलानामविरोधात् समुच्चयो बाधस्यापवादः ।

२६ - तन्त्रास्यावृत्तिप्रतिपक्षः ।

२७- प्रासङ्गिकस्यापवादो भेदः ।

२८- सं. व्या. द., पृ. - ३७९ अवशिष्ट दो लक्षणों के विषय में पुण्यराज की कोई निश्चित धरणा नहीं हैं उन्होंने लिखा है कि शेष दो लक्षणसमुद्देश में. ढूँढना चाहिए अथवा सामान्य निर्देश का अभाव मान लेना चाहिए । इसी तरह विशेषातिदेश का प्रतिपक्ष सामान्यातिदेश विशेषान्तरादेश मानकर अवशेष दो लक्षणों की पूर्ति कर लेनी चाहिए। इसी तरह ये २४ लक्षण हो जाते हैं ।

२९- Bhoja's Sringar Prakash] pp. 714- But the full list of dharmas as given by Bhoja is not clearly traceable in those given by Punyaraja.

३०- Ibid, pp. 715 Bhoja also illustrates each of these from Mimansa and tha loka.

३१- Ibid Punyaraja illustrates each of these with these instances, one from the Veda of the Mimansa, one from the world (Loka), and one from the vyakarana sastra. Bhoj also illustrates each of these both from Mimansa and verses from kavy as.

३२- वाक्यप. २/७७-८६

३३- श्रृं. प्र., पृ.- ३०७; मैसूर संस्करणम् ।

३४- सं. व्या. द., पृ. - ३८०- भोज द्वारा दिए हुए वाक्य के धर्मों का उल्लेख वाक्यपदीय और उसकी स्वोपज्ञवृत्ति में यत्र -तत्र मिल जाता है । भोज ने उनका एकत्र चयन कर दिया है ।

३५- सं. व्यां. द., पृ. -३८१- यहाँ दो कार्य होने वाले हे, जिनका प्रयोजक रूप में सामर्थ्य ज्ञान हो, यदि एक के प्रयोग से दूसरा भी सम्बद्धरूप में, सफल सा होकर प्रयोजक नहीं बनता है, उसे प्रसङ्ग कहते हैं । प्रसंग के प्रयोजक को प्रासङ्गिक कहते हैं

३६- वाक्यप., २/७७

३७- शृं. प्र. पृ.- ३१८-३१९

३८- श्रृं. प्र., पृ. - ३१९

३९- तदेव- सदक्षिणापाङ्गनिविष्टमुष्टि नतां समकुञ्चितसव्यपादम्
ददर्शचक्रीकृतचारूचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ।।- ३/७०

४०- तदेव-भ्रेमुर्ववल्गुर्ननतुर्जगर्जुर्जगुः समुत्युप्लुर्विनिषेदुः,
आस्फोटयाञ्चक्रुरभिप्रणेमूरेजुर्ननन्दुर्वियुस्समीयुः ।

४१- तदेव, पृ. ७ ३१९

४२- शत. ब्रा. ५/२/७/१

४३- वाक्यप., २/७७ अम्बाकर्त्री व्याख्या

४४- पा. सू., १/१/२७

४५- वाक्यप., २/७७ पुण्यराजः

४६- सं. व्या., द., पृ. - ३८१- एक ही अर्थ की सिद्धि की इच्छा रखने वाले कई अर्थों के प्रयोजक के अभेद से अथवा आवृत्ति द्वारा, सम्भव की दृष्टि से और लाघव की दृष्टि से, उस अर्थ का एक ही प्रयोग करते हैं, वह तन्त्र है ।

४७- वाक्यप. २/७७

४८- श्रृं. प्र., पृ. ७ ३१७- सर्वे प्रयोजकाभेदेनावृत्त्या वा वृत्तिवक्तव्यमर्थं विभवाल्लाघवाच्चैकमेव प्रयोजयन्त तत्तन्त्रम् ।

४९- पा. सृ., १/१/७०;

५०- तदेव, १/१/४५

५१- तदेव, १/१/१

५२- तदेव, १/४/४४

५३- तदेव, १/४/५३

५४- वाक्यप., २/७७ पुण्य.

५५- श्रृ. प्र., पृ. - ३१७-३१८
अभेदकत्वसंख्या च संख्यान्तरेषु तन्त्रिणी मन्यन्ते। तथा आस्यते

वा गुणविषया शक्तिः प्रधानानुरोधादभिहितवत् प्रकाशत इति । यच्चैकमेव पदं वाक्यं प्रकरणं प्रबन्धो वा द्वयोरर्थयोः प्रयुज्यत तदपि तन्त्रम् ।

५६- वाक्यप., २/७७ पुण्य.

५७- तदेव, १/४/५४५

५८- शा. भा., १२/१/१

५९- सं. व्या. द., पृ. - ३८३

एक क्रिया पदार्थ अथवा कारक पदार्थ का अपने अभिन्न रूप से पर्याप्त रूप में अनेक स्थलों में उपस्थित होना आवृति कहलाना है।

६०- श्रृ. प्र., पृ.- ३१९

६१- तदेव,१/१/४५

६२- पा. सू., १/१/१/१० वार्तिक

६३-श्रृ.प क्रियापदवृत्तिः

शशिना च निशा निशया च शशी शशिना निशया च यथा गगनम्।
भवता च सभा सभया च भवान् समया भवता विभाति जगत् ।।

कारकपदावृत्तिः - सीता विस्मायतो निरीक्ष्य हरते दृष्टिं झटित्याकुला,
मन्योन्यार्पितचञ्चुदत्तकबलैः पारावतैर्दूयते ।
इन्दोर्दूरत एव नश्यति विशत्यन्तर्गृहं दुःखितः
प्रच्छाद्याननमञ्चलेन रजनीष्वस्तपं रोदिति ।।

६४- सं. व्या. द. पृ. - ३८३ - जहाँ पर वस्तु अपने स्वरूप सामर्थ्य से अनेकत्व प्राप्त करती है, भेद माना जाना है ।

६५- वाक्यप., २/७७

६६- श्रृं. प्र., पृ.- ३१९-३२०

६७- सं. व्या. द., पृ.- ३७३- उत्तर भारत की किसी परम्परा को लक्ष्य कर भेद का लौकिक उदाहरण भोज ने दिया है ।पा. सू., १/१/४४

६८- शृ. प्र., पृ. - ३२० **क्रियाभेदः**- लवङ्गमाला कलितावतंसास्ते नालिकेरान्तरपः पिबन्तः। आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमापुः।। **कारकभेदः**- स्पर्शाभोजिविशदच्छविचारौ कल्पिते मृगदृशां सुरताय सन्नतिं दधति पेतुरजस्त्रं दृष्टयः प्रियतमे शयते च।।

६७- सं. व्या. द., पृ.- ३७३- उत्तर भारत की किसी परम्परा को लक्ष्य कर भेद का लौकिक उदाहरण भोज ने दिया है ।पा. सू., १/१/४४

६८- शृ. प्र., पृ. - ३२० **क्रियाभेदः**- लवङ्गमाला कलितावतंसास्ते नालिकेरान्तरपः पिबन्तः। आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमापुः।। **कारकभेदः**- स्पर्शभोजिविशदच्छविचारौ कल्पिते मृगदृशां सुरताय सन्नतिं दधति पेतुरजस्त्रं दृष्टयः प्रियतमे शयते च।।

६९- महाभ. पस्पर्श., पृ. - २४-२५

७०- सं. व्या. द., पृ.- ३८३- अर्थित्व सामान्य के आधार पर अथवा उपदेश के आधार पर, प्रवृत्ति के सम्भव होने पर भी दृष्ट- अदृश्ट अर्थों में तुल्य बल वाले विरोध अथवा अविरोधी अर्थों का अप्राप्त्यनुमान बाध है । उसे बाधा भी कहते है ।

७१- महाभा. पस्शा., पृ.-४१

७२- महाभा., प्रदीप., पृ.,- ४१

७३- श्रृ.प्र, पृ.-३३७

७४- पा. सू. ३/२/१

७५- तदेव, ३/३/३

७६- वाक्यप०., २/३५१

७७- सं. व्या. द., पृ. - ३८७ -तुल्य बल वाले अविरोधियों का एकार्थपरक उपादान का नाम समुच्च्य है

७८- वाक्यप., २/७७ पुण्यराजः

७९- शृ, पृ. - ३१३ गुणादिसमुच्चयाभेदेन- श्ला न्वयेति नयनोत्सवकारिणीति निर्व्यूढसौहृदभरेति गुणज्वलेति । एकैकमत्र हि वशीकरणं गरीयो युष्माकमेवमियमित्यर्थं किं ब्रवीमि । भेदेनापि- कुलममलिनं भद्रा मूर्तिमति श्रुतिशालिनी भुजबलमलंसस्फीता लक्ष्मीः प्रभुत्वमृखण्डितम। प्रकृतिसुभगा ह्येते भावाः पदस्य च हेतवो व्रजति पुरुषो यैरुन्मादं त एव तवांकुशाः।

८०- मीमां. को., पृ. - ४१७३

८१- पा. सू., ३/४/३

८२- तदेव, ३/४/२

८३- काशि., ३/४/३

८४- सं. व्या. द., पृ. -३८७-ऊह का सम्बन्ध लिङ्ग, वचन, विभक्ति आदि के विपरिणाम से हैं।

८५- वाक्यप., २/७८ पुण्यराजः ।

८६- वाक्यप., २/७८ पुण्यराजः।

८७- शृं. प्र., पृ.- ३१५

८८- सं. व्या. द., पृ. -३८७-३८८; जिसमें इति कर्तव्यता आदि के सम्पूर्ण अंग समूह का उपदेश होता है, वह प्रकृति है। जैसे दशपौर्णमास आदि। जहाँ सम्पूर्ण अङ्गों का उपदेश नहीं होता, वह विकृति है। जैसे सौर्य आदि । प्रकृति की तरह विकृति करनी चाहिए।यह मीमांसा का न्यायहै। प्रकृति में नहीं है। प्रकृति में जिस मन्त्र का जो अभिधेय है, यदि वह विकृति में साकल्य रूप में नहीं है, सम्पूर्ण मन्त्र की निवृत्ति होती हैं । यदि उसके एकदेश का अभिधेय नहीं है तो उसके एकदेश की निवृत्ति होती हैं ।

८९- वाक्यप. २/७८ पुण्यराजः

९०- पा. सू. १/३/२; १/३/९; १/३/१; १/३/१२

९१- महाभा., पृ. - १५ १६

९२- वाक्यप.

९३- शृं. प्र. - चूड़ाचूम्बितकङ्कपत्रमभितस्तूर्णाद्वयं पृष्टता, भस्मस्तोकपवित्रलाञ्छनमुरोधत्ते त्वचं मौरवीम् । मेखलया नियन्त्रितमधो वासश्चमाञ्जिष्ठक, पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ।। उत्तररामचरितम्, ४/२०

९४- सं. व्या. द., पृ. ३९१- सम्बन्धबाधन ऊह का प्रतिपक्ष है ।

९५- वाक्यप. २/७८ पुण्यराजः।

९६- श्रृं. प्र., पृ. ११३- यं सर्वशैलाः परिकल्प्य वत्स मेरौ स्थितेदोग्धरिदोहदक्षे।भास्वन्ति रत्नानि महौषधीश्च पृथूपदिश्टां दुदुहुर्धरीत्रीम् ।

९७- पा. सू., १/१/१२

१०१- पा. सू., १/१/५६

१०२- सं. व्या. द., पृ.- १७२- पुण्यराज और भोज ने अर्थित्व और सामर्थ्य को स्वतन्त्र वाक्य धर्म के रूप में न लेकर इनका सम्बन्ध अधिकार अथवा अधिकारी से जोड़ा है ।

१०३- वाक्यप., २/१७ पुण्यराजः

१०४- शृं प्र., पृ.- ३२३

१०५- वाक्यप, २/७९अम्बाकर्त्री

१०६- शृ.प्र.,पृ-३२३

१०७- सं. व्या. द., पृ.-३९५-शब्द छः तरह के हैं । साधु और असाधु साधु शब्द भी दो तरह के है शास्त्रीय और प्रायोगिक । शास्त्रीय शब्द भी तीन तरह के हैं - प्रतिपाद्य, प्रतिपादक और उभयरूप। प्रायोगिक भी लौकिक-वैदिक भेद से दो तरह के हैं इस तरह कुल छः तरह के शब्द हैं ।

१०८- वाक्यप., २/७१ पृ.-१५२-१५३ अर्थो दशधा । तत्र वस्तुमात्र मभिधेयश्च। अभिधेयोऽपि द्विद्या शास्त्रीयो लौकिकश्च । पुनरपि विशिष्टावग्रहसंप्रत्ययहेतुस्तद्विपरीतश्च मुख्यः, परिकल्पितरूपविपर्यासश्च, व्यपदेश्योऽव्यपदेश्यश्च, सत्वभावमापन्नोऽसत्वभूतश्च स्थिरलक्षणो विवक्षा प्रापित संन्निधानश्च अभिधेयमानः प्रतिपाद्यमानश्च अभिसंहितो नान्तरीयकश्चेति।

१०९- शृ. प्र., पृ.- १२६-तत्र प्रकृत्यादिशब्दप्रत्याय्यः- क्रियाकालकारक-पुरुषोपाधिप्रधानोपस्कारार्थप्रातिपदिकार्थवृत्त्यर्थपदार्थवाक्यार्थरूपा द्वादश भेदाः । (विभक्त्यर्थस्योल्लेखः पाठे नास्ति)

११०- सं. व्या. द., पृ. - ३९५ - वस्तुमात्र - जिसके बारे में कहा जा सके, जो प्रतिपादन का विषय बन सके, वह अर्थ का वस्तुमात्र रूप है अर्थात् जो कुछ वस्तु है, चाहे उसकी यथार्थ सत्ता हो अथवा कल्पित सत्ता हो वह वस्तुमात्र अर्थ है। दूसरे शब्दो में शब्द निरपेक्ष वस्तु की सत्ता वस्तुमात्र है ।

१११- सं. व्या. द., पृ.- ३९५ अभिधेय वह अर्थ है जो शब्द का अर्थ है बाह्य यथार्थ अर्थ नहीं । जो समीहित है वह अभिधेय है । अभिधेय ही शब्द व्यापार का विषय है , वह दो प्रकार का होता है शास्त्रीय- लौकिक ।

११२- तदेव शास्त्रीय वह अर्थ है जो पौरुषेय है, कल्पित है । व्यभिचरित भी होता है फिर भी जो परम्परा से अव्यभिचरित माना जाता है और जो परिकल्पित होता हुआ भी अवकल्पित सा शब्दसाधुत्व के निमित्त के रूप में प्रातिपदिक माना जाता है । उसका अन्वाख्यान किया करते हैं । इसलिए वह आवापोद्धारिक भी है, उसका विश्लेषण आवापोद्धार पद्धति से किया जाता है ।

११३- अर्थवि. और व्या. द., पृ. -९४

११४- सं. व्या. द., पृ.- ३९५ लौकिक अर्थ अखण्ड अर्थ है । लौकिक अर्थ में से शब्द का अधिकार माना जाता है, शास्त्रीय अर्थ में अधिकार नहीं अर्थ में वे शब्द का अधिकार माना जाता है, शास्त्रीय अर्थ में अधिकार नहीं होता है ।

११५- परि. वृति., १२८

११६- अर्थ. और व्या. द., पृ. - ९२-९३

११७- वाक्यप., २/४२०

११८- सं. व्या. द., पृ.- ३९५ जब अर्थ विशिष्टाकार रूप में ज्ञान विशेष का प्रत्यापक होता है, वह विशिष्टावग्रहसंप्रत्ययहेतु माना जाता है। विशिष्टावग्रहसंप्रत्ययहेतु शब्द का व्यवहार पुण्यराज ने किया है ।

११९- वाक्यप०, २/७९ अम्बाकर्त्री ।

१२०- सं० व्या० द०, पृ-३५३ बाह्य रूप में जो वस्तु जैसी है, उसी रूप में उसका उद्भावन अविशिष्टावग्रहसंप्रत्यय हेतु अर्थ है ।

१२१- वाक्यप०,२/७९ पृ०- १५३

१२२- सं० व्या० द०,पृ० - ३९३ शब्द के उच्चारण से जिस अर्थ का साक्षाद् बोध होता है, वह मुख्य है ।

१२३- सं० व्या० द०, पृ० ३९३, किसी निमित्त के आधार पर जिसका रूप विपर्यास कल्पित होता है, वह अर्थ परिकल्पितरूप विपर्यास है । दूसरे शब्दो में गौण अर्थ का एक नाम है ।

१२४- वाक्यप०, २/७९ पुण्यराज: पृ०-१५४

१२५- सं० व्या० द०, पृ० - १५४

१२६- तदेव, पृ०- ३९३ आवाप पद्धति के आधार पर जाति अथवा द्रव्य व्यपदेश्य अर्थ कहे जाते है ।

में उसका उद्भावन अविशिष्टावग्रहसंप्रत्यय हेतु अर्थ है ।

१२१- वाक्यप०,२/७९ पृ०- १५३

१२२- सं० व्या० द०,पृ० - ३९३ शब्द के उच्चारण से जिस अर्थ का साक्षाद् बोध होता है, वह मुख्य है ।

१२३- सं० व्या० द०, पृ० ३९३, किसी निमित्त के आधार पर जिसका रूप विपर्यास कल्पित होता है, वह अर्थ परिकल्पितरूप विपर्यास है । दूसरे शब्दो में गौण अर्थ का एक नाम है ।

१२४- वाक्यप०, २/७९ पुण्यराज: पृ०-१५४

१२५- सं० व्या० द०, पृ० - १५४

१२६- तदेव, पृ०- ३९३ आवाप पद्धति के आधार पर जाति अथवा द्रव्य व्यपदेश्य अर्थ कहे जाते है ।

१२७- वाक्यप०, २/७९ पृ० - १५४

१२८- सं० व्या० द०, पृ०- ३९६ वाक्यार्थ लक्षण अखण्ड अर्थ को अव्यपदेश्य माना जाता है ।

१२९- सं० व्या० द०, पृ०- ३९६- अवाप- उद्वाप् पद्धति वाला व्यपदेश्य ही सत्वभावापन्न है ।

१३०- सं० व्या० द०, पृ० - ३९३- वाक्यार्थलक्षण अर्थ जब सत्वभावान्न न हो, असत्त्वभूत माना जाता है। व्यपदेश्य और सत्त्वभूत अर्थ में, तथा अव्यपदेश्य और असत्त्वभूत अर्थ में केवल उक्ति भेद से भेद है ।

१३१- सं०,व्या०, द०, पृ, ३९६-३९७- जो अर्थ कभी अपने सम्बन्ध को नहीं छोड़ता वह स्थिरलक्षण कहा जाता है । जिसका लक्षण स्थिर रहता है, वह स्थिर लक्षण या स्थितलक्षण होता है ।

१३२- तदेव, पृ - ३९७ जिस अर्थ को सम्बन्ध विवक्षाधीन है वह विवक्षा प्राप्ति सन्निधान अर्थ है ।

१३३- तदेव , पृ० -३९७ - जो अर्थ जिस रूप में कहा जा रहा है, उसी अर्थ में उसका ग्रहण अभिधीयमान कहलाता है ।

१३४- अर्थ और व्या० द०, पृ०- ९५

१३५- सं० व्या० द०, पृ० -३९७ अभिधीयमान से एक कोटि आगे का अर्थ प्रतीयमान माना जाता है ।

१३६- वाक्यम०, २/७९, पृ० १५४

१३७- सं० व्या०,द०,पृ० ३१७- शब्द से संपृक्त जो अर्थ रहता है, उसे अभिसंहित कहा जाता है

१३८- वाक्यप०, २/७९ अम्बा०, पृ० -१५५

१३९- सं० व्या० द०, पृ०- ३९७- शब्द से सहचरित वर्णसंघटना आदि नान्तरीयक अर्थ है ।

१४०- वाक्यप०,२/७९ पुण्य०, पृ०- १५५

१४१- अर्थ और व्या०द०, पृ०-९५

१४२- वाक्यप०, २/७९, पृ०-१५५

१४३- पा० सू०, ८/१/८

१४४- तदेव, ८/१/८ वा०।

१४५- तदेव, भाष्यम्

१४६- मीनिंग आफ् मीनिंग् पृ० १५८-२१८

१४७- (आ) अर्थ० की भूमि०,पृ० ६९,७०,७१
(आ) अर्थ औ० व्या० द०, पृ०- ९५-९७

१४८- सं० व्या० द०, पृ०- ३९८- पुण्यराज के अनुसार शब्द के अथवा शास्त्र के जो धर्म अनिधिकार के रूप में कहे गये है, वे क्रियान्तरव्युदास माने जाते है। भोज ने इसी को दूसरे शब्दों में कहा है सामर्थ्य अर्थित्व आदि का किसी स्थल पर अयोग्यता का नाम क्रियान्तरव्युदास है ।

१४९- वाक्यप०, २/८०, कारिकावतरणम्

१५०- शृंगारप्रकाशः, पृ०-३२७

१५१- सं० व्या० द०, पृ० - ३२७ पौर्वापर्य के आधार पर नियोजन क्रम है ।

१५२- वाक्यप०, २/८० पुण्य०, पृ०- १५५

है । यथा पठित का यथापठित से सम्बन्ध पाठक्रम है । यथासंख्य नियम ही एक तरह से पाठक्रम है ।

१६३- का० अलं० २/९०

१६४- तैत्त० सं० २/६/११

१६५- पा० सू० १/४/२; ८/२१

१६६- श्रं० प्र०,पृ०- ३३१

१६७- सं० व्या० द०, पृ-३९९- वैदिक साहित्य में वर्ण आचार सम्बन्धी जो आदेश जिस प्रकरण में उद्दिष्ट है उसी प्रकार से उनका अभिधान - काण्ड क्रम है ।

१६८- श्रृं प्र०, पृ- ३३१ - स्मृतिक्रमो यथा भूर्भुवः स्वर्लोकांस्तर्पयति ।

१६९- सं० व्या० द०, पृ-३९९- प्रतिपन्न की इच्छा वश प्रवृत्त क्रम को प्रवृत्तिक्रम कहा जाता है ।

१७०- वाक्यप०, २/८० पुण्य०, पृ०- १५७

१७१- महाभा०, १/१/५७ अचः परस्मिन् पूर्व विधौ सूत्रम् ।

१७२- सं० व्या० द०, पृ० - ४००; अवबोध के क्रम को प्रतिपत्तिक्रम कहा जाता है ।

१७३- पा० सू २०, ६/४/७१

१७४- वाक्यप०, हरिवृत्ति - सं० व्या० द०, पृ०- ४००

१७५- महाभा०, १!४!१०८ सूत्रम् - परः सन्निकर्षः ।

१७६- वाक्यप०, २/८० पृ० - १६०

१७७- सं० व्या० द०, पृ०- ४०१ पाराङ्ग से अभिप्राय सम्भवतः पराङ्गवद् भाव से है ।

१७८- वाक्यप०, २/८१

१७९- सं० व्या० द०, पृ-४०१ - जो पदार्थ उत्पन्न हैं, उसी का काम करता हुआ पर का उपकार करता है वह पर उसका अप्रयोजक कहा जाता है । जिसका सम्बन्ध हो वह अप्रयोजक है ।

१८०- श्रृं० प्र०, पृ०- ३०८

१८१- सं० व्या० द०, पृ-४०१ जिसके प्रयुक्त होने पर प्रवृत्ति होती हैं उसे प्रयोजक कहते है ।

१८२- श्रृं० प्र०, पृ०- ३१८

१८३- वाक्यप०, २/३०३

१८४- सं० व्या० द०, पृ-४०१, प्रधान क्रिया के निवर्तन में अनिवार्यतः साथ लगे धर्म अथवा अर्थ नान्तरीयक कहे जाते हैं ।

१८५- श्रृं० प्र०,पृ०- ३०८

१८६- वै० सि० ल० मञ्जू०, पृ०- ४०५

१८७- श्रृं० प्र०, पृ०- ३०७

१८८- सं० व्या० द०, पृ-४०१ जो पदार्थ हैं वह शेष है ।

१८९- शृं० प्र०, पृ०- ३०७

१९०- सं० व्या० द०, पृ०, ४०२

१९१- सं० व्या० द०, पृ-४०२ - शेषाशेषिभाव के इतिकर्तव्यता का नाम वियोगक्रम है ।

१९२- वाक्यप०, २/८२ पुण्य०, पृ०- १६३

१९३- वाक्यप०, २/३९९

१९४- श्रृं० प्र०, पृ० -३०७

१९५- सं० व्या० द०, पृ-४०२ जो प्रत्यक्ष रूप से अपना उपकारक हो उसे साक्षादुपकारक कहते है ।

१९६- वाक्यप० २/८२ पुण्य० पृ० - १६३

१९७- सं० व्या० द०, पृ-४०२ जो साक्षात् उपकारक न होकर कुछ दूर से उपकारक हैं वे आरादुपकारक कहे जाते है ।

१९८- पा० सू०, ३/३/५६; ३/२/२५

१९९- सं० व्या० द०, पृ- ४०२, शक्ति और व्यापार के आश्रय से उपस्थित भेद शक्ति व्यापार भेद है ।

२००- वाक्यप०, २/८३, पृ० - १६४ अम्बा० ।

२०१- श्रृं० प्र०, पृ०- ३२८

२०२- सं० व्या० द०, पृ-४०३ फल के आधार पर भेद फलभेद कहलाता है ।

२०३- वाक्यप०, २/८३ अम्बा०, पृ०- २६५

२०४- श्रृं० प्र०, पृ०- ३२८

२०५- सं० व्या० द०, पृ-४०३ धातु से उपात्त क्रिया के सम्बन्ध भेद से भेद की प्रतीति सम्बन्धज भेद है ।

२०६- वाक्यप०, २/८३ पुण्य०, १६६- पृ०

२०७- श्रृं० प्र०, पृ० - ३२२-३२९

२०८- सं० व्या० द०, पृ०-४०४ - भेद का प्रतिपक्षभूत अभेद अविवक्षित भेद से अभिप्रेत है ।

२०९- वाक्यप०, २/८३ पुण्य०, पृ० - १६७

२१०- सं० व्या० द०, पृ-४०९ जहाँ नञ का सम्बन्ध क्रिया के साथ होता और वाक्यभेद होता है, वहाँ प्रसज्य प्रतिषेध माना जाता है ।

२११- वाक्यप०, २/८४ पृ०- १६७

२१२- तदेव , अम्बा० पृ०- १६८

२१३- पा० सू०, ३/३/१९

२१४- वैय्याकरण सिद्धान्तकौमुदी, उत्तरकृदन्तम्, पृ० - ६४८

२१५- श्रृं० प्र०, पृ० - ३१४

२१६- महाभा०प्र०, १/१/४३ सि० की० तत्त्वबो०,पृ०- ६५

२१७- सं० व्या० द०, पृ-४०४ जहाँ नञ का सम्बन्ध क्रिया के साथ नहीं होता और एक वाक्यता होती है वहाँ पर्युदास होता है।

२१८- वाक्यप ९, २/८४ पुण्य०, १६८

२१९- श्रृं० प्र०, पृ- ३१४

२२०- पा० सू०, ३/२/३

२२१- परिभा० शे०, पृ०,- ८४ परिभाषा १-१५

२२२- श्रृं० प्र०, पृ०-३०९

२२३- पा० सू०, १/२/४२

२२४- वै० सि० सु०,पृ० ५८९

२२५- परिभा० शे०,पृ०- ८४

२२६- सं० व्या० द०, पृ-४०४- अनेक विषय का स्पर्श करने वाला व्यापि है ।

२२७- सं० व्या० द०, २/८४ पुण्य० पृ० १७२-१७३ (सन्निहत्याम्- कुरूक्षेत्रे इति)

२२८- सं० व्या० द०, पृ-४०४- असंक्षिप्त अभिधान गुरु है ।

२२९- वाक्यप०,२/८४ पृ० -१७३

२३०- महाभा, ६/३/१०९

२३१- महाभा०, ६/३/१०९

२३२- सं० व्या० द०, पृ-४०५ संक्षिप्त अभिधान लधु है ।

२३३- वाक्यप०, २/८४, पृ०- १७३

२३४- श्रृं० प्र० पृ०- ३१०

२३५- सं० व्या० द० पृ०- ४०५ संयुक्त विधान होने पर अङ्गाङ्गिभाव होता है ।

२३६- पा० सू० ४/१/९२; ३/४/६७

२३७- वाक्यप०, २/८५ पुण्यराजः, पृ०- १७४ अम्बाकर्त्री च ।

२३८- तैत्त० सं०, १/२/१/१

२३९- नीतिश०, १/४२, पृ०- ३७-३८

तत्र पुण्यराजोक्तश्लोकस्यान्यत्र पाठभेदो दृश्यते-

मणिः शाणोलीढः समरविजयी हेति दलिताः ।

मदक्षीणो नाम शरदि सरिदाश्यानपुलिना ।।

कलाशेषश्चन्द्रः सुखमृषिता बालवनिता ।

तन्निम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ।।

२४०- सं० व्या० द०, पृ- ४०५- तुल्य प्रमाण वाक्यों में विरोध होने पर विकल्प होता है ।

२४१- श्रृं० प्र०,पृ०- ३१३

२४२- वाक्यप०,२/८५ पुण्यराजः अम्बाकर्त्री च, पृ०-१७४

२४३- पा० सू० ३/४/५८, ३/१/४९-५३ मैत्रा० स०,३/८/२

२४४- अल० सर्व०,पृ०- २१ काव्यानुशासनेऽपि, पृं०- ३९

२४५- सं० व्या० द०, पृ- अनेक की प्राप्ति होने पर आयोग, अन्ययोग, व्यवच्छेद के आधार पर निर्धारण नियम कहलाता है ।

२४६- श्रृं० प्र०,पृ०- ३१३

२४७- पा० सू०, १/४/८,१/४/८०

२४८- काठ० सं०, पृ० २३-५७

२४९- सं० व्या० द०, पृ- ४०५ अधिकारित्व का ग्रहण योग्यता है ।

२५०- वाक्यप०, २/८५ पुण्य० पृ०- ५४, तैत्त ब्रा०, १/५/११/२

२५१- सं० व्या० द०, ४०५ - शब्दान्तरोपलब्ध वस्तु के सामर्थ्य से सामान्य रूप में आक्षिप्त का विशेष रूप में अवस्थापन लिङ्गाद्भेद कहा जाता है । अ. वाक्यप०, २/८६

२५२- श्रृ० प्र०, पृ० - ३२५

२५३- पा० सू०-७/४/८४

२५४- वाक्यप०, २/८६, पुण्य अम्बाकर्त्री। तत्र वक्रोक्तिजीवितम् पृ० ३८ सरस्वतीकण्ठाभरणम् पृ०- ५८९; काव्यप्रकाशः, ५/१०९; काव्यानुशासनम्, पृ०- ३९- सदुक्तिकर्णामृतम् सर्वत्रेदं पद्यं लभ्यते ।
यथा-रामोऽसौ भुवनेषु विक्रमगुणैः समृद्धपराम् अस्मद्भाग्यविपर्याद् यदि परं देवी न जानाति तम् । बन्दो वैष यशांसि गायति मरुद् यस्यैककवाणहतश्रेणी मूलविशालताल विवरोदुगोद्धृस्वरैः सम्तभिः ।। इति ।।

२५५- सं० व्या० द०, पृ- ४०६- विभाग को अपोद्धार कहा जाता है ।अत्यन्त संसृष्ट का अनुमेय या कल्पित रूम में प्रकृत स्वरूप का विश्लेषण अपोद्धार होता है ।

२५६- वाक्यप० २/८६ पुण्य, पृ०- १७७

२५७- पा० सू०, ७/१/११

२५८- श्रृं० प्र०, पृ०- ३२६

२५९- तदेव, पृ० - ३११

२६०- तदेव, पृ० - ३१२

२६१- श्रृ० प्र०, पृ०- ३१२

२६२- श्रृं० प्र०, पृ०- ३१२

२६३- तदेव, पृ०- ३२४

२६४- तदेव, पृ०- ३२३

२६५- तदेव, पृ०- ३२६

२६६- श्रृ० प्र० पृ- ३०५

२६७- तदेव०, पृ०- ३६३- सरस्वतीकण्ठाभरणञ्च, पृ०, -३५, चौखम्बा ओरियटिलिया । तत्र पाठः शब्दहीतं क्रमभ्रष्टं विसन्धिः मुनरुक्तिमत्। व्याकीर्ण वाक्यसंकीर्णमपदं वाक्यगर्भितम् ।। द्वे भिन्न लिङ्ग वचने द्वे च न्यूनाधिकोपमे । भग्नच्छन्दोमती च द्वे अशरीरमरीतिमत् । वाक्यस्येते महादोषाः षोडशेव प्रकीर्तिताः ।।-श्लो० १८-२०

२६८- तदेव, पृ०- तदेव ।

२६९- तदेव

२७०- तदेव

२७१- तदेव

२७२- श्रृं० प्र०,पृ०- ३३६

२७३- तदेव

२७४- श्रृं० प्र०,पृ०- ३३६

२७५- तदेव

२७६- तदेव

२७७- तदेव

२७८- तदेव

२७९- श्रृं० प्र०, पृ०- ३३७

२८०- तदेव

२८१- तदेव

२८२- तदेव

२८३- श्रृं० प्र०,

२८४- तदेव

२८५- तदेव

२८६- पृ० ३९१- सामान्यातिदेश में अन्यत्र जो धर्म रूढ़ है उतका प्रसिद्ध अथवाअनुमेयभेद सम्भव सम्बन्धियों द्वारा निर्ज्ञात भेदे वाले वस्तुओं (अर्थो) में प्रापण किया जाता है ।

२८७- पृ० ३९४- इन तीन को पुण्यराज ने वाक्यधर्म नहीं माना है ।

२८८- वृत्ति समुद्देशे ३६

२८९- पृ ३९४- अर्थित्व से अभिप्राय एकार्थीभाव से जान पडता है । सामर्थ्य से और भेद, संसर्ग अथवा भेदसंसर्ग दोनों से है। यदि वृत्ति में भेद और संसर्ग हों, सामर्थ्य नहीं हो सकता । सामर्थ्य भेद संसर्गात्मक होता है भेद सामर्थ्य होता है और संसर्ग अनुमेय होता है । कभी संसर्ग स होता है और भेद अनुमेय होता है । अथवा युगपत् आश्रित होकर सामर्थ्य कहलातें है ।

२९०- पा.सू.८/१/१८,वार्तिकम्,८/१/१८,८/२/८२,

२९१- वाक्यप०,२/४४४-सटीकम्

२९२- काव्य० मी० अध्याय:,पृ०-५९ बिहार राष्ट्र प्रकाशन पटना महा० भा०, २/४/६२; ६/१/६७ प्रदोपोद्योत:

२९३- वाक्यप० २/४४२-४५८

२९४- महा० मा०, ५/३/६६ प्रदीप:

२९५- ईश्वरप्रतयभिज्ञा विवृति विमर्शिनी, भाग-२ पृ०-२६५

२९६- निरुक्तम् १/१/९- दुर्गाचार्य :

२९७- वाक्यप०, २/७६७ पुण्यराज:

२९८- का० मी०, पृ०- ५८- अनेक क्रियाओं वाले अनेकाख्यात वाक्य दो प्रकार के होते हैं । (१) - सान्तर और (२)७ निरन्तर ।

२९९- श्रृं प्र०, पृ० - १०३

३००- का० मी० पृ० ७ ५८ जिस के आख्यात पदो के बीच-बीच में सुबन्त पद भी हों ।

३०१- श्रृं० प्र०, पृ०- १०४

३०२- का० मी०,पृ०- जिस में केवल क्रिया पद ही हों बीच में सुबन्त पद एक भी न हो ।

३०३- का० मी०, पृ० ७ ५९

३०४- श्रृं० प्र०, पृ० -१०४

३०५- का० मी०, अ० ७ ६, पृ० - ५८,

३०६- श्रृं० प्र०, पृ० - १०३

३०७- का० मी०- अनुवाद संहिता, पृ०- ५८; आख्यात का अर्थ क्रियापद है। एक क्रिया पद वाले एकाख्यात वाक्य होते है ।

३०८- का० मी०, पृ० - ५८

३०९- श्रृं० प्र०, पृ० ७ १०३

३१०- का० मी०, पृ०- ६० एक ही क्रिया की, भिन्न- भिन्न कर्त्ता -कारको के साथ बार-बार आवृत्ति की जाए ।

३११- का० मी०, पृ० - एकाभिधेयाख्यात का तात्पर्य यह है कि एक ही कर्त्ता कारक का अनेक आख्यातों के साथ सम्बन्ध हो ।

३१२- तदेव ।

३१३- श्रृं० प्र०, पृ- १०४

तृतीयोऽध्यायः

वाक्यार्थसमीक्षणम्

पृष्ठ संख्या 152 से 221

तृतीयोऽअध्यायः

वाक्यार्थसमीक्षणम्

वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा [१] वाचकत्वमिच्छन्ति, तत्रापि वाक्यस्यैव वाचकत्वं ब्रुवन्ति । वाक्यस्य पदभिन्नत्वे 'पदैः पदार्था बुद्ध्यन्ते वाक्यैश्च वाक्यार्थ इति स्वं मतं प्रतिपादयन्ति । वाक्यादेव वाक्यार्थज्ञानोपयोगिनोः पदपदार्थयोः निर्णयः सञ्जायते, तत एव व्याकरणस्य प्रधानाङ्गतेति तात्पर्यम् । वाक्यतो यो ह्यर्थः बुद्ध्यते सो वाक्यार्थः निष्कर्षतो वाक्यादेव वाक्यार्थ इत्यनुभवसिद्धो व्यवहारः । तत्रापि अखण्डवाक्यं वाक्यार्थस्य बोधकमित्युच्यते। अयं विषयः प्रसिद्धो व्याख्यातश्च व्याकरणेऽपूर्वविधिनेति । मीमांसान्यायप्रभृतिषु दर्शनेष्वयं विषयः निरूपितः, स्व स्व शास्त्रवासनया परं वैयाकरणानां तत्र मौलिकः कश्चन मतभेदोऽभिलक्ष्यी भवति । तत्र [२] हि ध्वनिव्यङ्ग्यं नित्यं वाक्यमेव शब्दः मुख्यः, वाक्यार्थ एव मुख्यः शब्दार्थः । [३] पुण्यराजस्य मतेन तत्र वैयाकरणस्याखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः अध्यासश्च सम्बन्ध इति । भर्तृहरितात्पर्यमेव पुण्यराजेन प्रकाशितम् ।

[४] भाष्ये – पदानां सामान्ये वर्तमानानां यद्विशेषे अवस्थानं स वाक्यार्थः इत्येतस्य व्याख्यानं कैय्यटेनेत्थं प्रतिपादितम् – ध्वनिव्यङ्ग्यं नित्यं वाक्यं विशिष्टस्यार्थस्य पदार्थसंसर्गरूपस्य वाचकम् । अन्यथा ह्याशब्दो वाक्यार्थः स्यादिति । सामान्यस्य विशेषेऽवस्थानमित्यत्र पदार्थसंसर्गरूप एव वाक्यार्थो भवति तदेवोच्यते वाक्यमेव मुख्यम् ।

शब्दो वाक्यार्थ एव मुख्यः शब्दार्थः, इत्यादिना पदार्थातिरिक्तो वाक्यार्थोऽस्तीति गम्यते । यतो हि सर्वत्र वाक्यमेव बोधकं भवति। तत्तदुपादानं तु नियमाय कल्पते । [५] वाक्यपदीयेऽपि–

अशब्दो यदि वाक्यार्थः पदार्थोऽपि तथा भवेत् ।
एवं च सति सम्बन्धः शब्दस्यार्थेन हीयते ।।

मञ्जूषायां विशेषणविशेष्यभावरूपससर्गो वाक्यार्थोऽपि वाक्यशक्य एव निरूपितः । यथा वाक्ये पदानि स्वं स्वमर्थं सूचयन्ति तथैव वाक्यार्थे पदार्था आकाङ्क्षायोग्यतासन्निधिवशात् परस्परं संसृष्टाः भवन्ति, वस्तुतो वाक्यं वाक्यार्थो वा न हि पृथगस्तीति भावः कैय्यटेनोक्तः । यतो हि वाक्ये पदार्थादन्यस्यार्थस्य न कदापि उपलब्धिर्भवति । [६] पुनरपि भाष्ये यत्राधिक्यं वाक्यार्थः स, राज्ञः पुरुष इत्यत्र पुरुषे यदाधिक्यं स वाक्यार्थ इति, न तु राजनि यदाधिक्यं स वाक्यार्थो भवति । यतो ह्यत्र एवञ्च विशेषणत्वस्य वाक्यार्थत्वे तन्नियामकसम्ब- न्धोऽपि वाक्यार्थ एव भवतीति उद्योतकारः । वाक्यार्थमधिकृत्य भाष्ये द्वौ पक्षाविमौ प्राप्नुतः । तत्र हेलाराजशबरस्वामिनोरपि विचारः साम्यं वहति [७] हेलाराजः 'वाक्यार्थश्च सामान्ये वर्तमानानां विशेषेऽवस्थापकः सम्बन्ध :-

पदं हि सामान्यं, वाक्यं विशेषः, सामान्ये च विशेषस्यावस्थानं वाक्यार्थो भवति ।

वाक्यवद्वाक्यार्थेऽपि लक्षणविषयकमतभेदः शास्त्रान्तरेषु श्रूयते। अभिहितान्वयान्विताभिधानवादिनां मतेन भिन्नानि वाक्यार्थलक्षणानि दृष्टिगोचरी भवन्ति । पुनरपि 'वाच्य एव वाक्यार्थः' पदार्थ एव वाक्यार्थ इत्यन्विताभि धानवादिनो वदन्ति । भेद एव वाक्यार्थ इति केचिदिच्छन्ति, तन्मतेन व्यावृत्तिरेव वाक्यार्थः । क्वचित्संसर्गो वाक्यार्थः, क्वचिद् भेदसंसर्गो वाक्यार्थः । 'भेदो वाक्यार्थः' इति संग्रहे व्याडिमतम् । [८] पदवाच्यानां द्रव्यान्तरनिवृत्तिरेव वाक्यार्थ इति । पुनरपि व्याडिनोक्तम्- [९] पदानां रूपमर्थो वा वाक्यार्थादेव जायते पदस्वरूपम् पदस्य अर्थः वाक्यार्थादेव सम्भवस्तस्माद् वाक्यार्थः समाश्रयणीयो भवति ।

[१०] वाक्यार्थप्रकारनिरूपणम्-

वाक्यलक्षणावसरे तत्रैव हरिणा वाक्यार्थविषयकाः मतभेदाः प्रदर्शितास्सन्ति वाक्यपदीयस्य द्वितीये काण्डे -

१- वाक्यस्याखण्डत्वे - जातिः सङ्घातवर्तिनी, एकोऽनवयवः शब्दः, बुद्ध्यनुसंहृतिरिति त्रिषु लक्षणेषु ' विच्छेदग्रहणेऽर्थानामित्यादिना' प्रतिभा वाक्यार्थः प्रतन्यते ।

२- आख्यातशब्दो वाक्यमित्यस्मिन् पक्षे 'क्रिया क्रियान्तरादिभिन्ना प्रतिभा यत्प्रभूतार्थो' आभ्यां क्रियावाक्यार्थः, निरूप्यते ।

३- पदसङ्घातो वाक्यमिति एवं पदानां पौर्वापर्यरूपः क्रमः वाक्यमिति पक्षे सम्बन्धे सति यत्त्वन्यद् सर्वभेदानुगुण्यं तु इति कारिकाभ्यां संसर्गो वाक्यार्थः प्रतिपद्यते ।

४- सङ्घात पक्ष एव प्रकारान्तरेणाभिहितान्वयपक्षे कार्यानुमेयः सम्बन्धो रूपमित्यादिना (विशेषविश्रान्तः पदानामेवार्थो वाक्यार्थः) निराकाङ्क्षस्य पदार्थस्य वाक्यार्थतेति लक्ष्यते ।

५- पदमाद्यम् पृथक्सर्वं पदसाकाङ्क्षं वाक्यमित्यस्मिन्पक्षे प्रथमतः तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते इत्यादिना संसृष्ट एव वाक्यार्थः प्रयोजनमित्यादिना निरूप्यते । केषाञ्चिन्मतेनैतस्य पूर्वोक्तेष्वन्तर्भाव इति ।

प्रतिभा, संसर्गः, संसर्गवशान्निराकाङ्क्षो विशेषावस्थितः पदार्थ एव, (साकाङ्क्षः, निराकाङ्क्षश्च), संसृष्ट एवार्थः, प्रयोजनञ्चेति षड् वाक्यार्था इहोपदर्शिता इति [११]पुण्यराजः । अम्बाकर्त्र्यामपि षड्वाक्यार्था उपस्थापिताः- प्रतिभा पदार्थानां संसर्गः, पदार्थान्तरसंसर्गात् पूर्वसामान्यरूपः पदार्थान्तरसाकाङ्क्षः, पश्चात्तु पदार्थान्तरसंसर्गवाशान्निराकाङ्क्षो विशेषरूपेऽवस्थितः पदार्थान्तरसंसर्गव- शिष्टपदार्थ एव वाक्यार्थश्चतुर्थः, क्रिया वाक्यार्थ इतिं पञ्चमः पक्षः, वाक्यस्य प्रयोजनं वाक्यार्थ इति षष्ठः पक्षः । तत्र पुनः संसर्गपक्षे संसर्गवशाद्विशेषावस्थिते पदार्थे च वाक्यार्थस्वीकारेऽभिहितान्वय- वादो भवतीति सूचितम् । क्रियायां संसृष्टे चान्विताभिधानपक्ष आपतति । प्रयोजने वाक्यार्थेऽप्यन्विताभिधान एव प्रवर्तते । [१२] उभयपक्षे संसर्गभानं पदार्थसमभिव्याहारविशेषाकाङ्क्षा प्रयोज्यो वाक्यार्थः, पदार्थान्तरसंसृष्टः पदार्थो वाक्यार्थ इति । उभयपक्षे पदशक्त्यान्वयस्य प्रतीतिः । प्रतिभायां नायं कश्चन पक्षो भवति, यतो ह्यखण्डस्य वाक्यार्थस्य विषयत्वात् पदार्थान्वयशून्या एकरसैव प्रतिपत्तिरिति न तत्र काचिदभिहितान्व- यवादान्विताभि धानवादचर्चा विद्यते ।

[१३]वाक्यविषये सर्वाधिको विचारो वाक्यपदीये लक्ष्यते, तथैव वाक्यार्थविषयेऽपि सर्वतोऽधिका चर्चात्रैव वर्तते ।

[१४] पुण्यराजेन प्रधानविषयनिरूपणानन्तरं दर्शनान्तरेष्वपि विहिताया वाक्यचर्चायाः प्रसङ्गः समुपस्थापितोऽस्ति। मीमांसकोक्तं,विधिर्वाक्यार्थः, नियोगो वाक्यार्थः, भावना वाक्यार्थः, इति पक्षत्रयं नात्र निरूपितमस्ति यतो हि क्रिया वाक्यार्थ इति पूर्वमेव निरूपितम्, क्रियाभावनयोः पर्यायत्वं तु प्रायशः लभ्यते, तस्मात्तस्यास्तदन्तर्भाव इति कृत्वा नात्रायं विषयः समीक्षितोऽस्ति । वैय्याकरणमतेन केवलं भावना प्रकृत्यर्थः, मीमांसकमतेन आख्यातार्थो प्रत्ययार्थ इत्युभयोः मौलिको भेदो वरीवर्ति । पुनश्च सकर्मिकैव भावना, भावस्य कर्मप्रधानत्वात्, क्रिया त्वकर्मिका कथिता, यथा नदी एधते इति । एवं तथैव भावनाऽपि धात्वर्थभूता साध्यैव भवति, एवमवान्तरभेदाभेद इति कथयितुं न शक्यते । विधिनियोगविषयावपि लिङ्लोट्कृत्यान्तेष्वेव वाक्येष्वर्थाविति सर्ववाक्यविषयत्वान्नात्र निरूपाविति। क्वचित्प्रेरणाविषयत्वाद्विधिरपि क्रियैव भवति । नियोगविषये प्रभाकरमतममि नात्र सङ्गतिं लभते ।

'आकारविशेषो वाक्यार्थ' इति शाक्यानां मतम् । असौ वाक्यार्थः प्रायशो वैय्याकरणाभिमतस्य प्रतिभावाक्यार्थस्य सोदर एव दृश्यते । आकारविशेषो हि- वाक्यजन्मा कश्चन विज्ञानस्य परस्परसंसृष्टक्रियाकारकविषयक एव वाक्यार्थः । स आन्तरोऽपि सन् बाह्यरूपतया (घटपटादिरूपतया) अध्यस्तः निर्विभागोऽपि बहीरूपतयाऽध्यस्तैः पदार्थैः सविभागवान् भवति। [१५] वाक्यपदीयपाठदानेनाम्बा-कर्त्रीटीका प्रकाशेनायं विषयो भूयान् स्पष्टी भवति । तद्यथा -

" तत्तदनादिवाक्यार्थ विकल्पाहितवासना प्रबोधजन्मा क्रमवद्भिरिवा क्रमैर्बहीरूपतयाऽध्यस्तैः पदार्थैश्चित्रीकृत इव विकल्प विशेषोल्लिख्यमान आकारो बहीरूपतयाऽयस्तो निर्विभाग एव शाक्यानां वाक्यार्थ इति प्रायशः प्रतिभासोदर एवासौ मन्तव्यः"। तत्राम्बाकर्त्री- " तथा चानादिर्यः पूर्वः पूर्वो वाक्यार्थविषयको विकल्प उत्तरोत्तरवाक्यार्थ विकल्पस्य हेतुभूतः तेनोत्तरोत्तरवाक्यार्थ विंकल्पे स्वकार्ये आहिता या वाक्यार्थविषयवासना तस्या यो वाक्यश्रवणेन प्रबोधः, वाक्यार्थविकल्पे वाक्यार्थकारोल्लेखस्या-भिमुख्येनानुकूल्यम्, तज्जन्मा कश्चन विज्ञानस्याकारविशेषो वाक्यार्थः ।

स चान्तरोऽपि बहीरूपतयाऽध्यस्तः, निर्विभागोऽपि अक्रमोपजातप्रत्ययगोचरैरपि क्रमोपजातप्रत्ययगोचरैरिवान्तरैरपि बहीरूपतयाऽध्यस्तैः पदार्थैः चित्रीकृत इव समन्वित इव विकल्पविशेषेण शाब्दबोधजन्मा इत्युल्लिख्यते । शाक्यानां वाक्यमपि प्रायशः बुद्धयनुसंहृतिर्वाक्यमित्यस्य सोदरमेव कथितमिति'' ।

अयन्तु विशेष :- शाक्यानां विज्ञानाकारविशेषो वाक्यार्थ आन्तरोऽपि सन् बाह्याभूतो नास्ति, परन्तु वैय्याकरणानां प्रतिभा वाक्यार्थः सर्वदा बहिर्भूत एव कथ्यते ।

अतो हि प्रतीयते यदनयोः कश्चनावान्तरभेदः, विज्ञानवादिनां वाक्यार्थस्य न्यूनाधिकरूपेण प्रतिभा वाक्यार्थपक्षेऽन्तर्भावो विधातुं शक्यते। एतस्मात्कारणात् तस्य प्रतिभासोदरत्वं व्यञ्जितम् न तत्तत्प्रतिभामात्रविषयत्वमिति, अवान्तरभेदेऽपि तयोरेकविषयत्वमुपपद्यते ।

'प्रतीतिर्वाक्यार्थ' इति नैय्यायिकानामभिमतम् । तन्मते - पूर्वे [१६] पूर्वे ये वर्णास्तद्विषया समूहालम्बनात्मिकोत्पद्यमानावस्था एका या स्मृतिस्तत्सहकृतो योऽन्त्यो वर्णो नश्यदवस्थस्तेन श्रावणप्रत्यक्षरूपेणानुभवेन गोचरीक्रियमाणः तदेव पदं एव पूर्वाणि यानि पदानि तेषां यैका समूहालम्बनात्मकोत्पद्यमानावस्था स्मृतिस्तत्सहकृतमन्त्यमेव पदं विनश्यदवस्थेन श्रावणप्रत्यक्षरूपेणानुभवेन गोचरीक्रियमारमिदं तावत्पदसंघातो वाक्यमिति पक्षे लीनं भवति वाक्यार्थोऽपि नैय्यायिकानां चिन्त्यो भवति, तद्यथा-

''पूर्वपूर्वपदानां योऽर्थस्तद्विषयकं यदेकं स्मरणं समूहालम्बनात्मकं तत्सहकृतेनान्त्येन पदेनोत्पद्यमाना या परस्परसंसृष्टसर्वपदार्थविषया प्रतीतिः सैव वाक्यार्थविषयकत्वाद् वाक्यार्थ इति ''। एतस्यापि संघातपक्षेऽन्तर्भावः।

एवमुक्तेष्वष्टसु वाक्येष्वनवयव एवास्मिन् स्फोटात्मके वाक्ये षट्सु वाक्यार्थेषु च प्रतिभारूपे वाक्यार्थे शाब्दिकसम्मते वाक्यवाक्यार्थयोर-ध्यासरूप एव सम्बन्धः । तत्रोक्तं [१७] भर्तृहरिणा -

अर्थस्वरूपे शब्दानां स्वरूपाद्वृत्तिरिष्यते ।
वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया ।।

अत्र तत्सम्बन्धात्तु तद्वताम् इत्यादिना स्वरूपेण प्रवृत्तिनिमित्तेन सम्बन्धः प्रतिपादितः स एव च सर्वेषां शब्दानां प्रभृत्तिनिमित्तं ज्ञेयमिति

स्पष्टीकृतम्। वाक्यरूपस्य शब्दस्य वाक्यार्थे वृत्तिः, वाक्यार्थबोधनाय प्रवृत्तिः, अन्यानपेक्षया स्वरूपातिरिक्तप्रवृत्तिनिमित्तानपेक्षया भवतीत्यर्थः, वाक्यस्यापि एकोऽनवयवः शब्दो वाक्यमिति वाक्यलक्षणयुक्तस्य वाक्यार्थे वृत्तिः । वाक्यार्थे प्रवृत्तिः वाक्यार्थ बोधनाय प्रवृत्तिरन्यानपेक्षया भवति।

एकोऽनवयव इत्यतिरिक्तस्य सप्तसु लक्षणेषु मीमांसादृशा वाच्यवाचकभावलक्षणो योग्यताख्यसम्बन्धो भवति । तादृशवाक्याद् वाक्यार्थबोधदर्शनेन तयोर्वाच्यवाचकभाव एव सम्बन्धः कल्पनीयो भवति।

शाक्यदर्शनानुसारं बौद्धे पदार्थे शब्दार्थे वाक्यार्थे वा एवं बौद्धस्य पदस्य वाक्यस्य वा कार्यकारण भाव एव सम्बन्धः पुण्यराजेन कथितः। अर्थवत्सूत्रे संसर्गे वाक्यार्थे वाक्यस्य सङ्केतलक्षणः सम्बन्धः भाष्ये स च शक्तिरूपेण प्रतिपादितः ।

एवमन्विताभिधानपक्षेऽपि पदादेव सामान्येन प्रतीयमानः संसर्गे विशेषरूपेण वाक्यादेवोपद्यत इति वाक्यविषयकस्तत्र संकेतो भवति ।

नैय्यायिकानामभिहितान्वयवादीनां मीमांसकानां मतेन च पदेषु विशेषाकाङ्क्षा- भास्योऽपि संसर्गः तत्ततपदानां तत्तदर्थशक्त्यभावे न प्रतीयेदिति परम्परया संकेतलक्षणः शक्तिज्ञाप्य एवात्र सम्बन्ध इति ।

[१८]वाच्यवाचककार्यकारणलक्षणेषु वाक्यवाक्यार्थयोश्चाध्यासरूप एव सम्बन्धो वाक्यपदीये विशिष्य हि निरूपितोऽस्ति । तस्मांदेव वैय्याकरणानामखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्। प्रतिभैव वाक्यार्थः, अध्यासश्च सम्बन्ध इति टीकाकारेण व्यवस्थापितः द्वितीयकाण्डस्य संक्षिप्त विषय इति । अत एव वाक्यपदीयद्वितीयकाण्डस्य वाक्यकाण्डसंज्ञान्वर्थिकेति ब्रूमः ।

इदानीं प्राप्तावसराः षड्वाक्यार्थाः क्रमेण सोपपत्तिकं निरूपयितुं यत्नो विधीयते ।

[१] प्रतिभावाक्यार्थः-

व्याकरणदर्शनदृशा वस्तुतस्तु ' प्रतिभैव वाक्यार्थोऽत्र' प्रतिभा विधेयपदम् वाक्यार्थस्योद्देश्यपदमिति । बुद्धिव्यापारविशिष्टप्रतिभातो योऽर्थो निश्चीयते सोऽर्थो भवेदिति ब्रूमः [१९]भर्तृहरिप्याह -

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ।।

इत्यादिना[२०] देवदत्त गामभ्याज शुक्लां दण्डेन इति वाक्ये श्रोत्रा गृहीतेभ्यो देवदत्तादिभ्यो विच्छिन्नेभ्यस्तत्तदर्थानां विच्छेदेनैव ग्रहणे अन्यैव काचन बुद्धिरुपपद्यते या पदार्थातिरिक्तैव जायेत । पुनरपि ते 'पदार्थैरुपपादिताम्' इत्यादिना पाठेन पदार्थैरसत्यैरेवोपाधिभूतैरुपपादितामभिव्यञ्जितां वैय्याकरणवाक्यार्थं कथयामासुः ।

एवं पूर्वमपि पुण्यराजः द्वितीयकाण्डस्य प्रथमद्वितीयकारिकयोः व्याख्यानावसरे प्रतिभैव वाक्यार्थ इति प्रतिज्ञातवान् तद्यथा - तत्र वैय्याकरणस्याखण्ड एवैकोऽनवयवः शब्दः स्फोटलक्षणो वाक्यम्, प्रतिभैव वाक्यार्थः अध्यासश्च सम्बन्ध इति । प्रतिभायां त्वेकरसैव प्रतिपत्तिरिति न तत्र काचिदभिहितान्वयवादान्विताभिधानचर्चा। तस्यां न कोऽपि वादो भवति । प्रतिभावाक्यार्थस्त्वेकैव यतो हि सर्वोऽपि शब्दः प्रतिभाया एव हेतुः, तद्यथा -

[२१]अभ्यासात् प्रतिभाहेतुः शब्दः सर्वोऽपरैः स्मृतः ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ।।

अनया कारिकया परमार्थतस्तु 'प्रतिभैव वाक्यार्थ' इति निरूपितम्। यथा योऽपि शब्दः, सः प्रतिभाहेतुभूतोऽस्ति । बालानां जडानां वाऽविदितसंकेतानाम् किं बहुना बुद्धिजुषां ज्ञानसंकेतानां यथार्थप्रतिपादनेऽभ्यासात् स्वस्वसंकेतग्रहणकारणात्तत्र प्रतिभैव हेतुरूपेण स्मर्यते । यथा संवेद्यः कश्च नानादिवासनावशादर्थः प्रतीयमानो दृश्यते तथैव जडानामपि नियतपदं शब्दः सम्बोधनतयोदीर्यते । तस्माज्ज्ञायते प्रतिनियतजात्यनुसारेणैव प्रतिनियतैव काचित्प्रतिभोदबुद्ध्यते तन्मूलक एव सर्वप्राणिसम्बंधः सर्वोऽपि व्यवहारः। सेयं प्रतिभा शब्दनिमित्तिका सकलव्यवहारभूता, अतो हि सा प्रतिभावाक्यार्थरूपेण मन्तव्येति । तत्र शब्दो वाक्यरूपः पदरूपश्चाश्रीयते। वर्णात्मकवद्ध्वन्यात्मकोऽपि शब्दः प्रतिभाहेतुरेवेति तद्यथा - करतालिकाशब्दात् काका प्लायन्ते, एवं पश्वादिष्वपि जात्यनुसारं स्वाभाविकी प्रतिभा स्वीक्रियते। मनुष्यद्वारा आहूतास्ते स्व स्व कर्मणि प्रवर्तन्ते। यथा

नियताह्वानशब्दप्रयोगेण त एव समायान्ति ये हि समाहूयन्ते । तू-तू इति कृत्वा आह्वानेन श्वा पुच्छमान्दोलयन् तत्र स्व स्वामिनश्चरणेषु लुठति,दुर् दुर् इति कृत्वा तिरस्कृतश्च दूरदेशस्थं गच्छति । एतादृशी प्रतिभा सजातीयेषु विजातीयेषु प्राणिषु स्वाभाविकी भवति । सजातीयेषु च तथा - धेनुः वत्सस्य हम्बारमाकर्ण्य उन्मनायते कुक्कुटस्य तारस्वरं श्रुत्वा शावकाः सन्निकटं आगच्छन्ति । विजातीयेष्वपि सैव दृश्यते, यथा - सिंहगर्जनमाकर्ण्य दूर-दूर स्थिता अपि वन्याः भीतभीताः दूराद्दूरतरं प्लायन्ते । घनगर्जितमाकर्ण्य च मनसि मोदमाना मयूराः मनोहरं नृत्यन्ति । किं बहुनाऽस्मिन्वैज्ञानिकैः वसुप्रभृतिभिः वृक्षलतादीनामपि प्रापणं लपनं संवर्धनमस वर्धनञ्चेति स्पष्टं कथ्यन्त [२२] इति एतदभिप्रेत्य [२३] भर्तृहरिणोक्तमत्र सङ्गच्छते -

स्वरे वृतिं विकुरुते मधौ पुंस्कोकिलस्य कः ।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ।।

एतत्सर्वं प्रतिभामहात्म्यादेव प्रवर्तते, नतु केनचित्तत्र यत्नो विधीयते। सर्वमप्ययत्नजमेतदिति तात्पर्य्यम् ।

एवमखण्डमेव वाक्यं प्रतिभावाक्यार्थ इति समाश्रयणीयम् तत्रोच्यते-

[२४]अनागमाश्च सोऽभ्यासः समयः कैश्चिदिष्यते ।
अनन्तरमिदं कार्यमस्मादित्युपदर्शनम् ।।

'अभ्यासात् प्रतिभाहेतुः' इत्यत्राभ्यासः अनागमश्च सोऽभ्यासः जन्मान्तरीय एव कथ्यते । स च अस्मादनन्तरमिदं कार्यमित्युपदर्शनरूपा या प्रतिभा तत्स्वाभावजा भवति । यथा कशाभिघातमात्रसमनन्तरमेव वाजिनोऽतियान्ति, अङ्कुशाभिघातेन च गजा, एवमन्येऽपि प्राणिनो यथा स्वमनादिवासनावशात् प्रतिभातः समुचितव्यवहारं कुर्वतो लोकयात्रां निर्वाहयन्तीति स्थितम् । तस्माद्वाक्यवद्वाक्यार्थोऽपि पुण्यराजेनाखण्ड एव प्रतिपादितः ।

[२५] भोजसम्मतिः-

वाक्यार्थस्त्रिधा- भावना, विधिः प्रतिभा च । तत्र प्रतिभा

वाक्यार्थस्त- [२६] क्वचिद्वाक्यमुच्चरितमात्रमेव तमव्यपदेश्यमसत्त्वभूतं प्रतिभा-पदाभिधयं स्वार्थं प्रकाशयति । क्वचित्तु चिरव्यवहितमपि विशिष्टप्रतिभाबीज-भावना निवेशान्निमित्तान्तरसान्निध्ये तदेव वाक्यं पारम्पर्येण प्रतिभाख्यं स्वार्थमाविर्भावयतीति प्रतिभावाक्यार्थः । ननु च न प्रतिभा वाक्यार्थो यतो बालानां स्तन्यपानादिषु, हंसानां क्षीरविवेचनेन, जन्त्वादीनां कुलायादिकरणे, जातमात्राणामेव पशुमृगसरीसृपादीनामुदकसन्तरणे, सुप्तानां च प्रबोधादौ, कुमार्याश्च श्वो मे भ्राता आगमिष्यतीति ज्ञाने, स्वभावतो वाक्याश्रवणमन्तरेणापि प्रतिभोपजायमाना दृश्यते, तथा कालविशेषात्पुँसकोकिलानां स्वरविकारे अभ्यासविशेषात् रत्नपरीक्षकाणां तद्दोषगुणज्ञाने, अहष्टरक्षःपिशाचादीनां परकायावेशान्तर्धानादौ, योगाद्योगिनां पराभिप्रायगतौ, बाह्येन्द्रियवृत्तिनिरो-धाद्वसिष्ठादीनामतीन्द्रियज्ञानं, कृष्णद्वैपायनाद्यनुध्यानात् सञ्जयादीनां दूरदर्शनश्रवणादौ कारणान्तरेभ्योऽपि प्रातिभमुपलभ्यते ज्ञानम् । उच्यते यथैव साक्षात्पुरुषोपदिष्ट-वाक्यार्थ क्रियासु शब्दव्यापारेणोपसंहृता प्रतिपतृणां प्रतिभा समुदेति, तथैव बालादीनां स्तन्यपानादिषु पूर्वशब्दभावनानुगमाद्वाक्यार्थे प्रतिपत्तिभिरविशिष्टैव प्रतिभोपजायते येषामपि चाप्रसिद्धशब्दनिबन्धो व्यवहारः, तेऽपि हस्त्यश्वादयो जन्मान्तरीय शब्द भावनावशात् प्रत्युत्पन्नशब्दप्रत्ययाः प्रतिभामनुगच्छन्त सर्वमारभन्ते ।

पूर्वशब्दानुभावनानुगमाच्च स्वबीजानामाभिमुख्ये प्रकृष्टशब्दव्यापारे कोकिलादीनां स्वरविकारादौ प्रतिभोपजायते । पूर्वजन्मजनितशब्दश्रवण-संस्कारोद्बोधकानि त्वन्यानि कालाभ्यासादृष्टयोगध्यानादीनि साधनानि । इयांस्तु विशेषः । सन्तु तावत् प्रतिभोदस्य योगाभ्यासादीन्यानि कारणानि नैष दोषः। अनेक कारणकान्यपि कार्याणि भवन्ति लोके, ततः प्रतिभोदयस्य वाक्यश्रवणमननादीन्यपि कारणानि भवन्ति । न तत्र कोऽपि संशयस्यावकाश इति ।

भोजोऽपि भर्तृहरिपद्धतिमनुसृत्य प्रतिभामेव वाक्यार्थत्वेन स्वीकृतवान्। सा कदाचित् बुद्धिव्यापाररूपाऽपि भवति । भोजमतेनेयं यथा पुरुषादिषु तथैव पश्वादिष्वपि दृश्यते । स वैय्याकरणदार्शनिकस्य भर्तृहरेरुक्त-मेवोल्लिलेख ।

[२७] नागेशस्य सम्मतिः

वाक्यार्थश्च - प्रतिभामात्रविषयः । प्रतिभा च -जन्मान्तरसंस्कारजाऽपि ।

यथा मधौ पिकस्य पञ्चमस्वरविरावो जन्मान्तरसंस्कारजः । अत एव शशश्रृङ्गमस्ति इत्यादितोऽपि सः । प्रतिभाविषयत्वाच्च ' प्रतिभा वाक्यार्थः' इति व्यवहार इत्यलम् । वाक्यस्य त्रिषु लक्षणेषु प्रतिभा एव वाक्यार्थः, कोऽयं वाक्यार्थ इत्यत्र नागेशस्य स्पष्टमुत्तरं वर्तते यद्वाक्यस्यार्थः प्रतिभामात्रविषयस्तस्मात्तत्र प्रतिभाशब्दव्यवहारः । एतट्टीकायां- जन्मान्तरसंस्कारजन्यप्रतिभाविषयो वाक्यार्थः । प्रतिभा च - अन्तःकरणवृत्तिविशेषरूपा वर्तते । एवं देवदत्तादिभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छिन्नैव ग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थमतिः व्यतिरिक्तैव जायते ताञ्च वाक्यार्थः वैय्याकरणा आहुरिति हरिणोक्तमत्र व्याख्यातम् ।

क्रियावाक्यार्थः-

क्रियास्वरूपम्- का चेयं क्रिया ? यामाश्रित्य क्रिया वाक्यार्थ इत्युच्यते। यद्यप्यत्यन्तमपरिदृष्टाया क्रियाया निरूपणमन्यापेक्षया दुष्करमिति ततोऽपि सा प्रतिपाद्यते प्रत्याख्यातं प्रतीतिविषयतामवतरति। सामान्यतो वक्तुमुद्यते [२५] यद्येन विकारिणा शब्देन कस्यचिद्विषये किञ्चिदुच्यते, विधीयते वा सा क्रियाभि- धीयते।यत्र मूलशब्दे विकारमात्रेण क्रिया सम्पद्यते सा धातुशब्देनोच्यते । सकर्मका अकर्मकाश्च धातवो भवन्तीति सर्वसिद्धम् । साकाङ्क्षा क्रिया यत्र स धातुः सकर्मकः -

क्रियापदं कर्तृपदेन युक्तं साकाङ्क्षतां नैव जहाति यत्र ।
सकर्मकं तु सुधियो वदन्ति शेषस्ततो धातुरकर्मकः स्यात्।।

सामान्यतया यत्र क्रियायां किमिति प्रश्न उपस्थाप्यते, तदुत्तरं च कर्तृवाच्ये द्वितीयया, कर्मवाच्ये प्रथमया चोपादीयते, स सकर्मकः कथ्यते।

तद्यथा- '' शिष्यः पठति, शिष्यः किं पठतीति पठ् धातुः सकर्मको भवति । पठ् धातुनात्र व्यापारः सूच्यते । या क्रिया कर्मकारकमतिरिक्तं न कुत्रापि संघटते सा साकाङ्क्षा क्रियोच्यते ।

येन च धातुना व्यापारस्तु सूच्यते परं तत्र प्रश्नावसरो न स्यात् तद्धातुवाच्या निराकाङ्क्षा क्रिया भवति। धातुनोक्तो व्यापारस्य च फलं यदा कर्तृमात्रे सन्तिष्ठते तदाकर्मको धातुरुच्यतेऽसौ ।

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ।।
यथा रामः शेते नात्रान्यप्रश्नस्य सम्भावना दृश्यते ।
पुनरकर्मकास्ते - **लज्जासत्ता स्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।**
शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ।।

एवम्प्रकारकार्थवाचका अकर्मकाः धातवो भवन्तीति केचन आचार्या आहुः। एवं सकर्मकानामपि द्वैविध्यं दृश्यते । यत्र केवलमेकं कर्म स एककर्मकः धातुः, द्विकर्मधातुषु अपादानादिकारकाणां विवक्षा न भवति, केवलेन कर्मणा निर्वाहो भवति । ते धातवोऽपि परिगण्यन्ते -

दुह्-याच्-पच्-दण्ड-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथा-मुषां।
नीह्रोश्च कृषि-वहोः विज्ञेया वै द्विकर्मता ।। इति ।

धातूनामेकोऽपरो विभागोऽपि परस्मैपदी-आत्मनेपदी- उभयपदीति भेदेन कल्पितोऽस्ति । क्रियाफलस्याकर्तृगामित्वे परस्मैपदी धातुः, यथा गुरुः शिष्यं वेदं पाठयति'' इति । यत्र च कर्तृगामित्वं क्रियाफलस्य तत्रात्मनेपदत्वम्, यथा रामः मधुरं फलं भुङ्क्ते । क्रियाफलस्योभयगामित्वे- उभयपदी धातुः यथा कौण्डिन्यः स्वर्गकामः सन् अग्निहोत्रं यजते इति, कौण्डिन्यः यजमानायाग्निहोत्रं यजतीति च । इमे धातवस्तत्र दशगणेषु विभक्तास्सन्ति। एवं दश विकरणान्यपि प्रकल्पितानि दृश्यन्ते- यथा-शप्-लुक्-श्लु-श्यन्-श्नु-श्न-श्नम्-उ- णिच्-इति । पुनश्च प्रकृत्या धातवः सेट् अनिट् वेट् चेति विकल्पेन विभज्यन्ते । मुख्यतः लुट्लृटोः लकारयोः इट् भवति स सेट् धातुः, यत्र नेट् तदनिट, यत्रेट विकल्पेन तद्वेट् इति कथ्यते । अनिट्धातवो यथा-

ऊद्-ॠदन्तैर्यौति- रु-क्ष्णु-शी-स्नु-नु क्षु-श्वि-डीङ्- श्रीभिः।
वृङ्व्यञभ्यां च विनैकाचोऽजन्तेष्वनिट ईरिताः । इति ।

धातुः सिद्धः, धातुः साधितश्चेति । भवति, पठतीति मूलधातुप्रयुज्या सिद्धः धातुः । पाठयति, भावयतीति साधितः धातुः स च धातौ प्रत्ययद्वारा किमपि वैशिष्ट्यमानयति। साधितोयं णिजन्त- सन्नन्त यङन्तयङ्लुगन्तेत्यादिभिः चतुर्धा विभज्यते । यथोदाहरणानि भवति इत्यस्य भाव्यति, बुभूषयति, बोभूयते, बोभवीतीत्यादीनि ।

एवं पुनरपि 'आत्मानं राजानं इच्छति' राजीयति, पुत्रीयति नामधातुरपि इच्छार्थे भवति । तस्मान्नामभ्योऽपि धातवो निर्मीयन्ते ताः क्रियाः नामधातुनाऽभि धीयन्ते ।

'भूवादयो [२९] धातवः' इति सूत्रे भाष्ये 'क्रियावचनो धातुः' अत एव धात्वर्थत्वं क्रियात्वमिति तान्त्रिकाणामुद्घोषः सङ्गच्छते । का पुनः क्रिया? ईहा । सा च मानसव्यापारभूतेच्छारूपा ईहा । 'इच्छाकाङ्क्षा स्पृहेहा तृट्' इति कोशात् ' समानमहिम्नाम्' ईह चेष्टायाम् इत्यर्थनिर्देशाच्चेति भावः । तत्र [३०] कैय्यटः- यावद् द्रव्यव्यतिरेकेण क्रियासद्भावे प्रमाणं नोक्तम्, तावत् पर्यायोपादानमात्रेण तस्याः स्वरूपं न निश्चीयत इत्यर्थः । उद्योते - कारकं न क्रिया, तस्यां कारकान्वयापत्तेः, कारकाणां मिथः सम्बन्धायोगात् । तस्माद् द्रव्यातिरिक्तक्रियासिद्धे सर्वथेत्युपहासः, कारकातिरिक्तक्रियाप्रत्यक्षेण नोपलभ्यते इत्येवं परो वाच्यः । का पुनरीहा ? चेष्टा । का पुनश्चेष्टा ? व्यापारः। तदनन्तरं सर्वथा भवान् शब्दैरेव शब्दानाचष्टे, न किञ्चिदर्थजातं निर्दिशति एवं जातीयका क्रियेति - [३१] क्रिया नामेयमत्यन्ता परिदृष्टाऽशक्या पिण्डीभूता निदर्शयितुम्, यथा गर्भो निर्लुठितः, सा अनुमानगम्या इति । द्रव्यस्थले अवयवप्रत्यक्षत्वं, क्रियायाः अवयवस्यापि न प्रत्यक्षत्वम्।

उद्योते क्रियायाः योगिप्रत्यक्षविषयता प्रतिपादिता, नेयं घटवत्प्रत्यक्षरूपेण लोकेऽनुभूयते । यथा - लोके घटपटावयवदर्शनेन तत्तत्प्रत्यक्षव्यवहारो भवति। नेदं ज्ञानं क्रियाज्ञाने भवति । तथोक्तम्- इदं च योगिप्रत्यक्षविषयं तेषामेवावयवक्रियाप्रत्यक्षत्वात् । अस्माकं तद्व्यवहारपरम्परया सर्वथा विकल्पात्मक एव प्रयोगः क्रियापदानामिति बोध्यम् एतच्च 'वर्तमाने [३२] 'लट्' इति सूत्रे ध्वनितम्। तत्रैव पुनः कारकाणां प्रवृत्तिविशेषः क्रिया इति लक्षणं कृतमस्ति । सामान्यभूता क्रिया वर्तते इत्यादिनापि सकलकारकानुयायिनी क्रिया भवति ।

तथा च वाक्यपदीये -

[३३] गुणभूतैरवयवैः समूहक्रमजन्मनाम् ।
बुद्धया प्रकल्पिताभेदः क्रियेति व्यपदिष्यते ।।

फलानुकूलो व्यापारसमूह एव क्रिया । यथा परमाणवः पिण्डीभूता उपलभ्यन्ते न केवलाः एवं पिण्डीभावात् क्रिया न प्रत्यक्षेति ।

क्रियानुमेया भवतीत्युक्तम् - सा [३४]सानुमानगम्येति भाष्यम् । किं तदनुमानम् ? इह सर्वेषु साधनेषु संनिहितेषु कदाचित्पचतीत्येतद् भवति कदाचिन्न भवति । यस्मिन्संनिहिते पचतीत्येतद्भवति सा नूनं क्रिया अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया । तत्र प्रदीपे- देशान्तरप्राप्तिलक्षणेन कार्येणाबाधितेन क्रियाख्यं कारणमनुमीयत इत्यर्थः ।

यद्वा अधिश्रयणादितत्तदाश्रयविशिष्टः क्रियारूपः क्रियायाः विशेष्यस्य चैकत्वाद् अक्रमत्वेऽपि आश्रयीभूतविशेषणक्रमात्क्रमोपचारः । परे तु अधिश्रयणादिरपि नैकक्षणात्मकस्तस्यापि हस्तप्रसारणपात्रदानचुल्ली- संयोजनादयोऽवयवाः सन्त्येवेति सोऽपि समूहरूप एव । यस्तु तेषामप्यवयवः परमाणुप्रख्यः, स तु शब्दशक्तिस्वाभावान्नैव वाच्यो नापि प्रत्यक्षः । अनुमानं त्वेवम् - उत्तरदेशसंयोगादिफलं कारणजन्यं कार्यत्वादिति । तच्च कारणं प्रसिद्धातिरेक इतरबोधबलात् क्रियारूपमेव सिध्यतीति भाष्यतात्पर्यमाहुः।

वाक्यपदीये [३५]क्रियाऽऽख्यातेऽभिधीयते तत्राख्याते न हि तिङभिहितेन भावेन कालपुरुषोपग्रहा व्यज्यन्ते इति [३६]सार्वधातुके यक् सूत्रम् । एवं [४]प्रशंसायां रूपम् सूत्रे भाष्यप्रदीपे - किं करोति - कां क्रियां निर्वर्त्तयतीत्यर्थः। तत्राख्यातवतिप्रश्न वाक्ये प्रकारणादिवशात् क्रियाप्रश्नावगमादख्याते- नैवोत्तरोपादानोत्कालसंख्या साधनोपग्रहाभिधानेऽप्याख्यातस्य क्रियाप्रधानत्वागम इति । तत्रैव भाष्ये क्रिया प्रधानमाख्यातं भवति, एका च क्रिया । आख्यातशब्दात् क्रियाभेदस्यानवगमात् । क्रियाया एकत्वमुच्यते भवद्भिरास्यते इत्यादौ केवलक्रियावचने द्विवचनबहुवचनदर्शनादिति कैय्यटः ।

[३७]सार्वधातुके यक् इत्यादि सूत्रे' चिण् भावकर्मणोः' इत्यतो भावकर्म्मणोः पदस्यानुवर्तनं क्रियते । स्थीयते चैत्रेण 'पच्यते तण्डुलस्तेन लः कर्मणीति' सूत्रेण लकारः । एवञ्चैकवचनमत्र भावे विहितम् । कर्म्मणि तु त्रीण्येव वचनानि दृश्यन्ते । यथा पच्येते ओदनौ, पच्यन्ते ओदना इति। परन्तु भावे तु एकवचनमेव तन्त्रं यथा - आस्यते भवता, आस्यते भवद्भ्याम्, आस्यते भवद्भिरिति ।

क्रिया साध्यरूपत्वान्निवृत्तभेदा धातुना प्रत्याख्यायते । तदुक्तं हरिणा-

[४०] निवृत्तत्तभेदा सर्वैव क्रियाऽऽख्यातेऽभिधीयते ।
श्रुतेरशक्यभेदानां प्रविभागप्रकल्पनम् ।।

यथा कारकभेदात्कर्तृकर्माभिधायिनि लकारे द्विवचनबहुवचने भवतस्तथा भावाख्यातेऽपि स्याताम् । यद्यप्यं पक्षस्तदा पाकः पाकौ इत्यादौ द्विवचनं न भवतीति प्रश्नः ? तत्रोच्यते शक्तिशक्तिमतोश्च शब्देन भेदो न प्रतिपाद्यत

इति । शक्तिः कारकमिति पूर्वंस्थितम् । तस्मात्कर्मानेकम् तत्र द्विवचनादीनि भवन्तु नाम परं भाव एक एव तत्र न भवन्ति बहुवचनादीनीति। पाकः पाकौ तु पाकविशेषानभिसमीक्ष्य प्रयुज्यते यश्चोदनस्य पाकः, यश्च गुडस्य पाकः, यश्च तिलानां पाकः, तत्र गुडतिलौदनाद्याश्रयभेदात्तदाश्रितपाकभेदः। एवमेव बहवस्ते शब्दा सरूपा भवन्ति । तत्र बहुवचनमेकशेषश्च युक्ता एव ।

भावेऽपि बहुवचनं श्रूयते । तद्यथा 'उष्ट्रिका आस्यन्ते हतशायिकाः शय्यन्ते' इति तत्र उष्ट्रिकादि भेदाश्रयभेदानेकप्रकारयुक्तान्यासनादीनि भिन्नानि 'उष्ट्रिकाणां हि स्वत एव विलक्षणाण्यासनानि, एवं हताश्च नानाप्रकारं शेरते। उत्तानोत्तानावकीर्णकेशविवस्त्राश्च । तथा च यादृशान्युष्ट्राणामासनानि हतानां च शयनानि तादृशानि देवदत्तादिभिः क्रियन्त इत्यर्थः । यथा 'ताम्रःपलाशेषु बभूव रागः' इत्यादौ न सर्वत्राश्रयभेदादाश्रितभेदस्य प्रतीतिः तद्वत् भवद्भिरास्यते इत्यत्र प्रयोजनाभावाद् भावभेदः सन्नपि न विवक्षते। परन्तु घटान् पचतीत्यादौ त्वभिन्न एव पाकस्यावगमः ।

कैश्चिदत्र कर्मण्ययं लकारो विधीयते यतो हि उष्ट्रिका लक्षणस्य भावे कर्म, यथा गोदोहस्सूयते सुप्यते वा इतिवत् ।

क्रिया वाक्यार्थः-

येषां 'आख्यातशब्दो वाक्यमि' त्यवधारणा तेषां नये क्रिया वाक्यार्थ इत्युच्यते । वाक्यकारीयलक्षणे यदाख्यातपदं तत्तु क्रियापदमेवास्ति । वाक्यस्य हृदयं क्रियैव भवति, अत एव हरिणा क्रियापक्षोऽयं वाक्यमधिकृत्य निरूपितोऽस्ति । तत्र हरिराह क्रियावाक्यार्थमाश्रित्य-

"क्रिया क्रियान्तराद् भिन्ना नियताधारसाधना ।
प्राक्रान्ता प्रतिपत्तॄणां भेदाः सम्बोधहेतवः ।।

इत्यत्र क्रिया क्रियान्तराद् भिन्नैव निर्दिष्टा, सा च नियताधारसाधना भवति। अपि तु प्रत्येका क्रिया नियताधारसाधना कथ्यते । प्रथमतो वाक्ये क्रियैव गृह्यते । पुण्यराजस्तु तां विशिष्टां क्रियां प्रतिपादयति । वाक्ये विशेषणादीनां प्रयोगोऽपि क्रियाया वास्तविकं रूपं बोधयतीति कथितम् । तस्माद्वाक्ये क्रियैव वाक्यार्थत्वेन गृह्यत इति भावः ।

[४२]सदित्येव तु यद्वाक्यं तदभूदस्ति नेति वा ।
क्रियाभिधानसम्बन्धमन्तरेण न मन्यते ।।
आख्यातपदवाच्येऽर्थे साधनोपनिबन्धने ।
विना सत्त्वाभिधानेन नाकाङ्क्षा विनिवर्तते ।।
प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते ।
साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजकम् ।।

तदभूत्, अस्ति, नास्तीति विधिनिषेधवाक्यानि भवन्ति । सर्वेषां वाक्यानां सम्बोधस्तु क्रियां विनां कदापि भवितुं न शक्यत इति मन्यते। क्रिया रहितं न वाक्यमिति सुस्थितम् । क्रियां विना आकाङ्क्षापि न विवर्तते। वाक्ये क्रियाया एव प्रविभागः प्रथमतः क्रियते, पश्चात्कारकादीनामिति।

क्रियासिद्धये साधनानामुपयोगः, साधानान्यङ्गानि भवन्ति, तान्यप्रधानानि । क्रिया एव प्रधाना भवति ।

पुण्यराजव्याख्याने क्रियावाक्यार्थमाश्रित्यैका कारिका लभ्यते । मूलतोऽस्याः कुत्र निर्गम इति न जानीमः । अम्बाकर्त्र्यामप्युक्तं - कारिकान्वेषणीयेयमिति। सा च-

[४३]प्रतिभा यत्प्रभूतार्था यामनुष्ठानमाश्रितम् ।
फलं प्रसूयेत यतः सा क्रिया वाक्यगोचर : ।।

तत्र प्रतिभा यत्प्रभूतार्था, यामनुष्ठानमाश्रितम् फलप्रसूयेत यतः 'सा क्रिया वाक्यगोचरे वाक्यार्थ' इति । क्रियाया त्रीणि विशेषणान्यत्र दीयन्ते।नियताधा- रनियत- साधनया क्रियया यो ह्यखण्डार्थः प्रसूयते सा 'यत्प्रभूतार्था क्रिया' प्रतिभाविषियेऽपि या तादृशीव भवति सेति। नियतां तामाश्रित्य लोकाः प्रवर्तन्ते। सर्वेषां क्रियायामेव प्रवृत्तिर्दृश्यते, तदनुष्ठानमिति। यतःफलं प्रसूयेत तादृशी क्रिया वाक्यार्थत्वेन गृह्यत इति निष्कर्षः ।

[४४]क्रियावाक्यार्थवादः :-

षट्सु वाक्यार्थेषु क्रियावाक्यार्थवादिनां मतेऽयं वादः प्रसिद्धोऽस्ति। ये आख्यातशब्दो वाक्यमित्याम्नन्ति तेषामेव मते क्रिया वाक्यार्थो भवति। अस्य वादस्य द्वौ भेदावपि दृश्येते, प्रथमः- फलवाक्यार्थवादः, द्वितीयः- कर्मवाक्यार्थवाद इति । क्रियामन्तरा न कस्यचिद्वस्तुनः सत्तामात्रमभिलक्ष्यते, तदनुषङ्गेणैव पदार्थप्रतीतिर्भवति । तदुक्तम् -

[४५]क्रिया क्रियान्तरादिभन्ना नियताधारसाधना ।
प्रक्रान्ता प्रतिपत्तॄणां भेदाः सम्बोध हेतवः ।।

क्रिया वाक्यार्थस्वीकारे एका क्रिया द्वितीया क्रियातो भिन्नापि तु सा विशिष्टैव क्रियेति । क्रिययैव साधनानि प्रतिनियतानि भवन्ति । एतस्मात् क्रियाया वैशिष्ट्यं भवति, वाक्यगतविशेषणानि क्रिययैवोद्धबुद्धयन्त इति ।

फलवाक्यार्थे क्रियायाः प्रयोजनं फलमुच्यते तत्र क्रिया फलस्याङ्गीभूता भवति, एतस्मात्फलं वाक्यार्थ उच्यते । यथा-

[४६]प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते ।
साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजनम् ।।
कर्मवाक्यार्थवादस्तु-
पचि क्रिया करोमीति कर्मत्वेनाभिधीयते ।
पक्तिः करणरूपं तु साध्यत्वेन प्रतीयते ।।

यत्र क्रिया कर्मत्वेन व्यवतिष्ठते, तत्रायं वादः प्रवर्तते । क्रिया तु सर्वत्र मुख्यत्वेनैव प्रतिपादिता । क्रियामन्तरा कर्मणः फलस्य च सत्तैव नास्ति, तस्मात्क्रियावाक्यार्थवाद एवोचितः । प्रतिभा वाक्यर्थोऽपि क्रियाश्रित एवास्ति तत्र पुण्यराजस्त्वाह-

[४६]प्रतिभा यत्प्रभूतार्था यामनुष्ठानमाश्रितम् ।
फलं प्रसूयेत यतः सा क्रिया वाक्यगोचरः ।।

संसर्गो वाक्यार्थः-

येषां मते 'पदसंघातजं वाक्यम्' तत्र संसर्गो वाक्यार्थत्वेन प्रसिद्धः। क्रमो वाक्यमिति वादिनां मतेऽपि संसर्ग एव वाक्यार्थो भवति । अस्मिन्पक्षे भाष्योक्तं [४७] यत्राधिक्यं वाक्यार्थः स इति बीजमस्ति । संसर्गः- सम्बन्धः, स च 'अर्थवद- धातुरप्रत्ययः [४८] प्रातिपदिकम्' इत्यादावुक्तं यद्विशेषेऽवस्थानं स वाक्यार्थः । तद्यथैकेनोदाहरणेन स्पष्टयति देवदत्त गामभ्याज शुक्लां दण्डेन इह देव इत्युक्ते कर्त्ता निर्दिष्टः, कर्मक्रियागुणौ चानिर्दिष्टौ । गामित्युक्ते कर्म निर्दिष्टम् कर्त्ताक्रियागुणौ चानिर्दिष्टौ।

अभ्याजेत्युक्ते क्रिया चानिर्दिष्टा: इहेदानीं देवदत्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टम् देवदत्त एव कर्त्ता नान्य: । गामित्येव कर्म नान्यत्। अभ्याज इत्येव क्रिया नान्या । शुक्लामेव नान्यां कृष्णामिति । एषां पदानां सामान्ये वर्तमानाना यद्विशेषेऽवस्थानं स वाक्यार्थ इति । संसर्गो वाक्यार्थ इत्यस्मिन् विषये भर्तृहरिराह-

[५०] केवलेन पदेनार्थो यावानेवाभिधीयते ।
वाक्यस्थं तावतोऽर्थस्य तदाहुरभिधायकम् ।।
सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजायते ।
वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ।।

एतत्सूचयति यत्केवलेन पदेन यावानार्थोऽभिधीयते, तावानर्थो वाक्यस्थ एवेति सूचयति । पदसमुदाये वाक्ये वा परस्परसमन्वये योऽधिकोऽर्थ: निष्पद्यते स संसर्ग इत्युच्यते । अनेकपदसंश्रयेण संघातो वाक्यं, तदेव वाक्यार्थ इति दर्शितम ।[५१] पुण्यराजोऽप्येदमेव कथयति केवलं पदं यस्यैवार्थस्य वाचकम्, वाक्यस्थमपि तमेवाभिदधाति । निष्कर्षत:- पदानां परस्परान्वये सति पदार्थयो: प्रतीतिवशाद् यदाधिक्यं संसर्गात्मकं प्रतीयते स वाक्यार्थ इति ।

[५२] **प्रथमकारिकार्थ:** भावोऽयम्- यदिह लोके केवलो वृक्षशब्दो यावन्तं जातिमात्रं भिन्नमर्थं ब्रवीति तावन्तमेव वृक्षोऽस्ति, नास्ति, वृक्षच्छिन्न इत्येवमादिष्वपि वाक्येषु पदान्तरेण सह प्राप्तयोग: सन् स प्रत्यायति।

द्वितीयकारिकार्थ: -[५३] वीर: पुरुष: इत्यादौ विशेष्यविशेषणत्वात् सामाना- धिकरण्यं जातिगुणविशेषयोरेकार्थसमवायप्रतिपत्तिपूर्वकमर्थेष्वाधिक्यं दृश्यते - वाक्यार्थ एवासाविति भर्तृहरि: । एतस्मात्संसर्गो वाक्यार्थ:, न तु पदार्थो वाक्यार्थ इति प्रस्फुटतरं भवति । पदार्थलक्षणं व्याकरणे यस्यार्थस्य ज्ञानरूपो व्यापार: पदस्य संस्कारे निमित्तत्वेनाश्रीयते स पदार्थ:, परन्तु संसर्गस्य ज्ञानरूपो व्यापार एव न भवति, तस्मात्संसर्ग न पदार्थ: स च वाक्यार्थ एवेति सुस्थितम् ।

केचन वाक्यार्थस्य जातिवत् प्रत्येकपरिसमाप्तिरिति वदन्ति । केषाञ्चिन्मते संख्यावत् समुदायपरिसमाप्तिरिति । तदाह-

[५४]स त्वनेकपदस्थोऽपि प्रतिभेदं समाप्यते ।
जातिवत्समुदायेऽपि संख्यावत्कल्प्यते परैः ।।

उपर्युक्तपक्षद्वयं तत्र दर्शितम्, परन्तु क्वचित्तृतीयः पक्षोऽपि कथ्यते स हि सामान्यविरोधी विशेषः पक्षः । वस्तुतः पक्षद्वयमेवात्र भवति। तृतीयपक्षस्तु अग्रिमकारिकायां द्रष्टुं शक्यते -

[५५]सर्व भेदानुगुण्यं तु सामान्यमपरे विदुः ।
तदर्थान्तरसंसर्गाद् भजते भेदरूपताम् ।।
भेदानाङ्कक्षतस्तस्य या परिप्लवमानता ।
अवच्छिनत्ति सम्बन्धस्तां विशेषे निवेशयन् ।।

पूर्वं पदानां वाक्ये तावानेवार्थो यावानेव केवलानाम्, संसर्गस्तु संघातवाच्यः । इह तु तथाभूत एव सामान्यरूपः पदस्यार्थो यस्तत्तद्विशेष-सन्निधौ तत्तद्विशेषविश्रान्त इति । एवं संसर्गवादे द्वौ त्रयो वा पक्षाः स्वीकर्तव्याः ।

एवं संघातपक्षेऽन्विताभिधानस्य स्वीकारे पदार्थो वाक्यार्थ इत्युपपद्यते। संसर्गस्तु न पदार्थातिरिक्त इति । स पदार्थस्तु सामान्यः जातिरूपः कथ्यते, स एव संसर्गात्मको भवति । सामान्यस्वरूपमेव वाक्यार्थः । तत्रैव समस्तभेदसमावेशः, तस्याकाङ्क्षायोग्यतासन्निधिकारणेन पदान्तरेण सह यः संसर्गः स एव वाक्यार्थः ।

[५६]कार्यानुमेयः सम्बन्धो रूपं तस्य न दृश्यते ।
असत्त्वभूतमत्यन्तमतस्तं प्रतिजानते ।।

हर्यनुसारं तस्य सम्बन्धस्य स्वरूपमवधारयितुं न शक्यते । स योग्यतावच्छेदककार्यप्रसवानुमेय एव नित्यम् । पदार्थस्य कस्यचिद्विशेषार्थे विश्रान्तिरेव सः । अनया विश्रान्त्या तस्य केन सह सम्बन्ध इत्यनुमीयते। 'इदं तत्' इति रूपेणेति । अत एव तदसत्त्वभूतं पदार्थातिरिक्तं न तस्य सत्त्वमिति आचार्याः निगदन्ति। विशेषसंसर्गविषयेऽपि हरिराह-

[५७] **यथाऽस्यावयवा वर्णा विना वाच्येन केनचित् ।**
अर्थवन्तः समुदिता वाक्यमप्येवमिष्यते ।।
अनर्थकान्युपायत्वात् पदार्थेनार्थवन्ति वा ।
क्रमेणोच्चारितान्याहुर्वाक्यार्थं भिन्नलक्षणम् ।।

तत्र पुण्यराजः- वर्णानां समुदायार्थवत्त्वे केवलानामनर्थकत्वं यथा तथा पदानां केवलानामर्थासम्भवात्तत्समुदाय एव वाक्यम् । इत्यत्र संघातः क्रम इत्युच्यते। अनेनापि संघातपक्ष एव उपसंहर्तुं प्रयतितमस्ति ।

पुनः पदानि केवलान्यनर्थकानि, केषाञ्चिन्मते स्वार्थेनार्थवन्ति क्रमेणोच्चारितानि वाक्यम् । तथाविधाद्वाक्याद्वाक्यार्थं भिन्नलक्षणं व्यतिरिक्तस्वरूपं संसर्गात्मकं

विशिष्टमेव वा संसर्गवशान्निराकांक्षविशेषावस्थितपदार्थस्वरूपमेव व्यतिरिक्तावगम्यत इति ।

निराकाङ्क्षपदार्थो वाक्यार्थः-

[५८] **कार्यानुमेयः सम्बन्धो रूपं तस्य न दृश्यते ।**
असत्त्वभूतमन्यन्तमतस्तं प्रतिजानते ।।

इत्यनेन विशेषविश्रान्तः पदानामेवार्थो वाक्यार्थ इति लक्ष्यते । कार्येण पदार्थानां विशेषविश्रान्तिलक्षणेनानुमीयत इति कार्यानुमेयः । इदं तदिति तु रूपं तस्य न दृश्यते। अत एवासत्त्वभूतं पदार्थव्यतिरेकेण सत्त्वं नास्ति, यस्य तमेवंभूतमाचार्याः प्रतिजानते ।

संघातपक्षे यः 'संसर्गो वाक्यार्थ' उक्तस्तस्यैवायमेकोऽपरः पक्षः प्रतिभाति । एतदुभयोरन्तरं यत्तस्मिन्पदानि साकाङ्क्षभूताति भवन्ति । अस्मिन् च पदानि निरकाङ्क्षजातानीति किञ्चित्करो भेदः । पुनरपि संसर्गपक्षे पदार्थो न वाक्यार्थः, अस्मिन् तु पदार्थो हि वाक्यार्थः। पदार्थश्चात्र विशेषविश्रान्तः, तस्य चासत्त्वभूतसम्बन्धोऽस्ति न तु संसर्गमूलक इति । न स प्रत्यक्षः, स तु अनुमेयोऽस्ति। न च स सम्बन्धोऽभिधेयमनतिक्रमति। एतदेवपुनर्व्यक्तीक्रियते-

[५९]नियतं साधने साध्यं क्रिया नियतसाधना ।
स सन्निधानमात्रेण नियमः सन् प्रकाशते ।।

यतः साध्यं साधनञ्च परस्परं नियते भवतः । केवलमाकाङ्क्षावशादितरपदार्थ- सन्निधाने सति नियमः सन्नेव प्रकाशत इत्याक्षिप्तपदान्तराणि पदान्येव वाक्यम् । पदार्थश्च वाक्यार्थ इत्यव्यतिरिक्तः संघातपक्षोऽयमिति ।

संसृष्टो वाक्यार्थः-

पदमाद्यं पृथक्सर्वं पदं साकाङ्क्षमित्यस्मिन् तु पक्षद्वये संसृष्ट एव प्रथमतरं प्रक्रम्यते वाक्यार्थः । यथा निरूपयति-

[६०]तेषां नु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते ।
व्यक्तोपव्यञ्जना सिद्धिरर्थस्य प्रतिपत्तृषु ।।

तथा -

[६१]पूर्वैरर्थैरनुगतो यथाऽर्थात्मा परः परः ।
संसर्ग एव प्रकान्तस्तथाद्येष्वर्थवस्तुषु ।।

एतेनान्विताभिधानसमाश्रयणेन संसृष्टं वाक्यार्थप्रदर्शनं क्रियते । पूर्वपूर्वार्थानुगतः संसर्गो वाक्यार्थस्त्वभिहितान्वयवादिनाम् तथाऽन्विताभिधानवादिनस्तत्तूत्तरोत्तरपदार्थावगतः प्रथमतरमेव संसृष्ट एव । कारिकाभावस्त्वत्रोच्यते अन्विताभिधानं पूर्वैरर्थैरनुगतः इति । किञ्चान्विताभिधानसमाश्रयणे कारिकेयं पूर्वपदार्थसंसृष्टपरपदार्थरूपवाक्यप्रदर्शनपरैवास्ति ।

पुनरपि संसृष्टो वाक्यार्थ इत्यत्र विशिष्टपदार्थ एव वाक्यार्थः। संसर्गपक्षे च पदार्थानां वैशिष्ट्यमेव वाक्यार्थ इति । विशिष्टं पदं पूर्वं स्वीयार्थेनानुगतं भवति ततः कुत्रचिद्युज्यति । संसृष्टं पदं सर्वदा सन्निधानेन स्वमर्थं [६२]बोधयति ।

पुण्यराजमतेऽस्यां कारिकायामन्विताभिधानमेव समर्थितमस्ति । अभिहितान्वयवादखण्डनेनैवान्विताभिधानपक्षः स्थाप्यते ।[६३]जयन्तोऽपि अन्विताभिधानपक्षं समर्थयन् अभिहितान्वयवादिनामाक्षेपान् निराचकार ।

अन्विताभिधानवादिनस्तु स्वीयमेव पक्षं ग्राह्यमित्याम्नन्ति । दर्शनदृशाऽपि पक्षोऽयं ततः श्रेष्ठतमोऽस्ति। पदमाद्यम् पृथक्सर्वमिति वाक्यवादिनां मते संसृष्ट एव वाक्यार्थो भवति । अस्मिन् पक्षे वाच्यार्थः पदार्थो वेति वाक्यार्थः । तत्रापि मतभेदः दृश्यते केचन संसृष्टार्थ एव वाक्यार्थ अपरे क्रिया वाक्यार्थो भवतीति [६४] प्रतिपादयन्ति ।

प्रयोजनं वाक्यार्थः-

तत्र गौतमसूत्रं-[६५] 'यमर्थमधिकृत्य पुरुषः प्रवर्तते तत्प्रयोजनमिति' । यं कञ्चिदर्थमभिलक्ष्योद्दिश्य वा कर्मणि प्रवर्तते स एव प्रयोजनमिति लक्ष्यते। जयन्तभट्टस्तु एतत्समर्थकोऽस्ति । यतो हि न्यायनये 'फलं वाक्यार्थ' इत्युच्यते न कश्चिदपि निष्फलं कर्म करोति। प्रयोजनमभिलक्ष्यैव प्राणिनः सर्वत्र प्रवर्तन्ते, यथा वेदस्यादेशं, गुरोराज्ञां, राजाऽऽज्ञां तदानीमेव धारयन्ति यदा तत्र फलं पश्यन्तीति भावः । फलं प्रयोजनस्य पर्यायशब्दः । एवं मीमांसासूत्रमपि दृश्यताम्- कर्माण्यपि जैमिनिः फलार्थत्वादिति, मीमांसकेष्वपि फलं वाक्यार्थः प्रसिद्धः । पुनश्च फलापेक्षया पुरुषः केवलं कर्म करोति, फलं च पुरुषार्थत्वात् । पुरुषश्च कर्माश्रयत्वादित्युक्तमस्ति । तत्र कः मुख्यः कश्च गौणभूत इति निश्चेतुं न शक्यते । तस्मात् प्रयोजनमेव वाक्यार्थ इति [६६] ब्रुवन्ति ।

हरिग्रन्थे - अभिधेयः पदस्यार्थाः वाक्यस्यार्थ प्रयोजनम् इत्यादिना प्रयोजनं वाक्यार्थत्वेन प्रदर्शितम् । तत्केषाञ्चिन्मते सर्वलक्षणसाधारणमिति न प्रयोजनवाक्यार्थो वाक्यलक्षणेषु विभज्य इति [६७] पुण्यराजः । येषां मते पदस्यार्थः अभिधेयः, वाक्यस्यार्थो प्रयोजनं तत्र प्रयोजनं वाक्यार्थ इति प्रथते । परं तत्रैव कारिकायामयं पक्षः कारिकाद्वितीयभागेन दूषयितुमाह भर्तृहरिः-

[६८] अभिधेयः पदस्यार्थः वाक्यस्यार्थः प्रयोजनम् ।
यस्य तस्य न सम्बन्धो वाक्यानामुपपद्यते ।।

यैः पदस्य- अर्थः, पदस्य अभिधेयमुच्यते । वाक्यार्थश्च न वाक्या भिधेयमपि तद्वाक्यप्रयोजनमिति कथ्यते । एवं कथिते सति तन्मते वाक्यानां परस्परं सम्बन्धो नोपपद्यते, परन्तु वाक्यानां परस्परं सम्बन्धस्तु सर्वसम्मतोऽस्ति।

[६९]यदुक्तं तन्त्रवार्तिके तदत्र संगच्छते -

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ।।

एतेनापि वाक्यानां पदानाम्वा सम्बन्धोऽभिधेयपरको भवतीत्युच्यते। अभिधेयं विना वाक्यान्यसम्बद्धानि भवेयुरिति । प्रयोजनेनोद्देश्येन वोच्चरितं वाक्यं न पदार्थान्कथयति, तज्ज्ञानं तु वाक्यादेव सम्भवमिति । पुनरपि दृष्टान्तेनोपस्थापयति कीलायः शलाका कल्पानां वाक्यानां कीदृशो सम्बन्ध इत्युदिते तेषामभिधेयद्वारकः परस्परं सम्बन्धो भवतीति हरेरपि सम्मतिः।

पुनरन्विताभिधानवादपक्षेणेदं समर्थितं तदाह-

[७०]तत्र क्रिया पदान्येव व्यपेक्षन्ते परस्परम् ।
क्रिया पदानुषक्तस्तु सम्बन्धोऽतः प्रतीयते ।।
आवृत्तिरनुवादो वा पदार्थव्यक्तिकल्पने ।
प्रत्येकं तु समाप्तोऽर्थः सहभूतेषु वर्तते ।।

क्रियावाचकेषु पदेषु साधनानि व्यपेक्षयाक्षिप्यन्ते । यथा द्वारमित्युक्ते पिधेहि क्रियापदमाक्षिप्तं भवति । क्रियावाचकानि पदानि सापेक्षाणि भवन्ति, न साधनानीति । तस्मादन्विताभिधानसमाश्रयणेन वाक्यानां परस्परं सम्बन्धो भवितुमर्हति । नापीदं युक्तमन्विताभिधानमिति । तत्र समाधान-त्रयपुरस्सरं तद् व्याख्याते अन्विताभिधानपक्षे एकस्मादेव पदाद् अवगतानामप्यर्थानामवृत्तिरितरसाधननिषेधरूपनियमाय भविष्यतीत्येकं समाधानम् ।

२-वा- अथवा पदार्थव्यक्तिकल्पने पदार्थस्य इतरसाधनव्यावृत्त्याभिप्रेतस्य साधनस्य या व्यक्तिः- असन्दिग्धा स्फुटा प्रतीतिस्तस्याः कल्पने फले संपाद्येऽवगतार्थस्यानुवाद इति द्वितीयं समाधानम् । ३- सह भूतेषु असौ प्रत्येकं समाप्तोऽर्थ इत्युच्यते तृतीयं समाधानमिति। एवमन्विताभिधाने नास्ति कश्चिद्दोष इति वदन्ति । न प्रयोजनं वाक्यार्थ इति यतो हि कैश्चित्प्रयोजनं सर्वत्र वाक्यार्थेषु भवतीति कृत्वा न तस्य पृथक् वाक्यार्थत्वमङ्गीक्रियते। परमन्यैः प्रयोजनं पृथक् वाक्यार्थत्वेन स्वीक्रियते इति पुण्यराजः ।

स्थितलक्षणो वाक्यार्थः-

वाक्यार्थश्च स्थितलक्षणः निरंशः कारकोत्कलितशरीरक्रिया स्वाभावत इति हेलाराजः । भाष्येऽपि सरूपसूत्रे [७०] षष्ठी शेषे सूत्रे च वाक्यार्थस्य स्थितलक्षणत्वं कथितमस्ति । केषाञ्चिन्मते स्थितलक्षणः पदार्थो भवति। एतद्वक्तुं शक्यते यद्वाक्यवादिनां मते स्थितलक्षणो वाक्यार्थः, पदार्थवादिनाम्मते स्थितलक्षणः पदार्थ इति । प्रकृतिप्रत्ययोरर्थाः पदार्थेष्वन्तर्भवन्ति, पदार्थस्तु न तथा तस्मात् पदार्थ एव स्थितलक्षण इत्युच्यते। परन्तु पदार्थास्तु असत्योपाधियुता वर्तन्ते, ते तु वाक्यार्थे अर्थप्रत्यये उपायभूतास्सन्ति, पदार्थानां वाक्यार्थे तिरोभावस्तु वाक्यवादिनां मते भवति, तस्मात् वाक्यर्थ एव स्थितलक्षण इति वक्तुमुचितम् ।

हेलाराजस्तु हरिमतमभिलक्ष्यैव वाक्यार्थं स्थितलक्षणमित्युवाच । तत्र तादृशो वाक्यार्थः निरंशः क्रियास्वभावसंबलितः कारकशरीरात्मवान् वर्तते।

[७२] भाष्यकार- संग्रहकार- वृषभादीनां मते स्थितलक्षणस्योभयगतिरिति। तत्र न हि किञ्चित्पदं इति संग्रहकारोक्तं प्रामाण्यमिति । विशेषतः प्रतिभोपसंहारकालेऽर्थ- ज्ञानोदयकाले वाऽभिन्नैकाकारप्रतिभया वाक्यार्थः स्थितलक्षण इति [७३] सिद्धयति ।

पुनरपि हेलाराजमतेन स्थितलक्षणो न अपोद्धारपदार्थः, यतो हि स्थितलक्षणायां प्रक्रियाभेदेन न भेदो भवति, परमपोद्धारपदार्थे तु भेदो भवत्येवायमेवैतयोर्भेद इति ।

कुमारिलभट्टस्य मतम्-

वाक्याधिकरणे त्रिषु विकल्पेष्वपि वाक्यार्थः नाङ्गीक्रियते । तत्र [७४] किं वाक्ये प्रतिवर्णं वाक्यार्थधर्मस्य वाचकत्वमस्ति, किं वाक्ये विशेषवर्णसममूहात्मकमैकं पदे वाक्यार्थस्य प्रमापकमस्ति, किं पदसमूहात्मकं सकलं वाक्यमेव वाक्यार्थस्य ज्ञापकमस्ति ?

नात्रैकस्यापि पक्षस्य कृते वाक्यवाक्यार्थयोः कार्यकारणभावः निष्पद्यते। यतो हि पदार्थैः सह वाक्यार्थस्य सम्बन्ध एव नोत्पद्यते। एतदर्थं- अर्थस्यानिमित्तत्वाद्वाक्यावगतिरवश्यं करणीयेति । तत्र वार्तिकम् -

[७५] अत्राभिधीयते यद्यप्यस्ति मूलान्तरं न नः ।
पदार्थानां तु मूलत्वं दृष्टं तद्भावभावतः ।।

इत्यादिना वार्तिकपूर्वार्द्धेन पूर्वपक्षः वार्तिकोत्तरार्द्धेनोत्तरपक्षः सिद्धान्तपक्षो वा निरूपितः । यद्यपि प्रत्येकं पदं स्वतन्त्रं सम्बद्धमपि न वाक्यार्थस्य कारणम्, एवं पदसमुदाये जातिः पदार्थपदादीनां सम्बन्धज्ञानमपि न वाक्यार्थोत्पादकं सन्निधि आकांक्षा मन्यते तथापि पदानि ज्ञातपदार्थानि प्रत्यासत्तिरपेक्षा योग्यताप्रत्यासत्त्यादीनां साहाय्यं लभते तदा तैरेव पदैः वाक्यार्थज्ञानोत्पत्तिरवश्यमुत्पद्यते । तत्र पदैरुपस्थापितपदार्थेभ्य एव वाक्यार्थबोधो जायत इति सिद्धान्तः मीमांसाकानाम् । कुमारिलो वाक्यार्थस्य पृथग्स्तित्वमपि निराकरोति यथा-

७६ वाक्यवाक्यार्थयोर्नापि वस्तुत्वमुपपद्यते ।
स्पष्टं पदतदर्थाभ्यामन्यानन्यानिरूपणात् ।।

प्रस्तुतवार्तिकेन वाक्यवाक्यार्थयोः पृथग्भूतमस्तित्वं खण्डितम् । यतो हि तस्य मतेन पदाद्वाक्यं भिन्नं, पदार्थद्वाक्यार्थो भिन्न इति पक्ष एवस्थिरो वर्तते । एवं पदानामर्थेभ्यो भिन्नः कश्चन वाक्यार्थो भवतीति न स्वीक्रियते-

७७ न तावदवगम्येते कैश्चित् त्वव्यतिरेकतः ।
यौगपद्यागृहीतेश्च समुदायौ न सिद्धयतः ।।

पदसमूहो वाक्यम्, पदार्थसमुदायो वाक्यार्थ इत्यत्र परस्परसम्बद्धपदसमूहो वाक्यम् भवति, पदानां पारस्परिकः सम्बन्ध एव वाक्यमिति । एतद्रीत्या पदार्थानां पारस्परिकोऽर्थ एव वाक्यार्थः, पदानां पारस्परिकः सम्बन्ध एव वाक्यार्थ इति समूहवादिनां मतम्-

७८ सम्बन्धपूर्वकत्वं च वाक्यवाक्यार्थयोः स्थितम् ।
स्वतन्त्रेषु हि वाक्यत्वं कदाचिन्नोपलक्ष्यते ।।

यथा पदेषु वर्णानां, वाक्येषु पदानां च बोधो भवति तथैव वाक्यार्थे पदार्थानां बोधो जायते । तस्माद्वाक्यार्थोऽपि खण्ड एव वक्तुं शक्यते-

७९ न चावयवशो बोधादैक्यं वाक्यतदर्थयोः ।
न चावयवबुद्धीनां भ्रान्तितत्वं बाधकाद् ऋते ।।

न हि वाक्यार्थस्य काचिदपि सत्ता वर्तते, एतद्विषयकं ज्ञानं स्वप्नज्ञानवन्मिथ्यैव सन्तिष्ठते ।वाक्यार्थज्ञानमप्रमाणं यतो हि विरोधि-प्रमाणानि तज्ज्ञानं बाधन्ते ।

[८०]तदभावेऽवबोधश्च जातोऽपि स्वप्नवन्मृषा ।
सतामेव विशेषाणां सन्निधेर्योऽपि मन्यते ।।
वाक्यार्थत्वमभिव्यक्तौ तस्यापि तदनेकता ।
प्राक्सत्त्वे कुतस्तेषां प्रमाणं प्रत्ययैर्विना ।।

आद्यं पदं वाक्यमित्यत्र संस्कारविशेषेण स्वरूपानुग्रहेण पदादुत्पन्नं संस्कारविशिष्टं यद् आद्यं पदं तदेव वाक्यमिति स्वीकारे कदाचिद्वाक्या-र्थबोधो भवितुं शक्यते ।

अन्योऽन्यानुग्रहाभावात् पदानां नास्ति वाक्यता ।
आद्यं यदि पदं सर्वैः संस्क्रियेत विशेषतः ।।
ततस्तदेव वाक्यं स्यादन्यश्च द्योतको गणः ।
एवमन्त्येषु सर्वेषु पृथग्भूतेष्ववस्थितम् ।।

इत्यत्र वाक्यलक्षणेषु अन्त्यपदं वाक्यमित्यपि मीमांसकानाम्मतम् यथा आद्यं पदं वाक्यं तद्वदिति वक्तव्यम् ।

प्रतिभावाक्यार्थ [८१]इत्यत्र कुमारिलस्य परोक्षतया सम्मतिः दृश्यते । अनेकाकारकप्रतिभासस्वरूपा प्रतिभा वाक्यस्य प्रयोजनमिति स्वीकारे प्रतिभा बाह्यविषयिणी भवति, आन्तरज्ञानविषयिणी न जायते यद्येवं स्यात्तदा प्रतिभा वाक्यार्थेऽस्माकं पक्षेऽपि न काचिद्विप्रतिपत्तिः दृश्यते । वैय्याकरणानां तु आन्तर- बाह्ययोरर्थः प्रतिभावाक्यार्थो भवति परन्तु मीमांसकैः बाह्योवासौ प्रतिभाविषयः नाङ्गीक्रियतेऽयमेव तत्र किञ्चित्करो विरोधोऽवलोक्यते । बाह्योऽर्थ एव पारमार्थिकोऽस्ति यतो हि बाह्योऽर्थः नियतस्वभावो भवति, परन्तु एकेनार्जुनचरितेन वीरेषु हर्षः, भीरूषु भयमुत्पदद्यते अत एव आन्तरोऽर्थ प्रतिभात्मको भवति न बाह्यः, तस्यानेकार्थेषु एकार्थनियतत्वात् । तद्यथा-

[८२]अर्थविज्ञानादिरूपात्तु फलतो विप्रयुज्यते ।
प्रतिभानेकधा पुंसा यद्यप्यर्थेषु जायते ।।
तथापि बाह्य एवार्थस्तस्य वाक्यस्य चेष्यते ।
वाक्यप्रयोजनत्वेन जन्यत्वेनाथ वा यदि ।।
उच्यते प्रतिभाप्यर्थो न नः किञ्चिद् विरुध्यते ।
शब्दाद्युत्थापितैर्ज्ञानैरात्मांशग्रहणाक्षमैः ।।
यद् बाह्यमाप्यते वस्तु स त्वर्थः पारमार्थिकः ।
प्रत्यक्षव्यतिरिक्तं तु विज्ञानमुपवर्णितम् ।।
त्रिकालविषयं यस्मादसन्निधिरदूषणम् ।
अनेकाकारता यापि शूरभीरूधियं प्रति ।।
वासनानुग्रहात् सोक्ता कुणपादिमतेरिव ।
भावनैव च वाक्यार्थः सर्वत्राख्यातवत्तया ।।

कुमारिलमतेन सर्वत्राख्यातवत्तया भावनैव वाक्यार्थ इति । सा भावना वासनानुग्रहात् कुणपादिमतेरिव एकस्मिन् वस्तुनि विभिन्नाकारबुद्धयो जायन्ते। घटादिवद्बाह्यवस्तु न हि वाक्यार्थो भवितुं शक्यते यतो हि पदार्थव्यतिरिक्तो वाक्यार्थोऽसम्भव एव प्रतिभाति । तस्माद् भावना वाक्यार्थः, इत्येव साधुपक्षस्तत्रापि भावना केवलमाख्यातपदाभिधेया वाक्यार्थे चानेकानि पदानि दृश्यन्ते कथं साधारणा भावनैव वाक्यार्थः । तत्रोच्यते विशिष्टवाक्यार्थविषयकैः जातिगुणादिभिरनेकैरर्थैरनुरक्ता भावनैव वाक्यार्थ इति । तद्यथा -

[८३]अनेकगुणजात्यादिकारकार्थानुरञ्जिता ।
एकयैव तु बुद्धयासौ गृह्यते चित्ररूपया ।।
पदार्थाऽऽहितसंस्कारचित्रपिण्डप्रसूतया ।
पदार्थपदबुद्धीनां संसर्गस्तदपेक्षया ।। इति ।

जयन्तभट्टस्य मतम् -

न्यायमञ्जर्यां वाक्यवाक्यार्थविवेचनं दर्शनदृशाऽतीव संक्षेपेण गाम्भीर्येण च कृतमस्ति।मूलतः न्यायशास्त्रवासनया जयन्तभट्टः व्याख्यातवान्।

अत्र अभिहितान्वयवादस्य खण्डनमेव दृश्यते । वाक्ये पदसमूह एकार्थको भवति यदि पदानां कश्चित् पृथगर्थः क्रियते तदा सामूहिकं कार्यं पदैः कर्तुं न शक्यते । सामूहिकपक्षेऽन्विताभिधानपक्षो बलवान् भवति। वाक्यार्थनिरूपणावसरे तद् विषयकविभिन्नमतानि समुपस्थाप्यासौ स्वीयमभीष्ट-मतमुपन्यस्तवान् । तद्यथा-

.....[८४] वाक्यार्थश्चिन्त्यतेऽधुना ।
तत्र विप्रतिपत्तिश्च बहुरूपा विपश्चिताम् ।।

तत्र नव मतानि विपश्चितां प्रदर्श्य तानि खण्डयित्वा जयन्तभट्टः दशमं मतं प्रस्तुतवान् । तानि मतानि-

१- [८५] ज्ञानं वाक्यार्थस्तु पदार्थसंसर्गनिर्भासं, बाह्यवाक्यार्थासम्भवश्च कथ्यते ।

२- क्रियावाक्यार्थ इति केचिद् वदन्ति ।

३- फलं वाक्यार्थः ।

४- पुरुषो वाक्यार्थः ।

५- भावना वाक्यार्थः ।

६- शब्दभावना वाक्यार्थः ।

७- नियोगो वाक्यार्थः ।

८- उद्योगो वाक्यार्थः ।

९- प्रतिभावाक्यार्थः ।

१०- फलं वाक्यार्थः (जयन्तभट्टमतम्)

१- ज्ञानं [८६] वाक्यार्थः-

पदार्थसंसर्गनिर्भासं ज्ञानं वाक्यार्थो भवितुमर्हति, तेनैव लोके व्यवहारे दृश्यत इति केचिदाहुः । तेषां मतेन पारमार्थिको वाक्यार्थो बहिर्न भवति। यतो हि बाह्यस्य वाक्यार्थस्य सर्वप्रकारेणासम्भवाद् गौः शुक्ल आनीयतामित्यत्र जातिगुणक्रियादिपदार्थः प्रत्येकं समूहेन वा वाक्यार्थः ।

ज्ञानस्य वाक्यार्थत्वमनुपपन्नं भवति, गौरित्यस्माद्यादृशोऽर्थनिर्णयः, न तावत्सोऽर्थः गौःशुक्ल आनीयतामित्यस्मात् पदार्थव्यतिरिक्तो वाक्यार्थो न भवति स चोक्तो यत्राधिक्यं स वाक्यार्थः संसर्गस्यापि प्रतीतिर्नास्ति- यथा गौरश्वः पुरुषो हस्तीत्यसंसृष्टपदार्थप्रतीतिवद् गौःशुक्ल आनीयतामित्यस्य प्रतीतिरिति तस्माद्बाह्य एव वाक्यार्थः ।

२- "क्रिया वाक्यार्थः-

केचित्क्रियामेव वाक्यार्थं कथयन्ति। तेषां मतेन शब्दार्थो बाह्योऽवस्थितोऽस्ति । तद्यथा-

पदार्थाः किल वाक्यार्थभावमायान्ति संहता ।
अपेक्षानुगुणान्योऽन्यव्यतिषङ्गविशेषता ।।

क्रियारहितं वाक्यं प्रयोगयोग्यं न भवति । लोके वाक्यप्रयोगः श्रोत्राकाङ्क्षानिवृत्यर्थं भवति । अनुच्चरिते न आकाङ्क्षाविरहः । यथा लोके तथैव वेदादपि अर्थो निष्पद्यते। साध्यरूपोऽर्थ आख्याताल्लभ्यते । साध्यसिद्धये सिद्धमुपात्तं भवतीति मन्यते -

साध्यं च साध्यमानत्वात्प्रधानमवगम्यते ।
तस्मात्तदेव वाक्यार्थः क्रियातो नापरं च तत् ।।

क्रिया हि प्रतीयमाना स्वनिष्पत्तये साधनान्याक्षिपति तैश्च कैश्चित्सम्बध्यते तानि च कानिचित्पदान्तरोपात्तानि भवन्ति कानिचित्प्रकरणान्तरपाठलभ्यानि कानिचिदारादुपकारकाणि कानिचित्सन्निपत्योपकारकाणि कानिचिदन्तिकोपपतितान्यपि योग्ताविरहात्पतति कानिचिदतिदूरवर्त्तीन्यपि योग्यानि स्वसम्पत्त्यर्थमाहरति इत्येव दृष्टादृष्टोपकारकारककलापसम्पद्यमानस्वरूपा क्रियैव वाक्यार्थः ।

३-फलं वाक्यार्थः-

क्रियापेक्षया फलं प्रधानं भवति तस्मात्फलं वाक्यार्थ इति कथ्यते। क्रिया तु फलार्थं क्रियते अतो हि फलं प्रधानं जायते कथन्न फलं वाक्यार्थः स्वीकर्तव्यः तद्यथा-

" फलस्य वस्तुतस्तावत्प्राधान्यमवगम्यते ।
न सचेता क्रियां कांचिदनुतिष्ठति निष्फलाम् ।।
वेदाद् गुरुनियोगाद्वा शासनाद्वा महीभुजः ।
न वैफल्यमपश्यन्तः क्रियां विद्धते जनाः ।।
जडो माणवकोऽप्येष चपेटापातहानये ।
मोदकाद्याप्तये वापि करोति गुरुशासनम् ।।

४- [८९]पुरुषोवाक्यार्थः-

अस्मिन्पक्षे वाक्यस्यार्थः पुरुषो भवति, क्रियापेक्षया फलं प्रधानं तत्रापि फलापेक्षया पुरुषस्य प्राधान्यम् ।

तत्र [९०]जैमिनिसूत्रं - "फलं च पुरुषार्थत्वादिति" । पुरुषो हि सर्वदानन्यनिष्ठो भवति यतो हि स स्वतन्त्रो भवति । तस्मात्फलं पुरुषायैव भवति ।

जयन्तस्तत्र वदति- संकटे पतितास्स्मः न विध्मः किं विदध्महे, क्रिया हि फलार्था, फलं च पुरुषार्थं, पुरुषः क्रियार्थं इति परिवर्तमाने चक्रे कस्य प्राधान्यं कस्य च वाक्यार्थत्वम् आख्यातस्य वाच्यत्वे पुरुषो न वाक्यार्थः। लकाराणां कर्त्तरि जायमानत्वात् । नाख्यातवाच्यः कर्त्ता, वर्तमाने लडिति कृत्वा शप्, युष्मदि मध्यमः, अस्मद्युत्तमः,शेषे प्रथमा तिप्तस्झीति बहुषु बहुवचनं द्वयेकयोर्द्विवचनैकवचने इति वाक्यान्तरे विभज्य विव्रियते न तावत् पुरुषो वाक्यार्थः न च फलमपि वाक्यार्थः यदि तत्र सिद्धस्याभिधानमेव न स्यात्।

[९१]भावना वाक्यार्थः -

वाक्यस्यार्थः भावना कथ्यते । भावना भावकव्यापारः भावनञ्च तत्र स्वर्गादिफलम्। तत्रोच्यते -

साध्यमानत्वपक्षे तु साक्षत्तत्सिद्धयवेदनात् ।
व्यापार एष तन्निष्ठस्तर्हि वाक्यार्थ उच्यताम् ।।
अत एव हि वाक्यार्थं भावनां प्रतिजानते ।
यथोचितफलाढ्यां च त्रय सम्बन्धबन्धुराम् ।।

पुरुषो हि भवन्तं स्वर्गादिकमर्थं स्वव्यापारेण भावयति (णेरर्थः णिज्वाच्यः) प्रयोजकव्यापारः । तस्य सम्पादकः पुरुषः तस्य यो व्यापारः सा भावना कथ्यते ।

न सा केनचिदुत्पाद्या जनिका सा न कस्यचित् ।
केवलं जननी ह्येषा जन्यस्य जनकस्य चेति ।।

एवं भावनाया अपि वाक्यार्थत्वं नाङ्गीचकार जयन्तभट्टः । यतो हि पाणिनिना भावनावाची काचिद्विभक्तिः स्मर्यते ।

[१२] शब्दभावना वाक्यार्थः

वाक्यस्यार्थः शब्दभावना विधिर्वा भवितुमर्हति । शब्दभावना शब्दस्यैव व्यापारः। इयं शब्दस्य कार्यम्, शब्देन वाच्यं वा भवति । लिङ्गादियुक्तेषु वाक्येषु द्वे भावने भवतः, शब्दभावना अर्थभावना चेति । शब्दगतप्रयोजकव्यापारो यत्र पुरुषप्रवृत्तिः साध्यतो प्रतिपद्यते सा शब्दभावना एव विधिर्भवति विधिभावनायोः सम्बन्धः धात्वर्थात्पूर्वतरः प्रतीयते । एकपदोपादानेऽपि धात्वर्थस्तावत्प्रकृत्यंशाभिधेयः, विधिभावे तु द्वेऽपि प्रत्ययांशेनाभिधीते ।

७- [१३] नियोगो वाक्यार्थः-

वाक्यस्य नियोगो भवति । नियोगशब्देन प्रेरणा अभिधीयते यतो हि शब्दः कार्यत्वं प्रेरणां च ब्रवीति। तस्यार्थःलिङादे प्रत्ययादवशिष्यते यमभिवदतो न तस्यातिभारो यत्र न तद्व्यतिरेकेण प्रमाणान्तरं क्रमते स नियोगो नाम वाक्यार्थः प्रेरणा-प्रेषणा अपि भवति सैव सर्वत्र विद्यमाना दृश्यते। प्रैषप्रैष्यसम्बन्धो हि प्रथममवगम्यते यथोच्यते प्रेषितोऽहमिति हि विदित्वा क्रियायां प्रवर्तते । आचार्यप्रेरितोऽहं करोमि, दृश्यते यजेतेति श्रुते नियुक्तोऽहमिति प्रथममवगच्छति, ततो यजते, तेनायमाद्यः सम्बन्धः पाश्चात्यस्तु कर्तृकर्मसम्बन्धः, तद्योऽयं लिङ्र्थः प्रथममवगम्यते प्रैषो नाम सा प्रेरणा स नियोग सो वाक्यार्थ इति । विधौ निमन्त्रणादिषु, लिङ्लोटौ स्मर्येते ते च प्रेरणाया एव औपाधिका अवान्तरभेदाः भवन्ति । उपाधिनिबन्धन एष प्रेरणाप्रेषणादिभेदव्यवहारः, प्रेषणा च सर्वस्यानुस्यूताऽवगम्यते। नियोगो वाक्यार्थ इति मीमांसकानां कथा ।

८ - [१४] उद्योगो वाक्यार्थः -

उद्योग एव वाक्यस्यार्थ इति केचिद्वदन्ति । उद्योगो नाम वाक्यार्थं तत्स्वरूपं तु न वयं जानीम इति जयन्तभट्टः लिखति । उद्योगवादिनां मतेन - आत्मस्पन्द एव उद्योगः यथा यजेतेति लिङादि शब्दश्रवणे सति समुपजायमानात्मस्पन्दविशेष उद्योगो वाक्यार्थः । कोऽयमात्मस्पन्दो नामेति बुद्धिर्वा स्यात् प्रयत्नो वेति । आत्मनो नवगुणा एव विशिष्यन्ते ते च- बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा इति । यद्यत्र बुद्धिरेवात्मस्पन्दस्तदा किमत्र नूतनं यत्प्रतिभायां न लभ्यते तदा प्रतिभा एव वाक्यार्थत्वेन ग्राह्या किमर्थमयं यत्न इति । यदि प्रयत्न आत्मस्पन्दस्तदा भावनावाक्यार्थः । भावना नामान्तरेण उद्योगपदवाच्या भाट्टमतेन नियोगेऽस्यान्तर्भावः । अतो

हि उद्योगस्य न वाक्यार्थत्वं सिद्ध्यति, अश्रुतपूर्वोऽयं वाद इति ।

९- प्रतिभावाक्यार्थ :-

प्रतिभा वाक्यस्यार्थ इति शाब्दिकानां विषयः सोऽप्यत्र निराक्रियते। संसर्गप्रतिभासज्ञाननिराकरणेन प्रागेवासौ प्रतिक्षिप्त इति । यथोक्तम् -

[९५]प्रतिभा खलु विज्ञानं तच्च शब्देन जन्यते ।
न तु शब्दस्य विषयो रूपधीरिव चक्षुषः ।।

बाह्यविषयाभावादसौ नैय्यायिकादीनां न वाक्यार्थः । यथा 'व्याघ्र आयात' इत्युक्ते शूरकातरनराधिकरणनानाप्रकारकार्योत्पादःस बाह्योऽर्थे व्याघ्रागमनादौ प्रतिपन्ने वासनानुसारेण भवन्न प्रतिभामात्रहेतुको भवति, तस्य हि ज्ञायमानोऽर्थः करणं न तज्ज्ञानकारणम् तदानीमर्थस्तु न दृश्यते । बाह्योऽर्थे वासनानुसारेण कुणप इति वनिता भक्ष्यं इत्येतावता प्रतिभा भवति । न त्वेतावता प्रतिभा शब्दार्थो भवितुमर्हति न च पदार्थो वाक्यार्थोऽपीति।

१०- [९६]फलम्वाक्यार्थः-

भट्टमतेन फलमेव वाक्यस्य अर्थो भवितुमर्हतीति निष्कर्षः । तथोक्तं-

वाक्यार्थः परमार्थ एव तदयं नो कल्पनानिर्मितः ।
तद्वानप्युदितः पदस्य विषयस्तेनार्थसंस्पर्शिता ।।

तेनोच्यते यदि पूर्वेषु वाक्यार्थलक्षणेषु न स निर्णेतुं शक्यस्तदा फलं वाक्यार्थः स्वीकर्तव्य एव । यतो हि एकस्मै कस्मैचिदवश्यं अभिषेककलशो दातव्यः तत्फलायैव दीयताम् । न कश्चिद्वाक्यं निष्प्रयोजनं प्रयुङ्क्ते सर्वत्र फलमेवाभिलषते वक्तेति-

तत्र हि फलं नाम-

[९७]क्वचित्साक्षात्पदोपात्तं क्वचित्प्रकरणं गतम् ।
क्वचिदालोचनालभ्यं फलं सर्वत्र गम्यते ।।

सकलेन कारककलापेन क्रिया निर्वर्त्यते । क्रियया च फलं न तु फलेनान्यत्किमपि निर्वर्त्यते । तस्मात्प्रधानत्वात् फलमेव वाक्यार्थः स्वीकर्तव्यः। पुरुषोऽपि फलार्थमेव यतते, एवञ्च भावना फलनिष्ठव्यापारः,

नियोगस्य फलं विना न प्रवर्तकत्वम्, केवला क्रियाऽपि न वाक्यार्थः । सर्वत्र फलस्यैव प्राधान्यं दृश्यते । तस्मादस्माकं नये फलमेव वाक्यार्थ इति मन्तव्यो भवति । तदुक्तम् -

[९८] अन्योऽन्यसंगतिविशेषित एव यस्माद्वाक्यार्थभावमुपयाति पदार्थपुञ्जः ।
एतच्च चेतसि निधाय ततो न भिन्नं वाक्यार्थमभिधत्ते कश्चन सूत्रकारः ।।
प्राधान्ययोगादथवा फलस्य वाक्यार्थता तत्र सतां हि यत्नः।
प्रयोजनं सूत्रकृता तदेव प्रवर्तकत्वेन किलोपदिष्टम् ।। इति ।

इतोऽतिरिक्तमपि वाक्यार्थविषये जयन्तभट्टो यथावसरमुल्लिखति - "स तु [९९] वाक्यार्थे न बाह्यः पदार्थेन संसर्गस्य यस्मिन् आभासः स वाक्यार्थः "इति तन्मतनिगर्भः । एवं "पदार्थानां सम्बन्धो वास्तविको भवति । सोऽपि यत्रोच्यते स वाक्यार्थः" इति तन्मतनिगर्भः पुनरपि-" वाक्यार्थो व्यवच्छेदात्मको भवति । यथा गौःशुक्लः इत्यत्र शुक्लेन शब्देन कृष्णस्य निवृत्तिर्वाक्यार्थ इति ।

वाक्यार्थविषयकाः नूतना विचाराः -

तत्र कतिपयैरभिनवचिन्तकैरपि वाक्यार्थविषये स्वीयानि शोधपत्राणि शोधनिबन्धेषु प्राप्तप्रसङ्गेन संक्षिप्तीकरणपद्धत्या प्रस्तुतीकृतानि । वस्तुतस्तेषां चिन्तनं वाक्यवाक्यार्थविषयकप्राचीनग्रन्थानां केवलमनुवादात्मकमेव प्रतिभाति, न हि कश्चन नूतनो विचारो दृष्टिपथमायाति तत्र शास्त्रीयविषये कठिनपरिश्रमेणापि स्वविचारं व्यक्तीकर्तुमशक्यास्ते सन्ति । तत्र विरलास्सन्ति येषां सा प्रतिभा विस्फुरति । तथापि यैः गवेषणात्मकं यत्कार्यं क्रियते तदेव सन्तोषाय भवतु नाम यतो हि गवेषणा पञ्चाग्नितपः इति कथयितुं शक्यते । तत्र हि के०, कुञ्जुनीराजा [१००] महोदयः स्वीये निबन्धे वाक्यार्थविषये कथयति - " वाक्यार्थः कश्चन शब्दार्थेभ्यो भिन्न एव प्रतिभाति । वाक्ये विभिन्नशब्दानामर्था आकाङ्क्षाभासस्याः भवन्ति। शब्दार्थेभ्यो भिन्न एव प्रतिभाति । वाक्ये विभिन्नशब्दानामर्था आकाङ्क्षाभास्याः भवन्ति । शब्दार्थेभ्यो हि कश्चिदतिरिक्त एवार्थः प्रतीयते। अयमेव वाक्यार्थ- संसर्गः, तात्पर्य्यार्थः, केषाञ्चिन्मतेनेयं वाक्यशक्तिः अपरेषां मतेन संसर्गमर्यादा वेति वर्तते । तत्र तात्पर्य्यशक्तिरपि

कैश्चिदुच्यते'' ।

काव्यप्रकाशानुसारं तद्धि - [१०१]''आकाङ्क्षा योग्यता सन्निधिवशात् पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् । वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः । पुनरपि यदत्राधिक्यं वाक्यार्थः सः, पदानां परस्परान्वयं पदार्थवशात् यदाधिक्यं संसर्गः स वाक्यार्थ इति निर्देशपुरस्सरं पुण्यराजीयोक्तमपि तत्रालोचितमस्ति ।

पुनरपि [१०२]वाक्यार्थः एव समाश्रीयमाणे तस्यैव प्रधानतां व्यवस्थापयति, यतो हि वक्तृश्रोत्रोः सम्बन्धो वाक्यार्थेन युक्तो भवति, न तु शब्दार्थेन भवतीत्युच्यते । शब्दप्रयोगस्त्वभ्यासवशेन क्रियते तदा शब्दार्थविषये चिन्ता न प्रवर्तते, चिन्ता तु वाक्यार्थविषयिणी भवति । न तेन यद्वयमपशब्दान् ब्रूमः । शब्दप्रयोगकाले तेषामर्थोऽपि चिरकालाभ्यासवशेनास्माभिर्ज्ञायत एव तस्मादेव कश्चन जडोऽपि शब्दान् वदति अर्थांश्चाधिगच्छति । कुञ्जुनीराजा महोदयस्तु पाश्चात्यविदुषामपि मतानि यथावसरं प्रकटयति यथाऽत्र तेन रसेलमहाशयस्य मतमप्युपन्यस्तमस्ति।

पदार्थप्रविभागः-

वाक्यकाण्डे भर्तृहरिणोक्तप्रसिद्धपदार्थप्रविभागः कश्चन महत्त्वपूर्णः विषयोऽवलोक्यते। तत्र द्वादशपदार्था वर्ण्यन्ते, ते हरिसमये प्रसिद्धा आसन्निति वक्तुं शक्नुमः। एतद्विषये पुण्यराजीयं विवरणमपि महत्त्वपूर्णमस्ति । यद्यपि पदार्था वाक्यान्तर्गता एवार्थबोधकतां भजन्ते, तथापि वाक्यार्थज्ञानात् पूर्वकालो पदार्थज्ञानेनावश्यं भवितव्यमिति । ते द्वादशपदार्थाः मतभेदेनात्र क्रमशः निर्दिश्यन्ते। टीकायां तु तेषां द्वादशपक्षा अपि कल्पितास्सन्ति ।

प्रथमः पक्षः-'पदार्थो निराकारः तद्यथा-

[१०३]अस्त्यर्थःसर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु ।
प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः ।
न स शब्दस्य विषयः स हि यत्नान्तराश्रयः ।।

केषाञ्चिन्मते पदार्थ आकारविशेषरहितो भवति । यथा अपूर्वदेवतास्वर्गादिपदेभ्यः कश्चन आकाररहितोऽर्थः समुपजायते तथैव समस्तशब्दानामाकाररहितार्थपात्रस्य बोधो भवतीति भावः । उच्चारितशब्देन

तु स्थूलार्थोऽवश्यं गृह्यते यथा गवादिषु स्थूलपदार्थो न व्यभिचरति । एतत्समयसम्बन्धेनोपजायत इति । पूर्वोपदिष्टगोपदार्थस्य तु सास्नादिमानर्थोऽस्माकं वासनाभ्यासवशाच्च जायते । न तु शब्दः स्थूलपदार्थेऽन्वेति। अपि चास्माभिः 'गौरि' त्यादिना योऽर्थःपूर्वमभिमतःस एवार्थः तदानीं गृह्यते । परन्तु पदार्थस्तु साकारो नास्ति, अपितु निराकार एव पदार्थ इति । नायं शब्दस्य विषयो भवतीति [१०४]तेषामभिमतम् ।

द्वितीयः पक्षः 'पदार्थो हि साकारः' तद्यथा -

[१०५]केचिद्भेदाः प्रकाश्यन्ते शब्दैस्तदभिधायिभिः ।
अनुनिष्पादिनः कांश्चिच्छब्दार्थ इति मन्वते ।।
जातेः प्रत्यायके शब्दे या व्यक्तिरनुषङ्गिणी ।
न तद्व्यक्तिगतान् भेदान् जातिशब्दोऽवलम्बते ।।
घटादीनां न चाकारान् प्रत्याययति वाचकः ।
वस्तुमात्रनिवेशित्वात् तद्गतिर्नान्तरीयकी ।।
क्रिया विना प्रयोगेन न दृष्टा शब्दचोदिता ।
प्रयोगस्त्वनुनिष्पादी शब्दार्थ इति गम्यते ।।

केषाञ्चिन्मते साकारविशेष एव पदार्थ इति । पुण्यराजमतेन केचिद् भेदा जात्यादयः शब्दवाच्याः, केचित्तत्रार्थप्रयोजका अनुनिष्पादिन एव तथा ताश्च शब्दार्था इत्यपरे मन्यन्ते इत्यादिना पाठेनात्र भर्तृहरेर्न रुचिरिति पश्यामः। पदार्थस्तु आकारान्बोधयति अविनाभावेन च ते प्रवर्तन्ते जात्यादयो भेदास्तु शब्दवाच्याः भवन्ति, व्यक्तिभेदः समावाय सम्बन्धेन जातौ भवन्ति, शब्दश्च तान् बोधयतीति तेषामभिमतमस्ति । परन्तु भर्तृहरिः जातेर्प्रत्यायके' इति कारिकया तत्सर्वमपि खण्डयति । न हि जातिशब्दो व्यक्तिभेदस्य बोधको भवतीति ।

घटादीनां प्रसिद्धानामाकारानां वाचकः शब्दो न प्रत्यायति, पृथ-बुध्नोदराकारमात्रनिवेशात् । न हि सकलविशेषसहितमर्थं शब्दः प्रत्याययितम-लमिति । एवं यजेतेति शब्दचोदितो क्रियाकर्मसाधनसामग्री विना न दृश्यते। असौ साधनयोगस्तत्रानुनिष्पादी शब्दार्थोऽवगन्तव्य इति ।

तृतीयः पक्षः 'गुणप्रधानभावः पदार्थः' -

[१०६]नियतास्तु प्रयोगा ये नियतं यच्च साधनम् ।
तेषां शब्दाभिधेयत्वमपरैरनुगम्यते ।।

अम्बाकर्त्र्यामुक्तम् - सर्वे एवाकाराः सामान्यरूपाश्च यद्वा साध्यरूपाः साधनरूपाश्च । गुणप्रधानभावेनावस्थिताः पदस्यार्थाः तत्रार्थसामान्यं गुणत्वेनावस्थितम्, अर्थविशेषस्तु प्राधान्येनेति साध्यरूपोऽर्थः प्राधान्येनावस्थिताः, साधनरूपास्तु गुणत्वेनैति । अयं तृतीयः पक्षः- यतो हि पिधेहि प्रभृतयो ये नियताः प्रयोगाः, साध्यवाचकशब्दप्रयोगाः एषां नियतत्वन्तु साधनवाचकशब्दमात्रप्रयोगेऽपि नियमेन प्रतीयमानत्वात् । येन केनचिद् विना शब्दस्याभिधेयं न निर्वहति तत्सर्वं साध्यसाधनात्मकं सामान्यविशेषात्मकं च शब्दाभिधेयमेव वक्तुं युक्तम् । द्वितीयं मतं न शोभनमिति । यतः सर्वाकारमेव गुणप्रधानेन शब्दात् प्रतीयते तस्मात्तृतीय एव पक्षः शोभन इति पुण्यराजः ।

'समुदायः पदार्थ' इति चतुर्थः पक्षः-

[१७७] समुदायोऽभिधेयो वाऽप्यविकल्पसमुच्चयः । इत्यादिना समुदाय एव तुल्यकक्षतया पदार्थो भवतीति केषाञ्चिन्मतमस्ति । समुदाये पदार्थानां गुणप्रधानभाव एव शब्दबोध्यः, न तदुपस्थिताविति । यद्याकारसमुदायं समुचितमेव प्रत्यायति तर्हि सर्वत्र बहुवचनमेव क्वचिदेकवचनमिति । अविकल्पसमुच्चय इति, अविद्यमानौ विकल्पसमुच्चयौ यस्यासौ तथाभूतस्तस्मात् प्रतीयते । 'एतच्चोपमा समुद्देशेऽप्यर्थविचारणावसरे सविस्तरं प्रदर्शयिष्यति इति पुण्यराजः । परं नायं समुद्देशोऽद्यावधि समुपलब्ध इति सूचना । कैश्चिदुपमासमुद्देशेन वृत्तिसमुद्देश एव गृह्यते ।

अस्मिन्पक्षे [१७८] यो हि श्लोकार्द्धः प्रस्तूयते, स च तत्त्वसंग्रहेऽपि कथितः, पञ्चिकायां सविस्तरं व्याख्यतश्चास्ति । तत्प्रकरणमत्र प्रस्तूयते येनायं पक्षः सुस्थितो भविष्यतीति ।तद्यथा- केचिद् ब्राह्मणादि-शब्दैस्तपोजातिश्रुतादिसमुदायो विना विकल्पसमुच्चयाभ्यामभिधीयत इत्याहुर्यथा वनादिशब्दैर्धवादय इति ।

तथा हि वनमित्युक्ते धवो वा खदिरो वा पलाशो वेति न विकल्पेन प्रतीतिर्भवति, नापि धवश्च खदिरश्च पलाशश्चेति समुच्चयेन, अपि तु वनत्वेन रूपेण सामान्येन प्रतीयन्ते धवादयः । तथा ब्राह्मण इत्युक्ते तपो जातिर्वा श्रुतं वा, तपश्च जातिश्च श्रुतञ्चेति न प्रतिपत्तिर्भवति । अपि तु साकल्येन सम्बन्ध्यन्तरव्यवच्छिन्नास्तपः प्रभृतयः संहताः प्रतीयन्त इति। तत्र बहुष्वनियतैकसमुदायिभेदावधारणं विकल्पः । एकत्र युगपद्भि-सम्बध्यमानस्य नियतस्यानेकस्वरूपभेदावधारणं समुच्चयः । अविद्यमानौ विकल्पसमुच्चयौ यस्य स तथोक्त इति ।

'असत्यभूतः संसर्ग एव पदार्थ'इति पंचमः पक्षः-

[१०९] असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदिष्यते ।।

केषाञ्चिन्मते जातिगुणक्रियात्मकस्यार्थस्य व्यक्तावसत्यभूतः संसर्ग एव पदार्थ इति । तत्र घटादिभिः शब्दैर्घटादीनां जात्यादिसंसर्ग उच्यते । स चात्र तद्व्यतिरेकेणानुपलम्भादसत्यभूत एवोच्यते । तस्मात् संसृष्टः पदार्थ एव सत्यभूत इति पुण्यराजः ।

[११०] अयमपि पक्षः तत्त्वसंग्रहे व्याख्यातोऽस्ति, तदेवात्र प्रस्तूयते । यथा 'अन्ये तु द्रव्यत्वादिभिरनिर्धारितरूपैर्यः सम्बन्धो द्रव्यादीनां स शब्दार्थ इति, स च सम्बन्धिनां शब्दार्थत्वेनासत्यत्वादसत्य इत्युच्यते । यद्वा तपः श्रुतादीनां मेचकवर्णवदैक्येन भाषणादेषामेव परस्परमसत्यः संसर्गः । तथा ह्येते प्रत्येकं समुदिता वा न स्वेन रूपेणोपलभ्यन्ते, किन्त्वलातचक्रवदेषां समूहः स्वरूपमुत्क्रम्याभासत इति ।

'असत्योपाधिविशिष्टः पदार्थ' इति षष्ठः पक्षः-

[१११] असत्योपाधियत्सत्यं तद्वा शब्दनिबन्धनम् ।

सत्यमेवासत्योपाधिविचित्रितं शब्दवाच्यमिति केचन वदन्ति। सत्यभूतो यो हि व्यक्तिरूपः पदार्थः स एवासत्योपाधिविशिष्टो भवतीति। 'द्रव्यं हि नित्यम्' इत्यादिना अर्थो नित्य इति महाभाष्यम्। यतो हि सकलशब्देषु ब्रह्मतत्त्वभूत एकार्थ एव भवति। 'ब्रह्म एव सत्यम् न जगदिति' शब्दश्च तं बोधयति, अतो हि अर्थोऽपि सत्यः स एव नित्य इति । लौकिकपदार्थयोगेनार्थोऽसत्यभूत इति दृश्यते। लोके पदार्थस्य नित्यत्वमिति तेषामाशयः ।

'स्वरूपाभिधेयः पदार्थ' इति सप्तमः पक्षः -

शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यताम् ।।

शब्दस्य स्वरूपमेवाभिधेयमस्तीति कैश्चिदुच्यते । शब्दस्य स्वरूपमेवार्थ इति सिद्धम् । स शब्दोभिजल्पत्वागतो वाच्यतां गच्छतीति तात्पर्यम् । क्वचिदभिजन्यत्वमिति पाठः । अभिजल्पः, अभिजन्यश्च शब्दार्थयोरितरेत- राध्यासरूप एवात्राभिप्रेत इति । तत्राभिजल्पस्वरूपमाह हरिः-

[112]सोऽयमित्यभिसम्बन्धाद् रूपमेकीकृतं यदा ।
शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ।।

अभिजल्प्यत इत्यभिजल्पः कर्मणि घञ् रूपम् ।'सोऽयमिति' अभिसम्बन्ध एवात्र अध्याससम्बन्धत्वेन कथितः । अध्यासेन च पदार्थस्वरूपमेकीक्रियते, आच्छाद्यते वेति तस्मादभिजल्पः शब्द एवोच्यते। एकीकरणेऽपि तत्रार्थांशस्य प्राधान्यमुपलक्ष्यते । क्वचिद्विषयभेदेन लौकिकशास्त्रीयभेदेन पदार्थयोः शब्दवाच्यत-ैवोक्ता । तद्यथा-

[113]तयोरपृथगर्थत्वे रूढेरव्यभिचारिणि ।
किञ्चिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठते ।।
शास्त्रे लोके च अर्थप्रधानतैवास्ति । तद्यथा --
शास्त्रे लोके चार्थप्रधानतैवास्ति । तद्यथा--
लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते ।
शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ।।

गौरित्यत्रार्थ एव बाह्यतया प्रधानमवसीयते । लोके शब्दोऽर्थरूपतां प्रतिपन्नस्तादात्म्याध्यासवशादर्थेन सहैकरूपत्वमिव प्राप्तः व्यवहारोऽयं गौरित्यादिरूपेण प्रवर्तते । तथा हि शास्त्रे 'अग्नेर्ढक्' 'तस्यापत्यम्' इत्यादौ शब्दः स्वरूप प्रधानोऽर्थप्रधानश्च दृश्यते । अत्रोभयरूपतामभिधत्ते । मञ्जूषायां नागेशोऽपि यो यः शब्दः स स अर्थ इति प्रतिपादयति ।

'स्वमाहात्म्योपस्थापित एव पदार्थ' इत्यष्टमः नवमश्च पक्षः-

[114]अशक्तेः सर्वशक्तेर्वा शब्दैरेव प्रकल्पिता ।
एकस्यार्थस्य नियता क्रियादिपरिकल्पना ।।

स्वमाहात्म्यादिना तात्पर्यं यदर्थेषु न काचन पृथक्शक्तिरस्ति, सा तु सर्वदा शब्दाधीनैव कथिता, यथा ते शब्दैर्विधीयन्ते तथैव बुध्यन्त इति तस्मात्ते स्वशक्त्युपस्थापिता एव भवन्ति शब्दैर्योऽर्थः क्रियते सोऽर्थः लोके प्रसिद्धो भवति । एवमशक्तिः शब्दार्थ इति ।

अपरे तु [115]सर्वशक्तिरर्थो व्यवस्थित इति ब्रुवन्ति । सर्वशक्तियुक्तश्चार्थोऽस्तीति मन्यन्ते, यतो हि शब्देनैव प्रत्येकनियतशक्ते-रवबोधो जायते । तेनार्थस्य सर्वशक्तितत्वं सम्भवति। हरिसम्मतिरप्यत्र दृश्यते

सर्वं जगत् किल अर्थस्य विषय' इति ततोऽतिरिक्तः न कोऽपि विषयोऽस्ति। यथायं शब्दः सर्वशक्तिमान् तथैवार्थोऽपीति । यदा शब्देनार्थो निरूप्यते तदा स अर्थबोधस्य विषयो भवतीत्युक्तम् -

सर्वात्मकत्वादर्थस्य नैरात्याद् वा व्यवस्थितम्
[११७] अत्यन्तयतशक्तित्वाच्छब्द एव निबन्धनम् ।।

शब्द एवात्यन्तनियतशक्तिवशादर्थस्य निमित्तमस्ति इति व्यवस्थितम्। भाष्ये प्रदीपेऽपि विषयोऽसौ [११८] स्वरूपं शब्दस्याशब्दसंज्ञेति सूत्रे प्रकाशितः। कैय्यटेनोक्तं-देवदत्तादयश्च संज्ञाशब्दा नियमार्था इति सिद्धान्तः। सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः' । 'सर्वशब्दप्रत्याय्यनशक्तियुक्तश्चार्थः इति व्यवहाराय नियमः क्रियते । अत्र नियमद्वयं दर्शितम्- 'अनेन शब्देनायमर्थो ग्राह्यः' अयमर्थश्चानेनैव शब्देन बोधनीय इति । वस्तुतस्तु 'सर्वे सर्वार्थवाचका' इति नागेशोक्तमेव संगच्छते । परन्तु नायमस्माकं विषयः, अस्माकं तु सर्वार्थज्ञानं न सम्भवम्, तत्तु योगिनामेवेति। व्यवहारेणापि शब्दशक्तिः नियता भवति । तेनार्थो शब्दस्य वाच्य इति कथ्यते। एतस्मादर्थो सर्वशक्तिमान् वर्तते ।

'बौद्धार्थः पदार्थ' इति दशमः पक्षः-

[११९] यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः ।
स बाह्यवस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते ।।

कैश्चिद्बुद्ध्युपारूढ एव पदार्थो भवति , न तु बाह्य इति । बुद्ध्युपारूढ एव पदार्थो बाह्यवस्तुनिबन्धन इति कथितः । स च वैकल्पिकोऽर्थो भ्रमवशाद् विकल्पकल्पनात्मकत्वेनाबहीरूपोऽपि बहीरूपतयाऽध्यस्तोऽध्यत वस्त्ववगच्छामि शब्दादिति शब्दनिमित्तक एव शब्दार्थ इष्यत इति पुण्यराजः ।

यथाऽर्थो बुद्धिविषयत्वेन व्याख्यातः, तथैवार्थो बाह्यविषयत्वेनापि प्रतिपादितोऽस्ति, परन्तु बौद्धविषय एव मुख्यत्वेन स्वीक्रियते ।

[१२०] अस्याः कारिकायाः तत्त्वसंग्रहपञ्जिकान्तर्गता व्याख्यादानमत्र आवश्यकमस्ति, तेन विषयः स्फुटो भविष्यति । तद्यथा - 'बुद्धिविषय' इति । बुद्धौ विपरिवर्तमानः, बुद्धिस्थ इति यावत्।बाह्यवस्तुनिबन्धन इति। सदसद् बाह्यवस्तु निबन्धन- मक्षरचिह्नस्थानीयं स्वरूपमुपदर्शयितुं प्रक्रम्यते यस्य स बाह्यवस्तुनिबन्धनः ।

बाह्यं वस्त्विति ज्ञात इति । बुद्धिरूपत्वेनाविर्भावितो बाह्यतया व्यवस्थित इत्यर्थः । तथाहि यावद् बुद्धिरूपमर्थेष्वप्रत्यस्तं बुद्धिरूपमेवेति तत्त्वभावनया गृह्यते, तावदस्य शब्दार्थत्वं नावसीयते, तत्र क्रियाविशेष-सम्बन्धाभावात् । न हि गामानय, दधि खादेत्यादिकाः क्रियास्तादृशि बुद्धिरूपे सम्भवन्ति । क्रियायोगसम्भवश्चार्थः शब्दैरभिधीयते । अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः । यदा तु बाह्यवस्तुनि प्रत्यस्तो भवति, तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रिया साधनसामर्थ्यं तस्य मन्यत इति · भवति शब्दार्थः' ।

'प्रतिनियताकारो पदार्थ' इत्येकादशः पक्षः-

[१२१] आकारवन्तः संवेद्या व्यक्तस्मृतिनिबन्धनाः ।
ये ते प्रत्यवभासन्त संविन्मात्रं त्वतोऽन्यथा ।।

केषाञ्चिच्छब्दानामाकारविशेषवानर्थः, अपरेषां तु तद्रहित इति । गवादीनां शब्दानामाकारविशेषवानर्थोऽपूर्वप्रभृतीनां संविन्मात्रमपरामृष्टाकारविशेषमर्थ इति । येषां योऽर्थोऽभिप्रेतः स एव तत्रोपयुक्त इति । येषां यादृशी वासना यस्मिन्नर्थे नियता तेषां पुरुषाणां तादृश एव प्रतिनियताकारोऽर्थः शब्दाद-भिधीयते यथा कम्बुग्रीवादिमान् घटपदार्थ इति, घटत्वजातिमान् घटपदार्थ इति, पृथुबुध्नोदरादिमान् घटपदार्थ इति ।

'अप्रतिनियताकारो पदार्थ ' इति द्वादशः पक्षः-

[१२२] यथेन्द्रियं सन्निपतद्वैचित्र्येणोपदर्शकम् ।
तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा ।।
वक्त्रान्यथैव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु ।
स्वप्रत्ययानुसारेण शब्दार्थः प्रविभज्यते ।।
एकस्मिन्नपि दृश्येऽर्थे दर्शनं भिद्यते पृथक् ।
कालान्तरेण चैकोऽपि तं पश्यत्यन्यथा पुनः।।
एकस्यापि च शब्दस्य निमित्तैरव्यवस्थितैः ।
एकेन बहुभिश्चार्थो बहुधा परिकल्प्यते ।।
तस्माददृष्टतत्त्वानां सापराधं बहुच्छलम् ।

दर्शनं वचनं चापि नित्यमेवानवस्थितम् ।।
ऋषीणां दर्शनं यच्च तत्त्वं किञ्चदवस्थितम् ।
न तेन व्यहारोऽस्ति न तच्छब्दनिबन्धनम् ।।
तलवद् दृश्यते व्योम खद्योतो हव्यवाडिव ।
नैव चास्ति तलं व्योम्नि न खद्योतो हुताशनः।।
तस्मात् प्रत्यक्षमप्यर्थं विद्वानीक्षेत युक्तितः ।
न दर्शनस्य प्रामाण्यात् दृश्यमर्थं प्रकल्पयेत् ।।
असमाख्येयतत्त्वानामर्थानां लौकिकैर्यथा ।
व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेत् ।। इति।।

न कश्चिदप्यर्थो नियतः शब्दादभिधीयते । यथा पुण्यराजेनोक्तम्- प्रतिनियतवासनावशनैव प्रतिनियताकारोऽर्थः, तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयत इति । पुनस्तत्रैव- अविपरीतमप्यर्थमिन्द्रियं दोषवशान्नानारूपमवभासयति, यथा नियतवासनावासिनां शब्दार्थप्रतीतिरिति 'नास्ति कश्चिन्नियत एकः शब्दस्यार्थ' इति । यथा श्रूयते - [१२३]द,द,द इति ब्राह्मणा प्रतिबोधिता देवासुरमानवाः२ स्व स्व वासनानुसारमेवैकस्मादेव शब्दाद् यथाक्रमं दमवं दयध्वं ददध्वमिति प्रतिपद्येरन् । देवा हि इन्द्रियार्थलोलुपा असुराश्च हिंसाप्रियास्तत्पराश्च मानवास्त्वर्थलुब्धास्ततोऽपि संग्रहपरा इति । शब्दान्न कश्चिदपि प्रतिनियताकारोऽर्थोऽभिधीयत इति निष्कर्षः ।

श्रोतृबुद्ध्युपपन्नोऽर्थो भवति वक्ता स्वबुद्धयुद्बुद्धं परं प्रति वदति, श्रोतृभिस्तस्य स्वप्रत्यायानुसारमर्थो गृह्यते । तदुदाहरति - 'वक्त्रान्यथैवेति' कारिकय। तत्र सांख्यजैनसौगतप्रभृतयः स्वप्रत्ययानुसारमेव शब्दार्थं ब्रुवन्ति। यथा गुणसमाहारमात्रं घट इति सांख्याः, परमाणुमात्रञ्च घट इति जैनाः सौगताश्चेति ब्रुवन्ति ।येषामत्र योऽर्थः स एवार्थः प्रतिनियताकार इति ब्रूमः।

शास्त्रीयवासनाभेदादपि [१२४]अर्थो भिद्यते किं बहुना दर्शनमेव भिद्यत इत्यर्थः । प्रथमतो यद्दर्शनं यथार्थबुद्धया गृहीतम्भवति कालान्तरे तदेव दर्शनमन्यथा भवतीत्युक्तमेकस्मिन्नपि इत्यादिना । यथा एक एव पुरुषः पूर्वदृष्टमर्थम् पुनः कालान्तरेण अन्यथा पूर्वदृष्टरूपादन्यप्रकारेण अन्यशास्त्रवासनानुरूपं पश्यति, यथा भिद्यते । एकोऽपि च पुरुषः सुगतदर्शनसंस्कृतमतिरन्यथा- ध्यवस्यत्यर्थं कालान्तरेण वैशेषिकंशास्त्रश्रवणादन्यथेति ।

[१२५] अधीतबहुशास्त्रवता पुरुषेण शास्त्रभेदेनैकस्य शब्दस्याप्यर्थोऽनेकधा परिकल्प्यते । यथा घट शब्दस्यार्थः एकस्यार्थः एकस्यापिशब्दस्येत्यादिनोक्तम् ।

तत्र पुण्यराजः- 'पुरुषेणानियतशास्त्रवशात् क्रमेण बहुधार्थः प्रकल्प्येत, बहुभिश्च नानाशास्त्रसंस्कृतबुद्धिभिः युगपत्स्वप्रत्ययानुसारेण बहुधापि परिकल्प्यते किमत्र कुर्मः, इति ।

[१२६] मनुष्योऽल्पज्ञस्तदीयं ज्ञानमनवस्थितमपूर्णञ्चास्ति । तस्मात्तस्य शब्दप्रयोगोऽपि क्वचिदनवस्थितो भवेदिति 'तस्माददृष्टतत्त्वानामिति' कारिकादलेन कथितम् । अदृष्टतत्त्वानां पुरुषाणां दर्शनं नित्यमेवानवस्थितमित्युच्यते। तेषां वचनमपि नित्यमेवानवस्थितमिति वक्तुं युज्यते, तत्त्वकथनेन तु तत्र सुदूरमवस्थीयते ।

[२] किम्बहुना ऋषीणामपि दर्शनमतात्त्विकं कदाचिदनुभूयते , यतो हि आर्षमपि ज्ञानं न शब्दनिबन्धनमस्ति, तेन व्यवहारोऽपि सिद्धयति, 'ऋषीणां दर्शनं यच्चे' त्यादिना तदुक्म् तत्र पुण्यराजस्त्वाह - ननु सन्त्येव परावरज्ञा मुनयस्तदनुसारेण सर्वं व्यवस्थापयिष्याम इति । अत्र सन्दर्भेऽम्बाकर्त्री दर्शनीया भवति, तत्रोक्तं प्रस्तौमि तेन ऋषीणां तत्त्वविषयकेण दर्शनेन न व्यवहारोऽस्ति परमार्थेन व्यवहारासम्भवात् । तदुक्तं श्रीशङ्कराचार्यभगवत्पादैरध्यासभाष्ये 'सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः' इति । तत्त्वविषयकं ऋषीणां दर्शनं न शब्दनिबन्धनं शब्दानां प्रवृत्तिनिमित्तं न भवतीति न तेन व्यवस्था । व्यवहारवेलायां वा तेऽप्यदृष्टतत्त्वसदृशा एव व्यवहरन्ति। पुण्यराजस्यैवाशयोऽत्र व्याख्यातोऽस्ति । तेन स्वीयटीकायामेक- सम्बन्धसमुद्देशस्य कारिकोदृता वर्तते । सा हि -

[१२७] रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ
ज्ञाने प्रत्यभिलापे च सदृशो बालपण्डितौ ।।

व्याख्या रूपेण निरूपणं, पदार्थदर्शनमिति पर्यन्तम् । व्यपदेशः - व्यवहारः, रूपणव्यपदेशौ पण्डितस्यापि लौकिकमार्गस्थितौ प्रत्याभिलापे व्यवहारे ज्ञाने वोभौ बालपण्डितौ सदृशौ स्तः । वेदान्तवासनावासितोऽयं प्रकृतविषयोस्तीति ।

[१२८] विचित्रास्सन्ति बुद्धयो यथा 'प्रत्यक्षेण यथार्थो दृष्टस्तथैव वयं व्याहरिष्याम' इति । परन्तु व्यस्थितं न प्रत्यक्षं तलवद् दृश्यत इत्यादिनोक्तम्। अतिनिर्मलं गगनतलमित्युक्तिमृषैव भविष्यति तथापि अविप्लुतदृशामेषोक्तिर्दृश्यते,

किमत्र कुर्म इति पुण्यराजः । तलं हि भाग इति, यथोच्यते वृक्षाधस्तल इति वृक्षस्याधो भाग इत्यर्थः । अधोभाग समीप इति यावत् । परन्तु अधोभागस्य गगनस्य भागो न सम्भवतीत्यतिनिर्मलं गगनतलमित्युक्तिमृषैव भवतु । द्वितीयं तु खद्योतो हव्यवाडिव खद्योते बह्निबुद्धिस्तु भ्रमादेव जायते, न हि तत्सत्यमिति । तदानीं वक्ष्यामः प्रत्यक्षस्याप्यव्यस्थेति । अयं श्लोको भारते १११-६६ तमे शान्तिपर्वण्युक्त इति ।

यस्य [१२९] योऽर्थोऽभिप्रेतः स एवार्थो भवतीति अगतिकगतिका वयं किमत्र वयं कर्तुं शक्नुमः इति कारिकाशयः । तत्र पुण्यराजस्त्वाह - यस्य यथैव स्वदर्शनानुसारेण प्रतिभाति तथैव तस्य स शब्दार्थ इत्येवाश्रयणीयमित्यलं निर्वस्तुबहुविकल्पदर्शनेनेति ।

" असमाख्येयानां यथा लौकिकैर्व्यवहारे समाख्यानं तत् प्राज्ञो न प्रकल्पयेत् न विरुद्धं कल्पयेत् किन्तु यथा व्यवहारं यद् वस्तु समाख्यातं तथैव मन्यते" ।

तत्र यत्पुनरुपपत्त्या निश्चीयते तद् दृष्टमेवास्ति, तथैव चोपगम्येत इत्युपसंहारपूर्वकमुच्यते 'तस्मात् प्रत्यक्षमप्यर्थमित्यादिनेति । अत्राम्बाकर्त्री- 'तस्मात् तत्त्वविषयकस्यापि प्रत्यक्षस्य सम्भवाद्, विद्वान् प्रत्यक्षस्य प्रत्यक्षमप्यर्थं युक्तितोऽनुमातन ईक्षेत परीक्षेत इति । तस्माद् यथा दृष्टमप्यर्थं तथैव न प्रकल्पयेदिति भावः ।

निर्णयतः - एतदत्र वैय्याकरणस्याखण्ड एव स्फोटलक्षणो वाक्यार्थोऽध्यासः सम्बन्धः पदार्थस्त्वसत्य एवेति पुण्यराजः । पुनरपि ' पदार्थः पृथग्रूपः सन्नपि वाक्यार्थबोधे वाक्येन तन्निरूपणमेव साफल्यं भजत [१३०] इति । पदार्थविभागविषये तु वाक्यपदीयावसानेऽपि हरिणोक्तं विवरणं लभ्यते । ताश्चात्र कारिकाः प्रस्तूयन्ते -

[१३१] अशब्दमपरेऽर्थस्य रूपनिर्धारणं विदुः ।
अर्थावभासरूपा हि शब्देभ्यो जायते स्मृतिः ।।
[१३२] अन्वर्थवाग्निसम्बन्धाद्दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहाद्यर्थः प्रतीयते ।।
[१३३] क्रियानुषङ्गेण विना न पदार्थः प्रतीयते ।
सत्यो वा विपरीतो वा व्यवहारे न सोऽस्त्यतः।।
[१३४] प्रयोक्तैवाभिसन्धत्ते साध्यसाधनरूपताम् ।
अर्थस्य वाऽभिसम्बन्धकल्पनां प्रसमीहते ।।

[१३५] योऽसौ येनोपकारेण प्रयोक्तृणां विवक्षितः ।
अर्थस्य सर्वशक्तित्वात् स तथैव व्यवस्थितः।।

[१३६] आराद् वृत्तिषु सम्बन्धः कदाचिदभिधीयते ।
आश्लिष्टो योऽनुपश्लिष्टः स कदाचित् प्रतीयते।।

[१३७] संसृष्टानां विवेकित्वं संसर्गश्च विवेकिनाम् ।
नानात्मकानामेकत्वं नानात्वं च विपर्यये ।।

[१३८] वस्तूपलक्षणं शब्दो नापकारस्य वाचकः ।
न स्वशक्तिः पदार्थानां संस्प्रष्टुं तेन शक्यते।।

[१३९] लक्षणाद् व्यवतिष्ठन्ते पदार्था न तु वस्तुतः ।
अपकारात् स एवार्थः कथञ्चिदनुगम्यते ।।

कारिकाणाम्भावः -

१- शब्देभ्यः केवलमर्थावगमरूपा स्मृतिरेव जायते, अर्थस्य रूपनिर्धारणमशब्द एवास्ति । शब्दस्यार्थेन सह सुदूरमेव विप्रकर्षः । ततश्च कथं शब्दोऽर्थमभिदधीतेत्यसत्य एव शब्दार्थः पर्यवस्यतीति पुण्यराजः ।

२- पूर्वोक्तस्य हेतुत्वमुच्यते, यच्छब्दार्थयोर्नास्ति कश्चिद्वास्तवः समन्वय इति बोद्धव्यम् । तत्रोक्तेन यच्छब्देन यथावद् बाह्योऽर्थः प्रत्याय्येत, तदा शब्दसन्निधापितोऽसौ तामर्थक्रियां कथं न कुर्यात् यतश्चाग्नि-सम्बन्धाद्दग्धो दाहमन्यथाऽनुभवति दाहशब्देन च दाहमन्यथाऽवगच्छतीति पुण्यराजः । तस्मान्न शब्दार्थः सत्य इति ।

३- पुनरपि पूर्वोक्तमेव द्रढयति । क्रियानुषङ्गेण विना न पदार्थप्रतीतिरुक्ता तत्र पदार्थः सत्योऽसत्यो वेति स्यात्, तन्न क्वापि प्रतीयते। अत एव व्यवहारेऽपि स पदार्थो नानुभूयते, शुक्तिरूप्यादिवदसन्निति भावः। तस्मात्पदार्थोऽसत्य एवास्ति ।

४- साध्यसाधनयोः परस्परसम्बन्धः काल्पनिक आपेक्षिक एव न तु वास्तविक इत्यादिनाऽपि पदार्थस्यासत्यत्वमुक्तम् । तत्त्वतस्तयोस्स-म्बन्धः शून्यरूप एवास्ति । तत्सर्वं प्रयोक्तैवाभिसन्धत्ते साध्यसा-धनरूपतामिति । तत्सर्वं प्रयोक्तृसमीहामात्रजीवितमिति यावत् । तत्र पुनः पुण्यराजस्त्वाह- 'यदि हि वास्तवमेतत् स्यात्तदा वस्तुस्वभावस्य ब्रह्मणाऽप्यन्यथाकर्तुमशक्यत्वात् व्यस्थितमेवैतद्भवेत्, न च तथा परिदृश्यत इति ।

५-यद्यप्यर्थोऽनेकशक्तियुक्तस्तथापि यत्र प्रयोक्त्रा स विवक्षते तदेवात्मानमुपदर्शयतीति । अर्थो हि परिवर्तनशीलस्वभाव इति, भाषाशास्त्रविदामपि तत्रायं भावः । पदार्थस्त्वसत्य एवाभूदिति ।

६- अश्लिष्टोऽनुपश्लिष्टश्च विवक्षया प्रतीयते । अतिदूरस्थितेष्वपि पदार्थेषु सम्बन्धः कदाचिद्विवक्षाधीन एव भवति । यथा - 'धवखदिरपलाशा एव च्छिद्यन्तामिति तत्र सुदूरव्यवहितानामपि धवादीनां द्वन्द्वे परस्परमितरेतरयोगोऽभिधीयते । पुनरपि तत्रोक्तम्- 'तोयमत्स्ययोर्नैकत्वम्, किन्तु तयोः संश्लिष्टयोरपि विवक्षावशादनुपश्लिष्टत्वं भवत्येवेति रघुनाथशर्माणः ।

७- एकत्वेऽपि कल्पनावशाद् वस्तूनां नानात्वं कथ्यते यथा - राहो शिर इति, एवं नानात्वेऽपि एकत्वं भवति यथा वनमिति । विवेकिनां परस्परविलक्षणानां पदार्थानामयः शलाका कल्पानां संसर्गो वाक्यार्थरूपो दृश्यते । न च पदार्थमात्रविलक्षणार्थो विवक्षितः, पदार्थस्तु सर्वदा सत्य एव कथ्यते ।

८- शब्दो ह्यर्थस्य केवलं सङ्केतमात्रमिति । न हि शब्दोऽर्थस्वरूपं कदाचित् स्पृशति परं दूरस्थः शब्दोऽर्थमात्रमुद्दिशति । उपलक्षणभावेन व्यवहारोपयोगितामुपवर्णयतीति पुण्यराजस्याभिमतम् ।

९- अर्थस्वरूपं न किमपि वक्तुं शक्यते । यथा वक्ता तं निरूपयति तथा तदात्मानं प्रकाशयतीति । केनचिद्वक्त्रा सोऽर्थः कथञ्चिदुपयोगादन्यथा प्रयुज्यते अन्येन च स एवार्थः प्रयोगादन्यथा व्यपदिश्यते तस्मादनेकप्रपञ्चीभूतोऽयमर्थोऽसत्य एवास्तीति सर्वेषां भावः ।

किं बहुना पूर्वोक्तविश्लेषणेन पदार्थोऽसत्य एव प्रतिष्ठापितः । वैय्याकरणनये पदार्थस्यासत्यता, वाक्यार्थस्य च सत्यता व्यपदिष्टे कार्यनिर्वाहप्रयोजनतयेति ।

हेलाराजोऽपि पदार्थस्यासत्यातामुक्तवान् । तत्र अर्थोऽनुमेयः कथितः। तत्र हरिः-

[१४०] **वक्तुरभिप्रायादर्थानां व्यवस्था न शब्दधर्मतः ।**
शब्दादर्थाः प्रतीयन्ते स भेदानां विधायकः ।।
.....
अनुमानं विवक्षायाः शब्दादन्यत्र विद्यते ।।

[१४१] अर्थानां व्यवस्थाऽत्र वक्तुरभिप्रायमात्रादेव कथिता, न तु शब्दधर्मतः सा लभ्यत इति । एवमर्थोऽनुमेय एव भवति । वक्तुरभिप्रायं श्रोताऽनुमानद्वारैव जानाति । प्रतिपतृशब्दश्रवणानन्तरमेवानुमानेनार्थो बुध्यते। तत्र श्रोतुः स्वज्ञानानुरूपमेवानुमानेनार्थं गृह्णाति ।

वाक्यार्थस्य सत्यत्वम् - पदपदार्थानामस्त्यत्वं केवलमखण्डस्य वाक्यार्थस्यैव सत्यत्वं हरिणा प्रतिपादितम् । बहुभिः प्रकारैस्तन्निरूपयितुं शक्यते । तद्यथा -

[१४२] या प्रवृत्तिनिवृत्त्यर्था स्तुतिनिन्दाप्रकल्पना ।
कुशलः प्रतिपत्ता तामयथार्था प्रतीयते ।।

प्रवृत्त्यर्था स्तुतिप्रकल्पना, निवृत्त्यर्था च निन्दाप्रकल्पना तां व्यवहारे कुशल एव प्रतिपत्ता प्रेक्षावान् अयथार्थामभिमन्यते । कुशल एव तां प्रतिपत्ता, तद्विज्ञानवान् भवति ।

ततोऽसावयथार्था तस्य प्रतीयते स्तुत्यर्थेन निन्दार्थेन च तत्र वाक्यस्य प्रवर्तस्व तात्पर्यशक्तिः कैश्चिद्व्यस्थापिता वर्तते । यत्परः शब्दः स शब्दार्थ इति । एवञ्च- गङ्गा निवर्तस्वेति सत्यभूतं वाक्यार्थ सोऽवगच्छतीति पदपदार्थप्रत्ययः सर्वत्रासत्य एव सैवेषां गङ्गेति यो ब्रूयाद्- इत्यादि स्तुतिवाक्यानां न स्वार्थे तात्पर्यम् किन्तु गङ्गोच्चारणे प्रवर्तस्व इति तात्पर्यम् स एव शब्दार्थः । एवं सोऽरोदीद् यदरोदीत् तद्रुद्रस्य रुद्रत्वमित्यादिनिन्दावाक्यानामपि न स्वार्थे तात्पर्यम् । किन्तु बर्हिषि रजतदानान्निवर्तस्व इत्यत्र तात्पर्यम् । पूर्वोक्तं पुनः प्रकटीकर्तुमुद्यते -

[१४३] विधीयमानं यत्कर्म दृष्टादृष्टाप्रयोजनम् ।
स्तूयते सा स्तुतिस्तस्य कर्तुरेव प्रयोजिका ।।

दृष्टप्रयोजनं कर्म - यथा 'यो राजानं भजते स सारंभुङ्क्ते'। अदृष्टप्रयोजनञ्चेति 'योऽग्निष्टोमेन यजते स स्वर्गं गच्छति' इति विलक्षणः प्रवृत्तिनिवृत्तिप्रयोजनोऽन्य एव विभागो वाक्यार्थस्तथाविधवाक्यनिबन्धनोऽप्युपगन्तव्य इति । स्तुतिवाक्यमिदमिति

पदपदार्थयोरभ्युपगमो न सत्यभूत इति प्रतिपाद्यते -

[१४४] व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते ।
असत्योऽपि तथा कश्चित् प्रत्यावायो विधीयत।।

यथा रुदन्तं व्याघ्रो भक्षयतीति, बालस्योच्यते न हि वस्तुतस्तत्र व्याघ्रभक्षणेन तात्पर्यम्, केवलं बालस्य रोदनमेव निषिद्धमिति मा कदाचित्स रुद्यादिति तावन्मात्रं प्रयोजनं वर्तते । तस्माद्वाक्यार्थ एव सत्यः न तु पदपदार्थाभ्युपगम इति । कारिकायां प्रत्यवायः प्रतिकूलतया यदवबुध्यतेऽवेद्यत इति प्रत्यवायः च पुनः-

[१४५] न संविधानं कृत्वापि प्रत्यवाये तथाविधे ।
शास्त्रेण प्रतिषिद्धेऽर्थे विद्वान् कश्चित् प्रवर्तते ।।
सर्पेषु संविधायापि सिद्धैर्मन्त्रौषधादिभिः ।
नान्यथा प्रतिपत्तव्यं न दतो गमयेदिति ।।

सत्येऽसत्ये वेति तथाविधे प्रत्यवाये - शास्त्रतात्पर्यविषये, संविधानम्- प्रतिविधानम् प्रतीकारं कृत्वाऽकृत्वापि कश्चिद् विद्वान् शास्त्रेण प्रतिषिद्धेऽर्थे न कदापि प्रवर्तते । प्रत्यवायोपदिष्टत्वेन शास्त्रेण यदुपदिष्टं प्रतिषेधे तत्र प्रत्यवाय- संविधानमारचय्यापि प्रेक्षापूर्वकारिणः प्रवृत्तिर्न भवतीति ।

द्वितीयकारिकार्थः- सर्पेषु विषापहारकादिकं कृत्वाऽपि सिद्धैः- दृष्टप्रयोजनपरैः मन्त्रौषधादिभिः- सर्पविषापहारकादिभिः नान्यथा प्रतिपत्तव्यम्, 'न दतो गमयेद् यद्दतो गमयेत् 'सर्पा एनं घातुका भवन्ति, इत्यादौ वाक्ये दन्तदंशनपूर्वकं पुरोडाशभोजनस्यानवकाशः, परन्तु केनचिद्यदि सर्पाणां प्रतीकारार्थं दन्तदशनपूर्वकं पुरोडाशभोजनं क्रियते तदा तेन शास्त्रानुष्ठानं परित्यज्य त्वशोभनमेवाचरितमिति । एवं गीतास्वपि-

[१४६] यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमाप्नोति न सुखं न परां गतिम् ।।

तस्माच्छास्त्रप्रतिविधानमेव सत्यार्थे हेतुरिति । एवं वाक्यार्थे शास्त्रस्य सत्यत्वमुपद्यते, न तु पदार्थे वेति । [१४७] पुनरपि स्तुतिनिन्दयोर्प्रवृत्तिनिवृत्ती वोपदिश्यते। तद्यथा-

क्वचित् तत्त्वसमाख्यानं क्रियते स्तुतिनिन्दयोः ।
तत्रापि च प्रवृत्तिश्च निवृत्तिश्चोपदिश्यते ।।

स्तुतिनिन्दावाक्यैः न किमपि प्रयोजनं सिद्धयति, ताभ्यां केवलं प्रवृत्तिनिवृत्ती एव कदाचिदुपदिश्येते इति वक्तुं शक्यते ।

यद्यपि पदपदार्थानामसत्यत्वं प्रसिद्धं, वाक्यार्थस्यैव सत्यत्वं सिद्धमस्ति तथापि पदार्थानां वाक्यार्थ एव निबन्धनमुपपद्यते । तदुक्तम्-

१४८ रूपं सर्वपदार्थानां वाक्यार्थोपनिबन्धनम् ।
सापेक्षा यं तु वाक्यार्थाः पदार्थैरेव ते समाः।।

पदार्था वाक्यार्थे निबद्धाः साफल्यं भजन्ते, अन्यथा विशरा इव एवेति (अनर्थकाश्चेति) वाक्यार्थ एव तेषां समन्वये निमित्तं भवति ।

१४९ पृथङ्निविष्टतत्त्वानां पृथगर्थानुपातिनाम्
इन्द्रियाणां यथा कार्यमृते देहान्न कल्पते ।।
तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम् ।
वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते ।।

अन्यत्रापि-

१५० न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित् ।
पदानामर्थरूपं च वाक्यार्थादेव जायते ।।

पृथक् तत्त्वनिविष्टानां पृथगर्थानुपातिनां इन्द्रियाणां यथा देहाद् ऋते कार्यं न कल्पते तथैव पृथगर्थनिवेशिनां पदानां सर्वेषां वाक्येभ्योऽतिरिक्तमर्थत्वं लोके न दृश्यते । असत्योपाधिसमारूढस्य पदार्थस्यापि विलक्षणवाक्यार्थे महती आवश्यकता भवतीत्युच्यते-

१५१ संसर्गरूपं संसृष्टेष्वर्थवस्तुषु गृह्यते ।
नात्रोपाख्यायते तत्त्वमपदार्थस्य दर्शनात् ।।

पदार्थरूपाद्विलक्षणमेव वाक्यार्थस्वरूपं प्रतिपादितमस्यां कारिकायामिति। वाक्यार्थस्यैव सत्यत्वमुपपन्नं न तु पदार्थानामिति भावः ।

वाक्यार्थः पदार्थानामात्मा-

वाक्यार्थो हि पदार्थानामात्मेति व्यवहारः। वाक्यार्थस्तु सर्वदा सत्यभूत न पदार्थवदसत्य इति । तदुक्तम् -

[१५२] वाक्यार्थे योऽभिसम्बन्धो न तस्यात्मा क्वचित् स्थितः ।
व्यवहारे पदार्थानां तमात्मानं प्रचक्षते ।।

परस्पराभिसम्बन्धस्वरूपः पानकरसादिवदनिर्विभागोऽनंश एव यो वाच्यार्थस्तस्य क्वचित् पृथग्रूपतयात्मा स्थितोऽवधारयितुं न शक्यत इति यावत् । पदार्थानामयः शलाकाकल्पनां व्यवहारावसरे तदात्मानं जीवितमिव प्रचक्षते तद्वशात्तत्प्रतिपादित पदार्थोद्देशेन सर्वस्य कस्यचित् प्रवृत्तिनिवृत्तिसाफल्यात्। स चैकस्मिन् पदार्थे समुदाय एव वा परिसमाप्तौ बोद्धव्य इति पुण्यराजः।

अखण्डो वाक्यार्थोऽभक्त एव

[१५३] पदार्थे समुदाये वा समाप्तो नैव वा क्वचित् ।
पदार्थरूपभेदेन तस्यात्मा प्रविभज्यते ।।
अन्वाख्यानाय यो भेदः प्रतिपत्तिनिबन्धनम् ।
साकाङ्क्षावयवं भेदे तेनान्यदुपवर्ण्यते ।

वाक्यार्थः पदार्थे पदार्थसमुदाये वा न क्वचिदपि परिसमाप्यते, तत्स्वरूपं श्रृङ्गग्राहिकतया विवेक्तुं शक्यते । पदार्थोपाधिद्वारकमेव सर्वदा वाक्यार्थस्य निरूपणं भेदोऽन्वाख्याते सोऽपि तन्निबन्धनभूत एव भवति। तस्मादेव पदार्थातिरिक्त एव वाक्यार्थः कश्चिदित्युपवर्ण्यते । स तु साकाङ्क्षावयव इति पदार्थस्वरूपेण वर्णयितुं शक्य इति ।

स सर्वदा निर्विभक्त एव सन्तिष्ठते, एवम्भूत एव वाक्यार्थः सत्यरूप इति । पदार्थद्वारेण नानारूपत्वेनासौ प्रतीयते तथापि परमार्थतस्तु स एकैवेति योजना-

[१५४] अनेकशक्तेरेकस्य प्रविभागोऽनुगम्यते ।
एकार्थत्वं हि वाक्यस्य मात्रयाऽपि प्रतीयते ।।

मात्रयाऽपीत्यादिना तस्य एक एव निर्विभागस्वरूप इत्युक्तः । तथा-विधस्य तस्यानेकशक्तिखचितस्य प्रविभागोऽनुगम्यते , परन्तु स एकार्थ एव भवति । यथोक्तम्-इग्यणः सम्प्रसारणमितित्यत्र इग्यण् योगे स्थान्यादेशभावलक्षणो वाक्यार्थः स सम्प्रसारणमिति व्यपदिश्यते यद्ययं योगो न युज्यते तदा सम्प्रसारणमित्यनेनैकसंख्यकेन न वाक्यार्थो लभ्यते । एतस्मादेक एवाखण्डरूपवानयं वाक्यार्थः ज्ञातव्य इति ।

बौद्धो वाक्यार्थः-

[१५५]संप्रत्यार्थाद् बाह्योऽर्थः सन्नसन्वा विभज्यते ।
बाह्यीकृत्य विभागस्तु शक्त्यपोद्धारलक्षणः ।।

पूर्वोक्तेन वाक्यार्थस्यैव सत्यत्वमुपपद्यते, पदार्थश्चासत्य एव निर्णीयते, तादृशोऽयं वाक्यार्थो बौद्ध एवाबहीरूप इति प्रतिपादितोऽस्ति । पदार्थस्तु बहीरूपतामुपैति । कारिकायां- सम्प्रत्ययो बुद्धिविज्ञानमित्यर्थान्तरमस्ति। सोऽर्थोऽभिधेयरूपो यस्यासौ तथाभूतात्तस्माद्बौद्धोद्वाक्यार्थाद्बाह्यार्थः सन् बहीरूपतया विद्यमान एवार्थसन्बहिरसत्यभूत एव विभज्यते इति पुण्यराजः। बाह्यीकृत्य- अबाह्यमेव बाह्यं कृत्वेति शुक्तिरूप्यवद् विवेकानवधारणात् दृश्यविकल्पैकीकारेण वाक्यार्थं प्रतिपाद्य पश्चादसौ विभागेनानुगम्यते। स विभागः शक्ति- अपोद्धारलक्षणः इति शक्तीनां पदार्थसम्बन्धिनीनामपोद्धारः पृथक्करणं लक्षणं यस्यासौ तथा । तासां वाक्यार्थेऽविद्यमानतैव तिष्ठति। बौद्धार्थे च न तासामुपयोगोऽन्यत्र बाह्योऽर्थस्योपयोग इति । बहिर्भूतस्यार्थस्य शक्तिसहयोगमन्तरा नास्ति व्यवहारस्तस्माद् बाह्यीकृत्योक्तम् । यदि बौद्धार्थबाह्यार्थयोरेकयोगक्षेमत्वमुच्यते तदा विकल्पेन बौद्धार्थेऽप्यत्र शक्त्यपोद्धारलक्षणो विभागो युक्तश्चेत् स्वीक्रियेत तदा सत्यो बहिरर्थ इति, न तावदसौ सत्यः, सत्यस्तु बौद्धार्थ एवेति निर्णयः ।

वाक्यवाक्यार्थयोः सम्बन्धः-

पुण्यराजेन वाक्यवाक्यार्थयोस्सम्बन्धविषयकः कश्चन विषयः द्वितीयकाण्डादावेव स्पष्टीकृत इति । तत्रोभयोस्सम्बन्धः भिन्नदर्शनविषयत्वेन निरूपितोऽस्ति ।

तत्र वैय्याकरणाः-

[१५६] वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया ।। इति

वाक्यरूपस्यापि शब्दस्य वाक्यार्थे वर्तमानस्य वृत्तिरन्यानपेक्षया स्वरूपेणैव बोद्धव्येति प्रसङ्गः । तत्रानवयव एवैकस्मिन् स्फोटात्मके वाक्ये प्रतिभालक्षणे च वाक्यार्थे वाक्यवाक्यार्थयोरध्यासरूपः सम्बन्धः कथ्यते। अध्यस्तेऽध्यासः, तादात्म्यसम्बन्ध एव स ।

मीमांसादृशा - शब्दार्थयोः कश्चन वाच्यवाचकभावलक्षणो योग्यताख्य एव सम्बन्धो भवति । एकोऽनवयवातिरिक्तेषु सप्तवाक्यलक्षणेष्वयं प्रवर्तते । यतो हि वाक्यादेव वाक्यार्थबोधः जायते । तयोर्वाच्यवाचकरूपः सम्बन्धश्च कल्प्यते । वाक्ये वाचकत्वयोग्यता, वाक्यार्थे च वाच्यत्वयोग्यता तत्तद्धर्मरूपा भवति ।

विज्ञानवादिनां मते शब्दार्थे सर्वत्र कार्यकारणभावः, सम्बन्धो भवति। तत्र बौद्धे पदार्थे वाक्यार्थे वा बौद्धस्य पदस्य वाक्यस्य वा कार्यकारणभावः सम्बन्धः ।

नैय्यायिकानां तु संकेतलक्षणोऽसौ बोद्धव्यः । संसर्गरूपे वाक्यार्थे वाक्यस्य संकेतलक्षणशक्तिरूप एव सम्बन्ध इति ।

[१५७] वाक्यपदीये तु अध्याससम्बन्ध एव निरूपितः ।
संसर्गादयो वाक्यार्थावच्छेदकाः -

कैश्चिदर्थभेदाच्छब्दभेदः, कैश्चिदर्थभेदान्न शब्द भेद इति कथ्यते, शब्दस्यैक्येऽपि शक्तिभेदरूपौ द्वौ पक्षौ भवतः । तत्रानेकपक्षे स्वभावभिन्नेषु तुल्यश्रुतिषु रूपाभेदानवच्छिन्नेषु निमित्तान्तरैः संसर्गादिभिरवच्छेदः क्रियते । एवमेकत्वपक्षे त्वर्थाभिधाने भिन्नासु शक्तिषु श्रुतिसारूप्यात् आनुपूर्वीसाम्यात् अलब्धभेदासु तथैव संसर्गादिभिः निर्णयः क्रियते । तद्यथा-

[१५८] संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ।।
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ।।

कैश्चित्सामर्थ्यस्यैव निर्णयनिमित्तत्वमाम्नायते । तेषां मतेन यो ह्याप्यर्थप्रकरणादिवशादर्थभेदत्वमुपपादयति स ह्यर्थः सामर्थ्यादेव तत्र प्रतीयत इत्यादिकं वदन्ति । सामर्थ्यमेव तत्र हेतुभिस्सहाभिव्यज्यत इति तात्पर्य्यम्।

यद्यपि मञ्जूषादौ [१५९] नागेशेन संयोगादीनामुल्लेखो विस्तरेण सोदाहरणं प्रतिपादितस्तथापि पुण्यराजादिभिः तत्र विशिष्य लौकिकैरुदाहरणैस्सह शास्त्रीयान्युदाहरणानि सूत्राणां प्रस्तुत्या दीयन्ते । इयांस्त्वत्र विशेषः ।

१- संसर्गः-

संयोगो हि संसर्गः, स चावच्छेदहेतुः । तथा-अवाद्ग्रः [१६०] इति पाणिनिसूत्रमुदाह्रियते, तत्र गृधातुरर्थद्वये प्रसिद्धः, तुदादौ निगरणोऽर्थः, क्रियादौ शब्दोऽर्थश्च भवति । अवाद्ग्रो निगरणार्थकस्य प्रयोग एवास्ति न च क्वापि गृणातेरवाद् पूर्वक्प्रयोगः केनचिदुपलब्धः । सर्वत्र निगरणार्थकतुदादेः गिरतेरेवावोपसर्गकनिष्ठात्मनेपदप्रयोगो लभ्यते । अवाद्ग्रः इति सर्वत्र तुदादिनिष्ठस्यात्मनेपदम्, न तु क्रयादिगृणातेरयं प्रयोगोऽस्ति, यतो हि क्रयादौ तङन्तस्य न भवति । तत्र भाष्यम् न चावयवपूर्वस्य गृणातेः प्रयोगोऽस्ति। तस्मान्मन्यामहे यदवाद् गिरतेरेव तङि व्यवहार इति कस्मात्संसर्गादित्युच्यते। अवात् प्रयोगस्तु गिरतेरेव न गृणातेरिति । निगरणन्तु ग्रासस्यावस्त्रंसनं तत्तु तुदादि गिरतेरिति सम्भवः।शब्दार्थकगृधातोस्तु नास्त्रंसनपूर्वकमुच्चारणमित्यस्माच्छास्त्रे संसर्गस्योदाहरणं भवितुमर्हति । तत्र पुण्यराजस्त्वाह-यस्यावेनोपसर्गेण सम्बन्धः सम्भवति स एव गृह्यतेः गिरतिः । गृणातेस्तु स्वभावादेवार्थवि-रोधात् सम्बन्धो न जायत इति । अयं निर्णयः संसर्गादेव जायते ।

व्याकरणस्यान्यग्रन्थेषु 'सकिशोरा धेनुरानीयताम्', सवत्साधेनुरानीय-तामित्यत्र किशोरोऽश्वशावकनियतेन संसर्गेण किशोरलक्षणेन विशेषावसायनिमित्तेन 'वडवाया' एवार्थनिर्णयः । तथा च सवत्सा धेनुरित्यस्मात् वत्ससंयोगाद्गोर्धेनोरेवार्थसम्भवो भवति केषाञ्चिन्मतेन गौर्धेनुरित्यत्र रूढ्यर्थवशात्संसर्गस्य नोपयोगः कथ्यतेऽत्र प्रसङ्ग इति ।

संयोगस्तु-नानार्थशब्दशक्त्यान्तरवृत्तितया प्रसिद्धत्वे सति सम्बन्धविशेष एव भवति। साहित्यग्रन्थेषु सशङ्खचक्रो हरिरित्युच्यते । नानार्थकस्य नानालिङ्गनिष्ठस्य हरिशब्दस्य शंखचक्रसंसर्गेणाच्युते विष्णौ वाऽयं शब्दः नियम्यत इति ।

२- **विप्रयोगः**- पूर्वोक्तस्य एवं संयोगवद्विप्रयोगोऽपि हेतुर्यथा- 'भुजोऽनवने' पाणिनीये[१६१] सूत्रेऽस्मिन् विप्रयोगेनार्थविशेषस्य निर्णयः जायते। तद्यथा- भुज् पालनाभ्यवहारयोः भुज्कौटिल्ये इत्यस्य ग्रहणं न भवतीति तात्पर्य्यम् । यतो हि संयोगवद्विप्रयोगस्यापि विशेषनिर्णयहेतुता जायते ।

सहचरितासहचरितयोः [१६२] सहचरितस्यैव ग्रहणमिति विशब्दसाहचर्यादुपसर्गस्यैव पराशब्दस्य ग्रहणमिति स्पष्टम् । सदृशयोरेव सहचरणं भवति तत्र सहचरितशब्दोऽपि साहचर्यस्य सादृश्यस्य वा वाचकः। 'विपरा' उपसर्गौ अनुपसर्गत्वेऽपि साहचर्यादुपसर्गस्य वाचकौ भवतः । एतद्विषये साहचर्यमेवार्थनिर्णयस्य नियामकमाहुः । सर्वत्र तादृशसूत्रेषु ध्वनितमिति । द्विस्त्रिश्चतुरिति सूत्रेऽपि साहचर्येणैव कृत्वोऽर्थस्य ग्रहणम्। दीधीवेवीटामित्यत्र धातुसाहचर्येऽप्यागमस्येटो ग्रहणमित्युच्यते ।

शब्दशास्त्रे साहित्ये च साहचर्याद् रामलक्ष्मणावेवोक्तम् । तत्र सादृश्यमेवार्थनियामकमिति । तत्र रामशब्दोऽनेकार्थकस्तथैव लक्ष्मणशब्दोऽपि नानार्थकोऽस्ति । अस्तु नात्र लक्ष्मणसाहचर्याद्रामो भार्गवादिः, रामसाहचर्याच्च न लक्ष्मणः सारसादिः, किन्तूभयोः शब्दयोः साहचर्येण दाशरथौ पुत्रौ नियम्येत इति भावः । रामलक्ष्मणयोः सादृश्यं दशरथापत्यरूपमस्ति । तुल्यधर्मानामेव साहचर्यमिति प्रसिद्धम् । यथोक्तमम्बाकत्र्यामेकं पद्यम्-

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गमैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ।।

पुनरपि सुन्दरकाण्डे श्रीहनुमद्वाक्यम्-

स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ।

४- **विरोधिता** - विरोधिनोः कयोश्चित् विरोधित्वेनोल्लेखेनार्थविशेषस्य निश्चयो विरोधिता कथ्यते । एवं विरोधादप्यर्थोऽवधार्यते । यथा रामार्जुनावित्यत्रार्जुनसन्निधाने जामदग्न्यस्यैव प्रतीतिः ।

५-**अर्थः**- अयं तु शब्दत्वाच्छब्दार्थनिर्णयं प्रकल्पयति । तद्यथा शास्त्रे '[१६३] पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' इति सूत्रे गुणेन सह षष्ठी न समस्यते। तत्रार्थशब्दस्तु प्रत्येकं सम्बद्ध्यते । अत एव गुणशब्देन आदेङां

ग्रहणं न भवति । तथा 'न [१६४] शसददवादिगुणानाम्' सूत्रे गुणशब्दनात्र शसादीनां ग्रहणं सामर्थ्याद् आदेङां भवति । आश्रयिणो ग्रहणं न भवतीति अर्थप्रसङ्गात्सिद्धम् । भाष्येऽर्थप्रसङ्गे प्रकरणप्रसङ्गे च बहूक्तमत्र संगच्छते। तत्र 'एकः पूर्वपरयोः इति सूत्रे भाष्ये' 'अर्थात् प्रकरणाद्वा लोके द्वयोरेकस्याभिनिर्वृत्तिर्भवति । अर्थः प्रयोजनं भवति ।

एवं अञ्जलिना जुहोति, अञ्जलिना सूर्यमुपतिष्ठते अञ्जलिना पूर्णपात्रमाहरतीत्यत्र जुहोति पदार्थवशात् विभिन्नार्थकोऽयमञ्जलिशब्दः ।

साहित्ये - स्थाणुं भज भवच्छिदेऽत्र भवच्छेदरूपेण हरे शिवे नियम्यतेऽयं स्थाणुशब्दः । अर्थस्य नियामकत्वमुक्तम् ।

५- **प्रकरणम्**- प्रकरणमप्यशब्दं (शब्दातिरिक्तं) शब्दार्थनिमित्तं भवति । तद्यथा शास्त्रे 'कर्तृकरणयोस्तृतीया' इत्यत्र प्रकृत्यादिभ्य उपसंख्यानम् इत्यादिना वार्तिकेन प्रकृत्याभिरूपः 'प्रायेण' वैयाकरणाः' बहवो वैय्याकरणा तथा एव तत्र प्रायः येन तेऽधीयते इत्यादिषु कारकाणां (कर्तृकरणयोः) अभावात् कारणशब्देन क्रियादं न श्रूयते परन्तु 'शब्दवैरकलहभ्रकण्वमेघेभ्यः करणे इत्यत्र' करणशब्देन धात्वधिकारेण क्रियापदं प्रतीयते । तद्यथा - शब्दं करोति शब्दायते । शब्दायते मधुरमनिलैः कीचकाः पूर्यमाणा' इति **कालिदासः** । 'कस्तस्मै प्रथमायमानिषु महावीराय वैरायताम्' इति मुरारिः। द्वितीयेनोपमन्युनाम्ना मुनिना सह कलहायमानो दुर्वासाः साम गायन् क्रोधान्धो विस्वरमकरोदिति हर्षचरितम् । सर्वमेतसिद्धान्तुधानिधौ द्रष्टव्यम्। पुनरपि सैन्धवमानय इत्यादौ संग्रामप्रस्तावे सैन्धवपदेनाश्वानयनपर्यवसायि भवति, किमपि भक्षणप्रस्तावे तदेव पदं लवणप्रतीतिमुपजनयति । पारिभाषिकशब्दानामपि प्रकरणादर्थज्ञानं भवति । यथा- व्याकरणाध्ययने धातुपदेन भ्वादयः कथ्यन्ते, आयुर्वेदादौ ताम्रादिः कफादिर्वार्थो भवति । भर्तृहरिणार्थनिर्णये पदे पदे प्रकरणस्य निमित्तत्वमुच्यते -

यथाप्रकरणं द्वारमित्यस्यां कर्मणा श्रुतौ ।

बधान देहि वेत्येतदुपायादधिगम्यते ।।

प्रकरणप्रसङ्गे भाष्ये तरप्तमपौ घः सूत्रे प्रदीपे - अतिशायनिकप्रकरण एव तादौघः पितौ धः, इति वक्तव्ये प्रकरणोत्कर्षेण संज्ञाकरणं स्वार्थेऽपि

तरवस्ति । वेदमन्त्राणामपि अर्थः प्रकरणबलादेवोपपन्नो भवति । वस्तुतस्तु प्रकरणं - वक्तृश्रोतृबुद्धिस्थितं भवति, तद्यथा - सर्वं जानाति देवः इत्यत्र देवो भवानेव जानातीत्यर्थः । पाश्चात्यभाषाशास्त्रीणामपि मतेन प्रकरणमेवार्थनिश्चये प्रधानतमं कारणं भवति । ओग्डेन रिचर्ड प्रभृतिभिः प्रकरणस्य सर्वाशायित्वमुक्तम् ।

काव्यप्रकाशे प्रकरणार्थयोः किञ्चित्करो भेदोऽपि निरूप्यते । तद्यथं प्रकरणमशब्दम् अर्थस्तु शब्दवानित्यनयोर्भेदः ।

७- **लिङ्गम्** - संयोगातिरिक्तसम्बन्धेन सम्बद्धो व्यावर्तको धर्म विशेष इति । चिह्नविशेषेणापि क्वचिदर्थविशेषस्य परिज्ञानं भवति । तद्यथा- शास्त्रे यानि यानि ज्ञापकानि सन्ति तानि तानि लिङ्गान्येव सन्ति । तेभ्यश्चार्थविशेषग्रहणादेव निर्वाहो भवति । तत्र हृदयस्य हृल्लेखयदणलासेषु' सूत्रमुदाहर्त्तुं शक्यते, तत्र लेखग्रहणज्ञापकेन अणन्तस्यैव ग्रहणं भवति न तु घञन्तस्य ।

अण्कृते हृदयस्य प्रियं हृद्यम्, हृदयं लिखति हृल्लेखः, हृदस्येदं हार्दम्, घञि हृदयलेख एव भवति ।

शास्त्रे - अक्ताः शर्करा उपदधाति, तेजो वै घृतमित्यादौ अनेकस्याञ्जनद्रव्य स्य सम्भवे तेजो घृतस्य स्तुतिरुक्ता । एतस्माल्लिङ्गघृत-साधनत्वभञ्जिक्रियायाः शर्करा कर्मिका निर्द्धार्यते । पशुमालभेतेत्यत्रापि पशुत्वसम्बन्धिषु प्राणिषु सत्सु छागस्य हविषो वपाया मेदस इति लिङ्गछागैकार्थस्मवायिपशुत्वं प्रतीयत इति पुण्यराजः ।

काव्यप्रकाशादौ लिङ्गस्य नियामकत्वं कुपितो मरकध्वज इत्यादिना सूचितम् । मकरो नक्रस्तदाकारः स एव वा ध्वजो यस्येति विग्रहेऽनेकार्थकस्य मकरध्वजशब्दस्य वाचकत्वं मकरध्वजाकारध्वजसमुद्राभ्यां व्यापृतेन समवाय- संबन्धवता कोपरूपलिङ्गेन कामे मन्मथे नियम्यत इति ।

८-शब्दान्तरसन्निधिः- इत्यादिनाऽपि विशेषावगतिर्जायतेऽर्थऽस्य सन्निधिस्तु शब्दसामीप्यम् तद्यथा- कुत्सितानि कुत्सनैः सूत्रस्योदाहरणं वैयाकरणखसूचिः न हि तत्र व्याकरणं कुत्सितं न च वैयाकरणकुत्सितः यतो हि व्याकरणस्य वेदाङ्गत्वमुपपादितं पूर्वम् । तत्र खसूचनेन व्याकरणस्या ध्ययनस्य निष्फलत्वमुपगच्छति । वैयाकरणस्तु बुधः कीर्तितः खसूचियोगेन

तस्याध्ययनं निष्प्रयोजनमिति रीत्या शब्दान्तरसन्निधिवशादर्थविशेषपुरस्कारः। एवमन्यत्रापि 'उपमित व्याघ्रादिभिः सामान्यप्रयोगे सूत्रे-'पुरुषोऽयं व्याघ्र इव बलवान्' 'पुरुषोऽयं व्याघ्र इव शूरः' इत्यादावपि सामान्यार्थस्य शब्दान्तरसन्निधिवशेन विशेषार्थनिर्णयो जायते ।

लोके 'रामो जामदग्न्यः' देवस्य पुरारारेति प्रयोगेषु संन्निधानाद् रामः परशुरामः देवः - शम्भुरिति शब्दान्तरसन्निधानात् नियम्यत एव ।

९-सामर्थ्यम् - निर्दिष्टजननशक्तिकारकत्वं चेति । एतेनापि विशेषप्रतिपत्तिर्जायते । तत्र 'प्रथमानिर्दिष्टं समास उपसर्जनम्' सूत्रसामर्थ्यादेक-विभक्तिचापूर्वनिपाते सूत्रे समासशब्दोऽनुमीयते स तु प्राथमिककल्पिकः समासशब्दोऽस्ति । सूत्रेष्वपि पूर्वसूत्रसामर्थ्यादर्थविशेषावगतिर्जायते । 'अनुदरा कन्या' अभिरूपाय कन्या देयेत्यत्र प्रथमकल्पे कन्याया उदराभावो नास्ति अपि च सामर्थ्यादुदरस्य विशेषसौन्दर्यप्रतीतिः, द्वितीयकल्पे अभिरूपतराय कन्या दानस्य फलमुक्तमस्ति तत्रापि अभिरूपतराय पुरुषवरविशेषाय न तु अभिरूपाय पशुविशेषाय उद्वा मूर्खायेति ।

साहित्यादौ मधुना मत्त कोकिल इत्यत्र सामर्थ्यस्य नियामकत्वमुप-पादितम् । तत्र हि मधुशब्दस्य वाचकत्वं वसन्ते सामर्थ्येन नियम्यते ।

तत्र मेदिनीकोशे -

मधुपुष्परसे क्षौद्रे मद्ये न तु मधुद्रुमे ।
वसन्तदैत्यभिच्चैत्रे स्वाज्जीवन्त्यां तु योषिति ।।
नानार्थकमधुशब्दोऽत्र वसन्त एव प्रसिद्ध इति वदन्ति ।

१०- औचिती- योग्यता एव भवितुमर्हति । वाक्य औचित्यादपि शब्दार्थव्यवस्थापनं दृश्यते । तद्यथा- 'पुंयोदाख्यायाम्' सूत्रे 'गोपालादीनां प्रतिषेध' इति वार्तिकम् । पुंयोगस्तु पुंसा योगः पुंयोगः, दाम्पत्यादिसम्बनः, तस्माद्धेतोर्यत्प्रातिपदिकं स्त्रियां वर्तते ततो ङीष् भवति । आख्याग्रहणं गुणभूतेनापि पुंसा सम्बद्धयते, अन्येन सम्बन्धासंभवात् । गणकादयो हि शब्दाः पुंयोगात् स्त्रियां वर्तमाना न पुंयोगाख्या भवन्ति । स्त्रियां च पुंयोगमन्तरेण न प्रवर्तन्त इति स्त्रियाऽपि नाख्याः । तदानीं प्रष्ठादयः शब्दा

अग्रगामित्वादिनिमित्तसमाश्रयणेन प्रवर्तन्त, तस्य च निमित्तस्य पुंसि औचित्येन संभवात् पुंवाचकास्ते शब्दा अप्युच्यन्ते । तस्मादौचित्यादपि विशेषार्थनिर्णयो भवति । प्रष्ठादयो निमित्तत्वेनोपदर्शितास्सन्ति, ।

पुण्यराजस्त्वाह -सीरासिमुसलैः इत्यत्र तृतीयान्ते केवलैरनिर्दिष्टक्रिया पदैरप्यौचित्याद् विलेखनयुद्धावहन -लक्षणसमुचितक्रियापदाक्षेपशब्दार्थनिर्णयः पर्यवस्यति ।

अन्यत्रौचित्याः नियामकत्वं 'पातु वो दयितामुखामित्यादिना कथितम्। तत्र कोशे मुखशब्दस्य नानार्थेषु साम्मुख्यं एवात्र गृह्यते । न च मुखं शब्दस्य वदनमर्थः । दयितामुखं पातु सम्मुखीभवत्वेत्यर्थः । पुनरपि-

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ।।

अस्मिन्पद्ये सर्वत्र क्रियाऽनुक्तैवास्ति तत्र साधनान्येवौचित्यवशात् स्व समुचित् क्रियाविशेषबोधेन अवान्तरवाक्योपप्लावनप्रत्यायनपूर्वकाप्रस्तुत-प्रशंसालक्षणस्य वाक्यार्थस्य प्रतीतिमुपजनयन्ति । यथा च यो निम्बं परशुना छिनत्ति यश्चैनं गन्धेनानुलिम्पति सर्वस्य तस्य दुस्त्यजा प्रकृतिरिति कृत्वा कटुरेव दौर्मनस्य दाननिपुण एव इति कस्यचित्खलत्वप्रतिपादनमत्र तात्पर्यार्थः।

११-देशः- ग्रामादिस्वरूपस्तस्मादपि शब्दार्थनिर्णयो । तद्यथा- 'मथुरायाः प्राचीनादुदीचीनाद्वा नगरादागच्छामीत्युक्ते' नगरविशेषात् पाटलिपुत्रादागच्छामीति गम्यते । पाटलिपुत्रस्य मथुरासम्बन्धिनोश्च प्राचीनोदाचीनभागयोर्विद्यते प्रत्यासत्तिरिति कृत्वा देशवशादर्थनिर्णयोऽत्र जायते । एतच्चान्यः भात्यत्र परमेश्वर इति राजधानीरूपाद्देशाद् राजनि परमेश्वरपदस्य नियामकत्वमिति वदन्ति ।

१२-कालः- एतस्मादपि शब्दार्थनिर्णयव्यवस्था दृश्यते । कालः- दिवसादिः- तद्यथा-द्वारमित्युक्ते शिशिरे पिधेहि, ग्रीष्मे समुद्घाटयेति कालेनार्थनिष्पत्तिर्जायते । एवं चित्रभानुर्भाति प्रयोगे चित्रभानुशब्दः सूर्यस्य अग्नेश्च वाचकोऽस्ति । दिवा प्रयोगे स सूर्यो भवति, निशि स एवाग्निपदवाचकः कालभेदेन भवति । चित्रभानुशब्दस्तु चित्रा भानव किरणा यस्येति विग्रहेऽनेकार्थस्य चित्रभानुपदस्य कालेन नियमनं भवति ।

१३ व्यक्तिः- लिङ्गम् पुंस्त्वादिरूपम् तस्मान्निर्णयोऽर्थस्य ब्रूते । तद्यथा अर्धं नपुंसकम् सूत्रेऽर्धशब्दः नपुंसके प्रयुक्तः पुल्लिंगश्चार्धशब्दो वर्तते । मितं शकलखण्डे वा पुंस्यर्द्धोऽर्धं समेंऽशके इत्यमरः । समांशवाच्यर्धशब्दो नपुंसकमात्रलिङ्मित्यर्थः । तथैवोक्तं भाष्ये - समप्रविभागे नपुंसकलिङ्गः, अवयववाची पुल्लिङ्ग् इति । तत्र प्रदीपोक्तमपि नियमेन नपुंसकलिङ्गो न भवतीत्येव परमेतद् ।अवयववाची त्वभिधेयवशाद् सर्वलिङ्गस्तथा च प्रयोगो दृश्यते अपूपार्धम्मया भक्षितम् दन्तार्धमधस्थात् पतितम् तदत्र नपुंसकग्रहाद् यस्मिन्नर्थविशेषे नियमेन नपुंसकग्रहणात् यस्मिन्नर्थविशेषे नियमेन नपुंसकत्वं तदर्थवृत्तिरेवार्धशब्द आश्रीयत इति । तथा च कालिदासः-

पणार्धक्रीतताम्बूलचर्वणाद् गर्विताननाः ।
अनभ्यासगलल्लाला यान्त्येते वारयात्रिकाः ।।इति ।।

पुण्यराजस्त्वाह-ग्रामस्यार्धं लभेतेत्यत्र समप्रविभागोऽर्धशब्दो नपुंसकेन परामर्शाद्ग्रामस्यार्धं स्वयमेव प्रतीयते ।तस्माल्लिङ्गादप्यर्थनिर्णयः सञ्जायते।

१४ स्वरः- उदात्तादिः । स्वरभेदेनाप्यार्थविशेषनिर्णयो भवति । तत्र उदक्च

विपाशः सूत्रे विपाश उत्तरे कूले ये कूपास्तेष्वभिधेयेष्वञ् प्रत्ययो भवति । अणोऽपवादः । अबह्वजर्थ आरम्भः । इत्यत्र कूप आद्युदात्तश्रवणाद्विपाश उत्तरस्य विशिष्टैव प्रतीतिः । अन्तोदात्तश्रवणे तद्विपरीतस्य दक्षिणतो विपाश इति प्रतीतिः । एतत्सर्वं स्वरमाहात्म्यादेव लभ्यतेऽर्थः ।

स्वरादर्थनिर्णयो वेदमन्त्रेषु प्रसिद्ध इति तत्र स्थूलपृषतीमालभेतेत्यत्रान्तोदात्तस्य श्रवणात् स्थूला चासौ पृषतीत्येवंविधार्थप्रतीतिः । पूर्वपदप्रकृतिस्वरे स्थूलानि पृषन्ति यस्यामित्यन्यपदार्थप्रतीतिः । एवं 'इन्द्रशत्रुर्वर्धस्व' इत्यत्र तत्पुरुषोऽन्तोदात्तत्वं तेन चेन्द्रस्य शत्रुरित्यर्थः, बहुव्रीहौ च आद्युदात्तस्वरस्तेन इन्द्रः शत्रुर्यस्येति । एतद्विषकसन्देहो व्याकरणाध्ययनेन निवर्ततेऽत एवाध्येयं व्याकरणमिति व्याकरणप्रयोजनेष्वयं विषयः समुपपन्न इति ।

आदय इत्यस्मात्पुण्यराजः षत्वसत्वणत्वनत्वादीन् परिगणयत् साहित्ये आदिनाऽभिनयादयो गृह्यन्ते ।

१५- षत्वसत्वाभ्याम्- एताभ्यामपि विशेषार्थावगतिरिति । तद्यथा-सुः पूजायाम् सूत्रोदाहरणं सुस्तुतमित्यत्रानुपसर्गान्न षत्वम् । सुषिक्तमित्यत्र पूजाविरहे षत्वं भवति । एवं सुष्ठुरित्यत्रातिशयमात्रं विवक्षितं न पूजेत्याह । 'प्रशंसानुमते पूजाभृशकृच्छ्रसुखेषु सुः भवति । पुनरपि 'अतिरतिक्रमणे चे' ति अतिक्रमणमुचितादधिकानुष्ठानम् । अतिसिक्तम् 'अतिस्तुतम्' बहुतरं समीचीनमिति क्रमेणार्थः समीचीनमिति क्रमेणार्थः । उपसर्गे तु षत्वं भवत्येव । षत्वेऽर्थान्तरस्यावगतिरिह जायते ।

१६-णत्वनत्वाभ्याम् -एतयोरन्तरेऽप्यर्थविशेषो भवति । तद्यथा 'उपसर्गादसमासेऽपि णोपदेशस्य इति' सूत्रे- 'ण' उपदेशे यस्यासौ णोपदेशः। णोपदेशस्य धातोर्यो नकारः तस्य उपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति असमासेऽपि, समासेऽपि प्रणमति परिणमति, प्रणायकः, परिणायकः, इत्यत्रोपसर्गसमाश्रयणेन प्रणमनक्रियाकर्तुः प्रतिपत्तिः । णत्वाभावे प्रगता नायका अस्माद् देशात् प्रनायको देश इति-अन्यपदार्थप्रतीतिरेताभ्यां भवति ।

एतदतिरिक्तं वाक्यस्यापि हेतुत्वं एताभ्यां कारिकाभ्यां पूर्वस्यां कारिकायामुदाहृतम् । तद्यथा-

वाक्यात् प्रकरणादर्थादौचित्याद्देशकालतः ।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ।।

१७- वाक्यम् वाक्यादप्यर्थनिर्णयो भवति । तद्यथा-कर्मणि द्वितीयेति वक्ष्यत्याचार्यस्तत्राश्रयाश्रयिणोर्वाक्यादनिर्णयस्त्वावतिष्ठते, द्वेयेकयोर्द्विवचनैकवचने, अनभिहिते, प्रभृतिसूत्रेषु वाक्यघटितानि प्रकरणानि सन्ति । तत्र प्रातिपदिकादनभिहिते कर्मादौ यदेकत्वादि तत्र द्वितीयाद्या विभक्तयो भवन्ति। इत्येवमर्थस्य संगतेराकांक्षादिवशाद् भिन्नेष्वपि प्रकरणेषु तात्पर्यालोचनके श्रोतरि वाक्यीयसम्बन्धेऽर्थनिश्चयाय पर्यवसतीति वाक्याच्छब्दार्थनिर्णय इति पुण्यराजः । तत्रैव पुनः कटं करोति भीष्ममुदारं दर्शनीयमिति कटं पदस्य करोतिना सम्बन्धे भीष्मपदं बृहत्कटवाची वर्तते । न च भीष्मेण भीष्मपितामहस्य परिज्ञानं सम्भवमिति ।

साहित्यशास्त्रेऽभिनयस्यवाक्यार्थत्वम्-

१८-अभिनयः- साहित्यग्रन्थेष्वभिनयोऽपि आदिना पदेन व्याख्यायते। तदपि हेतुरिति ते ब्रुवन्ति । तद्यथा-

२ एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ।।

अभिनयस्तु संकेतमात्रम् । संकेतेनैवार्थोऽत्र नियम्यते कदाचिदत्रेति । उपर्युक्तं सर्वमपि शब्दार्थनिर्णयोपायानां दिङ्मात्रं ज्ञातव्यम् । एतदतिरिक्ताः प्रकारा अपि भवितुमर्हन्तीति मन्यते पुण्यराजः । पुनश्च १-वक्तृभावना २-अर्थकृदान्तर्यम् अन्वयव्यतिरेकः, व्याख्यानम् ज्ञानरूपप्रकरणम् सामान्यव्यावहरिकञ्च ज्ञानम्, शब्दाध्याहारः, युक्तिसंगताऽऽदयोऽपि शब्दार्थनिर्णयहेतवो भवितुमर्हन्तीति वक्तव्यम् ।

अमुं विषयमधिकृत्य भाषाशास्त्रिणामपि अनेके ग्रन्थाः सन्ति विशिष्य तत्र 'प्रकरणादर्थज्ञानमित्यस्मिन् विषये' हर्मन पाउल प्रभृतिभिः पाश्चात्यभाषाशास्त्रविद्भिः यथा समयं विवेचनं कृतमस्ति । तत्र सामर्थ्यमेव रूपान्तरेण प्रकरणनाम्ना कथ्यते यस्यार्थनिर्णये हेतुत्वं भवति । हर्मन पाउल महाशयस्य ग्रन्थः 'प्रिन्सिपल ऑफ दि हिस्ट्री ऑफ लैंग्वेज' इत्यस्य चतुर्थोऽध्यायोऽर्थविषयक एवास्ति, तत्रार्थनिर्णयोपायानां निर्देशोऽस्ति तद्यथा-

१- वक्तृश्रोतृसमानावधारणम् ।

२- वक्तृप्रयुक्तपूर्ववाक्यानि ।

३- विशेषसामार्थ्यम् समानवयः श्रेणी व्यापारादिभिरिदं सामर्थ्यं लक्ष्यते ।

४- शब्दान्तरसन्निधिः ।

५- अनियतार्थयुक्तशब्दसम्बन्धेनेति ।

पूर्वोक्तार्थनिर्णयोपायानामुदाहरणानि । तद्यथा-

१- आचार्येण पाठारम्भे- 'प्रकृतमनुसरामः' तदुक्तं तत्र गम्यते शिष्येण क्व पाठ इति । कश्च प्रसङ्ग इति । तत्र प्रकृतपाठेनोभयोः

वक्तृश्रोतृसमा- नावधारणं जायते । यत् ह्यः किं पठितम् , किञ्चाद्य पठनीयम् इति । क्वचिदिङ्गितेनापि एतयोरभिधानं प्रष्टुं शक्यम् ।

२- व्याकरणाध्ययनावसरे कदाचिद् गुरुणा केवलं यदि शास्त्रे, शास्त्रं, वोच्यते तदा तदेवावगम्यते यद् व्याकरणशास्त्रेणैव तेषामाशय इति ।

एतस्मात्पूर्ववाक्यप्रसङ्गेनोत्तरवाक्यश्रवणेनार्थावगतिर्जायते ।

३- विशेषसामर्थ्येनापि शब्दार्थोदयः पर्यवस्यति ।तद्यथा-अहं सोमवासरे ग्रामं गमिष्यामि, ग्रामनाट्यशालायाम् आयोजनमस्ति तत्र त्रिगर्तनर्तकानां नृत्यमस्ति। इत्यत्र आगामिनि सोमवासरे,नगरस्य समीपे नाट्यशलायां त्रिगर्ताणां नटविशेषाणां त्रिगर्तविशिष्टं नृत्यमित्यार्थावगतिर्जायते। एतद्वाक्यस्यार्थबोधे वक्तृश्रोतृसमानत्वादुभयोरपि समानबोधो भवति।

४-शब्दान्तरयोगेनार्थनिर्णयो भवति । यथा-पीठमिति शब्देन वैष्णवीशब्दान्तरयोगे 'वैष्णवीपीठम्' पुनश्चात्र त्रिकूटशब्दसन्निध्येन त्रिकूटवैष्णवीपीठमित्यर्थावगतिः भवति ।तच्चासीमितः सीमितस्यार्थस्य परिज्ञानं जायते ।

५-सम्बन्धिशब्दः -अनियतार्थकस्य सम्बन्धिशब्दयोगेऽर्थोदयः। रामस्य ग्रन्थः तत्र ग्रन्थविशेषस्यार्थः समसम्बन्धेन निश्चीयते ।तत्र कटिशब्दस्य निश्चितोऽर्थः गम्यते ।

एतत्सर्वमपि भर्तृहरिसाम्यम् आवहति । इमेऽर्थोपायाः प्रत्यक्षपरोक्षदृशा पूर्वोक्तेषु निर्णयेषु अन्तर्भावत्वं भजन्ते । इत्यत्र हरिप्रोक्तस्य सामर्थ्यस्य संसर्गस्य वा कीर्तनं कीतर्यते ।

भोजोक्तवाक्यार्थदोषाः-

षोडशवाक्यादोषान् संदर्श्य वाक्यार्थस्यापि षोडश दोषानुद्धरतीति । ते वाक्यार्थदोषाः २-अपार्थं व्यर्थ, संसशयं, अपक्रमं, खिन्नं, अतिमात्रं, पुरुषं, विरसं, न्यूनोपमं, अधिकोपमं, असदृशोपमं, अप्रसिद्धोपमं, निरलङ्कारं, अश्लीलं, विरुद्धञ्चेति ।

१-अपार्थम् समुदायार्थहीनं ह्यपार्थम्भवति । यथा-

जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि ।

तं ब्राह्मणी पृच्छति पुत्रकामा राजन्तुमायां लवणस्य कोऽर्थः ।।

२-**व्यर्थम्**- यन्निष्प्रयोजनं गतार्थञ्चेति तद्व्यर्थम् । यथा-

आहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं स च ।
अहौषीत्स्वतनु ब्रह्मौ दृष्ट्वाप्तौ रामलक्ष्मणौ ।।

३- **एकार्थम्**- उक्तभिन्नार्थमुच्यते । यथा-

प्रसाधितस्याथमधु द्विषाऽभूदन्यैव लक्ष्मीरिति युक्तमेतत् ।
वपुष्य शेषेऽखिललोककान्ता सानन्याकान्ता ह्युरसीतरातु ।।

४- **ससंशयम्** -यत्रानिश्चयकृतं भवति तदिति । यथा-

मनोरथप्रियालोकरसलोलेक्षणे सखि ।
आराद् वृत्तिरियं माता न क्षमा द्रष्टुमीहयाम् ।।

५- **अपक्रमम्** - यस्य क्रमच्युतश्तदपक्रमुच्यते । यथा-

काराविऊण खउरु गामडडो भज्जिमो अजिमिओअ ।
णक्खत्तं तिहिवारे जोइसिअं पुच्छिअं चलिभो ।।

६- **खिन्नम्** - जात्याद्युक्तावनिर्व्यूढं खिन्नमुच्यते । यथा-

वेवाहि ऊण बहुआ सा अरअंदो लि आए णिजंती ।
रोचइदि अरी तस्सिं नेच्चइ वासेन पच्चंतो ।।

७- **अतिमात्रम्**- यल्लोकातीतमर्थं तदतिमात्रमुच्यते । यथा-

भृङ्गेण कलिकाकोशस्तथा भृशमपीडयत् ।
ववर्ष विपिनोत्सङ्गे गोष्पदं यथा मधु ।।

८- **परुषम्** - अतिक्रूरार्थं यद्भवति तत्परुषम् । यथा-

स्वाहि वि सं मुन्नं पिव णिज्ज सु मी एव उउदेवज्जो ।
दंतक्खंडि अथणिया खिविऊण सुअं वइमाआ ।।

९- **विरसम्** - अप्रकृतरसं विरसमुच्यते । यथा-

तव वनवासोऽनुचितः पितृमरणशुचं जहीहि किं तपसा ।
सफलय यौवनमेनन्नन्वनुरक्तेन सुतनु मया ।।

१०-**हीनोपमम्** - यत्र हीनोपमानं दीयते तदिति । यथा-

क्वचिदग्रे प्रसरता क्वचिदापत्यनिघ्नता ।

शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ।।

११- अधिकोपमम् - यत्राधिकोपमानं दीयते तदिति । यथा-

अयं पद्मासनासीनश्चक्रवाको विराजते ।

युगादौ भगवन्ब्रह्मा विनिर्मित्सुरिव प्रजाः ।।

१२- सदृशोपमानम् - अतुल्योपमानमसदृशोपमानं भवति । यथा-

णमह हरं रोराण लणिद्दङ्ड विअदुवम्महसरीरम् ।

वित्थ अणि अंवणि अंवणिण्णअं गंगासोत्तं व हिमवंतम् ।।

१३- अप्रसिद्धोपमम् - अप्रसिद्धोपमानं भवत्यप्रसिद्धोपमं भवति। यथा-

कुमुदमिव मुखं तस्या गौरिव महिषः शशीवकाव्यमिदम् ।

शरदिव विभातितरुणी विकसितपुलकोत्करेयमिति ।।

१४- निरलङ्कारम् - अलङ्कारहीनं निरलङ्कारमुच्यते । यथा-

कोलाघंणति मीत्वा निद्धाखाअं ति मअअमं साई ।

उलु आहरंतिकाए काया उलुए पि होइ ति ।

१५- अश्लीलम् - असभ्यार्थमश्लीलम् भवति । यथा-

उद्यतस्य परं हन्तु स्तब्धस्य विवरैषिणः ।

पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः ।।

१६- विरुद्धम् - तत्र देशकाललोकदिप्रतीतः प्रत्यक्षविरोधः । विरोधोऽपि त्रिधा प्रत्यक्षं, अनुमानं, आगमविरोधश्चेति । तत्र देशविरुद्धं यथा-

१ सुराष्ट्रेषु नगरी मथुरा नाम विश्रुता ।

अक्षेपनारिकेलाङ्का यस्य पर्यन्तभूमयः ।।

२ कालविरुद्धम् -पद्मिनी नक्तमुन्निद्रा स्फुटत्य कुमुद्वती ।

मधुरुत्फुल्लनिचुलो निदाघो मेघदुर्दिनः ।।

३ लोकविरुद्धम् - आधूतकेसरी हस्तो तीक्ष्यभृङ्गस्तुरङ्गम्।

गुरुसारोऽयमेरण्डो निस्सारः खदिरद्रुमः ।। इति ।।

तृतीयाध्यायस्य पादटिप्पणयः

१- वै. सि. सु. निधिः, पृ. - ३४

२- तदेव, पृ.- ५९४, अर्थवत्सूत्रम्

३- वाक्यप., १-२, पृ. - १७

४- महाभा., १/२/५४ प्रदीपः, पृ. - २३

५- वाक्यप., २/१६

६- महाभा., २/३/५० षष्ठीशेषे सूत्रम् प्रदीपोद्योतसहितम् ।

७- वाक्यप.,

८- गुणसमुद्देशः, शाबरभा., ३/१/१२

९- वै. सि. ल. म. टी., पृ. - ४००

१०- सं. व्या. द.- ३६२, तत्रायं पाठः समुपलब्धः ।

११- वाक्यप., २१-२, पुण्यराजः अम्बाकर्त्री च ।

१२- सर. सु. पृ. - २९८

१३- सं. व्या. द., पृ.- ३६६; वाक्य के विषय में वाक्यार्थ के विषय में भी सर्वाधिक विचार वाक्यपदीय में है । मीमांसा की दृष्टि से विधिवाक्यार्थवाद, नियोगवाक्यार्थवाद, भावनावाक्यार्थवाद तथा न्याय और बौद्ध दर्शन में गृहीत वाक्यार्थवाद पर भी पुण्यराज ने प्रकाश डाला है।

१४- वाक्यप., २/१-२, पृ.-१३;

१५- तदेव, २/१-२

१६- वाक्यप. पृ. ७१५

१७- वाक्यप. २/२६२

१८- सं. व्या. द., पृ. - ३७१ - जो वाक्यार्थ को अखण्ड, अनंश मानते हैं उनका ही एक वर्ग प्रतिभा को वाक्यार्थ मानता है । भर्तृहरि ने प्रतिभा को वाक्यार्थरूप में लिया है ।

१९- वाक्यप. , २/१४३ पुण्यराजोऽम्बाकर्त्री च पृ. - २२२-२२३ एवं प्रतिभादर्शन ले.- हरिशंकर, पृ. - ३७० - जब किसी वाक्य को समझने के लिए विच्छेद पदवर्ण में किए गए अवधारण और स्वर के महत्त्व पर विचार या ध्यान आकर्षित किया जाता है तो प्रतिभा एक दूसरा ही स्वरूप

धारण कर के कुछ और ही अर्थ लगाने में समर्थ हो जाती है, इसे वाक्यार्थ कहते है

२०- वाक्यप., २/१-२

२१- वाक्यप., २/११७

२२- भाषाविज्ञानस्य रूपरेखा पृ.- १-२

२३- वाक्यप., २/१४९

२५- तदेव, २-११८

२६- श्रृङ्गार प्रकाशः पृ.- २११,२१४ तथा सं. व्या. द. पृ.- ३७६- कभी वाक्य के उच्चारण मात्र से ही प्रतिभारूप अर्थ का उन्मीलन हो जाता है । कभी निमित्तान्तर के सान्निध्य में चिर व्यवहित भी विशिष्ट प्रतिभा भावना बीज के संन्निवेश से ही वाक्य परम्परया प्रतिभारूप स्वार्थ का आविर्भाव करता है । प्रतिभा वाक्यार्थ ह

२७- वै. सि. लघुमञ्जू, पृ. - ३९७ - टीका च

२८- भा. वि. रूपरेखा, पृ. -१०३

२९- अष्टा., १/३/१- तदेव- प्रदीपोद्योतः ।

३०- व्या. द. भू. क्रियानिरूपणाध्यायः पृ. - १०५

३२ अष्टा., ३/२/१२३

३३- वाक्यप., २

४१- वाक्यप., २/४१४

४२- तदेव, २/४२५-४२७

४३- वा. प., २ काण्ड, पृ.-८ विशिष्याम्बाकर्त्री चाश्रिताऽत्र।

४४- सं. व्या. द., पृ.- २०३-२०४

४५- वाक्यप., २/४१४

४६- वाक्यप. २/४२७

४७- तदेव, २/१-२ पुण्यराजटीकायाम्

४८- महाभा., २/३/५० षष्ठीशेषे सूत्रम्

४९- तदेव, १/२/४५, वार्तिक-३

५०- वाक्यप., २/४१-४२

५१- तदेव, २/४१

५२- वाक्यप., २/४१ अम्बा.

५३- तदेव, २/४२ स्वोपज्ञवृत्तिः

५४- तदेव, २/४३ पुण्य., पृ.-६७

५५- अर्थ और व्या. द., पृ.- ३३०

५६- सं. व्या. द., पृ.- ३३७

५७- वाक्यप., २/४४, ४५

५८- अर्थ और व्या० द०, पृ०- ३३१

५९- वाक्यप., ३/४६ सटीकमृ

६०- तदेव, २/५४-५५ सटीकम्

६१- वाक्यप., २/४६.

६२- तदेव, २/४७

६३- तदेव, २/१८

६४- वाक्यप., २/४१

६५- सं. व्या. द., पृ.- ३६८

६६- न्या. मं, पृ.- ३६६-३६९

२ (ए)- अर्थ और व्या. द., पृ०. ३३६-३३७

६७- अर्थ और व्या. द., पृ.- ३३७.

६८- न्याय., १/१/२४, पृ.- ३०३

६९- अर्थ और व्या. द., पृ.- ३३३-३३४

७०- वाक्यप., २/१, २, पृ.-११

७१- तदेव, २/११३ पुण्यराजः अम्बाकर्त्री च.

७२- तदेव, २/११५ अम्बाकर्त्री

७३- त. वा., पृ. ३२९ चौ सं.

७४- वा. प., २/११४-११५.

७५- तदेव, २/११५ अम्बाकत्री

७६- अष्टा०,२/३/४९

७७- सं. व्या. द., पृ.- १३०,१३१

७८- तदेव- विशेष कर प्रतिभा के उपसंहारकाल में अर्थात् अर्थ के ज्ञान काल

में अभिन्न एकाकार प्रतिभा के परिबोध से वाक्यार्थ स्थितलक्षण सिद्ध होता है ।

७९- श्लोकवार्तिकम्, पृ.- १०२९ टिप्पणी दुर्गाधर झा.

८०- श्लोक, वा.- ११०, पृ. १०७०

८१- तदेव, पृ.- १०१२, वा-६

८२- तदेव, वा.-७

८३- श्लोकवा., वा.-१०, पृ.- १०३३

८४- तदेव, वा.-१८, पृ.- १०३६

८५- श्लोक, वा.-४४-४८, पृ.-१०४७

८६- तदेव, वा. ५०-५१, पृ.-१०४८

८७- सं. व्या. द., पृ.- ३७६- कुमारिल भट्ट ने प्रतिभा वाक्यार्थवाद को आंशिकरूप में स्वीकार किया है और आंशिक हो इसकी समीक्षा की है। वाक्य के प्रयोजन अथवा जन्यत्व रूप में प्रतिभा को स्वीकार करने में उन्हें कोई आपत्ति नहीं है। किन्तु चदि प्रतिभा किसी न किसी रूप में बाह्य अर्थ से सम्बद्ध है तो इस वाद में आपत्ति है। बाह्य अर्थ नियत स्वभाव वाला होता है किन्तु एक ही अर्जुन चरित, वीरपुरुष में हर्ष और भीरू मे भय उत्पन्न करता है । प्रतिभा वाक्यार्थवाद में इसकी उपपत्ति नहीं बैठती ।

८८- मी. श्लोकवा., वाक्याधिकरणम् ३२५-३३० वार्तिक

८९- मी. श्लोकवा. वाक्याधिकरणं, पृ.- १४०, वा.-३३१-३३२

९०- अर्थ और व्या. द., पृ.- ३०५,३०६- जयन्त भट्ट ने - वाक्य के अर्थ पर दार्शनिक दृष्टिकोण से विस्तृत और गम्भीर विचार किया है

९१- न्यायमं., पृ.- ३००-३०२

९२- तदेव, पृ.-३०६

९३- न्याय. मं., पृ. -३०२-३०३

९४- न्या. मं., पृ.-३०३-३०४

९५- तदेव

९६- जैमिनिसूत्रम्, ३/१/५

९७- न्याय प., पृ० - ३०६-३०७

९८- तदेव, पृ.- ३१७

९९- न्या. मं., पृ-३१८,

१००- तदेव, पृ.-३३५

१०१- न्या. मं., पृ.-३३५-३३६

१०२- न्य. मं., पृ.- ३३४-३३६

१०३- न्या. म., पृ.-३३४-३३६

१०४- तदेव ।

१०५- अर्थ और व्या. द., पृ. -३०६

१०६- Indian theory of meaning pp. 208-209 - The sentence meaning is something more than the sum of the word-meaning. When the meanings of the different words is a sentence are related with one another on the basis of the akanksha, etc.,there arises some additional signification which is destinet from the totality of the word meanings. This unified sentence meaning is referred to by different terms Vakyartha (sentence meaning) Samasarga (association of the word meaning and taparyartha (the purport of the word meaning).

१०७- का. प्र., २/७ तात्पर्य्यार्थोऽपि केषुचित् ।

१०८- Indian Theory of Meaning,pp.212 - The meaning of a sentence dominates the meanings of its words, bothe the speaker and the listener are concerned only with the sentence meaning. We use words without fully understanding their exact meaning, that does not mean we are talking nonsence. It is obvious that knowing of a language consists in using words appropriately and acting appropriately when they are heard-....

The ubiquitous importance of context as deciding factor in determining the meaning of words in a sentence points out the fact that the claims of words to have an independent meaning is isolation is very weak. The well known statement by St.Augustine on the real nature of time applies to the meaning of words also..... It is something then we know when no one

asks us, but no longer know when we are supposed to give an accout of it.

१०९- वाक्यप., २/११९,१२०

११०- अर्थ और व्या. द., पृ.-८३

१११- वाक्यप., २/१२१-१२४

११२- वाक्यप., २/१२५

११३- वाक्यप., २/१२६ सटीकम् पूर्वाद्धः

११४- सारस्वती सुषमा, २४/४/२०२६ व्याकारणदर्शनेवाक्यविमर्शः, पृ० ३१५

११५- वाक्यप., २/१२६ उत्तरार्द्धः सटीकम्

११६- तदेव, अम्बाकर्त्री, पृ.- २११

११७- तदेव, २/१२७ पूर्वाद्ध, सटीकम्

११८- वाक्यप., २/१२७; उत्तरार्धः, सटीकम्

११९- वाक्यप., २/१२८

१२०- तदेव,२/१२९-१३०

१२१- वाक्यप., १३१ सटीकम्

१२२- अर्थ और व्या. द., पृ.- ८७

१२३- वाक्यप., २/४३३

१२४- अष्टा., १/१/६८

१२५- वाक्यप., २/१३२ सटीकम् ।

१२६- सा. सु., २४/४/२०२६ पृ. ३१६-३१७

१२७- वाक्यप., २/१३३

१२८- तदेव, २/१३४-१४२

१२९- सा. स. १०, २४/४/२०२६

१३०- वाक्यप., २/१३५

१३१- वाक्यप., २/१३६

१३२- तदेव- २/१३७

१३३- वाक्यप., २/१३८

१३४- तदेव, २/१३९ पुण्यराजाः , अम्बाकर्त्री

१३५- वाक्यप., ३/५३

१३६- तदेव, २/१४०

१३७- वाक्यप., २/१४१

१३८- तदेव, २/४१८

१३९- तदेव, २/४३०

१४०- तदेव, २/४१६

१४१- तदेव, २/४२४

१४२- तदेव, २/४३१

१४३- वाक्यप., २/४१७

१४४- तदेव, २/४२८

१४५- तदेव, २/४३२

१४६- तदेव, २/४३४

१४७- तदेव, २/४३६

१४८- वा. प., २/४२९

१४९- वाक्यप., ३/५५०

१५०- अर्थ और व्या. द., पृ.-९९

१५१- वाक्यप., २/३१९

१५२- वाक्यप., २/३२४

१५३- भगवद्गीता

१५४- तदेव, २/३२५

१५५- तदेव, २/४१९४२०

१५६- वाक्यप., २/३१८ टीकायाम्, पृ.-३९१

१५७- तदेव, २/३०

१५८- वाक्यप. २/वाक्यप. २/३२२, ३२३

१५९- वाक्यप., २/३२१

१६०- वाक्यप., २/४२१

१६१- वाक्यप., २/४३७ पुण्यराज

१६३- तदेव, २/४३८,४३९

१६४- वाक्यप., २/४४०

चतुर्थोऽध्यायः

प्रतिभानिरूपणम्

पृष्ठ संख्या 223 से 296

चतुर्थोऽध्यायः

प्रतिभानिरूपणम्

अथ केयं प्रतिभा या सकलशास्त्रैः वैय्याकरणैश्च गीयते । सा हि प्रतिभा भर्तृहरिणा प्रथमतो वाक्यपदीये सुविशदं प्रतिपादिता । स आह-

[१] **शब्देष्वाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी।**
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ।।

अस्य विश्वस्य या निबन्धनी शक्तिः वर्तते सा शब्देष्वाश्रितेति। यन्नेत्रोऽयं प्रतिभात्मा तत्र भेदरूपो व्यवहारो प्रतीयते, तच्च प्रतिपुरुषं प्रसिद्धमिति। प्रतिभात्मायमित्यादिना सेयं प्रतिभा व्यक्तिरात्मा भौतिकात्मा वा कथ्यते । भर्तृहरिः प्रतिभां निमीलिततृतीयनेत्रं शब्दरूपमेव सकलजगतः कारणभूतमिति स्वीचकार । अयमाशयो व्यक्तिविवेककारस्यापि दृश्यते, तद्यथा-

[२] **क्षणं स्वरूपं स्पर्शोत्था प्रज्ञैव प्रतिभा कवेः ।**
सा हि चक्षुर्भगवतः तृतीयमिति गीयते ।

अत्र हरिप्रतिपादिततृतीयनेत्रप्रतिभारूपमेव गीयते । सा च भगवत-स्तृतीयं चक्षुरिति व्याख्यातम् । येन साक्षात्कारेण सर्वमपि प्रकाशितं भवति। जयन्तभट्टेनापि [३] प्रतिभामात्रं जगदिति समुपन्यस्तम् । यथावस्थिते वनिता-त्मनि बाह्येऽर्थे वासनानुसारेण कुणप इति, कामिनीति, भक्ष्यमिति प्रतिभो-त्पद्यते । क्वचिदसत्यपि व्याघ्र आयात 'इति श्रवणोत्तरं तत्र शूराणामुत्सा-हवर्धनम् कातराणां भीतिरुत्पद्यते तत्सर्वमपि शब्दार्थप्रतिभेति, अर्थप्रति- भा चेति यथा 'एष बन्ध्यासुतो याति' 'राहोः शिरः' इत्यादिभ्योऽर्थप्रतिभा जायतें यतोऽत्यन्तासत्यपि बाह्येऽर्थे शब्द एव तत्तदाकारेण विवर्तत इति प्रतिभाति ।

'प्रतिभा' शब्दव्युत्पत्तिः- तत्र प्रतिभात्यर्थोऽनयेति सा प्रतिभेति व्युत्पत्तौ प्रत्युपसर्गपूर्वकात् भा धातोः 'आतश्चोपसर्गे कः' इत्यादिना करणेऽर्थेऽङ्प्रत्यये टापि च कृते प्रतिभा रूपं निष्पद्यते । प्रतिभायत इति च । बुद्धौ, प्रत्युत्पन्नबुद्धौ, दीप्तौ वेत्यर्था [४] वाचस्पत्ये शब्दकल्पद्रुमे [५] चावलोक्यन्ते । 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' स्वीये कोशे यथाह रुद्र इति प्रतिभा चितशब्दटीकायां भरतः । तदुदाहरणं यथा [६] भारतेऽपि

सूक्ष्मं साधुसमुद्दिष्टं नियतं ब्रह्मलक्षणम् ।

प्रतिभा त्वस्ति मे काचित् तां ब्रूयामनुमानतः ।। इति ।

पुण्यराजस्त्वाह-[७]

पदार्थमतिर्भिन्ना या वाक्यार्थमतिः सा प्रतिभेति स्फुटम् । सैव प्रतिभा तत्त्वसंग्रहे [८]-

स्वसंवेदनसिद्धैव कथिता, सा 'इदं तदि' ति रूपेण प्रतिपादयितुमशक्या । नानारूपा सा प्रतिभा यत्र तत्र ग्रन्थेष्वपि व्याख्याता वर्तते-यथा काव्य- प्रकाशे-[९] वैशिष्ट्यात् प्रतिभाजुषाम् । इति प्रतिभासंस्कारविशेषा इति । एतट्टीकायाम् [१०]-तत्र प्रतिभाजुषामिति व्याख्याने प्रतिभा वासना । सा च - नवनवोन्मेषशालिनी प्रज्ञेति यावत् इति ।

अन्यत्र च प्रतिभा

समस्तलोकस्य नेत्रभूतः सकलेतिकर्तव्यतासम्पादकः प्रतिनियतसंस्कारजन्यः शक्तिविशेषः प्रतिभेति मण्डनमिश्राः । [११]

पुनरपि-इदमित्थमनेककर्तव्यमित्येवंरूपेतिकर्तव्यतायाः जननी विच्छिन्न-प्रतिपत्तिकपदार्थोपश्लेषसम्पादिकाऽसंविदितस्वभावा शब्दजन्या भावना प्रतिभेति वाचस्पतिमिश्रपादाः ।

कैश्चित्सा [१२] प्रतिभा भावेऽङ्प्रत्ययेनापि साध्यते । तेषां मतेन प्रतिभानं प्रतिभेति भावेऽङ्प्रत्यये बुद्धेर्व्यापारविशेषरूपा प्रतिभा । भोजमतेन- [१३] "बुद्धिव्यापाररूपा प्रतिभा ।"

भर्तृहरिसम्मता प्रतिभा-

भर्तृहरिमतेनात्र विशिष्य प्रतिभा स्वरूपमुच्यते । उपर्युक्तप्रतिभानिर्वचनानि तत्पूर्वपक्षेण विकल्पपक्षेण वोपन्यस्तानि । वाक्यपदीयस्य वाक्यकाण्डस्य वा सारं प्रतिभादर्शनमेव प्रतिभातीति मन्मतम् । यतो वाक्यस्य वाक्यार्थस्य च विषये व्याकरणदर्शनप्रासादः प्रतिभारूपामाधारभित्तिमेवावलम्ब्यास्ते। वाक्यकाण्डस्य परिशीलनेनेदं प्रस्फुटतां याति यद्भर्तृहरेः पूर्णायासः प्रतिभादर्शनसंस्थापनार्थाय संघटते । यद्यपि नानाविधा प्रतिभा ग्रन्थान्तरेषु तत्र तत्राचार्यैः यथाप्रसङ्गं व्याख्याता तथापि हरिग्रन्थे सा विशदरूपेण सोपपत्तिका विशदीकृता द्रष्टुं शक्यते । मन्ये

'प्रतिभा वाक्यार्थ' इति वैयाकरणानां अभिनव आविष्कारस्ततः पूर्वं भावना वाक्यार्थः फलं वाक्यार्थ इति बहुधा प्रवादाः श्रूयन्ते स्म, यतः 'प्रतिभावाक्यार्थ, इति श्रुत्वा तेषां चिन्तनसरणिरेव विमुखीभूय प्रतिभानुकूलाजायत। मन्ये स्फोटवादस्योत्तरं वैय्याकरणानां प्रतिभाविषयकं गवेषणामूलकं अवदानं योगदानं वा दर्शनक्षेत्रेऽद्वितीयमपरिहार्यञ्च स्थानं लभत इति । प्रतिभादर्शनेन स्फोटवादोऽपि सुस्पष्ट संगच्छते । सेयं प्रतिभा सर्वत्र समुचितमादरं लभत इति न कस्यचिद्विमतिः । सा चात्र हरिणा 'अन्तःकरणस्य बुद्ध्यभिधाना निश्चयात्मिका वृत्तिरेव प्रतिभेति' वर्णिता। सा भगवती प्रतिभात्र कतिपयकारिकाभिः व्याख्यायते-

[१४]विच्छेदग्रहणेर्थानां प्रतिभान्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ।।

'देवदत्त गामभ्याज शुक्लां दण्डेन [१५] इदं वाक्यं श्रुत्वा केवलमपोद्धारसरण्या देवदत्तादिपदेभ्यो विच्छिन्नेभ्यस्तदर्थानां विच्छेदेनैव ग्रहणे प्रत्ययवेलायामेका पदार्थमतिरतिरिक्तैव प्रतिभा सञ्जायते । प्रतिभात्र बुद्धिरिति लक्ष्यते । पुनरपि कस्तस्या उपायस्तत्राहपदार्थैरुपपादिताम् = पदार्थैरसात्यभूतैरुपाधिभूतैरुपपन्नामभिव्यक्तामिति यावत् । पदार्थानामसत्यत्वं तु भर्तृहरिणा पुण्यराजेन च 'अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्' इत्यतः प्रारभ्य 'असमाख्येयतत्त्वानामर्थानां लौकिकैर्यथा'।इति यावत् कारिकासु मतभेदेन

प्रदर्शितस्य द्वादशधा पदार्थस्य प्रविभागः सम्पादितः । तत्र वैय्याकरणानां मतेनाखण्ड एव स्फोटलक्षणो वाक्यार्थोऽध्यासः सम्बन्धः पदार्थस्त्वसत्य एवेति निर्णयः । तैरेवासत्योपाधिभूतैरियमुपपाद्यत इति निष्कर्षः । तस्यां प्रतिभायां वैय्याकरणैरभिहितान्वयान्विताभिधानवा- दयोश्च चर्चापि नेष्यते, तत्र प्रतिभाखण्डभावमापद्यते । सेयं प्रतिभेति पुण्यराजः ।[१६]

स त्वाह-प्रतिभायां त्वैकरसैव प्रतिपत्तिरिति न तत्र काचिदभिहितान्व-यान्विताभिधा चर्चा इति । शब्दः स्फोटार्थश्च प्रतिभायामेवाञ्जसः मार्गः। सा पूर्वोक्ताभिव्यक्ता प्रतिभा कीदृशी भवति । तत्रोच्यते-

[१७]इदं तदिति सान्येषामनाख्येया कथञ्चन ।
प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते ।।

सा चोपजायमानाप्यन्यान् प्रति कथञ्चिदपि 'इदं तदिति' प्रतिपादयितुमशक्यैव भवति । किं बहुना सा कर्त्रापि प्रत्यात्मसिद्धा स्वसंवेदनसिद्धापि नियतेन रूपेण किं स्वरूपा सेति वर्णयितुं न कदापि शक्यते। न हि कर्त्रापि तु प्रतिपत्त्रा तथैव सानुभूयते ।

सानाख्येया प्रतिभा कथं शब्दैर्व्यक्तुं शक्या । यथा द्राक्षाम-धूकसितशर्करादीनां प्रत्यात्मसिद्धापि माधुर्यगुणविशेषा अन्यान् कथयितुं न शक्यन्ते तथैवेयं स्वसंवेदनसिद्धा अन्यान् प्रति व्याख्यातुं न शक्यते । पश्याम्यत्र यथा भगवतः स्वरूपं नाद्यावधि केनचिदिदमित्थमिति रूपेण प्रकाशितं तथैव भगवती प्रतिभेति इदं तदित्यादिना कथयितुं न पार्यते। पुनरपि लौकिकेन दृष्टान्तेन समर्थ्यते- 'यथा प्रकृतिपुरुषयोर्मिथः कियान्ननुरागः स च किं स्वरूप इति' न हि केनचिद्यन्त्रेण शास्त्रेण वा व्याख्यातुं शक्यते तथैवेयं प्रतिभेति । सा च पुनः किं स्वभावेत्युच्यते-

[१८]उपश्लेषमिवार्थानां सा करोत्यविचारिता ।
सार्वरूप्यमिवापन्ना विषयत्वेन वर्तते ।।

अनाख्येया सा कदाचित्फलमुखेन, कदाचिदाश्रयमुखेन, कदाचिद्व्यञ्जकमुखेन प्रतिपादयितुं शक्नुयात्, यतो हि स्वरूपतोऽनाख्यातस्य

विषयस्य एभिः कारणैः यत्किञ्चित्स्वरूपं शास्त्रकारैर्निर्धार्यत एव । तद्यथा- बह्निनिष्ठा शक्तिरतीन्द्रयानिर्देश्याऽपि फलमुखेनाश्रयमुखेन च निर्दिश्यते । बह्नौदाहानुकूला शक्तिरभिव्यञ्जकेन कथ्यते । तथैवाविचारिता सापि पदार्थानामुपश्लेषं संसृष्टं संसर्गं वा बोधयति । सर्वस्मिन् वाक्ये सार्वरूप्यमिवापन्ना स्थिता सती सा प्रतिभा पदार्थानामभिव्यङ्गयत्वेन विषयेण वर्तते । विश्लिष्टपदार्थानां प्रतिभा मेलनं करोति । अयमभिव्यञ्जकत्व एव प्रतिभानिष्ठाः पदार्थाः साफल्यं भजन्त इति पुण्यराजः । अमुं विषयमधिकृत्य मण्डनमिश्राः वाचस्पतिमिश्राश्च स्वीयां स्वीकृतिं यच्छन्ति । तद्यथा मण्डनमिश्रः विच्छिन्नप्रतीतानामपि च पदार्थानां किं कथमनुसन्धीयेतेति विचारकल्पनाप्रत्यवमृष्टापूर्वशक्तिप्रतिभा सैवोदीयमाना प्रतिभा उपश्लेषं विदधाति । तादर्थ्यादनुपश्लेषं तद्भावात् । एवमेव वाचस्पतिमिश्रः 'विच्छिन्नप्रतिपत्तीनां तापह्रदतोयादीनां सहसोपश्लेषं विदधाति ।

एषोऽर्थोऽम्बाकर्ज्याम्-

सन्तापतप्ततनवो हि शीतह्रददर्शनमात्रादप्सु मिमङ्क्षवः प्रवर्तन्ते, नान्तरा विचारयन्ति । यथा गङ्गातोयम्, वयं च तप्तास्तदिह तत्प्रशमनाय निमज्जाम इति । तस्मादसंविदितरूपा शब्दभावनैव इदमित्थमनेन कर्तव्यमिति प्रतिभा हेतुरेव मन्तव्यः । प्रतिभैव ताद्रूप्यमापन्ना घटपटविषयत्वेन लोके प्रवर्तते ।

तदित्थं भावसंवेदनप्रकारः यो हि सर्वदा परम्पराप्रकारः प्राणिमात्रेषु सन्तिष्ठित एवेति विदितं सर्वेषामिति । तेन प्रतिनियतजात्यनुसारेणैव नियतैव काचित् प्रतिभा दृश्यते, तन्मूलक एव सर्वः कश्चित् पशुपक्षिजड़चेतनादीनां व्यवहारः । सा प्रतिभा इदानीन्तनी प्राक्तनी चास्ति तदाह हरिः ।

[१९]साक्षाच्छब्देन जनितां भावनानुगमेन वा ।
इति कर्तव्यतायां तां न कश्चिदतिवर्तते ।।

सा कदाचित्साक्षाच्छब्देन जन्यते, कदाचिद्व्यवहारकाले जन्यते, जन्मान्तरभावनावशेन वा कदाचिज्जन्यत इति । यतः सर्वोऽपि व्यवहारस्त-

न्मूलक एव । सेदानीन्तनी तु मनुष्याणां साक्षाच्छब्देन कदाचिद् व्यवहारवशेन वा । साक्षाज्जनिता तु सा बहुशास्त्राभ्यासवशेन जायते । प्राक्तनी तु बालानां तिरश्चाञ्च गजवाजिप्रभृतीनां, प्राक्तनभावनासमुपजातप्रतिभावशेनैव बाला अशिक्षिता अपि स्ववयोनुरूपैर्वयस्यैः सह व्यवहरन्ति, गजवाजिप्रभृतयश्च स्वजात्युचितं प्राप्तकाले चेष्टन्त इति । दृश्यते ह्यत्र सा द्विधा विभक्तापि कवीनां कवित्वे हेतुभूतेति । [२०]

यदुक्तं काव्यप्रकाशे-

[२१]शक्तिर्निपुणता लोककाव्यशास्त्राद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।

अत्र शक्तिः प्रतिभापरपर्यायेति केचन् । कैश्चिच्छक्तिप्रतिभयोर्भेदोऽपि प्रतिपाद्यते । उपर्युक्तकारिकायां शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात् । शक्तिमेव विवृण्वन् रुद्रट आहः [२२]-

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य ।
अक्लिष्टानि पदानि विभान्ति यस्यामसौ शक्तिः ।। इति।

एतया रीत्या शक्तिप्रतिभयोः स्वरूपमुदीरयन्ति आचार्याः । तस्मात् सर्वोऽपि व्यवहारः प्रतिभानियत इति मन्तव्यः । अस्यावेव विषयः पुनरपि स्फुटमुच्यते-

[२६]प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति ।
समारम्भाः प्रतायन्ते तिरश्चामपि तद्वशात् ।।

लोकः प्रमाणत्वेन तां प्रतिभां भगवतीरूपामनुपश्यति । तत्र पुण्यराजः महाकविकालिदासीये [२४] 'सतां हि सन्देहपदेषु प्रमाणमन्तःकरणप्रवृत्तयः' इति पद्ये प्रतिभायाः प्रामाण्यं साधयति । एवं प्रत्यक्षानुमानविषयेऽपि यावत्पूर्वा प्रत्यवमर्शः शब्दोल्लेखेन प्रतिभया न क्रियते

तावत्प्रत्यक्षमनुमानं वा स्वं कार्यं न प्रसाधयति । प्रतिभोपगृहीतानि सर्वप्रमाणानि प्रमाणतां लेभन्त इति । प्रतिभालोचनो हि लोक इति कर्तव्यतासु प्रवर्तत इति भोजराजः[२५] । तिरश्चामपि प्रतिभाबलादेव सर्वे समारम्भाः प्रतता जायन्त इति[२६] । अतः प्रतिभावश्यं स्वीकरणीया तस्या अपलापेनात्मा न वञ्चनीयः । सा प्रतिभा सर्वेषामपि सिद्धैव कथिता । तद्यथा-

[२७]यथा द्रव्यविशेषाणां परिपाकैरयत्नजा ।
मदादिशक्तयो दृष्टाः प्रतिभास्तद्वतां तथा ।।

यथा विशेषद्रव्यपरिपाकेन कस्यचिद् विशिष्टयत्नमन्तरा तत्र द्रव्यपरिपाके मदादिशक्तयो दृश्यन्ते तथैव प्रतिभाऽपि स्वभावतः संस्कारमन्तरापि साधनमन्तरापि च प्रबुद्धा सञ्जायते । प्रतिभावतां सा प्रतिभा अयत्नजापि स्फुटमभिलक्षत इति ।[२८]

जन्मान्तरजा प्रतिभा-

अयत्नजा पुनरपीयं प्रतिभा जन्मान्तराभ्यासहेतुका वर्तते, तदुपपादयति

[२९]स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः ।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ।।

मधुमासे पुंस्कोकिलस्य साधारणस्वरवृत्तिं विशिष्टपञ्चस्वरवृत्तिं को विकुरुते ? लूताजन्तूनां कुलायादिरचना केन शिक्षितापि च सर्वं प्रतिभा माहात्म्याद्भवति । पुनरपि शृंगारप्रकाशे[३०] बहूनि उदाहरणानि दृश्यन्ते- बालानां स्तन्यपानादिकम्, हंसानां क्षीरविवेचनम्, जन्त्वादीनां कुलायादिरचनम् जातमात्राणामेव पशुमृगसरीसृपादीनामुदकसंतरणम्, सुप्तानां प्रबोधनम्, श्वो मे भ्राता आगमिष्यतीति कुमारीनां महिलानाञ्च ज्ञानम्, किं बहुना वाक्यश्रवणमन्तरेणापि प्रतिभोत्पद्यत इति । तद्यथा- कलाविशेषात्पुंस्कोकिलानां स्वरविकारः, अभ्यासेन रत्नादीनां परीक्षणम्, भूतपिशाचादीनां परकायान्तरावेशः, योगिनां परपुरुषाभिप्रायज्ञानम्, वसिष्ठादीनामतीन्द्रियज्ञानम्, कृष्णद्वैपायनाद्यनु-

ध्यानात् सञ्जयादीनां दूरदर्शनं श्रवणञ्चेति । प्रतिभा कारणान्तरेभ्योऽपि ज्ञायते, साक्षात्पुरुषोपदिष्टवाक्यार्थक्रियासु शब्दव्यापारेणोपसंहृता प्रतिपत्तृणां प्रतिभा वर्तते तथैव बालादीनां स्तन्यपानादिषु पूर्वशब्दभावनानुगमाद्वाक्यार्थप्रतिपत्तिभिरविशिष्टैव प्रतिभोपजायते । येषाञ्च प्रसिद्धशब्दनिबन्धना व्यवहारस्तेषामपि हस्त्यश्वादीनां जन्मान्तरीयशब्दभावनावशात् प्रत्युत्पन्नशब्दप्रत्ययाः प्रतिभाबलादेवोत्पद्यन्ते । एतत्सर्वमपि मन्ये प्रातिभमाहात्म्यमेवास्ति।[३१]

किं बहुना तेषामाहारप्रीतिद्वेषप्लवनादिक्रिया नहि केनापि शिक्षकेन शिक्षयन्ते, अपि चैतत्सर्वं प्रतिप्राण्याहारादिक्रियादिनियतानादिप्रतिभावशादेव लोके प्रसिद्धमेवेति । तद्यथा-

[३२]आहारप्रीत्यपद्वेषप्लवनादिक्रियासु कः ।
जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् ।।

इत्यादिना प्रतिप्राण्याहारादिक्रिया नियतानादिप्रतिभावशादेव प्रसिद्धमिति स्थितम् । तद्यथा-मार्जारः मूषकम्, व्याघ्रः गां, नकुलः सर्पं भक्षयतीति तत्तत्तेषामाहारः केन निर्दिश्यते । शुनः स्वस्मिन् स्वामिनि प्रीतिः कदा केन च शिक्षिता । अश्वस्य महिष्या सह परस्परमपद्वेषं कः शिक्षयति। पुनरपि पशूनां जलप्लावनं कथं सिद्धयति किं तत्र कारणमित्यत्र सगर्वं ब्रूमः सर्वमप्यैतत्प्रतिभापुरस्कारः प्राणिमात्रकृते वर्तते यद्वैय्याकरणैरेवाविष्कृतम् । इति।

शब्द एव प्रतिभाहेतुरिति तदिह जन्मनि जन्मान्तरे वा आसत्तिविप्रकर्षशब्दपर्यायाभ्यां भिद्यते । तदाह हरिः-

[३३]भावनानुगतादेतदागमादेव जायते ।
आसत्तिविप्रकर्षाभ्यामागमस्तु विशिष्यते ।।

हर्यनुसारं प्रवृत्तिज्ञानवृत्तयोश्च प्रतिभाभेदेनोपाख्यायते । स शब्दः कदाचिदासन्नोऽस्मिन्नेव जन्मन्यवगतः कदाचिज्जन्मान्तर इत्यासत्तिविप्रकर्षाभ्यां शब्द एव प्रतिभाहेतुरिति पुण्यराजोक्तमत्र स्थितम् ।

एतावता हरिणा; पुण्यराजेन, भोजेन, सा प्रतिभा व्याख्यायते [३४]। तत्रेतोऽतिरिक्तमपि प्रतिभाविषयकं गवेषणमाकाङ्क्ष्यते येन भर्तृहरिप्रोक्तस्य प्रतिभादर्शनस्य प्रासादः सुस्थिरः, सुव्यवस्थितः सर्वशास्त्रोपकारी च भवेदिति यतितव्यम् । प्रतिभास्वीकारे नहि कस्यचिद्विमतिः क्वापि दृश्यते । बीजरूपमिदं प्रातिभं ज्ञानं शब्दामृतवारिणावश्यं सेक्तव्यम् । येन हर्यभिमतं प्रकाशितं भवेदिति ।

प्रतिभायाः षाड्विधत्वम्-

हरिसम्मता सेयं प्रतिभा पुनर्निमित्तभेदेन षड्विधा वर्तते । केचिदाचार्यास्तस्याः षाड्विध्यं ब्रुवन्ति । प्रतिभाभेदाः पूर्वोक्ता आसन् तांश्च हरिः संकलय्य स्वग्रन्थे ग्रथितवान् इति केचिदाचार्या इति पाठात्प्रतीयते। ताश्च प्रतिभाः-

१-स्वाभाविकी प्रतिभा, २-चरणनिमित्ता प्रतिभा,
३-अभ्यासनिमित्ता प्रतिभा ४-योगनिमित्ता प्रतिभा,
५-अदृष्टनिमित्ता प्रतिभा ६-विशिष्टोपहिता प्रतिभा ।इति।

तदुक्तं हरिणा-

[३५]स्वभाव चरणाभ्यासयोगादृष्टोपपादिताम्।
विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः ।।

भोजग्रन्थेऽस्याः [३६] परिगणनं भिन्नरीत्या कृतमिति दृश्यते । तत्र पूर्वजन्मजनितशब्दश्रवणसंस्कारोद्बोधकानि त्वन्यानि कालाभ्यासदृष्टयोगध्याना-नुध्यानादीनि साधनानि' इति । पूर्वाक्तभेदान् यथाक्रमं व्याचक्षुराचार्याः । तद्यथा-

१-स्वाभाविकी प्रतिभा-[३७]

काचित् स्वाभाविकी प्रतिभा । तद्यथा- परस्याः प्रकृतेः प्रथमं सत्तालक्षणमात्मानं महान्तं प्रत्यानुगुण्यं सुषुप्तावस्थस्यैव प्रबोधानुगुण्यं

फलसत्तामात्रं निद्राया इति । पुण्यराजमतेन सैषा प्रतिभा यथा- स्वभावेन कपेः शाखाप्लवनादिषु दृश्यत इति प्रतिपादिता वर्तते । यथा वा परस्याः प्रकृतेरव्यक्तरूपाया प्रथमं सत्तामात्रस्वरूपायाः बुद्धितत्त्वापरपर्यायं महत्त्वम्प्रति स्वाभाविकम् । स्वभावत एव हि परस्याः प्रकृतेर्महदाकारेण परिणामानुगुण्यं यत् सैव प्रतिभा । सुषुप्तावस्थस्य पुरुषस्य प्रबोधानुगुण्यं प्रतिभारूपम्। निद्राया अपि तमः परिणामरूपायाः प्रत्यानुगुण्यं प्रतिभैव ज्ञेया । इयं आत्मज्ञानमयी प्रतिभा भर्तृहरेरभीष्टा वर्तते ।

वाक्यपदीये स्वभावशब्दस्य आत्मन्यर्थे बहुधा प्रयोगो दृश्यते । हर्यनुसारम् ऋषीणां श्रुतौ स्वप्नवत् ज्ञानं ऋषिरूपेण विवर्तते यथा स्वप्ने श्रोत्रनिरपेक्षं ज्ञानं तथैव ऋषीणां बुद्धौ वेदज्ञानं भवति । तद्यथा-

[३८] **अविभागाद्विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ ।**
भावतत्त्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ।।
तत्र टीकायाम्-
प्रथमाः प्रतिभानेन द्वितीयास्तूपदेशतः ।
अभ्यासेन तृतीयास्तु वेदार्थं प्रतिपेदिरे ।।इति।

[३९] **हरिवृत्तावपि यथा-**

येषां तु स्वप्नप्रबोधवृत्त्या नित्यं विभक्तपुरुषानुकारितया कारणं प्रवर्तते तत्र ऋषयः क्वचित् प्रतिभात्मानि विवर्तन्ते, सत्तालक्षणं महान्तमात्मानम् अविद्यायोनिं पश्यन्तः प्रतिबोधेनाभिसम्भवन्ति । केचित्तु विद्यायां विवर्तन्ते ते च स्वप्न इवाश्रोत्रगम्यं शब्दप्रज्ञयैव सैवमाम्नायं सैवभेदशक्तियुक्तं अभिन्नशक्तियुक्तं च पश्यन्ति ।

२-चरणनिमित्ता [४०] चरणेनैवावधृतप्रकाशविशेषाणां वसिष्ठादीनां या प्रतिभा सैव चरणनिमित्ता कथ्यते । चरणं हि नाम सदाचारस्तपस्याजन्यं ज्ञानं वेति । क्वचिच्चरणं स्वाध्यादिकमप्युच्यते । चरणादिषूदाहरणान्यूह्यानि इत्यादि लिखन् पुण्यराजः चरणप्रभृतीनामुदाहरणानि नात्र प्रस्तुतवान् । तेषामुदाहरणानि स्वयमूह्यानीति प्रोवाच ।

हरिलक्षणेऽत्र पाठभेदोऽस्ति 'कारणेनावधृत यद्वा 'चरणेनावधृत कश्चात्र पाठः युक्तिसंगत इत्युक्ते ब्रूमो यच्चरणपाठो नायुक्ततरः यतो हि मूलकारिकायां चरणपदेन पाठितेयं प्रतिभा । तस्माच्चरणेनावधृतेति पाठः समीचीनः । एतल्लक्षणमतीव कठिनमस्ति तथापि तपसा स्वाध्यायेन चरणेन साक्षात्कृतभूतभविष्यद्वर्तमानकालप्रकाशविशेषाणां वसिष्ठप्रभृतीनां यज्ज्ञानं सा प्रतिभा चरणनिमित्ता कथ्यते । बाह्येन्द्रियवृत्तिनिरोधाद्वसिष्ठादी-नामतीन्द्रियज्ञानं प्रतिभारूपमिति भोजराजः । हरिः सर्वदा ज्ञानं प्रकाशमयमेव कथयति । यथा ब्रह्मकाण्डे-

[४२]आविर्भूतप्रकाशानामनुप्लुतचेतसाम् ।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ।।

इत्यादिनानुपप्लुतचेतसाम् आविर्भूतप्रकाशानां योगिनाम् यत्तावदतीतानागतज्ञानं भवति तद्विलक्षणमिति । अस्माकं प्रत्यक्षज्ञानवतां तदपि मन्तव्यम् । ऋषीणां प्रत्यक्षज्ञानं नहीन्द्रियजन्यं तथापि 'आर्षं ज्ञानं मिथ्या इन्द्रियासम्बद्धविषयकत्वे सति प्रत्यक्षत्वात्' इत्यादिनानुमाणेन न बाध्यते । तदेवात्र हरिणोक्तम्-

[४३]अतीन्द्रियानसंवेद्यान्पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ।।
यो यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते ।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ।। इति।

ये ऋषयो व्यवहारादिकादन्येन अलौकिकसमाधिरूपतयोपलब्धेन चक्षुषा योगजधर्मेण पश्यन्ति तेषां वचनं अनुमानेनाव्यवस्थितेन कदाचित्तर्केण वा बाधितुं न शक्यते । एतस्य छाया उत्तररामचरिते द्रष्टुं शक्यते । तद्यथा- [४४] आविर्भूतज्योतिषां ब्राह्मणानां ये व्यवहारास्तेषु मा संशंयोभूत्। भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता नैते वाचं विप्लुतार्था वदन्ति।।

कृतब्रह्मसाक्षात्काराणां विप्राणां ये व्यवहारास्तेषु प्रामाण्यविषयकः संशयो माभूत् । यतो हि एषां वाचि भद्रा नित्यसङ्गिनी भवति एते कदापि मिथ्यावाणी न वदन्ति इत्यर्थः ।

प्रतिभासु योगजा प्रतिभाप्येका परिगणिता, तस्याः ग्रहणेऽस्याः भेदपरिगणनं कठिनं भवति । लोके श्रूयते दृश्यते वा केषुचिदन्धेषु सा विचित्रा शक्तिः यया ते प्रवर्तन्ते तद्दृष्ट्वा दृष्टिसम्पनोऽप्याश्चर्यमनुभवति। एवं बधिरा अपि स्वप्ने शब्दं शृण्वन्ति तथैव व्यवहरन्ति च । येयमन्धेषु बधिरेषु च प्रकाशमयी प्रतिभा सा चरणनिमित्तैव भवेदिति स्थितम्।

३- अभ्यासनिमित्ता [४५]- सा सततमभ्यासवशेन लभ्यते सा प्रतिभा। तदुदाहरणं हरिवृत्तौ कूपतटाकादीनाम् (कूपतटाकादिखनकानाम्) एवं रत्नपरीक्षकाणामिति । तेषु तत्तत्कर्मणि चिराभ्यासबलेन सा प्रतिभोत्पद्यते यया ते तद्दोषगुणज्ञाने समर्थाः भवन्ति । यथाक्रमकूपतटाकादिखनकानां तत्कर्मणि खनकादिकर्मणि चिरकालाभ्यासनिमित्ता एव प्रतिभा । यया ते पृथिव्याः गर्भे तिरोहिताः जलनाड्यश्चिन्वन्ति जलञ्चाधिगच्छन्ति । एवं रत्नपरीक्षका अभ्यासविशेषात् मणिरत्नादीनां गुणदोषज्ञानं लभन्ते । नेयं प्रतिभा परेषु सरलरूपेण समतिक्रान्ता भवति, अभ्यासमन्तरा नैषा लभ्या। तदुक्त हरिणा-

[४६]**परेषामसमाख्येयमभ्यासादेव जायते ।**
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ।।

परेषामसमाख्येयं मणिरूप्यादिविज्ञानं यत् तद्विदां रूपतर्काणां सूक्ष्मं ज्ञानं सतताभ्यासादेव निष्पद्यते । नेदमिन्द्रियजन्यं ज्ञानमस्ति । तज्ज्ञानं न कदापि अनुमानजन्यमिति भर्तृहरेराशयः । लोके दृश्यते यच्चिराभ्यासादेव केचन तान्त्रिकाः, संगीतज्ञाः, शास्त्रज्ञाः, क्रीडाकुशलाः, यन्त्रचालनकुशलाः किं बहुना स्व स्व कर्मसु निपुणाः पुरुषाः सूक्ष्मं ज्ञानं लभन्ते । परमेतत्परेषु समतिक्रान्तं कठिनं भवति । [४७]

रामसुरेशत्रिपाठिमहाशयैरत्र 'कूपतटाकादीनां' पाठोऽशुद्धः कथ्यते, नैतस्य पाठस्य कोऽपि सङ्गतोऽर्थो तेषां मते यदत्र रूपतर्कादीनां पाठो भवतु येनार्थसङ्गतिर्भविष्यति । तदुच्यते- कूपतटाकादीनां पाठः नास्वाभाविकः न चाशुद्धः । श्रीरघुनाथशर्म्मणामम्बाकर्त्री विस्तृता टीका

विद्यते यस्याः दर्शनैतत्परिहृतम्भवति । कूपतटाकादीनामित्युक्तकूपतटाक-खनकादीनां, ते च तिरोहितमति जलनाडीं पृथिवीतः निष्कास्य जललाभं कुर्वन्ति । कश्चात्र पाठदोषो यो हि कष्टकरः ।

रूपतर्कपदप्रयोगोऽपि भावप्रदीपे दृश्यते, टिप्पणे तद्द्रष्टुं शक्यते, तद्धि रूपं रूपकभेदा दीनारादयः तास्तर्कयन्ति परिक्षन्ते इति सौवर्णिका उच्यन्ते। भोजग्रन्थेऽप्यभ्यासबलात् रत्नादिपरीक्षकाणामि'ति अतो हि [४८] हरिप्रतिपा-दितोऽयं पाठः सर्वथा शुद्धोऽर्थगर्भितश्चास्ति ।

४-योगनिमित्ता- [४९]

सा हि योगनिमित्ता प्रतिभा- 'योगिनामव्यभिचारेण पराभिप्रायज्ञानादिषु भवति योगाद्योगिनः पराभिप्रायज्ञाने समर्थाः भवन्ति, तत्तेनैव तेषु सर्वज्ञत्वं समागच्छति तत्कारणभूता योगनिमित्ता प्रतिभोच्यते' ।

५-अदृष्टनिमित्ता-[५०]

इयं रक्षः पिशाचादीनां परावेशान्तर्धानादिषु दृश्यते । रक्षः प्रेतपिशाचादीनां परकाये प्रवेशः, अन्तर्धानादिकञ्चादृष्टप्रतिभाबलाद्भवति। पूर्वजन्मार्जितशुभाशुभफलनिमित्तेयं भवेदिति ।

६- विशिष्टोपहिता-[५१]

काचिद्विशिष्टैरुपहिता प्रतिभा । तद्यथा-सञ्जयादीनां कृष्णद्वैपायनादि-भिरिति । भोजः, इमामनुध्यानपदेन व्यवहरति तद्यथा-

कृष्णद्वैपायनाद्यनुध्ययानात् सञ्जयादीनां दूरदर्शनश्रवणादौ काचिदुपहिताऽ-नुध्यानरूपा वा प्रतिभैव कारणं भवेदिति । महाभारतादौ श्रूयते यत्कृष्णद्वैपायनेन व्यासेन स्वीया

विशिष्टा तपोयोगादिसिद्धसम्पन्ना सञ्चिता सा प्रतिभा भारतयुद्धावसरे बहुदेशव्यापियुद्धवृत्तसमयग्दर्शनसामर्थ्यं सञ्जयाय प्रदत्तम् । तेनोपहिता या प्रतिभा सैव विशिष्टोपहितेति हरितात्पर्यम् ।

प्रतिभाया एवमनेके भेदाः कल्पयितुं शक्यन्ते । वर्तमानेषु सन्दर्भेष्वपि

ते भवेयुरिति । हरिमतेन वाक्यं प्रतिपाद्यम्, सर्ववाक्यानामधिष्ठानमपि तदेवास्ति । तद्वाक्यं प्रतिभारूपं व्याकरणशास्त्रादतिरिक्तमेव प्रतिपादितम्। नष्टे व्याकरणे सत्यपि तस्मिन्वाक्ये शब्दबीजानि न नश्यन्ति, तदेव कालान्तरे प्रस्फुटति । प्रतिभा विवर्तत्वेन वर्णपदवाक्यरूपेण प्राप्तावसरे पुनराभासते। इदं सर्वं हरिवृत्तौ सारगर्भितं सोपपत्तिकञ्च प्रतिपादितम् । तद्यथा-

[५२] एवं प्रतिभाबहुविधापि सर्वैवागमिकवाक्यनिबन्धना वाक्यप्रतिपाद्या व्याकरणात्ययेऽपि सर्वशक्तिप्रत्यस्तमये प्रत्यस्तमितनिविष्टशब्दबीजकरणान्तर्भूता निबद्धबीजा वृत्तिकाले प्रथमं सूक्ष्मेणापि वर्त्मना विवर्तमात्रामनुभूय क्रमेण वर्णवाक्यनियताभिरव्यवस्थाभिः संमूर्च्छन्ती प्राप्तबीजपरिपाकाकारा पुनः पुनर्व्यक्तेन रूपेण प्रत्यवभासत इति ।

[५३] हरिमतेन करणस्थानप्रयत्नादयोऽपि प्रतिभा द्वारैव सम्भाव्यन्ते यतो हि शब्दभावना ह्येषाऽनादिः वर्तते । प्रतिभातः क्षेमावाप्तिरपि हरिणा प्रतिपादिता, तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभां तत्त्वप्रभवां भावविकारप्रकृतिं सत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुध्य नियता क्षेमप्राप्तिरिति ।

किमिदं रहस्यं यत्पुण्यराजः स्वभावेन कपेः शाखाप्लवनादिषु इत्युक्त्वा विरराम । चरणादिषु स्वयमूह्यान्युदाहरणानीति । किं प्रतिभेदं विरोधः? अथवा तासामुदाहरणैः विरोध उद्भाव्यते ? नात्र पुण्यराजस्य कश्चन उत्साहो दृश्यते । भोजग्रन्थेऽस्माभिः किञ्चिद्भेदेन प्रतिभा षड्विधा साक्षात्कृता, तासामुदाहरणान्यपि दृष्टिगोचरीकृतानि । तत्रापि विशिष्य हरिवृत्तावेव सर्वं विस्तरेण सोदाहरणैरुपन्यस्तम् । किमर्थं पुण्यराजस्तत्र मौनमवलम्बते । एतासामुदाहरणानि स्वयमूह्यानि किमर्थं कथितवान् । विषयः सर्वसाधा णोऽस्ति तस्माल्लोकः स्वयमेव जानाति । किं कारणमिति न जानीमः। यदि विरोधः स्यात्तदोद्भावनीयः, न हि कुत्रापि अयं रोषस्तेन प्रकटीकृतः। परं पुण्यराजः हरिवृत्तौ तत्सर्वं समीचीनतया सुस्पष्टमिति ज्ञात्वात्र श्रमं न कृतवान् इति ज्ञायते मया ।

ग्रन्थान्तरेष्वपि प्रतिभेयं सुसम्पादिता दृश्यते विशेषतो दर्शन-योग-तन्त्र-साहित्यादि-ग्रन्थेषु यथावसरं प्रतिभामाहात्म्यं स्वीक्रियते

ग्रन्थकृद्भिराचार्य्यैरिति ज्ञेयम् । प्रतिभास्वरूपं निरुपयन् हेमचन्द्राचार्यः लिलेख सर्वोऽपि जीवो निसर्गतोऽनन्तज्ञानेन,अनन्तदर्शनेन ,अनन्तसामर्थ्येन, एवं विधेनान्येनापि सद्गुणेन सम्पन्नो भवति, परन्तु जीवानामावरणीयक-र्मकलापैरुपर्युक्तधर्मोऽभिभूयते । जीवानामेवाशुभं कर्म ज्ञानस्वरूपमावृणोति। शुभकर्मानुष्ठानेनेदमावरणं नश्यति । एवम् आत्मा संविदेव प्रकाशरूपः असत् कर्म च मेघमण्डलमिव तदावरकम् । सदाचरणेनासदाचरणं क्षीयते तदा प्रतिभाया भवत्युन्मेषः ।

प्रतिभायाः बहुविधत्वम्-

यथा सर्वत्र पदार्थनिरूपणे आचार्याणां बहुधा मतभेद एव भवति तथैव प्रतिभाविषयेऽपि सुमहान् मतभेदोऽस्ति । यथा येनानुभूयते तथैव तल्लिख्यते । वयमल्पज्ञाःस्मः यज्जानीमस्तदेव सारभूतं वदामः । अथवा सम्प्रदायवासना शास्त्रवासनावशेनापि चिन्तनं तद्रूपं जायते । यथा प्रतिभायाः स्वीकारे तथैव व्युत्पत्तिस्वीकारेऽपि मतभेदाः दृश्यन्ते । तत्र मम्मट आह 'व्युत्पत्तिर्बहुज्ञता' इति केचित् लोकशास्त्रकाव्यानुशीलजन्या निपुणता व्युत्पत्तिरिति । राजशेखरमतेन उचितानुचिताविवेकोव्युत्पत्तिः तत्र केषाञ्चिन्मतेन प्रतिभा श्रेयसी, अपरेषां मतेन व्युत्पत्तिः गरीयसी । उभयोरपि प्रवरावरता निरूपणावसरे आनन्दवर्धनो ब्रवीति- 'प्रतिभाव्युत्पत्त्योः प्रतिभा श्रेयसी सा हि कवेरव्युत्पत्तिकृतं दोषमशेषमाच्छादयति ।

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य झटित्येवाभासते ।।

शक्तिशब्दोऽत्र प्रतिभापर्यायः कैश्चिद्व्युत्पत्तिः श्रेयसी सा हि कवेरशक्तिकृतं दोषमशेषमाच्छादयति-

कवेः संव्रियतेऽशक्तिर्व्युत्पत्त्या काव्यवर्त्मनि ।
वैदग्धी चित्तचित्तानां हेया शब्दस्य गुम्फना ।।

राजशेखरप्रभृतीनां तु 'प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ' इति न खलु लावण्यलाभाद् ऋते रूपसम्पत्, ऋते रूपसम्पदो वा लावण्यल-

ब्धिर्महते सौन्दर्याय भवति ।

कविः- व्युत्पत्तिमान् प्रतिभावाँश्च भवति । सोऽपि शास्त्रकविः, काव्यकविः, समयकविश्चेति रूपेण त्रिधा दृश्यते । श्यामदेवमतेनोत्तरोत्तरः कविः श्रेयान् भवति, नैतदिति यायावरीयः । स्व स्व विषये सर्वोऽपि गरीयानिति काव्यमीमांसाकारः । तदुक्तम्- न हि राजहंसश्चन्द्रिकापानाय प्रभवति, नापि चकोरोऽद्भ्यः क्षीरोद्धरणायेति दृष्टान्तेन स स्फुटं सर्वमपि पर्यालोचयत् । काव्येषूत्तममध्यमाधमव्यवहारः कविषु चोत्कर्षापकर्षव्यवहारः प्रतिभामाहात्म्यादेव भवति ।

प्रतिभा द्विधा कार्यं करोति परोक्षं प्रत्यक्षयति, प्रत्यक्षीकृतस्य वस्तुनः लोकोत्तरत्वमाविष्कारोति च । सा द्विविधा कारयित्री भावयित्री चेति। यथा हि सृष्टिकर्मणि प्रवृत्तोऽजश्चतुर्मुखः कथ्यते । अत्र रचनाकारः सर्वासु दिक्षु युगपन्निरीक्षमाणो भवति । प्रजापतिरिवाभिबन्दनीयः काव्यात्मकं सर्गं रचयन् कविरपि स्रष्टेव नवं वैलक्षण्यम् वस्तुषु अनुप्रवेशयन्निवालक्ष्यते। भावयितृप्रतिभा विधिर्भाविकः काव्यगतं सर्वमपि गुणदूषणात्मकं वस्तु सम्यक् परिचिनोति । तदवलम्ब्यैव कविः प्रशंसति विन्दति वेति। भावकानां काव्यपरीक्षणं कवीनां सतां प्रोत्साहनजनकमसताञ्च कुकवीनां दोषोद्घाटनेन तत्परिहाराय प्रवर्तकं च भवतीति बोध्यम् । यथोक्तम्वन्दामहे महिमामण्डितकारयित्रीम्-

शम्भोः शिवामिव कवेः प्रतिभां स्फुरन्तीं ।
को नाभिनन्दति सुधीर्हृदि कारयित्रीम् ।।
या वृत्तगुम्फनकला कलनां सृजन्तीम् ।
वाचं कवेः सहृदयस्य करोति कण्ठे ।।
काव्ये निषिद्धरसभावगुणादिकोषो ।
व्याख्यायते न यदि काव्यविदा बुधेन ।।
लोको न तावदधिगच्छति सत्कवीनां ।
वाक्यामृतस्य महिमानमभूतपूर्वम् ।।
किं तेन कूपसलिलेन जितामृतेन ।
प्रोद्धतुमर्हति न यद् गुणमात्रहानात् ।।
तत्सन्निधौ निवसतः स्तुवतश्च कामं ।

किं तृट् प्रशाम्यति कदापि तृषार्दिनाम् ।।इति।।

तत्र योगसूत्रस्य विभूतिपादे प्रतिभा स्वरूपम् तद्यथा- 'ततः[५५] प्रातिभ-श्रावणवेदनादर्शास्वादवार्ता जायन्ते' इति प्रतिभाविषयकं लक्षणं व्याचक्षाणो नागेशभट्टोऽत्र 'दृष्टकारणं विनैवाकस्मादव्यवहितविप्रकृष्टातीतानागतसूक्ष्मार्थेषु यथार्थज्ञानसाम्र्यं प्रतिभेति' लिलेख । सा प्रतिभा वाल्मीकेरासीत् । तेनाकस्मादतीतादीनां सूक्ष्मार्थानां प्रतिभासामर्थ्येन प्रत्यक्षीकरणं कृतमासीत् तादृशी प्रतिभा । दर्शनान्तरेष्वियमेव आर्षज्ञानमिति पर्यायरूपेण व्यवह्रियते। तदेव ज्ञानं शब्दशास्त्रे प्रतिभा क्वचिच्चेयं प्रज्ञाशब्देन व्याख्यायते । प्रतिभैव पश्यन्तीरूपा [५६] बहुभिः प्रमाणैः निरूप्यते । बौद्धदर्शनेऽपीयं प्रज्ञामात्रं कथ्यते। जैना आर्षज्ञानमेव प्रतिपादयन्ति, तदपि अवधिज्ञानं केवलज्ञानञ्चेति भेदद्वयोपपन्नम् । एषु प्रतिभाशब्दस्य साक्षात्प्रयोगो नास्ति तथापि ते शब्दाः प्रतिभार्थद्योतका प्रतीयन्ते नात्र सन्देहः । अभिनवगुप्तपा-
दाचार्य्यैरियं [५६] प्रख्योपाख्याभ्यां शब्दाभ्यां प्रस्तुत्य क्वचित्प्रतिभा प्रयोगोऽपि कृतः यथा-समाधाननैर्माल्यात्मिका प्रतिभा ' तत्र भर्तृहरिप्रभृतय इति । शैवागमाचार्यैः प्रतिभाविषये संवित् स्पन्दनादिशब्दा अपि समुपन्यस्ताः।

एवं शक्तिशब्दोऽपि प्रतिभायामेव व्यवहृतः । तत्राभिनवगुप्तपादाचार्यैः 'शक्तिः प्रतिभानं वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम् प्रतिभाने प्रयुक्तस्तत्र वेदितव्यः । आचार्यराजशेखरोऽपि शक्तिशब्दश्चायमुच्चरितः प्रतिभाने वर्तत एवञ्च या शब्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविधम-धिहृदयं प्रतिभासयति सा प्रतिभा इति सुष्ठु प्रतिपादितवान् । 'नवनवोन्मेषशालिनी प्रतिभा मता' इति भट्टतौतो वदति । लोचनकारस्तां विमर्शरूपां विश्वशक्तित्वेन संस्मार-

[५८]यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात् ।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम् ।।

तां शक्तितत्त्वस्वरूपां ज्ञानात्मिकां विमर्शरूपां शिवां वन्दे यस्यामुन्मीलितायां समस्तोऽपि लोक उन्मीलितो भवति । तत्र तां प्रतिभां नमस्करोति यस्यामुन्मीलितायां समग्रमपि विश्वं नवनवायमानं लोकोत्तरच्छायामण्डितं

भवति । निष्कर्षतः प्रतिभायामुन्मिषितायां विश्वं नवमिव भासमानं भवति।

सा प्रतिभा आत्मन्येव वासनात्मतया संस्थिता वर्तते । इयमेवोद्बुद्धा सती प्रतिभेत्यभिधीयते । स्वात्मायतनं पदमभिनवभारत्यां व्याख्यातम् । कवेरपि स्वहृदयायतनसततोदितप्रतिभाभिधानपरवाग्देवतानुग्रहोत्थितविचित्रा-पूर्वार्थनिर्माणशक्तिशालिनः प्रजापतेरिव कामजनितजगतः' अत्र कवेर्हृदयं प्रतिभायाः आवासो निवेद्यते । एवं शक्त्या सह शिवस्य, कविना सह प्रतिभायाः कश्चन स्थिरः सहभावरूपः सम्बन्धोऽस्ति । तत्र महिमभट्टो न्यवेदयत्-

[५९]रसानुगुणशब्दार्थः चिन्तास्तिमितचेतसः

क्षणं स्वरूपस्पर्शोत्था प्रज्ञैव प्रतिभा कवेः ।।

सा हि चक्षुर्भगवतस्तृतीयमिति गीयते ।

येन साक्षात्करोत्येषा भावांस्त्रैलोक्यवर्तिनः ।।

जैनेषु प्रतिभायाः द्वौ भेदौ दृश्येते-१-सहजा प्रतिभा, २-व्युत्पाद्या प्रतिभा चेति । सहजा तु - 'असदाचरणस्याभावात् उत्पद्यते' । इयं चरणनिमित्तैव यद्वा स्वाभाविकी प्रतिभा एव भवति, ये प्रतिभे पूर्वं व्याख्यायेते स्तः । उत्पाद्या 'चासदाचरणस्य नाशात्' । इयमभ्यासनिमित्ता प्रतिभा प्रतिपादितास्माभिः । आवरणस्य सहजाभावात् 'सहजा' कर्म द्वारा तन्नाशादुत्पाद्योत्पद्यते । तत्रैव प्रतिभास्वरूपमपि निवेदितम्- 'नवनवोल्लेखशालिनी सेति' हेमचन्द्रः । एतदेव कदाचिन्मनस्यादाय वाग्भट्टोऽपि स्वीयमतमुपन्यस्यति सहजाविषये विशेषं व्याजहार तद्यथा- 'एतामपि वयं कर्मक्षयहेतुकामेव मन्यामहे' कर्मक्षय एव सा प्रस्तुता भवति ।

भिन्नागमदर्शनेन सा प्राप्या -

वाक्यकाण्डस्यावसाने कारिकाद्वयेन केषां भाग्यशालिनां भगवतीयं

प्रतिभा केन वोपायेन प्रसीदति, कथं वा विस्तारमाप्नोतीति सूचितम्-

[६०]प्रज्ञाविवेकं लभते भिन्नैरागमदर्शनैः ।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ।।
तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नाति प्रसीदति ।।

तदा इयं प्रज्ञा विवेकं- विस्तारमाप्नोति यदा नानागमदर्शनसिद्धान्तैरभ्यस्यते। किं तेन प्रयोज्यमित्यत्रोच्यते, तेभ्य आगमसिद्धान्तेभ्यः स्वशास्त्रसिद्धान्त एव निश्चितोऽसदिग्धश्च भवति ततश्च परिष्कर्तुर्भिन्नागमदर्शनैः शक्तिरुत्पद्यते। पुनरपि किं सा स्वतर्कमनुधावता प्रतिपत्त्रा कियच्छक्यमुन्नेतुमिति, तत्रोच्यते पुरा कदाचित्परमर्षयः स्वयोगात्सामर्थ्याच्च पदार्थान्यथावत्पश्यन्ति स्मेति, तेषां सिद्धान्तास्तथैव शोभन्ते स्म इत्यलम् । परञ्च ये तु योगमारुरुक्षवः प्रथमावस्थायां स्थिता अपि चाप्राप्तयोगशक्तिका मलिनचित्तवृत्तयः किं बहुना ये शास्त्रादेवातीतानागतव्यवहितपदार्थस्वरूपं निर्धार्य निश्चिन्वति तेषामपि नानागमोपसेवया देवी भगवती प्रतिभा प्रसीदतीति वक्तुं शक्यते।

पुनरपि तन्निरूपयितुं यतते । तद्यथा- लब्धप्रतिष्ठैः [६१] पूर्वं पूर्वदर्शनागमैर्विना स्वयमेव तत्तदित्ययथार्थमेव सति बाधे पूर्वं पूर्वं परित्यज्य उत्तरोत्तरमुत्प्रेक्षमाणानां विविधं कल्पयतां प्रतिपत्तृणां शास्त्रोपज्ञमेधाविरहिणां पण्डितम्मन्यमानानामभिमानाग्राहाहतानामत एवानुपासितवृद्धानां सम्प्रदायानभिज्ञानां तेषां भगवती विद्या अविद्यया तिरस्कृता नात्यर्थं प्रसीदति अतस्तर्हि वृद्धोपसेवाशालिनामागमजुषां विगलिताभिमानानामेवैषा प्रज्ञा प्रसीदतीति स्थितम् ।

पातञ्जलयोगसूत्रे [६२] प्रतिभा-

साक्षाच्छेषावतारपतञ्जलियोगसूत्रानुसारमपि प्राप्तावसरा प्रतिभा निरूपयिष्यते । तत्र सूत्रम् 'प्रातिभाद्वा सर्वम्' इति, प्रतिभा नाम तारकम् । प्रतिभोहः, तद्भवं प्रातिभम् । तज्ज्ञानं संसारतरणोपायत्वात्तारकमुच्यते । जन्तून्प्रति तारकमिव ज्योतिहृदयेषु भाति तत्तारकं भवति । नागोजिभट्टस्तु- प्रातिभं स्वप्रतिभोत्थानमौपदेशिकं ज्ञानं संसारतरणोपायत्वात्तारकं विवेकजस्य वक्ष्यमाणस्य सार्वज्ञ्यस्य पूर्वरूपं लिङ्गं यथा-सूर्योदयपूर्वरूपं प्रभेति । तत्रैवाग्रे

'तारकं सर्वं विषयम्'[६३] इति सूत्रम् ।

एतेन विवेकजं ज्ञानं लक्षयति । विवेकजमेव ज्ञानं परिपूर्णं भवति। अस्य क्वचित्कञ्चित्कथञ्चित्कदाचिदगोचरं न भवति । एतेन सर्वथा विषयमतीतानागतप्रत्युत्पन्नं सर्वं पर्यायैः सर्वथा विज्ञायते । एकक्षणोपारूढमिदं ज्ञानं सर्वं सर्वथा गृह्णाति । अस्यैवाशयो योगप्रदीपे मधुमती भूतिमुपादाय यावदस्य परिसमाप्तिरिति । मधुमती ऋतम्भरा प्रज्ञैव मधुः भवति, तद्वती प्रज्ञा मधुमती भवति । सा च ऋतम्भरा प्रज्ञा सप्तधा कथिता योगसूत्रकारेणेति। तारकं ज्ञानमेव सर्वोपकारकं योगिनामिति भावस्तेन प्रातिभमेव ते सर्वं जानन्ति । प्रातिभाद्वेत्यत्र सूत्रे हेतुवचनाद्विवेकज्ञानपूर्वरूपमेव लक्षणया प्रातिभं तारकं चेति व्याख्यातं नागोजिभट्टेन ।

बुद्धिस्मृतयोर्भेदः -

बुद्धिस्मृतिर्मेधा इति प्रज्ञापर्यायाः कथ्यन्ते । तत्र योगसूत्रकारमतेन बुद्धिस्मृतयोर्भेद एव कल्पितः । तद्यथा 'अनुभूतविषयासंप्रमोषः स्मृतिः' इति सूत्रे- 'ग्रहणाकारपूर्वा बुद्धिः । 'ग्राह्याकारपूर्वा स्मृतिरिति' प्रतिपादिता। ग्रहणमुपादानम्, तदनेनानधिगतबोधनं बुद्धिरित्युक्तम् । ग्रहणाकारो ग्रहणरूपं पूर्वं प्रधानं यस्याः सा तथोक्तेति । एवं ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता । तद्यथा-[६४] अयं घटो, घटमहं जानामीत्यनुभवो विषयप्रकारक-ज्ञानविशेष्यकः । स्मृतिस्तु स घट इत्याकारा विशेषविशेष्यिका ज्ञानप्रकारिका स्मृतिरिति । ग्राह्याकारा स्मृतिः, सा च द्विधा विभक्ता भावितस्मर्तव्या, अभावितस्मर्तव्या चेति । भावितस्मर्तव्या तु स्वप्ने, एवम- भावितस्मर्तव्या तु जाग्रदवस्थायामुपजायते । सर्वाश्चैता स्मृतयः प्रमाण- विपर्ययविकल्पनिद्रा स्मृतीनामनुभवात्प्रभवन्ति ।

ऋतम्भरा प्रज्ञा-[६५]

केयमृतम्भरेत्यत्र 'समाहितचित्तस्य या प्रज्ञा जायते तस्या ऋतम्भरेति संज्ञा भवति' । सा सत्यमेव बिभर्ति न च तस्यां विपर्यासरूपज्ञानलेशा-

ऽप्यस्तीत्यन्वर्था सेति । तथा चोक्तम्- ऋतम्भरा तत्र प्रज्ञा इति ।

[६६]आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम् ।।

ध्यानस्य चिन्तनस्याभ्यासे यो रस आदरस्तेन श्रवणमनननिदि-

ध्यासनैस्त्रिभिर्हेतुभिर्योगकाले प्रकर्षेण विपर्यासराहित्येन प्रज्ञां कल्पयन्नुत्पादयंस्तत्प्रज्ञया परवैराग्यद्वारेणोत्तमं योगं निर्बीजं लभत इति नागेशः । सैव पुनः-

श्रुतानुमानप्रज्ञाभ्यामन्यविषया सा प्रज्ञा विशेषार्थत्वादुक्तेति । तत्र [६७] 'श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्' इति सूत्रम् । एवं हि श्रुतागमविज्ञानं सामान्यज्ञानम्, तत्र आगमविषयोऽपि न शक्नोति विशेषो-ऽभिधातुम् । अनुमानं सामान्यविषयमेव प्रकाशयति । यत्र प्राप्तिस्तत्र गतिर्यत्र न प्राप्तिस्तत्र न गतिर्भवति । तत्र प्रज्ञानिर्ग्राह्य एव विषयो विशेषो भवति। तस्मात्प्रज्ञा विशेषार्थाभिधायिनी भवति । एषा प्रज्ञा समाधिजा भवति ततः प्रज्ञाकृताः संस्काराः नवो नवः संस्काराशयो भवति—तज्जः संस्कारोन्यसंस्कारप्रतिबन्धीति सूत्रम् ।

विवेकिनीप्रज्ञायाः सप्तप्रकाराः-

विवेकिनी सप्त प्रकारैव प्रज्ञा भवति । तत्र विषयभेदात्प्रज्ञाभेदोऽपि निश्चितः । [६८] 'तस्य सप्तधा प्रान्तभूमिः प्रज्ञा' इति सूत्रम् । प्रकृष्टोऽन्तो यासां भूमिनामवस्थानां तास्तथोक्ताः । यतः परं नास्ति स प्रकर्षः । प्रान्ता भूमयो यस्याः प्रज्ञाया विवेकख्यातेः, सा तथोक्तेति [६९] वाचस्पतिमिश्राः। प्रान्तभूमिकारूपिणी प्रज्ञा परामर्शः सप्तधेति नागोजिभट्टः[७०]। सा प्रज्ञा सप्तप्रकारा निष्पन्ना ज्ञानस्य लिङ्गं भवति । एवं सप्तविधां प्रज्ञां निरभिमानतया पश्यन्पुरुषः कुशल उच्यते । तत्र चतस्त्रो भूमयः पुरुषप्रयत्ननिष्पाद्याः भवति, अवशिष्टास्तिस्त्रो भूमयश्चित्तविमुक्तिरू-पेणोदाहृतास्सन्ति । यथा तास्तु-

[७१]-परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्तीति व्यासभाष्यम् । तत्र

नागोजिभट्टस्तु मुमुक्षुहेयं वस्तु परिज्ञातं साक्षात्कृतं नास्यावशिष्टं पुनर्ज्ञेयमस्तीत्याद्या। वाचस्पतिमिश्राः नास्य पुनः किञ्चिदपरिज्ञातं वदन्ति ।

[७२]-क्षीणा हेयहेतवो न पुनरेतेषां क्षेतव्यमस्तीति व्यासभाष्यम् । वाचस्पतिमिश्रास्तु-क्षीणा इति, प्रान्ततामाह न पुनरिति । तत्र नागेशः-हेयहेतवोऽविद्याकामकर्मादयो विवेकसाक्षात्कारेण मया क्षीणाः कृता न पुनरेतेषां क्षेतव्यमस्तीति द्वितीया ।

[७३]-साक्षात्कृतं निरोधसमाधिना हानमिति व्यासभाषम् । साक्षात्कृतं प्रत्यक्षेन निश्चितं मया संप्रज्ञातावस्थायामिव निरोधसमाधिसाध्यं हानम्, न पुनरस्याः परं निश्चेतव्यमस्तीति शेषः, इति वाचस्पतिमिश्राः । नागोजिभट्टस्तु-अविद्याविक्षेपादुत्पन्नेन निरोधसमाधिनाव्युत्थानकाले दुःखहानरूपो मोक्षो मया साक्षात्कृत ईदृशो में मोक्षो भवितेति परिचितोऽसंप्रज्ञातयोगवद्दृष्टान्तेन कैवल्यमपि दृष्टप्रायं न पुनरस्य परं निश्चेतव्यमस्तीति तृतीया ।

[७४]-भावितो विवेकख्यातिरूपो हानोपाय इति व्यासभाष्यम् । भावितो निष्पादितो विवेकख्यातिरूपो हानोपायः । नास्याः परं भावनीयमस्तीति शेषः, इति वाचस्पतिमिश्राः । नागोजिभट्टस्तु-विवेकख्यातिरूपो हानोपायो मया भावितो निष्पादितफलः कृत इति नातः परं भावनीयमस्तीति चतुर्थी। एषा चतुष्टयी विमुक्तिः प्रज्ञायाः

[७५]-चरिताधिकारा बुद्धिः । एषा कृतभोगापवर्गकार्येत्यर्थः ।

[७६]-गुणा गिरिशिखरतटच्युता इव ग्रावाणो निरवस्थानाः स्वकारेण प्रलयाभिमुखाः सह तेनास्तं गच्छति । न चैषां प्रविलीनानां पुनरस्त्युत्पादः प्रयोजनाभावादिति व्यासभाष्यम्। एषा लिङ्गशरीरस्य विनश्यदवस्था द्वितीयभूमिकेति भट्टनागेशः ।

[७७]-एतस्यामवस्थायां गुणसंबन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इति । एतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन्पुरुषः कुशल इत्याख्यायत।

अभिनवगुप्तस्तदीयं प्रतिभाविज्ञानञ्च-

काश्मीरशैवदर्शनस्य प्रायशश्चत्वार एवाचार्याः परिपूर्णज्ञानवन्तो योगसिद्धिभाजः, सर्वरहस्यमर्मज्ञाः, शैवसिद्धान्तप्रकाशनेऽतिनिपुणा अभूवनिति

शैवागमसाहित्यदर्शनेन परिज्ञायते । त आचार्याः- भट्टकल्लटः, सोमानन्दः, उत्पलदेवोऽभिनवगुप्ताश्च वर्तन्ते ।शैवागमस्य सिद्धान्तपक्षस्य प्रयोगपक्षस्य च सर्वाङ्गीणो विकासोऽभिनवगुप्तस्यैव मौलिकग्रन्थरत्नैर्व्यख्याभिश्च सम्पन्नः। रहस्यसाधनाविषयेकौलिकागमानामप्याश्रयोऽवलम्बितोऽस्ति गुप्तपादैः।

प्रतिभाविषयेऽप्यत्र बहुविधविचारोऽस्ति । मन्ये भर्तृहरिप्रोक्तप्रतिभा-विचारोऽपि शैवागमोक्तपरम्पराप्राप्तसिद्धयोगेनैव प्रभावितोऽस्ति । हरिणा काञ्चित्प्राचीनपरम्परामाश्रित्यायं विचारः प्रस्तावितोऽस्ति कदाचित् । भर्तृहरिप्रतिभावादः शुद्धव्याकरणरीत्या प्रवर्तते, अभिनवगुप्तप्रतिभावादः शैवसिद्धान्तोक्तदर्शनदृशा प्रचलति । क्वचित्तु हरिप्रभावस्तत्र द्रष्टुं शक्यते । मुख्यतया तत्र सोमानन्दकल्याणभवभूतिप्रभृतीनां गुरूणां प्रभावोऽस्ति । केषाञ्चिद्ग्रन्थानामपि प्रभावो वक्तुं शक्यते । तत्र प्रतिभाप्रसङ्गनिरूपणात्पूर्वमभिनवगुप्तस्य कश्चन अभिनव एव परिचय आवश्यकः सोऽत्र प्रस्तुयते डा० बलजिन्नाथपण्डितानां ग्रन्थसमाश्रयेन। अभिनवगुप्तः- कश्मीरशैवागमे यथोत्तरं मुनीनां प्रामाण्यमिति न्यायानुसारं सर्वोत्तीर्णं प्रामाण्यमभिनवगुप्तस्यैव प्रथते । एतेषां ग्रन्थनिर्णयः सर्वत्र चरमोऽस्ति । खैस्त-दशमशताब्दिमध्यभागोऽस्य जन्मकालः एवमेकादशशतक-मध्यभागस्य शिवत्वप्राप्तिकाल इत्यभ्युपगम्यते । स्वीयग्रन्थेषु स्वयमनेनायं निर्देशः कृतः । तद्यथा-

[७८]-अयं लेखोऽतीवाभिनवसामग्रीयुक्तोस्ति स च संगृहीतः इनसाइक-लोपीडिया आफ काश्मीर शैविज्म इति नाम्ना डा. बी एन.पण्डितमहाशयानां मार्गनिर्देशने निर्मीयमाणादभिनवकोशतः गृहीतः ।

[७९] **श्रीशास्त्रकृद्घटितलक्ष्मणगुप्तपाद**
मत्योपदर्शितशिवाद्वयवादतृप्तः । इति।

अभिनवगुप्तस्य शैशवं कौमारं वा तदाभूद् यदोत्पलदेवः सशरीरोऽ-वर्ततात्र लोके । तेनैव स्वशिष्यस्य लक्ष्मणगुप्तस्य पादयोरयं घटितः प्रत्यभिज्ञाशास्त्रदीक्षासमये ।

४-एकया मौखिकी परम्परया (या सिद्धसम्प्रदाये प्रसिद्धा) अस्य जन्म ९८१ तमे वै० संवत्सरे, तदनुसारं ९४२ तमे खैस्ते वर्षेऽभूदिति ।

तन्त्रालोकदर्शनेनास्य गुरवः श्रीशम्भुनाथा आसन् । ये तदानीं काङ्गडायां जालन्धरपीठे न्यवसन् । कौलत्रिकोभयरहस्यपारङ्गतास्ते सर्वतो भावेन स्वशिष्यस्याभिनवगुप्तस्य हृदये स्थितानां ग्रन्थीनां सर्वासाञ्च शङ्कानामपनेतारोऽभूवन् । तदुक्तम्-

[८०]**तूर्याख्यसन्ततिमहोदधिपूर्णचन्द्रः**
श्रीसोमतः सकलवित् किल शम्भुनाथः ।

अभिनवगुप्तस्यानेके गुरव आसन् । स्वयं तेन तन्त्रालोके तेषां पुण्यस्मरणं क्रियते आमर्दके शैवे एरकनाथपुत्रः श्री वामननाथः । तदुक्तम्।

[८१]**आमर्दसन्ततिमहार्णवकर्णधारः ।**
सद्वैशिकैरकवरात्मजवामनाथः ।।

श्रीमदुज्जटोद्भटादिनानागुरुपरिपाटी [८२] सन्ततिर्यत्प्रसादासादितमहिमाभिरस्माभिरेतत् प्रदर्शितमित्यत्र उद्भटः चक्रभानोः परम्परायामाविर्भूतोऽयं कालीनये ।

पुनरपि कौलिके तूर्याख्यसन्ततिरूपे श्रीशम्भुनाथस्मरणम्-

[८३]**अथ सप्रत्ययां दीक्षां वक्ष्ये तुष्टेन धीमता ।**
शम्भुनाथेनोपदिष्टां दृष्टां सद्भावशासने ।।

अपरत्र-इति दीक्षोत्तरे दृष्टो विधिर्वै शम्भुनोदितः ।

त्रिक्प्रक्रियासु अनेके गुरवः स्मर्यन्तेऽनेन- अन्येऽपि धर्मशिववामनकोद्भट्ट श्रीभूतेशभास्करमुखप्रमुखा महान्त इति ।

त्र्यम्बकीये च-त्रैयम्बकप्रसरसागर [८४] शायिसोमानन्दात्मजोत्पलजलक्ष्मणगुप्तनाथः । प्रत्यभिज्ञायां तु-श्रील्लक्ष्मणगुप्तदर्शितपथः [८५] श्री प्रत्यभिज्ञा-

विधौ मतङ्गशास्त्रे मातङ्गपारमेश्वरागमो मतङ्गशास्त्रम् । तत्रस्थगुरुराचार्येऽ-निरुद्धः यथोक्तम्-

[८६]**तस्मात् कर्मेन्द्रियाण्याहुस्ववग्वद् व्याप्तृणि मुख्यतः ।**
तत् स्थाने वृतिमन्तीति मतङ्गे गुरवो मम ।।
श्रीमतङ्गशास्त्रव्याख्यातारः श्रीमदनिरुद्धप्रभृतयः ।

एतद् विषये तत्राचार्याः[८७] ब्रुवन्ति- एते साक्षादुपदेशेन किमस्य गुरवः शास्त्रव्याख्यातृत्वेन वादरार्थं 'गुरवो मम' इति निश्चतुं तु न शक्नुमः ।इति।

भट्टभूतिराजपुत्रो भट्टेन्दुराजः श्रीनाथीये शैवे गुरुस्तदुक्तम्-

[८८]**श्रीनाथसन्तति-महाम्बर-धर्मकान्तिः ।**
श्रीभूतिराजतनयः स्वपितृप्रसादः ।।

एतस्मादेव भगवद्गीताधीता, तदुक्तम्-

[८९]**भट्टेन्दुरादाम्नाय विविच्य च चिरं धिया ।।**
कृतोऽभिअभिनवगुप्तेन सोऽये गीतार्थसंग्रहः ।
व्याकरणन्यायसात्यिशस्त्रेषु श्रीनृसिंहगुप्तोऽस्य पितैव गुरुरिति।

यदुक्तम्-

[९०]**पिता स शब्दगहने कृतसम्प्रवेशस्तर्कार्णवोर्मि**
पृषतामलपूतचित्तः ।
साहित्य- सान्द्ररसभोगपरो महेशभक्त्या स्वयं
ग्रहणदुर्मदया गृहीतः ।।

गुरुर्भट्टेन्दुराजोऽलंकारशास्त्रे, भट्टतौतोऽपि च नाट्यशास्त्रे गुरुरिति वदन्ति । एवं श्रीचन्द्रशर्मादयोऽपि गुरुत्वेन स्मृताः । यथोक्तम्-

[११]**श्रीचन्द्रवर्म-भवभक्ति विलासयोगा-**
नन्दाभिनन्दशिवशक्तिविचित्रनाथाः ।

इति गुरुपरम्परां प्रदर्श्य तत्कृतित्वं प्रदर्शयते ।

अस्य मौलिकाः ग्रन्थाः-

१- मालिनीविजयवार्तिकम्

२- तन्त्रालोकः,

३- तन्त्रसारः,

४- अनुत्तराष्टिका,

५- परमार्थचर्चा,

६- परमार्थसारः,

७- बोधपञ्चदशिका,

८- अनुभवनिवेदनस्तोत्रम्,

९- क्रमस्तोत्रम्,

१०-देहस्थदेवताचक्रस्तोत्रम्,

११-भैरवस्तोत्रम्,

टीकाग्रन्थाश्च-

१- क्रमकेलिः (अलभ्या),

२- परात्रिंशिकाविवरणम्,

३- ईश्वरप्रत्यभिज्ञाविमर्शिनी,

४- ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी,

५- अभिनवभारती (नाट्यशास्त्रटीका),

६- लोचनः (ध्वन्यालोकस्य टीका) ।

विनष्टाः ग्रन्थाः-

१- क्रमकेलिः क्रमस्तोत्रस्य व्याख्या,

२- पूर्वपञ्चिका मालिनीविजयतन्त्रस्य पूर्वभागस्य व्याख्या,

३- अजडप्रमातृसिद्धिविमर्शिनी,

४- ईश्वरसिद्धिविमर्शिनी,

५- शिवदृष्टयालोचनम्,

६- सम्बन्धसिद्धिविमर्शिनी । केषाञ्चन ग्रन्थानां केवलं नामोल्लेखमात्रमेव लभ्यते । केषाञ्चात्रोद्धरणानि प्रदीयन्ते परं ते ग्रन्था इदानीं नोपलभ्यन्ते ।

[९२] तन्त्रालोकेऽस्यावासविषयकमेकं पद्यम् । तच्च-

तस्मिन् कुवेरपुरचारुसितांशुमौलि
साम्मुख्यदर्शनविरूढपवित्रभावे ।
वैतस्तरोधसि निवासममुष्य चक्रे राजा द्विजस्य
परिकल्पितभूरिसम्पत् ।।

एतेन पद्येनास्य गृहं श्रीनगरे, वितस्तायास्तटे, सितांशुमौलिमन्दिरस्थपुरत आसीत् । तत्रैव तेन तन्त्रालोकः रचित इति । मधुराजस्त्वाह-

[९३] **द्राक्षारामस्य मध्ये स्फटिकमणिमध्ये मण्डपे चित्ररम्ये**
पुष्पस्रग्धूपदीपैर्बहलपरिमले चर्चिते चन्दनाद्यैः ।
वाद्यैर्गीतैः सनृत्तैः सततमुखरिते योगिनीसिद्धसङ्घै
राकीर्णे स्वर्णपीठे मृदुतमविलसदबद्धमुक्ताविताने ।।

अभिनवगुप्तस्य गृहं द्राक्षारामस्य मध्ये आसीत् यत्रायमारूढसिंहासनस्थः शिष्येभ्यः ज्ञानविज्ञानदानं करोति स्म । एतद्गृहवर्णनं केरलीयेन मधुराजेन गुरुनाथपरामर्शे कृतमस्ति। वर्तमानकाश्मीरस्य राजधान्यां श्रीनगरस्य प्राचीनतरे एकस्मिन् भागे शारिकापर्वतस्योदीच्यां दिशि 'गोतपूर' इति नाम्ना प्रसिद्धमेकं स्थानम् । परन्त्वैतद्वितस्तातीरं नास्ति, इदं स्थानं तु डलहदात् प्रवहन्त्याः क्षुद्रनद्या उभयोस्तटयोः वर्तते । तत्र सम्भाव्यते यदस्य वंशजा केचन तत्र

गृहं निर्मीय न्यवसन्निति । बृद्धपरम्परातः श्रूयते यदुत्पलदेवस्तत्र गोतपूरे निवसति स्म। गुप्तवंशीया यदा बहुसंख्याकास्तत्र न्यवसन्तदानीमिदं स्थानं 'गुप्तपुरम्' इति नाम्ना प्रसिद्धिमलभत। तदेव स्थानविशेषमिदानीं गोतपूर इति नाम्ना काश्मीरीभाषायां प्रथते । अभिनवगुप्तेन स्वीयेतिहासः स्वग्रन्थेषु वर्णितोऽस्ति । परन्तु काश्मीरेऽस्य विषये प्रचलिताः काश्चन किंवदन्त्यस्सन्ति। तास्तु-

१-शिवोपाध्यायेन श्रीविद्यायामस्य शास्त्रर्थः शंकराचार्यैः सहाभूदिति समुल्लिख्यते । डा० पण्डितहाशयानां मतेन नैतद्युक्तियुक्तं यदुभयोर्भिन्न एव कालो वर्तते इति ।

२-माधवीयशङ्करदिग्विजयेऽस्याभिनवगुप्तस्य देशः कामरूपो वर्णितः, स च ब्रह्मसूत्राणां शाक्तभाष्यकार इति कथितः । इदमपि कल्पनामात्रमस्तीति वक्तव्यम् । तत्र कामरूपदेशवासी न कोऽपि शाक्तभाष्यकारोऽद्यावधि केनचित्प्रमाणेन निश्चीयते। कथमस्य कामरूपवासः निरूपयितुं शक्यते ।

३-अपरापि एका दन्तकथा केनापि काव्यप्रकाशटीकाकृताभिनवगुप्तस्य नाम्नो व्याख्यानं कुर्वता स्वबुद्धयैव कल्पिता । नास्याः प्रामाणिकत्वं क्वचिदुपलभ्यते । इयमपि कविपल्पनैव केवला प्रतिभाति ।

४-काश्मीरेषु प्रचलितैककथानुसारं शिष्यैस्सार्धमसौ जीवनान्ते गुहां प्रविष्ट इति नैतस्यां किमपि लिखितं प्रमाणमुपलभ्यते । शैवागमे गुहप्रवेशविधिर्न कुत्रापि वर्ण्यते आचार्यैरिति ।

श्रीमधुराजेनाभिनवगुप्तपादानां वेषभूषाकृति विषये स्वीयं गुरुनाथपरामर्शे स्पष्टमुक्तमस्ति । तदुक्तम्-

[१४]आनन्दान्दोलिताक्षः स्फुटकृततिलको भस्मना भालमध्ये,
रुद्राक्षोल्लासिकर्णः कलितकचभरो मालया लम्बकूर्चः ।
रक्ताङ्गो यक्षपङ्कोल्लसदसितगलो लम्बमुक्तोपवीतः
क्षौमं वासो वसानः शशिकरधवलं वीरयोगासनस्थः ।।
जान्वासक्तैकहस्तः स्फुटपरमशिवज्ञानमुद्राक्षसूत्रो,
वामश्रीपाणिपद्मस्फुरितनखमुखैर्वादयन्नादवीणाम् ।

आचार्यस्य प्रियाः शिष्यास्त्रयो येषामुल्लेखो नानाग्रन्थेषूपलभ्यते । प्रथमस्तस्यानुजः मनोरथगुप्तः, द्वितीयः कर्णः, तृतीयो मन्द्र इति । तन्त्रालोकस्य सप्तत्रिंशेऽऽह्निके प्रियशिष्यानामैका सूची द्रष्टुं शक्यते । ते च सन्ति क्षेमगुप्ताद्याः पितृव्यतनयाः, शौरिः, रामगुप्तः लुम्पकः, अभिनवः (कश्चिदन्यः) वत्सलिका, अम्बा प्रभृतयश्चेति। क्षेमराजस्तु तस्य प्रधानतमः प्रसिद्धतमश्च शिष्य आसीत् ।

क्षेमराजोऽपि बहुधा आत्मानं शिष्यत्वेन प्रथयति । मधुराजोऽप्येवमेव सूचितवान् स्वीयं प्रधानशिष्यत्वमिति । मधुराजस्य शिष्यत्वं स्वीयग्रन्थेषु अभिनवगुप्तः न सूचयति। यतो हि मधुराजः पूर्वाचार्य्याणां भट्टकल्लटादीनां विरोध्यासीत् । क्षेमगुप्तः क्षेमराजश्च द्वावपि भिन्नौ शिष्यौ आस्ताम् । क्षेमराजो गुप्तवंशीयः नासीत् ।

[९५] अभिनवगुप्तस्य वंशपरम्परा-

अस्य वंशीया विद्वांसो ब्राह्मणाः कान्यकुब्जदेशनिवासिनोऽभूवन् । तेषामगत्स्यगोत्रमासीत् । एतेषां कुले कश्चिदत्रिनाम्ना सकलशास्त्रमर्मज्ञविद्वान् जन्म लेभे, तमेव काश्मीरनरेशो ललितादित्योऽष्टमे नवमे वा शतके काश्मीरम् आनीतवान् । सादरं ससत्कारञ्च तं सवृत्तिदानेन सुवासितवान्। तदीयकुलपरम्परायामयमभिनवगुप्तोऽवततार । वसुगुप्तलक्ष्मणगुप्तावप्यस्मिन् वंशेऽभूताम् । गुप्तविरुदेनाद्य समाजे वैश्यकुलं प्रसिद्धं परं तदानीं ग्रामशताध्यक्षस्यायं उपाधिरासीत् । कश्चनात्रिगुप्तीयो पूर्वजस्तथाविधो योग्यःप्रभावी गोप्ताभूद्येनास्य वंशस्येयमाख्या प्रसिद्धा सञ्जातेति वक्तुं शक्यते। गोप्तैव लोकेऽपभ्रंशशब्दव्यपदेश्यत्वमापन्नः गुप्तःजातः । पूर्वस्मिन्काले विष्णुगुप्तचाणक्यः, गणितज्ञोब्रह्मगुप्तः, समुद्रगुप्तस्य पिता चन्द्रगुप्तः सर्वे ब्राह्मणा एवासन् । अतो हि अभिनवगुप्तस्य पूर्वजा ब्राह्मणा आसन् । तद्यथोक्तम्

[९६] अन्तवेद्याकत्रिगुप्ताभिधानः लब्ध्वोत्पत्तिं
प्राविशत् प्राग्रयजन्मा ।
श्रीकश्मीरांश्चन्द्रचूडावतारैर्निः संख्याकैः
पावितोपान्तभागान् ।

एवमस्य पिता नृसिंहगुप्तः, पितामहो वराहगुप्ताः नृसिंहगुप्तश्चुखलकेति प्रसिद्धनामान्तरः माता विमलकला, मनोरथगुप्तोऽनुजोऽभवन् पितृव्यतनयाः पञ्च आसन्-क्षेमगुप्तः उत्पलगुप्तः, अभिनवगुप्तः (तन्त्रवटधानिका निर्माता) चक्रगुप्तः, पद्यगुप्तश्चेति । अम्बा भगिनी, ज्येष्ठभ्रातरौ लुम्पकाभिनव इति।

एते मातुलतनयाः पितृव्यतनया वेति न वक्तुं, शक्नुमः । एते सर्वेऽस्य समीपसम्बन्धिनोऽभूवन्नित्यसंशयः

तस्य प्रतिभाविज्ञानम्

श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्ताचार्यविरचिते तन्त्रालोके प्रसिद्धतमे ग्रन्थे त्रयोदशाह्निके शक्तिपातप्रसङ्गं निरूपणावसरे तीव्रतीव्रतरतीव्रतमशक्तिपातस्य स्व प्रतिभात एवं विवेचनं प्रस्तूयते । प्रतिभानं सर्वश्रेष्ठं प्रोक्तं तेनाचार्यस्य शास्त्रज्ञानं निरपेक्षत्वमेवसूच्यते । अत्र प्रतिभा निरूपणावसरे श्रीजयरथकृततन्त्रालोकस्य विवेकटीकाऽप्याश्रीयते। अभिनवगुप्तानां मतेन प्रतिभापरिनिष्ठित एव शिष्टः सर्वत्र प्रतिभाप्रसादेन पूज्यते । प्रतिभासर्वेषु जन्तुष्वपि विराजते न कोऽपि जन्तुः प्रतिभाविरहित इति कथ्यते यथा हरिणाप्युक्तम् । 'व्यवहाराः प्रतायन्ते तिरश्चामपि यद्वशादि' ति कदाचिदभ्यासनिमित्तापि सा प्रथिता, शास्त्रेषु प्रतिभैव सर्वात्मना ज्यायसीति प्रतिपादितम् । प्रतिभाज्ञानं श्रेष्ठतमं स्मृतम्, न तत्र गुरुदीक्षाऽभिषेकादिसंस्काराः प्रवर्तन्ते यतो हि प्रातिभं ज्ञानमादिगुरुणा महादेवेन स्वयमधिष्ठितम् । यैः संस्कारैः यत्र प्रातिभं ज्ञानमुदेति तच्च स्वतो लब्धमिति, किं तैः संस्कारैः प्रयोजनमिति प्राचीना आचार्याः ब्रुवन्ति । श्रीसर्ववीरश्रीब्रह्मयामलादौ तन्त्रे पातञ्जलसूत्रेषु च प्रतिभेयं सर्वसिद्धिदा प्रोक्ता । सर्वेषां प्राणिनां सर्वमनोरथान् प्रतिभा साधयति केषाञ्चिदत्र विरोधोऽप्यस्ति, तेषाम्मतेन नियतानियतमेव फलं लभ्यते संस्कारसम्पन्ना-ऽभिषिक्तश्चीर्णविद्याव्रती एव फलमाप्नोति, न तु प्रतिभावानिति । तत्रास्मद्गुरुवो यथा श्रीसोमानन्द- कल्याणभवभूतिपुरोगमाश्चोचुस्तदेवास्माकं प्रमाणमिति । तेषां तु प्रातिभ सांसिद्धिकं यद्विज्ञानं तदेव श्रेष्ठतममितिकृत्वा विरोधिनां मुखमुद्रणं कारयत्यभिनवगुप्तपादः तत्र प्रतिभा परमैषा सर्वकामदुघेति ख्यापिता वर्तते

एतत्सर्वं श्रीमन्नन्दिशिखातन्त्रेऽपि निरूपितमस्ति । अभिनवगुप्तकारिकाः दर्शनेनानुमीयते यदियं प्रतिभातन्त्रविषयिणी प्रथमकल्पिका जिज्ञासा

शिवपार्वती संवादरूपेण प्रश्नोत्तरमुखैनैवात्र प्राचीनग्रन्थषु निरूप्यते इति । तदत्र तन्त्रालोके प्रतिभातन्त्रं विशदं निरूपितम् । तदुक्तम् प्रतिभाशक्ति-निपातेन मायामलमपगच्छति । पुमान् मुक्तो भवति परञ्च पदमाप्नोति। प्रातिभं ज्ञानं दीक्षा ज्ञानतोऽधिकं श्रेष्ठमित्यपि निरूप्यते प्रातिभत्वं वस्तुसद्भवति नान्यस्मात्कथञ्चिदपि, विकाशमाप्नोतीति वर्णितम् ।

यथा भस्माच्छन्नोऽग्निर्मुखमारुतादिना स्फुटतां व्रजति, तथैव यथा स्वकाल एवोप्तं संसिक्तं च बीजमङ्कुरपल्लवादिरूपतयाभिव्यक्तिमियात्। तथैव प्रातिभमपि ज्ञानं गुरूपदिष्टयागयोगादिभिः स्फुटतामाप्नोति । हरिप्रोक्ता योगनिमित्ता प्रतिभा एवं प्रभावा एव परिलक्ष्यते तदुक्तम्।

[९६] यथाग्निर्भस्मनाच्छन्नस्तदपास्येन्धनेधितः ।
समीरणबलाविष्टो भूरितेजा वरानने ।
प्रभविष्णुः प्रकाशार्चिरेवमेतद्भवेत्स्फुटम् ।
यथोप्तं कालतो बीजं तत्सुसिक्तमथ क्रमात् ।
अङ्कुरेव पल्लवैराढ्यं तत्पुष्पादिफलान्वितम् ।।
व्यापकं विटपं तद्वद्गुरुतः प्रातिभं प्रिये । इति ।

यथा दिवा प्रदीपमनावश्यकं तथैव प्रातिभप्रकाशे सति महाप्रकाशो जायते तदतिरिक्तस्थानापेक्षता सुतरां भवति विमले दर्पणे स्वीयं प्रतिबिम्ब-मिवाप्रतिहतगतिः बहिरन्तर्गताश्च भावान् तत्वतः प्रतिभा यत्पश्यति तदेव तस्याः माहात्म्यमिति ज्ञेयम् यथाक्रमं कारिकामुखेन प्रतिभास्वरूपमुच्यते-यस्मिन् स्वयमेव , स्वप्रतिभातं ज्ञानमुपपन्नं तस्य ज्ञानस्य महत्त्वं शास्त्राचार्यादीनामपेक्षत्वं न हेतुरिति । तदुक्तम्

[९७] स्वयमेव यतो वेत्ति बन्धमोक्षतयात्मताम् ।
तत्प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत् ।।

स्वयमेवेत्यादिना न गुरुतो न तु शास्त्रतश्चेति । तत्प्रातिभज्ञानमुच्यते तन्महाज्ञानमप्युक्तमिति । प्रतिभाचन्द्रिकया तमस्तापौ विनश्यतः । तदुच्यते

[९८]**प्रतिभाचन्द्रिकाशान्तध्वान्तश्चाचार्यचन्द्रमाः ।**
तमस्तापौ हन्ति दृशं विस्फार्यान्दनिर्भराम् ।।
स शिष्टः कर्मकर्तृत्वाच्छिष्योऽन्यः कर्मभावतः ।
शिष्टः सर्वत्र च स्मार्तपदकालकुलादिषु ।।

प्रातिभशिष्यस्य व्युत्पत्तिस्स्वप्रतिभाधेया भवति, न तु पराधेय-व्युत्पत्तिकोऽयं शिष्य इति । प्रतिभाभाजनभूतोऽयं सर्वत्र विशिष्यते। तादृच्छिष्यः स्वयंभूरिति कीर्तितः, यतो हि कोऽपि जन्तुकः प्रतिभारिक्तो न भवति कस्तेषां गुरुः, कस्तान् स्व स्व कर्मसु नियोजयति? कः समये समये कोकिलादिषु विशिष्टव्यवहारं जनयति ? सर्वत्र प्रतिभैव विलसति, तया स्वयमेव यथाकालं यथापात्रं प्रातिभमहाज्ञानमुत्पाद्यते । तदुक्तं कारिकायां भर्तृहरिप्रभावेन-

[९९]**उक्तः स्वयम्भूशास्त्रर्थप्रतिभापरिनिष्ठितः ।**
यन्मूलं शासनं तेन न रिक्तः कोऽपि जन्तुकः ।।

हरिकारिका चात्र टीकायामुदाहृता- व्यवहाराः प्रतायन्ते तिरश्चामपि यद्वशादिति । पुनरपि तत्रैव तस्य स्वयंभूभावः प्रागुक्तोऽस्ति ।

प्रतिभाऽऽनन्त्यमप्यत्र प्रतिपादितम्-

[१००]**तत्रापि तारतम्योत्थमानन्त्यं दाढ्यर्थकम्प्रते ।**
युक्तिः शास्त्रं गुरुर्वादोऽभ्यास इत्याद्यपेक्षते ।।

प्रतिभाया अविशेषेण संभवेऽपि तारतम्येन समुल्लासादनन्तप्रकारत्वं यतः सा दाढर्थकम्प्रते अपेक्षते । कम्पमाना सा दृढा स्याद्वेति, पुनरपि सा युक्त्याद्यपेक्षते येनास्य दृढता भवेदिति । तदुक्तम् ।

[१०१]**कम्पमानं हि विज्ञानं स्वयमेव पुनर्व्रजेत् ।**
कस्यापि दाढ्र्यमन्यस्य युक्त्याद्यैः केवलेतरैः ।। इति ।

यथा यथा परापेक्षातानवं प्रातिभे भवेत् ।
तथा तथा गुरुरसौ श्रेष्ठो विज्ञानपारगः ।।

प्रतिभाज्ञानमेव सर्वात्मना श्रेष्ठम्- तत्र प्रतिभैव ज्यायसी न च शैवदीक्षेति । प्रतिपादितम्-

अन्यतः शिक्षितानन्तज्ञानोऽपि प्रतिभाबलात् ।
यद्वेत्ति तत्र तत्रास्य शिवता ज्यायसी च सा ।।

शिवदीक्षाप्राप्तस्य सर्वार्थसिद्धिरिति कथ्यते । पुनः प्रतिभा ततोऽपि श्रेष्ठा, ततो हि प्रतिभोदये दीक्षानावश्यकी, दीक्षया प्रतिभालाभः, स्वयं प्रतिभोत्पन्ने का दीक्षा, किं च शास्त्रम् प्रतिभासम्पन्नस्य न किमपि अपेक्षणीयं जायते । यतो हीदं प्रातिभं ज्ञानमादिगुरुणा महेश्वरेण स्वयमेवाधिष्ठितम्। प्रतिभया कल्पितं हि ज्ञानमकस्मात् भवति ।

तत्र गुरुदीक्षाभिषेकादिसंस्कारोऽपि व्यर्थ एव वर्तते, यतो हि एभिः परिकल्पितैः प्रतिभाधिष्ठात्वं संवर्धते, यदीयं स्वयमुत्पद्येत् तदा किं प्रयोजनमेभिः कल्पितैः संस्कारैरिति। तदुक्तमत्र सङ्गच्छते-

[१०२]**न चास्य समयित्वादिक्रमो नाप्यभिषेचनम् ।**
न सन्तानादि नो विद्याव्रतं प्रातिभवर्त्मनः ।।
आदि विद्वान्महादेवस्तेनैषोऽधिष्ठितो यतः ।
संस्कारास्तदधिष्ठानसिद्धयै तत्तस्य तु स्वतः ।।
देवीभिर्दीक्षितस्तेन सभक्तिशिवशासने ।
दृढता कम्प्रताभेदैः सोऽपि स्वयमथ व्रतात् ।।
तपो जपादेर्गुरुतः स्वसंस्कारं प्रकल्पयेत् ।
यतो वाजिसिनेयाख्यं उक्तं सिञ्चेत्स्वयं तनुम् ।।
इत्याद्युक्रमं यावदन्ते तत्परिनिष्ठतम् ।
अभिषिक्तो भवेदेवं न बाह्यकलशाम्बुभिः ।।
श्रीसर्ववीरश्रीब्रह्मयामलादौ च तत्तथा ।

निरूपितं महेशेन कियद्वा लिख्यतामिदम् ।।
इत्थं प्रातिभविज्ञानं किं किं कस्य न साधयेत् ।
यत्प्रतिभाद्वा सर्वं चेत्यूचे शेषमाहितम् ।।

एतस्य प्रमाणं वाजसिनेयाख्ये, श्रीसर्ववीरे, श्रीब्रह्मयामलादौ पातञ्जलसूत्रेषु च वर्तते । ततोऽधिकं केन प्रमातुं शक्यते, केन वा लिखितुं शक्यत इति । तत्र प्रातिभविज्ञानं किं किं न साधयति, अपि चेदं ज्ञानं लौकिकपारलौकिकोभयत्र सर्वं साधयतीति शेषमहामुनिवाक्यम् ।

केषाञ्चिदत्र विमतिर्दृश्यते । तदुक्तम् ।

[१०३]अन्ये त्वाहुरकामस्य प्रातिभे गुरुरीदृशः ।
सामाग्री जन्यता काम्ये तेनास्मिन्संस्कृतो गुरुः ।।
नियतेर्महिमा नैव फले साध्ये निवर्तते ।
अभिषिक्तश्चीर्णविद्याव्रतस्तेन फलप्रदः ।।

इत्यत्र प्रातिभगुरुर्न तथाभूतो यादृशोऽभिषेकादचीर्णविद्याव्रती गुरुः फलप्रदो भवतीति मन्यते । नियतेरयं महिमा यन्नियतादेव कारणान्नियतफलं भवतीति । तत्र तन्त्रालोकेऽस्य परिहारः क्रियते, यदस्मद्गुरवस्तु एतन्न मन्यन्त इत्याह–

[१०४]असदेतदिति प्राहुर्गुरवस्तत्त्वदर्शिनः ।
श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः ।।
तथा हि त्रिंशिकाशास्त्रविवृत्तौ तेऽभ्यधुर्बुधाः ।
सांसिद्धिकं यद्विज्ञानं तच्चिन्तारत्नमुच्यते ।।
तदभावे तदर्थं तदाहृतं ज्ञानमादृतम् ।
एवं यो वेदतत्त्वेन तस्य निर्वाणगामिनी ।।
दीक्षा भवत्यसंन्दिग्धा तिलाज्याहुतिवर्जिता ।
अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेति तत्त्वतः ।
य सिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ।

अविधिज्ञो विधानज्ञो जायते यजनं प्रति ।।
इत्यादिभिस्त्रींशिकोक्तैर्वाक्यैर्माहेश्वरैः स्फुटम् ।
ज्ञानं दीक्षादिसंस्कारसतत्त्वमिति वर्णितम् ।।
ज्ञानोपायस्तु दीक्षादिक्रिया ज्ञानवियोगिनाम् ।
इत्येतदधुनैवास्तां स्वप्रस्तावे भविष्यति ।। इति ।

अस्मद्गुरवस्तत्त्वदर्शिनः श्रीसोमानन्दकल्याणभवभूतिपुरोगमाः पूर्वोक्तमसदिति प्राहुः । तेषां मतं यत्प्रतिभावान् श्रेष्ठतमो भवति । यद्धि प्रातिभं नाम विज्ञानं तत्सर्वशास्त्रेषु चिन्तामणिप्रायमुच्यते यस्मात्काम्यार्थिनां सर्वफलसंपत्तिर्भवति। एतदभावे कृत्रिमज्ञानादिभिः सर्वार्थसिद्धिर्नभवेत् । तस्मादुद्घोष्यते तदभावे तदर्थं तदाहृदं ज्ञानमाहृतम् । यश्च सांसिद्धिकं ज्ञानं तत्त्वतो वेत्ति, तस्य तु बाह्यक्रियां विना निःसन्देहा निर्वाणगामिनी दीक्षा स्वत एव भवति। अत एवासौ सिद्धिभाग्योगी चेति कथ्यते । इदं सतत्त्वं ज्ञानमाद्यैर्माहेश्वरै-र्वाक्यैस्स्फुटजातमिति स्पष्टम् । तत्रैवेयं प्रतिभा कामदुघा कीर्तिता, गुर्वादेः प्रमाणस्यापि परमेव यौक्तिकमुपायत्वं सैवास्य विश्रान्तिस्थानमित्यर्थः । सैव परतत्त्वैक्यापादनेन सर्वाभीष्टसंपत्तिहेतुरित्यस्मात्कामदुघति कथिता । एवमुपायानां योगे परस्परस्य सम्बन्धे यः क्रमः तमेवावलम्ब्य निरुपायमत एव अक्रमं यत्प्रतिभात्मकं रूपमुदेति, तदेव परं तत्त्वं तत्र सर्वशास्त्रेषु सुनिश्चितम् । नात्र कस्यचिद्विमतिरित्युक्तम्-

[१०५]गुरुशास्त्रप्रमाणादेरप्युपायत्वमञ्जसा ।
प्रतिभा परमेवैषा सर्वकामदुधा यतः ।।
उपाययोगक्रमतो निरुपायमथाक्रमम् ।
यद्रूपं तत्परं तत्त्वं तत्र तत्र सुनिश्चितम् ।।
यस्तु प्रातिभबाह्यात्मसंस्कारद्वयसुन्दरः ।
उक्तोऽन्योन्योपकार्यत्वात्स साक्षाद्वरदो गुरुः ।।

प्रतिभापि शक्तिपातस्य बाह्यानामुपायानां वैचित्र्याद्विभिन्नास्ति इति चेत्युच्यते-

[१०६]स्वमुक्तिमात्रे कस्यापि यावद्विश्वविमोचने ।
प्रतिभोदेति खद्योतरत्नतारेन्दुसूर्यवत् ।।

दृष्टान्तसामर्थ्यादन्तरा यथोत्तरं प्रतिभा विचरति । यथा आकाशे इन्दुः, सूर्यः, तारकाश्च उदिताः भवन्ति जगत्सर्वं प्रकाशयन्ति तथैव प्रतिभोदेति सर्वमपि प्रकाशयति । तत्रास्मत्तन्त्रालोकाभ्यासादपि प्रतिभोत्पद्यत इत्यभिनवगुप्तोक्तम्-[१०७]

[१०७]ततःप्रातिभसंवित्त्यै शास्त्रमस्मत्कृतं त्विदम् ।
योऽभ्यस्येत्स गुरुर्नैववस्त्वर्था हि विडम्बकाः ।।

तत्र टीकायाम्-ततस्तरतमभावेन प्रतिभोदयाद् हेतोर्यः पुनरिदं श्रीतन्त्रालोकसंज्ञमस्मत्कृतं शास्त्रं प्रातिभत्वं संवेदयितुमभ्यसेत्स समनन्तरमेव सम्पूर्णबोधात् प्रातिभो गुरुर्भवेत् यद्दृक्पातमात्रेण सर्वोऽप्ययं लोकस्ताद्रूप्यमिति। महतीयं विडम्बना यत्स्वयमेव स्वकृतिं प्रत्येव प्रशंसा नाम तत्परिहाराय 'नैव वस्त्वर्था हि बिडम्बका' इत्युक्तम् ।

[१०८]परोपजीविता बुद्धया सर्वं इत्थं न भासते ।
तदुक्तया शास्त्रेषु तेषु निरूप्यते ।
किरणाया तथोक्तं च गुरुतः शास्त्रतः स्वतः ।।

कश्चिदपि जन्तुः प्रतिभारिक्तो नास्तीति पूर्वमुक्तम् । इदानीं तदुदयाय गुरुशास्त्रयोरपेक्षत्वं कथ्यते । कथमेतदत्र सङ्गच्छते । तदुत्तरयति ।

'उपर्युक्तकारिकाभ्यामिति । तत्रोच्यते शक्तिपातस्य मान्द्यात् यः परोक्तिमन्तरेण न किञ्चिज्जानाति तत्र गुरुशास्त्रयोरपेक्षा भवति । यत्र स्वतः प्रतिभोदेति तत्र न किमपि तयोः प्रयोजनमिति । शास्त्रेषु स्फुटमेतन्निरूपितं दृश्यते, यथोक्तं किरणायां-गुरुतः शास्त्रतः, स्वतः मन्ये एषामुत्तरोत्तरं प्रतिभाचमत्कारो भवेदिति । यतो हि केचिद्योगयोग्याः, केचित्क्रियायोग्याः, नियतविषयाश्च काचन सर्वेषां शास्त्रापेक्षा भवति' ।

परन्तु केषाञ्चित्स्वत एव प्रतिभोदेति तत्र श्रीमन्नन्दिशिखातन्त्रप्रमाणमिति, यतो हि तत्रायं विषयो वितत्य निरूपितोऽस्ति । शिवपार्वतीप्रश्नोत्तरमुखेनाखण्डं तन्निरूपितम् तदुक्तम्-

ज्ञानयोग्यास्तथा केचिच्चर्यायोग्यास्तथापरे ।
श्रीमन्नन्दिशिखातन्त्रे तदभग्नं निरूप्यते ।
प्रश्नोत्तरमुखेनेति तदभग्नं निरूप्यते ।
अनिर्देश्यः शिवस्तत्र कोऽभ्युपायो निरूप्यताम् ।।
इति प्रश्ने कृते देव्या श्रीमान्छम्भुर्न्यरूपयत् ।
उपायोऽत्र विवेकैकः स हि हेयं विहापयन् ।।

तत्र टीकायाम्- विवेकैक इति विवेक एव एकः प्रधानः स्वपरामर्शात्मा विवेक इत्यर्थः हेयमिति मायीयभावादीति । [१०९] तत्रापि प्रातिभज्ञानमेवोत्तममित्युक्तम्-

ददात्यस्य च सुश्रोणि प्रातिभं ज्ञानमुत्तमम् ।
यदा प्रतिभया युक्तस्तदा मुक्तश्च मोचयेत् ।
प्रतिभोदये मोक्षप्राप्तिः-

यदा प्रतिभा कस्यचित्समुदेति तदा तस्य मोक्षो भवति । तस्मान्मोक्षोपायरूपेयं प्रतिभा भवति ।

इदानीं प्रश्नः समुदेति यदि दीक्षया एवार्थसिद्धिस्तदानीं कथं प्रतिभया मोक्षप्रसङ्गः । एतयोः समनन्तरमेव कार्यं निर्दिश्यते । तत्राहाभिनवगुप्तपादः- गुर्वायत्ता दीक्षा बन्धबन्धनमोक्षणेऽलं भवति । प्रातिभमोक्षस्तु केवलीभावसिद्धः, यतः, तादृशस्य केवलस्य ध्रुवं मुक्तिरित्युच्यते -

प्रश्नः-

परशक्तिनिपातेन ध्वस्तमायामलः पुमान् ।
ननु प्राग्दीक्षयां मोक्षोऽधुना प्रातिभात्कथम् ।।
इति देव्या कृते प्रश्ने प्रावर्तत विभोर्वचः ।
एतदुत्तरम् दीक्षया मुच्यते जन्तुः प्रातिभेन तथा प्रिये ।।
गुर्वायत्ता तु सा दीक्षा बन्धबन्धनमोक्षणे ।
प्रातिभोऽयं स्वभावस्तु केवलीभावसिद्धिदः ।।

केवलस्य ध्रुवं मुक्तिः परतत्त्वेन सा ननु ।
नृशक्तिशिवमुक्तं हि तत्त्वत्रयमिदं त्वया ।।

पुनर्प्रश्नः-

नाबध्यो बन्धने शक्तिः करणं कर्तृतां स्पृशत् ।
शिवः कर्तेति प्रोक्तं सर्वं गुर्वागमादणोः ।
पुनर्विवेकादुक्तं तदुत्तरोत्तरमुच्यताम् ।
कथं विवेकः किं वास्य देवदेव विविच्यते ।।

एतदुत्तरम्-

इत्युक्ते परमेशान्या जगादादिगुरुः शिवः ।
शिवादितत्त्वत्रितयं तदागमवशाद् गुरोः ।।
अघोरोत्तरगैर्वाक्यैः सिद्धं प्रातिभतां व्रजेत् ।
दीक्षाविच्छिन्नपाशत्वाद् भावनाभावितस्य हि ।।

एतैर्वाक्यैः प्रश्न प्रति वचनरूपैः सिद्धं यथायथं तात्त्विकेन रूपेण प्ररोहमुपगतं प्रातिभतां व्रजेत् प्रातिभं ज्ञानं जायत एवेत्यर्थः।

प्रतिभाविकासः-

प्रतिभा विकासमुदाहरति दृष्टान्तपरैर्वाक्यैः, तदुक्तम्-

विकासं तत्त्वमायाति प्रातिभं तदुदाहृतम् ।
भस्मच्छन्नाग्निवत्स्फौट्यं प्रतिभे गौरवागमात् ।।
बीजं कालोप्तसंसिक्तं यथा बर्धेत् तत्तथा ।
योगयागजपैरुक्तैर्गुरुणा प्रातिभं स्फुटेत् ।।

इत्यत्र दृष्टान्तोपदर्शनेन प्रतिभास्वरूपं हृदयङ्गमयति । यथा हि भस्मच्छन्नोऽग्निर्मुखमारुतादिना स्फुटतां गच्छति प्रकटी भवतीत्यर्थः । यथा बीजं समय एवोप्तं संसिक्तञ्च यथाकालमङ्कुरपल्लवादिरूपेण प्रस्फुटं जायते। तथैव प्रातिभज्ञानमपि गुरूपदिष्टैर्वाक्यैर्यागयोगादिभिः सफलं भवतीति टीकायामप्युक्तम्-

[११२]यथाग्निर्भस्मनाच्छन्नस्तदपास्येन्धनेन्धितः ।
समीरणबलाविष्टो भूरितेजा वरानने ।।
प्रभविष्णुः प्रकाशार्चिरेवमेतद् भवेत्स्फुटम् ।
यथोप्तं कालतो बीजं तत्सुसिक्तमथ क्रमात् ।
अङ्कुरैः पल्लवैराढ्यं तत्पुष्पादिफलान्वितम् ।।
व्यापकं विटपं तद्वगुरुतः प्रातिभं प्रिये । इति ।

विवेकस्वरूपम्-

प्रातिभं ज्ञानं निरूप्येदानीं तावद्विवेकस्य स्वरूपं निरूपयति -

[११३]विवेकोऽतीन्द्रियत्वेष यदा याति विवेचनम् ।
पशुपाशपतिर्ज्ञानं स्वयं निर्भासते तदा ।।
प्रातिभे तु समायाते ज्ञानमन्यत्तु सेन्द्रियम् ।
वागक्षिश्रुतिगम्यं चाप्यन्यापेक्षं वरानने ।।
तत्त्यजेद्बुद्धिमास्थाय प्रदीपं तु यथा दिवा ।
प्रादुर्भूत् विवेकस्य स्याच्चिदिन्द्रियगोचरे ।।
दूराच्छ्रुत्यादिवेधादिवृद्धिक्रीडाविचित्रता ।
सर्वभावविवेकात्तु सर्वभावपराङ्मुखः ।।

एतट्टीकायाम्-यस्तु अतीन्द्रियः प्रमाणगोचर एष संविल्लक्षणोऽर्थो विचारपदवीमभ्युपेयात् । स स्वपरामर्शात्मा विवेको नाम यत्तस्मिन्सति स्वयमनन्यापेक्षमेव प्रातिभं ज्ञानं परिस्फुरेत् । एतस्य प्रातिभज्ञानस्य समुदये सति तुच्छतरस्य बाह्याभ्यन्तरकरणैरुपजायमानस्य निखिलस्यापि चाक्षुषादिज्ञानस्य सर्वथा परित्यागः करणीयोऽनुपयोगादेव । यथा हि दिवसि दिवसभर्तुर्भुवन-भासनार्थं महाप्रकाशे सञ्जातेऽनुपयोगादेव दीपादीनां परित्यागः क्रियत इति। एतदुदिते दिनकृतस्थानीयां बुद्धिं सम्यग्ज्ञानमास्थाय प्रदीपमिवदिने तदन्यत्संकुचितं ज्ञानं वागुपलक्षतैः कर्मेन्द्रियैरक्षिश्रुत्युपलक्षितैर्बुद्धीन्द्रियैश्चायं सेन्द्रियमन्तः करणैर्गम्यश्चात एवान्यापेक्षं त्यजेत् ।

प्रादुर्भूतविवेकस्य शब्दादाविन्द्रियार्थे विषये दूराच्छ्रुत्यादिविचित्रता स्यात् देशकालाकारविप्रकृष्टादिविषया संवित्तिर्जायते । तत्र पुनश्च-

[११४]क्रीडासु सुविरक्तात्मा शिवभावैकभावितः ।
माहात्म्यमेतत्सुश्रोणि प्रातिभस्य विधीयते ।।
स्वच्छाया दर्शवत्पश्येद्बहिरन्तर्गतं शिवम् ।
हेयोपादेयतत्त्वज्ञस्तदा ध्यायेन्निजां चितिम् ।।

इत्यत्र प्रातिभस्यैतन्माहात्म्यं विधीयते । यथा आदर्शे स्वच्छायां कश्चित्पश्यतिस्वीयं तनुश्च स्वच्छयति तथैव प्रतिभाऽऽदर्शेऽऽत्मानं पश्यनेवं जन्तुः बहिरन्तश्च सर्वात्मना प्रातिभं स्वरूपं पश्यति ।एवं पुनः सिद्धिजालं हि परप्रत्ययस्य कारणं प्रतिपादितं परप्रत्ययमात्रमेव सिद्धिरिति । प्रतिभया स्वयं मुक्तः सन् परानपि मोचयेत्तथोक्तम्-

[११४]सिद्धिजालं हि कथितं परप्रत्ययकारणम् ।
इहैव सिद्धाः कायान्ते मुच्येरन्निति भावनात् ।।
परभावनदार्ढ्यात्तु जीवन्मुक्तो निगद्यते ।
एतत्ते प्रातिभे भेदे लक्षणं समुदाहृतम् ।।
शापानुग्रहकार्येषु तथाभ्यासेन शक्तता ।
तेषूदासीनतायां तु मुच्यते मोचयेत्परान् ।।

यद्यप्येदं प्रातिभज्ञानं सर्वं साधयति, परं आत्मा तु स्वभावादेव शुद्धबोधस्वरूपो भवति, प्रतिभा तत्र किं कुर्यादित्यत्र कथ्यते-

[११५]भूतेन्द्रियादियोगेन बद्धोऽणुः संसरेद् ध्रुवम् ।
स एव प्रतिभायुक्तः शक्तिमत्वं निगद्यते ।।
तत्पातावेशतो मुक्तः शिव एव भवार्णवात् ।
नन्वाचार्यात्सेन्द्रियं तज्ज्ञानमुक्तमतीन्द्रियम् ।।

प्रतिभायुक्तः प्रादुर्भूतो विवेकश्चेत् तच्छक्तितत्त्वं निगद्यते, स च शुद्धविद्यादशाधिशायी भवेदिति । तत्र प्रतिभाविवेकयोर्द्वैधीभावे पुनः

प्रश्नसमाधानपरैः वाक्यैरेतयोरतीन्द्रियत्वं विवेकजं तु निरिन्द्रिम्प्रतिपादितम् । तदुक्तम्-

विवेकजं च तद्बुद्धया तत्कथं स्यान्निरिन्द्रियम् ।
इति पृष्टोऽभ्यधात्स्वान्तर्धियोर्जाड्यैकवासनात् ।।

सेन्द्रियं ज्ञानं बुद्धयान्तःकरणमुक्तं, निरिन्द्रियञ्च विवेकजं कथितम्। परन्तु विवेकजमपि 'तद्बुद्धया' इति कथितं तदा कथं तन्निरिन्द्रियं भवेदिति । निरिन्द्रियं ज्ञानं तु शशविषाणवदत्यन्तमसदेव भवतीत्यर्थः । एतस्य टीकायां पद्यद्वयं विषयममुं स्पष्टीकरणाय, यदुक्तम् -

[११६]सेन्द्रियं चैव गुरुतो ज्ञानमुक्तमतीन्द्रियम् ।
विवेकजन्मनो बुद्धया विना देव प्रवर्तते ।।
निरिन्द्रियत्वं तु कथं प्रोच्यते तस्य शंकर ।
एतच्छशविषाणेन प्रतिभाति समं मम । इति ।।

एदुत्तरं यथा-जाड्यसंस्कारकारणस्य भेदस्यावृत्त्या प्रकृष्टेन विवेकेनच्छितौ शिव एव प्रतिभासको निरिन्द्रिया संविदेव सर्वतः सिद्धं विवेकजस्य ज्ञानस्यातीन्द्रियत्वमस्त्युक्तम्

[११७]अक्षरत्वं प्रविवेकेन तच्छितौ भासकः शिवः ।
संस्कारः सर्वभावानां परता परिकीर्तिता ।।

विवेके तु मूलकारणे द्वे भवतः, मनोबुद्धी विना ज्ञानन्नोत्पद्येते । तत्र बुद्धितत्त्वं उत्तममध्यमाधमरूपं त्रिगुणं भवति । पुनरपि प्रतिभादेव मुक्तिस्तदा दीक्षया अनेकाध्याससाध्यया किं प्रयोजनं नास्ति । यदि प्रातिभेन जन्तुः मुच्यते तदा शिवाध्वरे किमर्थं शिशोर्दीक्षा क्रियते। तदुक्तम् -

[११९]मनोबुद्धी न भिन्ने तु कस्मिंश्चित्कारणान्तरे ।
विवेके कारणे ह्येते प्रभुशक्त्युपबृंहिते ।।
न मनोबुद्धीहीनस्तु ज्ञानस्याधिगमः प्रिये ।

परभावात्तु तत्सूक्ष्मं शक्तितत्त्वं निगद्यते ।।
विवेकः सर्वभावानां शुद्धभावान्महाशयः ।
बुद्धितत्त्वं तु त्रिगुणमुत्तमाधममध्यमम् ।।
अणिमादिगतं चापि बन्धकं जडमिन्द्रियम् ।
[९]ननु प्रातिभातो मुक्तो दीक्षया किं शिवाध्वरे ।।

एतदुत्तरमग्रिमकारिकासु दृश्यताम् -

ऊचेऽज्ञाना हि दीक्षायां बालबालिशयोषितः
[१२०]पाशाच्छेदाद्विमुच्यन्ते प्रबुद्धयन्ते शिवाध्वरे ।।
तस्माद्दीक्षा भवत्येषु कारणत्वेन सुन्दरि ।
दीक्षया पाशमोक्षे तु शुद्धभावाद्विवेकजम् ।।
इत्येष पठितो ग्रन्थः स्वयं ते बोद्धुमक्षमाः ।
तेषां शिवोक्तिसंवादाद्बोधो दार्ढ्यं व्रजेदिति ।।
श्रीमन्निशाटने चात्मगुरुशास्त्रवशात्त्रिधा ।
ज्ञानं मुख्यं स्वोपलब्धिविकल्पार्णवतारणम् ।।
मन्त्रात्मभूतद्रव्यादिदिव्यतत्त्वादिगोचरा ।
शंका विकल्पमूला हि शाम्येत्स्वप्रत्ययादिति ।।

बालादिष्वज्ञानिषु अज्ञविषया दीक्षा कारणत्वेन पाशच्छेदाच्छिवाध्वरे प्रबुद्धयन्ते । तस्मात् कारणीभूता दीक्षा तेषु भवति । तेषां दीक्षया मोक्षे शुद्धभावात् विवेकजं प्रातिभं ज्ञानं समुदेति । तत्प्रतिपदं तद्ग्रन्थपाठेनापि प्रतिभोदीयात् । प्रतिभा च गुरुतः शास्त्रतः स्वतश्च त्रिधोदिता जायते। प्रतिभया च विकल्पोत्थाः समस्याः शङ्काः निवर्तन्त इति भावः । टीकायां शङ्कानामपि षड्विध्यं कीर्तितमस्ति । ताश्च-

[१२१]मन्त्रशङ्कात्मशङ्का च द्रव्यशङ्का तथा पुनः ।
भूतशङ्का तथा दिव्यकर्मशङ्का परा मता ।।
पञ्चधा तु स्मृता शङ्का तत्त्वशङ्का परा स्मृता ।
षड् विधां कथयिष्यामि यथा मोक्षमावाप्स्यसि ।।

इत्याद्युपक्रम्य तत्रैव समाधानम्-

विकल्पक्षीणचित्तस्तु परमाद्वैतभावितः ।

मुच्यते नात्र सन्देह इति सत्यं ब्रवीमि ते ।।इति।

राजशेखरस्तदीयप्रतिभाविवेचनञ्च-

[१२२]**बभूव बल्मीकभवः कवि पुरा ततः प्रपेदे**

भुवि भर्त्तृमेण्ठताम् ।

स्थितः पुनर्यो भवभूतिरेखया स वर्त्तते सम्प्रति

राजशेखरः ।।

महाराष्ट्रियो यायावरीयः कविराजशेखरः प्रौढकविः, गम्भीरमीमांसकः, सिद्धहस्तनाटककारश्चतुरस्रो विद्वान् आसीत् । असावद्भुत्प्रतिभासम्पन्नः प्रखरालोचकः बहुभाषाविद्कन्नौजनृपतिमहेन्द्रपालस्य शिक्षकोऽद्यापि संस्कृतवाङ्मये नक्षत्रमिव विराजते ।

१-राजशेखरस्य समयः विक्रमाब्दस्य ९३७-९७७ (ई० सन्-८८०-९२०) यावन्निर्विवादरूपेणैतिह्यविद्भिः स्वीक्रियते ।

२-अस्य पिता दुर्दुकः, प्रसिद्धयायावरस्याकालजलदस्य चतुर्थः प्रपौत्रः, शीलवती मातेति च बालरामायणादेव ज्ञायते । तद्यथा-तदामुष्यायणस्य [१२३] महाराष्ट्रचूडामणेरकालजलदस्य चतुर्थो दौर्दुकिः शीलवतीसूनुरुपाध्यायश्रीराजशेखर इत्यपर्याप्तं बहुमानेनेति ।

३-अस्य कृतयो यथा-

१-कर्पूमञ्जरी,

२-विद्धशालभञ्जिका (नाटिका)

३-बालरामायणम् (नाटकम्)

४-बालभारतम् प्रचण्डपाण्डवम्, प्रतिद्धा काव्यमीमांसा चेति । बालरामायणे भुवनकोशस्यपि समुल्लेखः क्रियते । तद्यथा-

यद्यस्ति स्वस्ति तुभ्यं भव पठनरुचिर्विद्धि नः षट् प्रबन्धान् ।

नैवं चेद्दीर्घमास्तां नटवटुवदने जर्जरा काव्यकन्था ।।

केषाञ्चिन्मतेन हरविलासोऽप्यनेन कृतः प्रबन्धो वर्तते

४-अस्य बहुभाषाविज्ञता विज्ञायते यदयं संस्कृतेन साकं प्राकृतापभ्रंशभाषादीनां पर्याप्तां मीमांसां करोति । कर्पूरमञ्जरी सट्टकं प्राकृतमस्ति । 'सुभव्योऽपभ्रंशः, 'सरसवचनं भूतवचनम्' यद्योनिः किल संस्कृतस्येत्यादिभिर्वाक्यैस्सः संस्कृतेतरभाषाः प्रशंशस ।

५-राजशेखरस्य प्रशस्तयो [१२४] **याः** कविभिर्गीयन्ते तत्र तस्य गोष्ठी सखा श्रीकृष्णशंकरशर्मा, एतस्य कापि रचना न लभ्यते परं तन्नाम स्मरणपूर्वकं विद्धशालभञ्जिकायां स्वयं राजशेखरस्तदीयपद्यमुद्धरति । तद्यथा-

[१२५] **पातुं श्रोत्ररसायनं रचयितुं वाचः सतां सम्मताः**
व्युत्पत्तिं परमामवाप्तुमवधिं लब्धे रसस्रोतसः ।
भोक्तुं स्वादुफलं च जीविततरोर्यद्यस्ति ते कौतुकं
तद्भ्रातः शृणु राजशेखरकवेः सूक्ती सुधास्पन्दिनी ।।

महाकविधनपालस्तिलकमञ्जर्यां लिलेख-

[१२६] **समाधिगुणशालिन्यः प्रसन्नपरिपक्त्रिमाः ।**
यायावरकवेर्वाचो मुनीनामिव वृत्तयः ।।१३।।
कवि सोड्ढलस्स्वोदयसुन्दरीकथायाम्

[१२७] **यायावरः प्राज्ञवरो गुणज्ञैराशंसितः सूरिसमाजवर्यैः ।**
नृत्यत्युदारं भणिते रसस्था नटीव यस्योदरसा पदश्रीः ।।
एतस्य प्रतिभाविवेचनम्-

काव्यमीमांसायाश्चतुर्थपञ्चमाध्याययोः प्रतिभाया विवेचनमुपलभ्यते । इयं प्रतिभा हरिप्रतिभातो भिन्नैव कदाचिद्वक्तुं शक्यते । राजशेखरः काव्यस्य मूलकारणं जन्मान्तरीयसंस्कारविशेषां शक्तिं मनुते, शक्त्या प्रतिभोदेति, सा च काव्यस्य जननी भवति । प्रतिभालक्षणमनुक्त्वैव तद्भेदानाचक्षते । 'यस्य निसर्गतः'[३] शास्त्रमनुधावति बुद्धिः स बुद्धिमान् कथ्यते । सा

त्रिविधा- 'स्मृतिर्मतिप्रज्ञा इति, बुद्धिपर्यायशब्देनात्र नोदीरिता, एते बुद्धिभेदवाचकाः शब्दाः गृह्यन्ते, यतो हि-स्मृतिर्नाम अतिक्रान्तस्यार्थस्य स्मर्त्री, मतिः- वर्तमानस्य मन्त्रिणी, प्रज्ञां-अनागतस्य प्रज्ञात्रीति इयमेव प्रतिभा एवं भूता सा कवीनामुपकर्त्री भवति । कोशेष्वस्या बहवः पर्यायवाचकास्सन्ति। [१२८] तद्यथामरे-

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ।।

चतुर्दश नामानि । साहित्यिकेषु च सा त्रिधैव संतिष्ठते । पुनः [१२९] कोशेषु स्मृतिस्तु धर्मसंहितेति कथिता ।

यद्यपि बुद्धिमान् शुश्रूषते श्रृणोति गृह्णीते धारयति विजानात्यूहतेऽपोहति तत्त्वं चाभिनिविशते । आहार्यबुद्धेः शिष्यस्याप्येत एव गुणाः किन्तु प्रशस्तारमपेक्षन्ते । राजशेखरः सर्वदा निर्दिशति बुद्धिविकासाय- 'यदहरहः सुगुरूपासना' गुरूपासना च कामधेनुवदस्ति । तत्र [१३०] प्राचीनोक्तमेकं पद्यं तदुच्यते-

[१३१]प्रथयति पुरः प्रज्ञाज्योतिर्यथायथार्थप्ररिग्रहे
तदनुजनत्यूहापोहक्रिया विशदं मनः ।
अभिनिविशते तस्मात्तत्त्वं तदेकमुखोदयं
सह परिचयो विद्यावृद्धैः क्रमादमृतायते ।।

विद्यावृद्धविदुषां सेवा अमृतोपमेति तात्पर्यम् । अस्मिन् पद्ये क्रम एव दृष्टिपथमायाति । प्रथमतः प्रज्ञा- प्रतिभा यथार्थपरिग्रहे प्रकाशमाप्नोति, ततश्च मनस्तदनुगच्छति ऊहापोहं करोतीत्यर्थः, तस्मादेवैकं तत्त्वं तदभिनिविशते । इमामेकां प्रक्रियां राजशेखरः समुद्भावयति ।[१३२] यथा पाणिनीयशिक्षायां आत्मा बुद्धया समेत्यार्थान् मनो युङ्क्ते विवक्षयेति वदिति।

अस्मिन्पद्ये कालिदासोऽप्रत्यक्षस्य स्वर्गस्य तपस्वीगणस्य वर्णनं प्रत्यक्षवदेव कुर्वन् प्रतिभाति । एवं दीपान्तरव्यवहारोऽपि दृश्यताम्-

[१३३]अनेन सार्द्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः ।

कथापुरुव्यवहारस्तद्यथा-

[१३४]हरोऽपि तावत्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरौष्ठे व्यापारयामास विलोचनानि ।।

अन्यच्च-

[१३५]तथागतायां परिहासपूर्वं सख्यां सखी नेत्रभृदाबभाषे ।
बाले व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ।।

उपर्युक्तपद्येषु इन्दुमती-पार्वती-शिवकामदेवादीनां सजीवं वर्णनमस्ति। तत्सर्वं परोक्षभूतमपि प्रत्यक्षमिव प्रतिभाति । कालिदासोऽलौकिकप्रतिभाबलात्तेषां भावानां प्रत्यक्षवद्दर्शनं चकार । मन्ये प्रतिभामधिकृत्य कालिदासग्रन्थपरिशीलनेन तस्या तदभिमतं स्वरूपं प्रकटं भवति । असौ कविः प्रतिभा विषयकानि बहूनि पद्यानि कथयति यथा शाकुन्तलस्य प्रथमं पद्यं रघुवंशस्य प्रथमसर्गस्य १-१३ पद्यानि विशिष्योलिखितुं शक्यन्त इति ।

प्रतिभाभेदः-

राजशेखरः द्विधा प्रतिभां निरूपितवान् । प्रथमा-कारयित्री प्रतिभा, द्वितीया भावयित्रीति । भर्तृहरिभोजादीनां दृष्ट्या तु सा षाड्विध्यं भजते। कारयित्री प्रतिभालक्षणं-कवेरुपकुर्वाणा, सा च त्रिविधा कथिता,१-सहजा, २-आहार्या, ३-औपदेशिकी चेति । तासामपि लक्षणानि दीयन्ते-१-सहजा-जन्मान्तरसंस्कारापेक्षिणी भवति । मन्ये सा बालानां स्तन्यपानादिषु, हंसानां क्षीरविवेचने चेत्यादौ यथा भोजग्रन्थे वर्णिता सेति ज्ञेया । स्वभावतो वाक्यश्रवणमन्तरेणापि प्रतिभोपजायते । राजशेखरेणेयं बुद्धिमान् शिष्ये प्रतिष्ठापिता । सा चेहिकेन कियतापि संस्कारेण प्रथमां तां सहजेति व्यपदिशति ।

२-आहार्या-जन्मसंस्कारयोनिराहार्या महता पुनराहार्येति कथिता । महदभ्यासाज्जायमाना सेति । इयं प्रस्तारमपेक्षते, यथा आहार्यबुद्धिशिष्यस्तदपेक्षते। अन्यत्रेयमभ्यासनिमित्ता कथ्यते । तद्यथा रत्नपरीक्षकाणां तद्दोषज्ञाने भवति।

औपदेशिकी-मन्त्रतन्त्राद्युपदेशप्रभवा । औपदेशिक्याः पुनरैहिक एव उपदेशकालः, ऐहिक एव संस्कारकालः । मन्ये सा कृष्णद्वैपायनाद्य-नुध्यानात् सञ्जयादीनां दूरदर्शनश्रवणादौ कारणान्तरेभ्योऽपि प्रातिभज्ञानमुपलभ्यते। पुनरपि सा मन्त्रतन्त्राद्युपदेशोत्पाद्या भवति । अस्मिन्नेव जन्मन्यस्या उपदेशः, न तु अन्यस्मिन् जन्मनीति । कारयित्री प्रतिभा साक्षात्कवेः उपकारं कुर्वन्नास्ते । सहजादिभेदेन कवयोऽपि त्रिधा भवन्ति-सारस्वतः, सहजा प्रतिभावान्, आभ्यासिक आहार्या प्रतिभावान्, औपदेशिक औपदेशिकी प्रतिभावान् । इति । त इमे त्रयोऽपि-

१-जन्मान्तरसंस्कार[१३६]' प्रवृत्तसारस्वतीको बुद्धिमान्सारस्वतः।

२-इह जन्माभ्यासोद्भासितभारतीक आहार्यबुद्धिराभ्यासिकः

३-उपदेशितदर्शितवाग्विभवो दुर्बुद्धिरौपदेशिकः ।

तेषु पूर्वः पूर्वः श्रेयानिति श्यामदेवः । प्राचीनानां मतेन पूर्वोक्तौ द्वावपि प्रथमतः श्रेष्ठौ तयोर्मन्त्रयन्त्रानुष्ठानादिकं नापेक्षते । यथा प्रकृतिम-धुरा द्राक्षा पुनः फाणितसंस्कारं नापेक्षते तद्वदिति । यायावरीयस्य मतमत्र भिन्नमस्ति स कथयति -एकार्थे हि क्रियाद्वयं द्वैगुण्याय सम्पद्यते । द्राक्षायाः फाणितसंस्कारो न हानिकर इति । श्यामदेवस्य कथनानुसारमुत्तरोत्तरं कवीनां प्रामाण्यम्भवतीत्युच्यते राजेशेखरेण-

[१३७]सारस्वतः स्वतन्त्रः स्याद्भवेदाभ्यासिको मितः ।
औपदेशिककविस्त्वत्र वल्गु फल्गु च जल्पति ।।

यायावरीयमतेन यावदुत्कर्षस्तावच्छ्रेयानिति । तादृशोत्कर्षस्तु अनेकगुणानां सन्निपाते भविष्यति । यदुक्तम्-

[१३८]बुद्धिमत्वं च काव्याङ्गविद्यास्वभ्यास कर्म च ।
कवेश्चोपनिषच्छक्तिस्त्रयमेकत्र दुर्लभम् ।।
काव्यकाव्याङ्गविद्यासु कृताभ्यासस्य धीमतः ।
मन्त्रानुष्ठाननिष्ठस्य नेदिष्ठा कविराजता ।।

निष्कर्षतः स्वाभाविकी सहजा वा प्रतिभा सर्वश्रेष्ठाभिमता वर्तते। कवेरुपकर्त्री कारयित्री प्रतिभां प्रदर्श्येदानीं भावयित्री प्रदर्श्यते । तद्यथा-

भावयित्र्याः लक्षणम् -

[१३९] भावकस्योपकुर्वाणा सेति । भावकस्तु आलोचको भवति । स कवेः श्रममभिप्रायञ्च समीचीनतया भावयति, तन्मूल्याङ्कनं करोतीति भावः । भावयित्री प्रतिभा कवेर्कर्म सफलं करोति । भावयित्री विना कदाचित्तत्फलनिष्फलं भवेदिति । कविभावकयोर्न भेद इति प्राचीनाः निगदन्ति यतो हि कविर्भावयति, भावकश्चापि कविरेवेति । तदाहुस्ते-

[१४०]प्रतिभातारतम्येन प्रतिष्ठा भुवि भूरिधा ।
भावकस्तु कविः प्रायो न भजत्यधमां दशाम् ।।

परन्तु कालिदासस्यात्र विमतिः प्रदर्शिता राजशेखरेण । तत्रायं पाठः [१४१] -'न' इति कालिदासः । पृथगेव हि कवित्वाद् भावकत्वं, भावकत्वाच्च कवित्वं स्वरूपभेदाद्विषयभेदाच्च ।[१४२] यदाहुः

क्वचिद्वाचं रचयितुमलं श्रोतुमेवापरस्तां
कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति ।
न ह्येकस्मिन्नतिशयवतां सन्निपातो गुणानामेकः
सूते कनकमुपलस्तत्परीक्षा क्षमोऽन्यः ।।इति।।

कविभावकयोर्भेदः केवलं कालिदासस्याभिमतः । तत्र मन्येऽसौ कारयित्रीमेव प्रतिभामङ्गीचकार । पुनरपि प्रतिभा विवेकयुक्ता गुणागुणयोर्विभागं कर्तुं शक्नोति बहु गृह्णाति बहुत्यजति चेति । विवेकानुसारेण हि बुद्धयो मधु निष्यन्दन्त । प्रतिभावान् परिणामे यथार्थदर्शी भवति । स पुनश्च विभ्रमभ्रंशाच्छ्रेयसं विन्दते । सहजोत्पाद्या चेति भेदद्वयं प्राचीनानाम्, आहर्यौपदेशिकी चेति राजशेखरः[१४३]। राजशेखरोक्तयोरुत्पाद्यामन्तर्भावो भवितुं शक्यते । कारयित्रीं भावयित्रीं वोपपाद्य तत्र व्युपत्तिनिरूपणमपि विशदमस्ति । तदुक्तम्-

[१४४]कारयित्री भावयित्र्यावितीमे प्रतिभाभिदे ।
अथातः कथयिष्यामो व्युत्पत्तिं काव्यमातरम् ।।

व्युत्पत्तिर्हि काव्यस्य माता कथिता । केयं व्युत्पत्तिः? का च श्रेयसी व्युत्पत्तिप्रतिभयोरिति ? तत्रोच्यते पूर्वं लक्षणम् [२]- 'उचितानुचितविवेको व्युत्पत्तिः' इति राजशेखरः । व्युत्पत्तिशब्दार्थस्तु- 'बहुज्ञता व्युत्पत्तिरित्याचार्याः'। आनन्दमतेनात्रैतयोः प्रतिभा श्रेयसी, यतो हि प्रतिभा कवेरव्युत्पत्तिकृतमपि दोषं आच्छादयति । प्रखरप्रतिभया स्वदोषान् स्वीयामज्ञताञ्च न प्रकटयति कविः ।

तदुक्तमत्र सङ्गच्छते -

[१४५]अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य झटित्येवावभासते ।।

इत्यत्र शक्तिपदेन प्रतिभा गृह्यते । शक्तिशब्दस्यायं लाक्षकणिकोऽर्थः। तादृशप्रतिभोदाहरणम्। तत्रैव काव्यमीमांसायाम्-

[१४६]एतत्किं शिरसि स्थितं मम पितुः खण्डं सुधाजन्मनो
लालाटं किमिदं विलोचनमिदं हस्तेऽस्य किं पन्नगाः ।
इत्थं क्रौञ्चरिपोः क्रमादुपगते दिग्वाससः शूलिनः
प्रश्ने वामकरोपरोधसुभगं देव्याः स्मितं पातुं वः ।।

अस्मिन्पद्ये कवेरपूर्वा प्रतिभा दर्शनीया अस्ति । तेन शक्त्या-प्रतिभया वर्णनीयं हास्यरचनासामर्थ्यमाच्छादितम् ।

प्रतिभा न श्रेयसी अपि च व्युत्पत्तिरेव श्रेयसीति मङ्गलनाम्ना कश्चिदायचार्यः स्मृतः राजशेखरेण तन्मतेन यथा प्रतिभा कवेः दोषमशेषमाच्छादयति तथैच् व्युत्पत्तिरपि कर्तुं पारयति ।

तदुक्तम्-

[१४७]कवेः संव्रियतेऽशक्तिर्व्युत्पत्त्या काव्यवर्त्मनि ।
वैदग्धी चित्तचित्तानां हेया शब्दार्थगुम्फना ।।

तत्रैव व्युत्पत्तिर्यथा-

[१४८]**कृतः कण्ठे निष्को नहि किमुत तन्वी मणिलता**
कृशं लीलापत्रं श्रवसि निहितं कुण्डलमुचि ।
न कौशेयं चित्रं वसनमवदात्तं तु वसितं
समासन्नीभूते निधुवनविलासे वनितया ।।

यद्यप्यत्र सम्भोगश्रृङ्गाररचनायां शब्दविन्यासोऽनुकूलः यतो हि एतादृशरचनायां श्रुतिकटुशब्दाः न भवन्ति । तथापि व्युत्पत्तिबलसामर्थ्यात् कविः सहृदयान् आकर्षयति। स्वीयदोषान् आच्छादयति चेति ।

राजशेखरस्य स्वीयं मतं मध्यममार्गानुसारी दृश्यते । तेनोच्यते [१४९]- प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ' इति यायावरीयः । तद्यथा दृष्टान्तेनाह- 'न खलु लावण्यलाभादृते रूपसम्पदृते रूपसम्पदो वा लावण्यलब्धिर्महते सौन्दर्याय इति । शब्दान्तरैर्व्यज्यते लावण्यं विना रूपं सुन्दरं न भवति, एवं रूपसम्पदृते केवलं लावण्येन न सौन्दर्यलाभः, यथा सौन्दर्याय रूपं लावण्यञ्चेत्युभयं आवश्यकं तथैव कवित्वसौन्दर्याय प्रतिभाव्युत्पत्तिश्चेत्युभयं आवश्यकमिति भावः । राजशेखरमतेन गुणानामनेकानां सन्निपाते भवत्युत्कर्षस्तथैवात्रापि तच्चिन्त्यम् । प्रतिभाव्युत्पत्त्युपयोगो दृश्यताम्-

[१५०]**जङ्गा काण्डोरुनालो नखकिरणलसत्केसरालो करालः**
प्रत्यग्रालक्तकाभाप्रसरकिसलये मञ्जुमञ्जीरभृङ्गः ।
भर्तुर्नृत्यानुकारे जयति निजतनुस्वच्छलावण्यवापी
सम्भूताम्भोजशोभां विदधदभिनयाद्दण्डपादो भवान्याः ।।

[१५१]काव्यप्रकाशेऽपि दोषनिरूपणे परे सप्तमेउल्लासे- प्राद्युपसर्गाद्यर्थान्तरगतमवाचकत्वमुदाहरन्नाह मम्मटः-भर्तुर्महेश्वरस्य नृत्तानुकारे भवान्याः अभिनवः दण्डपादः (ऊर्ध्वीकृत) स दण्डपादो भवदण्डपादमुत्खण्डयन् रक्षतु चण्डिकाया इति । कवेः प्रतिभाव्युत्पत्ती परस्परं समवेते श्रेयस्यौ दृश्येते। नाट्यसम्बन्धिव्युत्पत्तिः वर्णनसम्बन्धि प्रतिभाउभयोर्प्रदर्शनेनार्थचमत्कृतिरवलोक्यते ।

रामाज्ञापाण्डेयस्य प्रतिभाविवेचनम्-

डा० सम्पूर्णानन्दमहाशयानां सत्परामर्शेण निरन्तरं प्रोत्साहनेन च शब्दशास्त्रीया या महत्त्वपूर्णा गवेषणा सरस्वती भवनपुस्तकालये श्री रामाज्ञापाण्डयेनोपस्कृता, तस्याः फलं ग्रन्थत्रयस्य निर्माणम्[१५२] । तत्र १-व्याकरणदर्शनभूमिका, २-व्याकरणदर्शनपीठिका, ३-व्याकरणदर्शनप्रतिमा चेति । तदध्ययनेन व्याकरणशास्त्रस्य दर्शनत्वं समीचीनमिति वक्तुं शक्यते। श्रीपाण्डेयोऽनेकत्र [१५३] व्याकरणदर्शनग्रन्थानामितरशास्त्रकाराणाञ्च मतानि पर्यालोच्य स्वीयमपि मतं समुपन्यसति । अन्येषां दार्शनिकानां मतानि पर्यालोचयन् दृढमवोचत्-न वयं वैयाकरणाः कस्यापि दर्शनस्यानुयायिनः, सर्वे हि मन्मुखापेक्षिणो मदीयसंग्रहादेव पदार्थानाकृष्य दार्शनिकम्मन्याः संवृत्ताः। यत्र क्वचन केनापि दर्शनेन संवादश्चेद् भवतु नाम तथा परं नैतावता ते मदनुयायिनो वयं वा तदनुयायिनः स्म इति ।

प्रतिभा विषयोऽप्यत्र सूक्ष्मेक्षिकया विवेचितोऽस्ति । प्रतिभायाः पश्यन्त्या सहैक्यमपि प्रदर्शितम् । प्रतिभायाः पर्यायशब्दाः मेधास्मृति-र्बुद्धिरिति ये ब्रुवन्ति, तैस्सह श्रीपाण्डेयस्य मतभेदोऽस्ति [१५४] ।

प्रतिभाविषये ये-नवनवोन्मेषशालिनी बुद्धिः प्रतिभेत्यादिना बुद्धेर्भेद एव प्रतिभेत्येवामानन्ति, ते प्रतिभास्वरूपं समीचीनतया नाध्यागच्छन् । न हि प्रतिभा एतैः पर्यायैः निरूपयितुं शक्या । सा च काचन भिन्नैव शक्तिरिति तन्मतम् । सा च प्रतिभा का ? इत्यत्रोक्तम् [१५५]- यस्याः षड्भावविकाराः सैव प्रतिभेत्युच्येते । सैव प्रतिभा षण्णां भावविकाराणां प्रकृतिः । हर्युपदर्शिताः स्वभावाचरणाभ्यासादिभेदास्तु तस्याः प्राप्त्युपायास्तेन प्रतिपादितास्सन्ति । तथाभूतां प्रतिभाख्यां यो जानाति, स एव ब्रह्मामृतमश्नुते-

[१५६]**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।**
प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यत ।।
तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ।।

तस्य शब्दब्रह्मणः प्रवृत्तेः क्रियायास्तत्त्वं सतां प्रतिभाख्यां यो जानाति स एवामृतमश्नुते । तदनन्तरमेव प्रतिभोत्पद्यत इति भावः । प्रतिभाज्ञानमपि मोक्षोपाय एव चिन्तयते ।

सा च ऋक् संहितायाम् [२]–

[१५७]सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा
वाचमक्रमत ।
अत्रा सखायः सख्यानि जानते भद्रैषां
लक्ष्मीर्निहिताधिवाचि ।।

अपि च–

चत्वारि श्रृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्त
हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यानाविवेश [१५८] ।।

एवं सर्वबोधकेषु ब्रह्मबुद्धौ जातायां तेनैव दृष्टान्तेन सर्वपदार्थेषु समुदेति ब्रह्मबुद्धिर्वैयाकरणानामित्यादिनोद्योते नागेशभट्टेनापि [१५९] मोक्षप्राप्तिर्वैयाकरणानां प्रतिपाद्यते ।

श्रीपाण्डेयमतेन– या चतुर्विधा वाक्कीर्त्यते परा –पश्यन्ती–मध्यमा वैखरीरूपा चेति । एतासु सेयं पश्यन्ती वाक् सैवार्थात्मना प्रतिभा व्यपदिश्यते । सेयं प्रतिभा शब्देष्वाश्रितेति हरिणा पूर्वमुपपादिता । तद्यथा–

[१६०]शब्दष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते ।।
तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता ।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते ।।

यदाहुः

वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तनोति ।

वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रतिभज्योपभुङ्क्ते।।

वाक्तत्त्वं प्रतिभा एवं भोक्तृभोग्यभोगरूपेण सर्वत्र विवर्तते । बाह्यं न किञ्चदस्ति तात्पर्यमिदं स्पष्टम् । सूक्ष्मोऽयं प्रतिभाधर्मस्तथाप्युक्तम्-

[१६१]वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत् सा हि प्रत्यवमर्शिनी ।।
सा सर्वविद्याशिल्पानां कलानां चोपबन्धनी ।
तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ।।

यथा प्रकाशकत्वम् अग्नेः स्वरूपम्, चैतन्यं वाऽन्तर्यामिणः, तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम् ।[१६२] असंचितावस्थायामपि सूक्ष्मो वाग्धर्मो प्रतिभारूपो भवतीति ।

सा च प्रतिभा संसारिणां संज्ञोच्यते । तद्यथा-

[१६३]सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।
तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजन्तुषु ।।
सर्वोऽपि लोकव्यवहारो वाङ्निबन्धनोऽस्ति।
वागेव चित्क्रियारूपेति टीकायामुक्तम्-
भेदोद्ग्राहविवर्तेरन लब्धाकारापिग्रहा,
आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा ।।
एकत्वमनतिक्रान्ता वाङ्नेत्रा वाङ्निबन्धना ।
पृथक् प्रत्यवभासन्ते वाग्विभागो गवादयः ।।
षड्द्वारा षडधिष्ठानां षड्प्रबोधां षडव्ययाम् ।
ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते ।।

इत्यत्र वाक्चैतन्योरभेदः प्रतिपादितः । वाङ्नेत्रा शब्दा अर्थाश्च, शब्दा अपि वाचमर्थरूपापन्नां प्रतिभां प्रतिपादयन्ति । तन्निबन्धनाः गवादयो वाग्भेदाः वाचोऽभेदमनतिक्रान्ताः वर्तन्ते । षड्द्वारा स्वभावचरणाभ्यासादिप्रतिभां षड्विदां विदुरित्यादिना षड्विधा प्रतिभाद्वारं प्राप्त्युपायो यस्या वाचश्च बहुधा शक्त्यो या हि षड्विधां प्रतिभा जनयति । ये हि

प्रतिभायामर्थाकारास्तेऽस्या अधिष्ठानं ताश्च वाचोऽव्यतिरिक्त इति ताभिः षट्प्रबोधां षडव्ययां षडवयवाम् षोढैव च तस्याः प्रतिपादनव्यापाराः ।

योऽयं चैतन्ये वाग्रूपानुगमस्तेन लोके ससंज्ञो विसंज्ञ इति व्यपदिश्यते। तदाह हरिः-

[१६४]अर्थक्रियासु वाक्सर्वान् समीहति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ।।

एतस्याः भावः वाचैव युक्ताः प्राणिनश्चेष्टन्ते, स्व स्व कर्मसु प्रवर्तन्ते। वाचोऽतिरिक्तः कश्चिद्देही काष्ठकुड्यवदेव विसंज्ञो भवति ।

षड्द्वारां प्रतिभां यो जानाति स एव पदार्थान् ज्ञातुं शक्नोति । तस्मादुक्तं षड्भावविकाराः सैव प्रतिभा [१६५] । तथा च षडेव विकारा अस्या अधिष्ठानम् । कार्येण कारणानि वर्तन्त एव सत्पदार्थवादिनाम् । सैव प्रतिभा । पूर्वोक्तरीत्या सा प्रतिभा षड्विधं रूपं समासादयति । एषामप्युदाहरणानि तथैव यथा स्वाभावादीनां तत्रोक्तानि । प्रतिभायान्तु [१६६]

१-स्वाभावोदाहरणम्-यथा कपिः । अयं हि स्वयं जातमात्रो मातरमाश्रयते ।

२-चरणोदाहरणम्-आचार एव चरणम् । तेन हि अन्तःकरणशुद्धया विशिष्टा प्रतिभोदेति ।

३-अभ्यासो नाम यथा-रत्नतत्त्वविदाम् । रत्नतत्त्वविदोऽभ्यासेन झटिति तत्परीक्षन्ते

४-योगेन तु-योगाभ्यासप्रक्रियया सा भगवती प्रतिभा प्रत्यक्षं प्रसीदति। यथोक्तम् [१६७] मार्कण्डेयपुराणे-

निराहारौ यताहारौ तन्मनस्कौ समाहितौ ।
ददतुस्तौ बलिं चैव निजगात्रा सृगुक्षितम् ।।
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ।
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ।।

इति योगपद्धत्या पूर्वं यताहारौ ततो निराहरौ । तदनन्तरं तन्मनस्कौ तदनन्तरं समाधिनिष्ठौ ततो हि एवं समाधिनिष्ठौ सञ्जातौ येन तयोः शरीरे रक्तमपि नष्टं प्रायमेवाभवत् । अनया रीत्या वर्षत्रयं यावत् समाराधयतः प्रत्यक्षं चण्डिका प्राहेति भावार्थः[१६८] । वाक्यपदीये तु भिन्नमुदाहरणम्-

५-अदृष्टोपपादिता नाम अनेकजन्मसञ्चितविशिष्टपुण्यपुञ्जया शक्त्या सा समुदेति । पुण्यराजेन सा भूतपिशाचादीनामाख्याता ।

६- विशिष्टोपगता नाम कस्माच्चिद्विशिष्टपुरुषात् सा उपगता भवति। यथा अर्जुनाय भगवता व्यासेन योगः समुदिष्टो येन सः यौगिकं चक्षुर्लब्ध्वा तेन शङ्करं तोषयामास । पुण्यराजेन सा कृष्णद्वैपायनसञ्जयादय उदाहरणत्वेनाहिता वर्तते । एभिर्षड्भिरुपायैः प्रकारैर्वा प्रतिभा सम्प्राप्यते। तस्मात्सा षड्प्रबोधा नाम्ना ज्ञायते । अत एव तस्याः षड्वयवाः सन्ति [१६९] यतीन्द्रमतदीपिकायां तत्र षड्गुणपूर्णः श्रीवासुदेवः ज्ञानबलैश्वर्यवीर्यशक्तितेजांसि षड्गुणाः । [१७०] तत्र-

१-ज्ञानं नाम-सर्वदा सर्वविषयप्रकाशकः स्वप्रकाशो गुणविशेषः ।

२-शक्तिर्नाम-जगत प्रकृतिभावोऽघटितघटनासामर्थ्यं वा ।

३-बलं-जगतःकारणत्वप्रयुक्ताश्रयभावः समस्तवस्तुधारणसामर्थ्यंवा।

४-ऐश्वर्यं-कर्तृत्वलक्षणं स्वातन्त्र्यं समस्तवस्तुनियमनसामर्थ्यं वा ।

५-वीर्यं-जगदुत्पादनत्वेऽपि स्वरूपविकाराभावः ।

६-तेजः- सहकारिनैरपेक्ष्यं पराभिभवसामर्थ्यं वा । इति ।

षडव्यया सा उपर्युक्तज्ञानापन्ना भवति । एते तस्याः गुणा विभाव्यन्ते। इयमेव क्रिया प्रधाना भगवती प्रतिभापदेन व्यवह्रियते । सैव ज्ञानस्य प्राधान्यं बुद्धिरूपेण वरुणसदनेऽन्तरिक्षे चकास्ति ।

प्रतिभापश्यन्तयोरभेदः

प्रतिभापश्यन्त्योर्विभागो वक्तुं न शक्यते । प्रतिभार्थदृशा, पश्यन्तीशब्ददृशा, इत्येवं शब्दोपयोगेन भेदः प्रतीयते । परन्तु शब्दार्थयोस्तादात्म्यस्वीकारान्नैव कश्चन प्रतिभापश्यन्त्योर्भेदः प्रतीयते । परन्तु

शब्दार्थयोस्तादात्म्यस्वीकारान्नैव कश्चन प्रतिभापश्यन्त्योर्भेदः । प्रतिभापदेन पश्यन्ती ग्राह्या । व्यवहारेऽर्थकोटौ प्रतिभायाः पश्यन्तीपदेन बोधोऽभ्युपगम्यः। नामरूपे व्याकरवाणीति श्रुत्या नामरूपयोर्व्याकृत्यवस्थायामेव विभागः, न तु ततः प्राक् तयोः कश्चन भेदः समवगम्यते । नामपदेन शब्दः रूपपदेनार्थो भवति । स च बौद्धः, बाह्यस्य तस्य स्वीकारे तन्नाशदशायां द्वयो सम्बन्धस्यानित्यात्वप्रसङ्गात् । तेषाञ्च नित्यत्वस्य सिद्धे शब्दार्थसम्बन्धे इत्यनेन कात्यायनेनैव निर्धारितत्वात् । तयोश्च न कोऽपि भेदोऽस्तीति वक्तव्यम्।

उपसंहारः

पाश्चात्येषु प्रसिद्धं भाषाविज्ञानं तु अष्टादशशताब्द्यां जन्म लेभे, परं भारते भाषाध्ययनं वैदिककालादेव सुस्थितमासीत् । संस्कृतवाङ्मयस्य वेद-संहिता-उपनिषद्प्रातिशाख्य -शिक्षा-निरुक्त-व्याकरण-दर्शनादिषु भाषाया विश्लेषणमभूतपूर्वमुपलभ्यते । भारतीयैर्भाषाविषयकं गूढं चिन्तनं यत्कृतं, न तत्पाश्चात्येषु दृष्टिपथमायाति । ऋग्वेदे तु भाषामधिकृत्य सूक्तद्वयमस्ति। एवं संहितास्वपि भाषामादाय सूक्तयः समुपलभ्यन्ते । किं यास्कस्य निरुक्तं भर्तृहरेर्वाक्यपदीयम्, पुण्यराजस्य टीका, पतञ्जलेर्महाभाष्यम्, नागेशस्य मञ्जूषा, जगदीशस्य शब्दशक्तिप्रकाशिका, भारतीयं भाषाविज्ञानं नास्ति। किमधिकेन जल्पितेन पाणिनेरष्टाध्यायी मानवमस्तिष्कस्य चरमोत्कृष्टा भाषावैज्ञानिका कृतिर्नास्ति । पदविज्ञानस्य-वाक्यविज्ञानस्येतोऽधिकं क्वास्ति भाषाविदां शरणस्थली । मन्ये, भारतीयानां वैयाकरणानां भाषाध्ययने मौलिकं योगदानमस्ति । भाषाविद्भिः प्राचीनपरम्परया विहितम-ध्ययनं नोपेक्षणीयमिति मे मतिः ।

सर्वप्रथमतः पाणिनेरष्टाध्यायाः वाक्यविज्ञानात्मकं वैज्ञानिकमध्ययनं नितान्तमपेक्षते । यतो हि पाणिनेर्व्याकरणं वाक्याश्रितमस्ति न हि केवलं पदाश्रितं कथितुं शक्यते । पाणिनिरपि वाक्यादेव पदार्थबोधो भवतीति मतं स्वीचकार । तस्य ग्रन्थस्य प्रारम्भः परिसमाप्तिश्च वाक्येनैव अजायत। शास्त्रे सर्वत्र समर्थः पदविधिः सूत्रसिद्धान्तः व्यापृतोऽस्ति । तत्र वाक्यप्रकाराश्च निर्दिश्यन्ते विधिः, अनुज्ञैषणा, अतिसर्गः, कामप्रवेदनं, प्रार्थना,

प्रैषः, अधीष्ट, आमन्त्रणम्, आशिष्, विनियोगः, दूरादाह्वानं, प्रश्नः, प्रत्यारम्भः, पृष्टप्रतिवचनं, प्रतिश्रवणं सम्प्रश्नः, प्रत्यभिवादनं, परीप्सा, प्रहासः चित्रीकारणम्, आख्यानं, अभ्यादानं, अमर्षः, उपर्युक्तवाक्यप्रकाराणां स्वतन्त्रमध्ययनं केनापि विदुषा कर्तुं शक्यते ।

पुनरपि वाक्यस्योपप्रकाराश्च वर्णिताः दृश्यन्ते । यथा-पूजा, क्षिया, सम्मतिः कोपः, असूया, कुत्सा, भर्त्सना, विचार्यमाणं, गर्हा, सम्भावना, असम्भावना, क्रियातिपत्तिः आशंसा हेतु-हेतुमद्भावः, इच्छा समुच्चयः, क्रिया-समभिव्यहारः, क्रियाप्रबन्धः इति । तत्राष्टाध्यायां षष्ठाध्यायतोऽष्ट-माध्यायं यावत् । वाक्यस्य विविधप्रकाराः उपलक्षणानि च सन्ति । एतस्य वाक्यविज्ञानदृशा स्वतन्त्रमेकं गम्भीरमध्ययनं आवश्यकमस्ति ।

वाक्यमधिकृत्य वाक्यपदीयश्लोकवार्तिकयोः तुलनात्मकमध्ययनमपि एतद्विषये अभिनवान् विचारान् प्रस्तावयिष्यति । भाषाविज्ञानस्य क्षेत्रे नूतन एक प्रयोगो भविष्यति ।

भोजदेवस्य श्रृङ्गारप्रकाशेऽपि अमुं विषयमादाय बहूक्तं दृश्यते । भोजस्य क्वचिद्विरोधोऽपि लक्ष्यते, तस्मात् परामृश्यते यदुभयोः वाक्यपदीयश्रृङ्गारप्रकाशयोः, ऐतिहासिकं तुलनात्मकञ्च विवेचनम् ।

कारकाणां समासानाञ्च वाक्यविज्ञानात्मकमध्ययनं नितरामावश्यकम्। मनुष्याणां विचारास्तु परस्परपदसम्बद्धे वाक्य एव स्फुरन्ति । असौ सम्बन्धः कारककृतो भवति । एवं भाषायाः संक्षेपः समासेन भवति। समासेन वाक्यस्य सौन्दर्यं वर्धते । पुनरपि कृत्प्रत्ययानां तद्धितानाञ्च वाक्यवैज्ञानिकं विवेचनं कर्तुं शक्यते ।

प्रतिभा विषयमाधारीकृत्य न कोऽपि शोधप्रबन्धोऽद्यावधि दृष्टिपथं आगतः, संस्कृते न कोऽपि प्रतिभाग्रन्थोऽस्ति । वाक्यपदीयस्य प्रतिभाभागमादाय तस्य वैज्ञानिकं विश्लेषणं कर्तुं शक्यते । अन्य शास्त्रेभ्यः प्रतिभाविषयं संकलय्य प्रकाशनमपि विधातुं शक्यते । प्रतिभा भाषातत्त्वशास्त्रमस्ति ।

भारतीयार्यभाषासु कैश्चिद्विद्वद्भिरनुसन्धानं क्रियते । ते भाषोपभाषाणाम-ध्ययनं पाश्चात्याधारेण कुर्वन्ति । यथा डोगरी-पंजाबी काश्मीरी भाषाणां

वाक्यवैज्ञानिकमध्ययनं अमेरिकादेशप्रचलितेन मन्यते । तत्रास्ति मदीया **सम्मतिः**- यत्ते भारतीयार्यभाषाणां सम्बन्धः प्राचीनभारतीयसिद्धान्तैःसह कुर्युः, यतो हि इमाः भाषाः एकमूलान्निर्गताः सन्ति ।

भाषाविज्ञानस्येयं भारतीया प्राचीना विचारपरम्परा अतीव समृद्धा परिपूर्णा चास्ति। भारतीयानां वैयाकरणानां व्याडि-औदुम्बर- कात्यायनपतञ्जलि-भर्तृहरि-नागेश-कौण्डभट्ट- जगदीशप्रभृतीनां विदुषां नामान्यपि अद्य सादरं स्मर्यन्ते । तेषां कृतयः गौरवमयं स्थान प्राप्नुवन्ति । इमे सर्वेऽपि भाषाविज्ञानस्य मौलिका आचार्या आसन् ।

भर्तृहरेः वाक्यपदीयम् भाषाविज्ञानक्षेत्रे भाषातत्त्वानामेका अपूर्वा रचना वर्तते । भर्तृहरिः पदवाक्यप्रमाणज्ञः कथ्यते । भारतीये भाषाविज्ञाने तस्य योगदानं चिरकालं यावत् स्मारयिष्यते ।

परिशिष्टम्-१

परिशिष्टम्-१

वाक्तत्त्वमहत्त्वम्-

ध्वनिः वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।
यस्याः सूक्ष्मादिभेदेन वाग्देवी तामुपास्महे ।। इति ।

वाग्विषयकोऽयं सूक्ष्मभेदः पुरा वैदिककाले ऋषिभिरतीवकौशलेन समुपस्थापितोऽस्ति । एकेनोपनिषत्प्रसङ्गेन तद्धि वाक्तत्त्वं प्रस्तौमि। तद्यथा-

"अस्तमित आदित्ये याज्ञवल्क्यो चन्द्रमस्यस्तमिते शान्तेऽग्नौ किं ज्योतिरेवायं पुरुष इति? वागेवास्य ज्योतिर्भवतीति । वाचैवायं ज्योतिषस्ते पल्यते, कर्क कुरुते, विपर्येतीति । तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र व्यतीत्येवमेवैतद् याज्ञवल्क्यः ।

एतद्भाष्यं यथा-'वाग् ज्योतिः' । वागित्यादि शब्दो गृह्यते । शब्देन विषयेण श्रोत्रमिन्द्रियं दीप्यते । श्रोत्रेन्द्रिये सम्प्रदीप्ते मनसि विवेक उपजायते, तेन मनसो बाह्या चेष्टा प्रतिपद्यते । तस्माद् वै सम्राड् यस्माद्-वाचा ज्योतिषानुहीनोयं पुरुषो व्यवहरति । यस्मिन्काले प्रावृषि प्रायेण मेघान्धकारे सर्वज्योतिः प्रत्यस्तमये सर्वोपि हस्तो विस्पष्टं निर्ज्ञायते, तस्मिन् काले सर्वचेष्टानिरोधे प्राप्ते बाह्यज्योतिषोऽभावात्, यत्र वागुच्चरति, श्वा वा भषति, गर्दभो वा रौति, उपैव तत्रस्थ इति-तेन शब्देन ज्योतिष श्रोत्रमनसोः नैरन्तर्यं भवति । तेन ज्योतिषः कार्यत्वं वाक् प्रतिपद्यते, तेन वाचा ज्योतिषोपव्यत्येव उपगच्छत्येवेति ।

उपर्युक्तस्य भावः दण्डिना यथोक्तस्स्वीये ग्रन्थे-

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा,
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ।
इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।

वाचामन्तरा न कोऽपि पुरुषः जगति व्यवहर्तुं शक्नुयाद्यतो हि

लोकयात्रा तु तस्या एव प्रसादेन प्रवर्तते । शब्दाह्वयं ज्योतिरासंसारं यदि न दीप्यते, तदा भुवनत्रयमपि सकलमन्धन्तमो जायते । शब्दाधीनमेव जगदिति ब्रूमः ।

वैदिकवाङ्मये तदङ्गभूतशास्त्रेषु च प्रधानतया त्रीण्येव तत्त्वानि पर्यालोचितानि दृश्यन्ते, तानि च-

१-प्राणतत्त्वम्,

२-मनस्तत्त्वम्,

३-वाक्तत्त्वञ्चेति ।

आधुनिकाश्च-

१-विज्ञानम्,

२-आत्मज्ञानम्

३-वाग्ज्ञानञ्चेति वदन्ति ।

यावद्विशदं वर्णनं वाक्तत्त्वस्य तन्त्रादिषु न तावदन्येत्रेति यथा शारदातिलकादाविति । तत्र बहिर्भूतं प्रकाशकं विज्ञानम्, अन्तः प्रकाशकञ्चात्मज्ञानम्, उभयोस्सेतुभूतं वाग्ज्ञानमिति, वागुभयं प्रकाशति ।

तदुक्तं तैत्तरीये ब्राह्मणे- **"वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वा पशवो मनुष्याः । वाचीमा विश्वाभुवनान्यर्पिता सानो हवं जुषतामिन्द्रपाती ।।" काव्यादर्शः ।**

शतपथब्राह्मणे-यद् वै प्रजापतेः परमस्ति वागेव तत् । ऋग्वेदसंहितासु **वाक्तत्त्वम्-**

२-उप त्वा सातये नरो विप्रासो यान्ति धीतिभिः । उपाक्षरा सहस्रिणी अक्षरा= क्षयरहिता, अस्मदीया वाक्, अक्षराऽत्र वागेव व्यपदिश्यते । पुनरपि अक्षर-व्याप्ता चरन्ती वाग् देवता चेति सायणः ।

३-"सा नो मन्द्रेषमूर्जं दुहान धेनुर्वागस्मानुप सुष्टुतैतु इत्यत्र वागेषा माध्मिकेति निरुक्तम् ।

४ -सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रमत् । अत्रायं सखायः सख्यानि जानते, भद्रैषा लक्ष्मीर्निहिताधिवाचि ।

लोकेऽपि पठ्यते-

मनः पूतां वदेद्वाचं, वस्त्रपूतं पिवेज्जलम् ।

दृष्टिपूतं क्षिपेत्पादं, शास्त्रपूतं समाचरेत् ।। इति ।

पुनरपि-पुनन्ति धीरा अपसो मनीषा देव या विप्र उदियर्ति वाचम्।

५-"पृच्छामि वाचः परमं व्योम ब्रह्मायं वाचः परमं व्योम ऋचे अक्षरे परमे व्योमन्, यस्मिन् देवा अधि विश्वे निषेदुः"

६- "यावत् ब्रह्म वितिष्ठितं, तावती वाक्" सध्रिमतेन यावद्ब्रह्मतत्त्वं व्यापकं तावत् वाक्तत्त्वमपीति ।।

देवी वाचमजनयन्त देवाः

७-चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्याः वदन्ति।।

निष्कर्षतो वागेव सर्वार्थसाधिका वर्तते । सर्वत्र वाक्तत्त्वस्य सूक्ष्मातिसूक्ष्मस्वरूपं माहात्म्यञ्च गीयते । किं बहुना-

वागेवार्थं पश्यति वाग् ब्रवीति वागेवार्थं संन्निहितं संतनोति।

वाचैव विश्वं बहुरूपं निबद्धं तदेतदेकं

प्रतिभज्योपभुङ्क्ते ।। इति ।

वाक् त सरस्वती । वाग्वै सरस्वती ।

परिशिष्ट-२

भर्तृहरिप्रोक्तं वाक् तत्त्वम्-

सा सर्व विद्याशिल्पानां कलानां चोपबन्धनी

तद्वशादभिनिष्पन्नं सर्ववस्तु विभज्यते ।।

सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते ।

तन्मात्रामनतिक्रान्तं चैतन्यं सर्वजन्तुषु ।।
अर्थक्रियासु वाक् सर्वान्समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ।।
प्रविभागे यथा कर्ता तथा कार्ये प्रवर्तते ।
अविभागे तथा सैव कार्यत्वेनावतिष्ठते ।।
स्वमात्रा परमात्रा सा श्रुत्या प्रक्रमते यथा ।
तथैव रूढ़तामेति तया अर्थो विधीयते ।।
अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।
दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ।।
अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ।।
तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रभृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ।।
शब्दस्य परिणामोऽयमित्याम्नाय विदो विदुः ।
शब्देभ्य एव प्रथममेतद्विश्वं व्यवर्तत ।।
इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ।।
आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ।।
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।इति ।।

परिशिष्ट -३

उतत्वः पश्यन्निति ऋङ् मन्त्रस्याभिनवा व्याख्या-

बृहस्पतिराङ्गिरसमते वाक्झटितिः स्वीयं भावं परं प्रति प्रकाशयितुमाकाङ्क्षते । एतद्भाष्येऽपि शब्दानुशासनप्रयोजनावसरे प्रयोजनपरक

व्याख्या समुपलभ्यते । ऋक्संहितायाम्-"उतत्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम् ।उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासाः ।।"

पातञ्जलव्याख्यानम्-'अपि खल्वेकः पश्यन्न पश्यति, अपि खल्वेकः श्रृण्वन्न श्रृणोत्येनामिति । उतो त्वस्मै तन्वं विसस्रे-तनुं विवृणुते । जायेव पत्य उशती सुवासाः। तद्यथा-जायेव पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, एवं वाक्वाग्विदे स्वात्मानं विवृणुते । वाङ्यो विवृणुयादात्मानमिति।

उपर्युक्तमन्त्रस्य व्याख्यानमभिनवतान्त्रिककारिका अज्ञातकर्तृकाः स्फोटदर्शननामके ग्रन्थे समुपलब्धा आसन् । अद्यावधि बहुप्रयासकृतेऽपि नैतज्ज्ञातं यत्कस्य ग्रन्थकारस्य कस्मिन् वा ग्रन्थे ताः कारिकास्सन्ति । तास्तु प्रस्तूयन्ते-

अपि चो तत्त्व इत्यादेरागमादपि गम्यते ।
वर्णातिरिक्तमेवेदं शब्दतत्त्वमिति स्फुटम् ।।१।।
उत त्व इति मन्त्रस्य ह्ययमर्थः प्रतीयते ।
स्वविवर्तमहीशैलसमुद्राद्यात्मना स्थिताम् ।।२।।
पश्यन्नपि पुमान् वाचं नैव कश्चिद्ददर्श ताम् ।
इह मही ह्ययं शैलः समुद्रोऽयमिति भ्रमन् ।।३।।
अहं पश्यामि वाक्तत्त्वमित्येवं नावगच्छति ।
कन्त्वन्यदेव पश्यामीत्येवमेवाभिधीयते ।।४।
नात्र वाग् विवर्त्तत्वात् सर्वस्यैव हि वस्तुनः ।
तत् पश्यन् वाचमेवासौ स्वतः पश्यति यद्यपि ।।५।।
तथापि तत्तया ज्ञानात् फलतो न ददर्श ताम् ।
यथा रज्जुं पुमान् कश्चित् सर्पाकारतया स्थिताम् ।।६।।
पश्यन्नप्यन्यथाख्याति विप्रलब्धतया सदा ।
अयं सर्पः पुरो मेऽत्र वसतीति परिभ्रमन् ।।७।।

रज्जुं रज्जुतया जानन् फलतो नैव पश्यति ।
तद्वा वाचमीत्येवमाद्यस्यार्थः प्रदर्शितः ।।८।।
तथा कश्चित् पुमान् वाचं ब्रुवाणमर्थमञ्जसा ।
पूर्वं ध्वनिकृताव्यक्तज्ञानसंस्कारसङ्गतैः ।।९।।
उत्तरध्वनिभिस्तैस्तैः क्रमेण स्फुटतामिताम् ।
पदमेकं वाक्यमेकं महावाक्यमिदं तथा ।।१०।।
इत्येवमादिरूपेण श्रृण्वन्नप्यन्यथा भ्रमन् ।
व्यञ्जकारोपितैर्भेदक्रमच्छेदैः प्रतारितः ।।११।।
व्यवहारोपयोगित्वात् वाचं वर्णादिरूपिणीम् ।
ब्रुवाणस्योपवर्षस्याप्यजानन्नञ्जसा मतम् ।।१२।।
तामेनामवजानीते फलतो न श्रृणोति तत् ।
इति द्वितीयपादार्थस्तृतीयार्थोऽत्र वर्ण्यते ।।१३।।
ननु वर्णस्वरूपस्य देशे काले परेषु वा ।
बाधाभावात् क्वचिच्चापि वाचं वर्णस्वरूपिणीम् ।।१४।।
श्रृण्वन्नैव श्रृणोतीति वक्तुं च शक्यते कथम् ।
इत्याशङ्क्य क्वचिद्बाधामाहुस्तस्य नरान्तरे ।।१५।।
उतो त्वेयादीनास्याङ्घ्रेः तृतीयस्येतिसङ्गतिः ।
अप्यन्यस्मै तथा वाणी पुरुषाय महात्मने ।।१६।।
शब्दशास्त्रपरिज्ञानजातसंस्कारशालिने ।
योगाभ्यासविशुद्धान्तः करणायात्मवेदिने ।।१७।।
वर्णादिभ्रमसंछन्नां तद्भ्रमापनयेन ताम् ।
तात्त्विकीं तनुमात्मीयां स्फुटं विवृणुते स्वयम् ।।१८।।

इत्थं तृतीयपादार्थस्तुरीयार्थोऽथ कथ्यते ।
अर्थस्याभिहितस्याह जायेवेत्यादिनोपमाम् ।।१९।।
इति सङ्गतिरस्यार्थः कथ्यते तदनुस्फुटम् ।
यथा खल्वङ्गना काचिद् ऋतुस्नाता रजोहतम् ।।२०।।
अपास्य प्राक्तनं वासः परिधाय मनोहरम् ।
वासोऽन्यत्प्रणयोत्कर्षक्रमादपगतत्रपा ।।२१।।
शनैः शनैः स्रंसमाने तस्मिन्नपि च वाससि ।
भृशं कामयमाना सा कन्दर्पशरपीडिता ।।२२।।
रिरंसुरखिलां स्वीयां तनुं विवृणुते स्फुटम् ।
पत्ये तद्वदियं वाणी शाब्दिकाय महात्मने ।।२३।।
शब्दशास्त्रमहातीर्थस्नानपूता शुभा सती
अपनीतापशब्दाख्या दुष्टाच्छादनबन्धुरा ।।२४।।
प्रयोगादृतसद्वर्णा शोभनाच्छादनान्विता ।
योगाभ्यासमयप्रेमलसदान्ध्यमपत्रपा ।।२५।।
वर्णाकारविपर्याख्यवासस्रंनेऽपि शनैः शनै ।
स्रंसमाने वरामेकां तनुं विवृणुते निजाम् ।।२६।।
इत्येवं तुर्यपादार्थो मन्त्रस्यास्य निरूपितः ।
पश्यन्निति पदेनात्र चक्षुर्ग्राह्यत्वमीरितम् ।।२७।।
वाचस्तद्वाग् विवर्त्तत्वं विना नैवोपपद्यते ।
वस्तुनो दृश्यमानस्य तेन मन्यामहे वयम् ।।२८।।
प्रपञ्चो वाग् विवर्त्तोऽयं दृश्यमान इति स्फुटम् ।
श्रृण्वन्नैव श्रृणोतीति श्रवणाश्रवणे स्फुटम् ।।२९।।

वाचस्ते सविपर्यासनिर्विपर्यासरूपताम् ।
विना नैवोपपद्यते कल्पयामस्ततो वयम् ।।३०।।
वर्णाकारविपर्यासरुषिता वागिति स्फुटम् ।
तनुं विवृणुतेत्यस्मादित्येदपि यद्वचः ।।३१।।
तदप्यावेदयत्येव वाचं वर्णातिरेकिणीम् ।
वर्णरूपा तनुर्येषां वाचः सा विवृता स्फुटम् ।।३२।।
सर्वेभ्यः प्रतिवक्तृभ्यः इति नैषा तनुर्मता ।
तन्वं विसस्र इत्यत्र वाचं तां निर्णयामहै ।।३३।।
वर्णातिरेकिणी वाणीत्यनवद्यं ततोऽखिलम् ।।इति।

चतुर्थाध्यायस्य पादटिप्पणयः

१- वाक्यप., १/११८

२- व्यक्तिविवेक; पृ. १०८

३- न्या. मञ्ज.

४ वाचस्पत्यम् भाग-६ पृ. ४४४८.

५- शब्दकल्पद्रुमः, भाग-३, पृ. २५८

६- महाभारतम्, १२/२५९/१

७- वाक्यप, २/१४४-१४५

८- तत्त्वसंग्रह;, पृ=२८६

९- काव्यप्रकाशः -६२

१०- काव्यप्रकाशटीका बालबोधिनी, पृ. =७२

११- विधिविवेकः पृ=२४८

१२- पा. सू., ३/३/१०६ आतोऽनुपसर्गेति

१३- शृंगारप्रकाशः, पृ=२१४

१४- (अ) वाक्यपदीयम्, २/१४३ पुण्यराजोऽम्बाकर्त्री च

(आ) प्रतिभादर्शन, पृ० = ३७० "वाक्य को समझने के लिए विच्छेद पद वर्ण में दिये गये अवधारण और स्वर के महत्त्व पर विचार या ध्यान आकर्षित किया जाता है तो प्रतिभा एक दूसरा ही स्वरूप धारण करके कुछ और ही अर्थ लगाने में समर्थ हो जाती है । Indian Theories of Meaning, pp. 225-226. -The sentence which is 'a single undivided utterence' conveus its meaning in a flash. The sentence meaning is not built up gradually on the basis of the word meanings. It is grasped by the listener inan instanancous flash of insiglt (Pratibha).

१५- वाक्यप., २/१,

१६- पुण्यराज,

१७- तदेव, २/१४४

१९- Indian Theories of Meaning, p.p. 226 - This can not in anyway be explained to others in terms such as 'It is this its existence is rarified only in the individual experiences of it and experiencer himself can-not describe it.

२०- वाक्यप. २/१४५ पुण्यराजोऽम्बाकर्त्री च ।

२१- वाक्यप., २/१४६ पुण्यराजः, अम्बाकर्त्री च ।

२२- सा. सु., पृ. = ३१८, अंक-४

२३- का० प्र०, १/३

२४- काव्यालङ्कारः

२५- वाक्यप., २/१४७, पुण्यराजः अम्बाकर्त्रीच

२६- अभि. शा, १/१९

२७- शृं. प्र., पृ. =२१३

२८- Indian Theories of Meaning- This Pratibha with instinctive urge in animals which prompts them to act. The behaviour of animals is prompted by this instinctive urge of Pratibha

२९- वाक्यप., २/१४८ पुण्यराजः, अम्बाकर्त्री च ।

३०- सं. व्या. द. पृ. = ३७१-३७२

३२- वाक्यप., २/१४९ पुण्यराजः, अम्बाकर्त्री ।

३३- शृं. प्र., पृ.= २१३, २१४

३४- Indian Theories of Meaning pp. 226- Bhartrihari identified this Pratibha with the instinctive urge in animals which prompts them to act. The behaviour of animals is promted by this instinctive urge the Pratibha to build their nests. It is the same kind of urge that results from a sentense. A sentence becomes productive of this urge, because of repeated usages.

३५- वाक्यप., २/१४४

३६- वाक्यप., २/१५१ पुण्यराजः, अम्बाकत्रीच ।

३७- सं. व्या. द., पृ.= ३७२

३८- वाक्यप., २/१५२

३९- श्रृं. प्र., =२१४

४०- वाक्यप., १/१५२ हरिवृत्तिः, पुण्यराजः, अम्बाकर्त्री

१ (ए) सं. व्या. द. श. पृ. =३७२

"भर्तृहरि स्वाभाविकी प्रतिभा का आधार सत्ता को मानते हैं ।-- स्वभावजन्य ज्ञान स्वाभाविकी प्रतिभा है । जिस तरह सुषुप्तासस्था में ज्ञान की सत्ता होते हुए भी वह अप्रबुद्ध- सा होता है पर नींद के टूट जाने पर स्वभावतः वह अभिव्यक्त हो उठता है,

उसी तरह स्वभावजन्या प्रतिभा भी संस्कार रूप में अनादि अभ्यासवश सत्ता में पडी रहती है और सत्ता के आविर्भाव के रूप में विवर्त होने पर वह भी उद्बुद्धहो जाती है ।

४१- वाक्यप., १/१४६

४२- तदेव, १/१४६ हरिवृत्तिः पाठस्त्रोतः, सं. व्या. द., पृ.= ३७३ इयं स्वाभाविकी प्रतिभा- स्वभावतो वाक्यश्रवणमन्तरापि जायमाना दृश्यते लोके यथा- 'श्वो मे भ्राता आगमिष्यतीति' ज्ञानं कुमार्याः ब्रुवन्ति । तत्सत्यमपि जातं दृश्यत।

४३- वाक्यप.-पुण्यराजः, पृ. =२२९

४४- शृंगारप्रकाशः, पृ. =२१४

४५- वाक्यप., १/३७

४६- तदेव, १/३८-३९

४७- उत्तररामचरितम्, ४/१८ चौ. ओरि.

४८- वाक्य., २/१५२

४९- तदेव, १/३५

५०- वाक्यप०, १/३५

५१- तदेव

५२- सं. व्या. द. पृ. =३७५ - योगनिमित्ता प्रतिभा से तात्पर्य योगियों की उस शक्ति से है, जिसके बल से वे दूसरे मनुष्यों के अभिप्राय आदि तुरन्त ठीक-ठीक अवगत कर लेते हैं जिसके बल से उनमें सर्वज्ञता आती है।

५३- (अ) शृंगार प्रकाशः, पृ. =२१४

सं. व्या. द., पृ. =३७५- भूत, प्रेत पिशाच आदि में दूसरे पर सवार होने और अन्तर्धान होने की क्षमता देखी जाती है । उनमें एक तरह की अदृष्ट शक्ति देखी जाती है । अदृष्ट निमित्ता प्रतिभा से भर्तृहरि का अभिप्राय ऐसी ही शक्ति से है ।

(आ)- शृंगार प्रकाशः, पृ०=२१४

५४- सं. व्या. द. पृ.= ३७५, कभी कभी कोई विशिष्ट व्यक्ति अपनी ज्ञानराशि का संक्रमण किसी अन्य में कर देते है । इससे दूसरा व्यक्ति भी उस विशेष ज्ञान का वाहक हो जाता है ।

५५- शृंगारप्रकाशः, पृ. =२१४
५६- वाक्यप., २/१५२ अम्बाकर्त्री ।
५७- वाक्यप., २/१५२ हरिवृत्तिः ।
५८- तदेव, १/१२३ हरिवृत्तिः (स्त्रोतः सं. व्या. द., पृ.=३८३)
५९- योगसूत्रम्
६०- व्या. द. प्र., पृ. =४
६१- ईश्वरप्रतिज्ञाविवृतिविमर्शिनी भाग-३, पृ.=२०९
६२- काव्यमीमांसा
६३- व्यक्तिविवेकः, विमर्शः ।
६४- वाक्यप., २/४८४-४८५ हरिवृत्तिः, अम्बाकर्त्री च ।
६५- वाक्यप., २/४८४; हरिवृत्तिः, अम्बाकर्त्री
६६- यो. सू., ३/३३ "वाचस्पतिकृतटीकायुतव्यासभाष्यसमेतम् । सम्पा.-राजाराम शास्त्री वोडास । नागोजी भट्ट कृता टीका सं० वासुदेव शास्त्री अभ्यंकर पूना, द्वि०सं, बम्बई संस्कृत एवं प्राकृत सीरीज, १९१७
६७- तदेव, ३/५४, तारकं सर्वविषयं सर्वथा विषयक्रमं चेति विवेकजं ज्ञानम् ।
६८- यो. सू., ३/३२ पृ.= ३४४, ३४५
६९- यो. सू., १/४८, पृ. ५२
७०- तदेव, पृ. २५९
७१- तदेव, १/४९, पृ. ५२-५३
७२- यो. सू. २/२७, पृ. ९८
७३- तदेव., पृ. ९८
७४- तदेव., पृ. ३००
७५- यो. सू., पृ.-९९-३००
७६- तदेव,
७७- तदेव,
७८- यो. सू., पृ. ९९ एवं ३००
७९- तदेव, ।
८०- तदेव, ।
८१- तदेव ।

८२- षट्षष्टिनामके वर्षे क्रस्तो० - ३०
स च कालः ४०६६ सप्त० संव, ९९० खैस्त० वर्ष इति
८३- वसुरसपौषे कृष्णदशम्याम्--भै० स्तो० १०
स च कालः ४०६८ सप्त सं०, ९९२ खै० वर्ष इति ।
८४- इति नवतितमेऽस्मन् वत्सरेऽन्त्ये युगांशे ।
तिथिशशिजलधिस्थे-- ई० प्र० वि० वि खं
८५- पृ. ४०९ स च कालः ४०९० सप्त सं. ४११५
कलि सं. १०१४ खै. वर्ष इति ।
८६- तत्रा., ३७/३२
८७- तदेव, ३७/६२
८८- तदेव, ३७/६१
८९- इ. प्र. वि. ख.-१ पृ.-१
९०- तन्त्रा., ९/१६०-१६१ वि. ख. ६, पृ.-२१०
९१- का. द. को. प्रतीकभागः, पृ. २२ ८८-तन्त्रा, ३७/६०
९२- गीतासंग्रहः, पृ.-२
९३- तन्त्रा., ३७/५८
९४- तदेव, ३०/६२
९५- गु. ना. प. ५,६,
९६- प. त्री. वि. पृ. २८०
९७- (अ). तन्त्रा. ३७-८५ त. ९ कारिकापर्यन्तम् ।
९८- तन्त्रा., १३/१४०.१४६
९९- तन्त्रा., १३/१४७-१४८
१००- तन्त्रा., १३/१४९-१५५
१०१- तन्त्रा., १३/१५६, १५८.
१०२- तदेव, १३/१५९
१०३- तन्त्र., १३/१६० सटीकम्
१०४- तदेव, १३/१६१-१६२
१०५- तन्त्रा., १३/१६३-१६५
१०६- तदेव, १३/१६६
१०७- तन्त्रा, १३/१६७-१६८
१०८- तन्त्रा, १३/१७५-१७६

१०९- तन्त्रा., भाग-८, पृ.= १११,११२
११०- तदेव
१११- तन्त्रा., १३/१८१-१८२
११२- तदेव, १३/१८३-१८५
११३- तदेव, १३/१८६-१८७
११४- तन्त्रा १३/१८८
११५- तदेव, टीका, पृ.-१२० भा. = ८
११६- तदेव, १३/१८९
११७- तन्त्रा., १३/१९०-१९३
११८- तन्त्रा, १३/१९४-१९८
११९- तन्त्रा., भाग-८, पृ.-१२६/१२७
१२०- काव्य मीमांसा भूमिका, पृ.-१९ बालरामायणतः ।
१२१- तदेव, ।
१२२- का. मी. भूमिका, पृ.-१९
१२३- तदेव,
१२४- तदेव, पृ. ३५ चतुर्थोऽध्ययायः
१२५- अम. को., १/५/१२९-मेदिनी, १/६/६
१२६- का. मी., पृ.-२६
१२७- का. मी.,
१२८- अभि. शा., ७/१२
१३३- रघु० वं०- ६/५७
१३४- कुमारसम्भव, ३/६७
१३५- रघु०, ५/८२
१३६- का० मा०, पृ०-३०
१३७- का० मी०, पृ०-३१
१३८- का० मी०, पृ०-३१
१३९- तदेव, पृ-३२
१४०- तदेव
१४१- तदेव
१४२- का० मी०, पृ०-३३
१४३- का० मी०, पृ०-३६

१४४- तदेव, पृ०-३८

१४५- का० मी०, पृ०-३८

१४६- तदेव, पृ०-३९

१४७- का० मी० पृ०-३९-४०

१४८- तदेव

१४९- का० मी० पृ०-३९-४०

१५०- तदेव, पृ०-८९

१५१- का० प्र०, २५७६ (वस्तुतः पद्यमिदं बाणभट्टस्य चण्डिकाशतकस्यास्ति।) व्युत्पत्तिः बहुज्ञता कथिता, बहुज्ञता शास्त्रादीनामभ्यासादेव जायते सा कदाचिदभ्यासनिमित्ता प्रतिभाभेद एव । यथा कूपतटाकादिखानकानां रूपतर्कादीनां सतताभ्यासात्सा जायते । एवं व्युत्पत्तिरपि बहुज्ञत्वमुत्पादयति । प्रतिभायाः समुदय एवं व्युत्पत्तिरूपा बहुज्ञता स्यात् । किं प्रतिभाहीनेऽपि व्युत्पत्तिरुच्यते ? तत्रोच्यते प्रतिभैव श्रेयसी किं किं न साधयति जन्तूनां सेति अभिनवगुप्तपादाः । प्रतिभा बलाद्व्युत्पत्तिरपि भवेत् । मन्ये व्युत्पत्तिरपि प्रतिभा एव वर्तते ।

१५२- सरस्वतीभवनग्रन्थमाला- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

१५३- व्या० द०, प्रति, पृ०-४२

१५४- व्या० द० प्रति०, पृ०-२४

१५५ -व्या० द० भू०, पृ०-७० (सारस्वती सुषमा-पंचमविश्वसंस्कृतसम्मेलन विशेषाङ्कः)

१५६- वाक्यप०, १/१३१-१३२

१५७- ऋ० सं०, १०/७१/२;२/५८/३.

१५८- मा० भा० पस्पशा०, ४४

१५९- वाक्यप०, १/११७/११८ टीका च

१६१- वाक्यप, १/१२४-१२५.

१६२- व्या० द० प्र० पृ०- २४

१६३- वाक्यप, १/१३६ श्लो०

१६४- वाक्यप०, १/१२७

१६५- व्या० द० प्र०, पृ०-२५

१६६- तदेव, पृ० २६

१६७- मार्क० पु०

१६८- व्या० द० प्र० १६

१६९- यती० दीपि०, पृ०-८४

१७०- सं० व्या० द०, पृ०-७ (स्रोत:- व्या० द० प्र०, पृ०-३२६-३२७)

४-सं० व्या० द० पृ०- कूपतटाकादीनां पाठ अशुद्ध जान पडता है । मेरी नम्र सम्मति में यहाँ रूपतर्कादीनां पाठ होना चाहिए । रूपतर्कादीनां के बदले कूपतटाकादीनां पाठ लिपिकारों द्वारा पढ लिया जाना अस्वाभाविक नहीं है । रूपतर्क शब्द के विशेष प्रचलन न होने से ऐसा हुआ होगा । रूपतर्क सौवर्णिक को कहते हैं जो सोने के सिक्के के खरे-खोटे होने की परीक्षा करते हैं ।

सन्दर्भग्रन्थाः

संस्कृतग्रन्थाः

- अभिज्ञानशाकुन्तलम्, कालिदासः, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी
- अमरकोशः, अमरसिंहः, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, १९७८
- अष्टाध्यायी, पाणिनिः, प्राच्यविद्या प्रतिष्ठानम्, अजमेर
- ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी, भाग-३, अभिनवगुप्त, काश्मीर ग्रन्थावली, श्रीनगर, १९३८
- उत्तररामचरितम्, भवभूतिः, मोतीलाल बनारसीदास, वाराणसी
- ऋक्प्रातिशाख्यम्, शौनकः, इण्डियन् प्रेस लिमिटेड इलाहाबाद
- ऋग्वेदसंहिता, सम्पा० डा० लक्ष्मणस्वरूप, मोतीलाल बनारसीदास, वाराणसी
- काठकसंहिता, चौखम्बा संस्कृत अमर भारती, वाराणसी
- काठकशाब्दबोधप्रभा, सम्पा० रायम्पेट्ट कृष्णमाचार्य, के० बी० प्रेस तञ्जौर, १९१०
- काशकृत्स्नव्याकरणम् सम्पा० युधिष्ठिर मीमांसक, प्राच्यविद्या प्रतिष्ठान, अजमेर, सं = २०२२
- काव्यप्रकाशः, मम्मटः, रघुनाथ दामोदर कारभाकर, भण्डारकर ओरियन्टल, इन्स्टीच्यूट, पूना, १९६५
- काव्यमीमांसा, राजशेखरः, अनु० पं० केदारनाथ शर्मा सारस्वत, बिहार राष्ट्रभाषा प्रकाशन, पटना, १९६५
- काशिकावृत्तिः न्यासपदमञ्जरी संहिता, सम्पा० स्वामी एवं शुक्लः, तारा पब्लिकेशन्स, वाराणसी, १९६७
- काश्मीरशैवदर्शनकोशः (प्रतीकभागः) डा० बलजिन्नाथ पण्डितः, श्रीरणवीर केन्द्रीय संस्कृत विद्यापीठम्, जम्मुः १९८५
- कुमारसम्भवम्, कालिदासः, चौखम्बा संस्कृत सीरिज, वाराणसी
- गुरुनाथपरामर्शः, मधुराजः, सम्पा० पी एन० पुष्प, काश्मीर ग्रन्थावली, श्रीनगर

- चन्द्रालोकः, जयदेवः, मोतीलाल बनारसीदास, वाराणसी
- चान्द्रव्याकरणवृत्तेः समालोचनात्मकमध्ययनम् (शोधनिबन्धः) डा० हर्षनाथ मिश्रः श्रीलालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापाठम् नई दिल्ली, १९७४

जैमिनिसूत्रम्, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी
- तत्त्वबिन्दुः, वाचस्पति मिश्रः, अन्नामलाई विश्वविद्यालय संस्कृत सीरिज-३, १९३६
- तत्त्वसंग्रहः, शान्तरक्षितः, बडोदरा, १९२६
- तन्त्रालोकः-, अभिनवगुप्तः, सम्पा० मधुसूदन कौल, काश्मीरग्रन्थावली, श्रीनगर
- तन्त्रवार्तिकम्, कुमारिलभट्ट, चौखम्बा संस्कृत सीरिज, वाराणसी
- द्वादशारनयचक्र, मल्लवादिक्षमाश्रमणः, सम्पा० मुनि जम्बूविजय, अहमदाबाद
- निरुक्तम्, यास्कः सम्पा० लक्ष्मणरूपः, अनु० सत्यभूषणः योगी, मोतीलाल बनारसीदासः, वाराणसी, १९६७
- नीतिशतकम्, भर्तृहरिः चौखम्बा संस्कृत सीरित, वाराणसी
- न्यायमंजरी तात्पर्यटीकायुता, सम्पा० सूर्यनारायणशुक्लः चौखम्बा संस्कृत सीरिज, १९७१
- न्यायमंजरी, जयन्तभट्ट, वाराणसी, १९३६
- पदवाक्यरत्नाकरः, गोकुलनाथभट्टः, वाराणसेय संस्कृत विश्वविद्यालयः, वाराणसी
- परिभाषेन्दुशेखरः, नागेशः, सम्पा० हर्षनाथ मिश्रः, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली
- भाषाविज्ञानस्य रूपरेखा, गिरिधरलालः, व्यासाश्रम ब्रह्मपोल, उदयपुर सं० २०२५
- बृहदाण्यकोपनिषद्, चौखम्बा संस्कृत सीरिज, वाराणसी

बृहद्देवता, शौनकः, चौखम्बा संस्कृत सीरिज, वाराणसी
- भाषणभूषणम् (व्याख्यानमाला), सम्पा० पुष्पेन्द्रकुमारः शर्मा,

श्रीलालाबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ, दिल्ली, १९७३-७४

- महाभारतम्, भण्डारकर रिसर्च इन्स्टीच्यूट, पूना
- महाभाष्यम्-भण्डारकर रिसर्च इन्स्टीच्यूट, पूना
- महाभाष्यम्-प्रदीपोद्योतसहितम्, भारतसरकार योजनान्तर्गत प्रकाशित, मोतीलाल बनारसीदास, १९६७
- माधवीयाधातुवृत्तिः सम्पा० द्वारिकादास शास्त्री तारा पब्लिकेशन्स वाराणसी
- मीमांसाकोशः केवलानन्दसरस्वती, प्राज्ञपाठशालामण्डलग्रन्थमाला, १९५२
- मीमांसाश्लोकवार्तिकम्, भट्टकुमारिलः, सम्पा०-टीका० पं० दुर्गाधर झा कामेश्वर सिंह संस्कृत विश्वविद्यालयः, दरभंगा, बिहार, १९७९
- मेघदूतम्, कालिदासः मोतीलाल बनारसीदास
- मेदिनीकोश-, सम्पा० जगन्नाथशास्त्री होशिंग, चौखम्बा संस्कृत सीरिज, वाराणसी
- मार्कण्डेयपुराणम्, काशीराज पुराण ट्रस्ट, वाराणसी
- मैत्रायणीसंहिता, मोतीलाल वनारसीदायस, वाराणसी
- युभातः संस्कृतं प्रति, ग.बा. पलसुले, राष्ट्रिय संस्कृत संस्थान, दिल्ली-१९७८
- योगसूत्रम्।-वाचस्पति-व्यास-नागेशकृतटीकासहितम्, सम्पा०-वासुदेवशास्त्री अभ्यंकर पूना-बम्बई, संस्कृत प्राकृत सीरिज, १९७१
- रघुवंशम्, कालिदासः, चौखम्बा संस्कृत सीरिज, वाराणसी
- लघुशब्देन्दुशेखरः, नागेशः, चौखम्बा संस्कृत सीरिज, वाराणसी
- वाक्यपदीयम् भर्तृहरिः सम्पा० श्री सूर्यनारायणशुक्लः, चौखम्बा संस्कृत सीरीज, वाराणसी
- वाक्यपदीयम्, पुण्यराजटीका, अम्बाकर्त्री च युतम्, । सम्पा०-रघुनाथ शास्त्री सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी

- वाक्यपदीयम् सम्पा० डा० के राघवन् पिल्ले (अंग्रेजी) दिल्ली, १९७१
- वाक्यपदीयम् (काण्ड-२, कारिका-१८४ तक) सम्पा०-चारुदेवशास्त्री, लाहौर, १९३९
- वाक्यपदीयम् प्रकीर्णप्रकाशसहितम्, चौखम्बा सीरिज, वाराणसी
- वाचस्पत्यम्, तर्कवागीशः, वाराणसी
- विधिविवेक, मोती लाल बनारसीदास
- वेदान्तपरिभाषा, चौखम्बा सीरिज, वाराणसी
- वैयाकरणभूषणसारः, कौण्डभट्टः, प्रभाटीका, सम्पा०-बालकृष्णपञ्चोली, चौखम्बा संस्कृत संस्थान वाराणसी, १९६९
- वैयाकरणसिद्धान्तकौमुदी तत्त्वबोधिनीसहिता, क्षेमराज कृष्णदास श्रेष्ठी, मुम्बई, सं०-२०१५
- वैयाकरणसिद्धान्तलघुमञ्जूषा, टीका सभापतिशर्मोपाध्यायः, चौखम्बा संस्कृत संस्थान, वाराणसी
- वैयाकरणसिद्धान्तपरमलघुमञ्जूषा ज्योत्स्ना सहिता, पं. कालिकाप्रसादशुक्लः, बडोदरा संस्कृत महाविद्यालयः युनिवर्सिटी, बडोदा, १९६१
- वैयाकरणसिद्धान्तसुधानिधिः, विश्वेश्वर सूरिः, सम्पा०, माधवशास्त्री भण्डारी (१-१५ भाग) चौखम्बा संस्कृत बुक डिपो, वाराणसी
- व्यक्तिविवेकः, राजानकमहिमभट्ट, वाराणसी
- व्याकरणक्रोडपत्राणि, रा० कृष्णमाचार्यः, त्रिमुनिमन्दिर, वरदराजन स्ट्रीट, त्रिचनानपल्ली, १९१०
- व्याकरणदर्शनभूमिका, रामाज्ञापाण्डेय, वा० सं० वि० वि०, वाराणसी
- व्याकरणदर्शनभूमिका, रामाज्ञापाण्डेय, वा० सं० वि० वि०, वाराणसी
- व्याकरणदर्शनपीठिका रामाज्ञापाण्डेय, वा० सं० वि० वि०, वाराणसी

- व्याकरणदर्शनप्रतिमा रामाज्ञापाण्डेय, वा० सं० वि० वि०, वाराणसी
- व्युत्पत्तिवादः गूढार्थतत्त्वालोकसहितः, सम्पा० पं० कीर्त्यानन्दः झा, चौखम्बा अमर भारती, १९७६
- शब्दकल्पद्रुमः, वाराणसी
- शतपथब्राह्मण, चौखम्बा संस्कृत अमर भारती, वाराणसी
- शब्दशक्तिप्रकाशिका, जगदीशभट्टः, कलकत्ता, १९१४
- शाब्दबोधविमर्शः, डा० बद्रीनाथसिंहः, वाराणसी
- श्रृङ्गारप्रकाशः, भोजराजः, सम्पा० जी० आर० जायसर, प्राचीन संस्कृत ग्रन्थ प्रकटन विश्वसंस्था, मैसूर, १९५५
- सरस्वतीकण्ठाभरणम्, भोजः, चौखम्बा संस्कृत संस्थान, वाराणसी
- स्याद्वादरत्नाकरः, वादिदेवसूरीः, अहमदाबाद, वीर सं०-२४५३
- स्फोटवादः सुबोधिनीसहितः, सम्पा० वि० कृष्णाचार्यः, अडयार लाइब्रेरी एवं शोध केन्द्र, मद्रास, १९४६

हर्षचरितम्, मोतीलाल वनारसीदास, वाराणसी

- क्षीरतरङ्गिणी मोतीलाल वनारसीदास, वाराणसी

हिन्दीग्रन्थाः

अर्थतत्त्व की भूमिका (शोधनिबन्ध), नागरी प्रचारिणी, वाराणसी १९६८

- अर्थविज्ञान और व्याकरणदर्शन (शोधनिबन्ध) कपिलदेव द्विवेदी, हिन्दुस्तानी अकादमी, इलाहाबाद, १९५१

पाणिनि व्याकरण का अनुशीलन, डा० रामशङ्कर भट्टाचार्य, इण्डोलोजिकल बुक हाउस, वाराणसी, १९६६

प्राचीन भारतीय वैयाकरणों के ध्वन्यात्कम विचारों का विवेचनात्मक अध्ययन (शोधनिबन्ध) श्री सिद्धेश्वर वर्मा, अनु० डी० डी० शर्मा, हरियाणा हिन्दी ग्रन्थ अकादमी, १९७३

- वैदिक ध्वनिविज्ञान (शोध निबन्ध), डा० विजयशङ्कर पाण्डेय, अक्षयवट प्रकाशन, इलाहाबाद, १९८७

वैदिक वाङ्मय में भाषा चिन्तन, शिवनारायण शास्त्री, इण्डोलोजिकल बुक हाउस, दिल्ली

- भाषाविज्ञान की भारतीय परमपरा और पाणिनि (शोधनिबन्ध) रामदेव त्रिपाठी बिहार राष्ट्रभाषा प्रकाशन दिल्ली-१९६८
- भाषाविज्ञान, मैक्समूलर, अनु० उदयनारायण तिवारी, मोतीलाल वनारसीदास, १९७०
- भाषाविज्ञान की भूमिका, प्रो० देवेन्द्र शर्मा, राधाकृष्ण प्रकाशन, दिल्ली-१९६६
- भारतीय भाषाविज्ञान की भूमिका, सम्पा०-डा० विद्यानिवास मिश्र, अनिल विद्यालंकार, डा० माणिकलाल चतुर्वेदी राजस्थान हिन्दीग्रन्थ अकैदमी, जयपुर, १९६६
- वाक्यविन्यास का सैद्धन्तिक पक्ष, नोअम चामस्की, अनु. रमानाथ सहाय, राजस्थान हिन्दीग्रन्थ अकादमी, १९७५
- संस्कृत आलोचना, आचार्य बलदेवोपाध्याय, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ
- संस्कृत का भाषाशास्त्रीय अध्यश्न, डा. भोलाशंकरव्यास, भारतीय ज्ञानपीठ प्रकाशन, १९७१
- संस्कृत व्याकरण दर्शन (शोध निबन्ध) पं. रामसुरेश त्रिपाठी, राजकमल प्रकाशन, १९७२
- संस्कृत व्याकरण का इतिहास १-३, युधिष्ठिर मीमांसक, भारतीय प्राच्य विद्या प्रतिष्ठान, २०२०
- स्फोटदर्शन, पं. रङ्गनाथ पाठक, बिहार राष्ट्रभाषा प्रकाशन, बिहार, १९६७

संस्कृत शोधप्रत्रिकाः-

- गङ्गानाथ झा शोध जनरल, डा. गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्, इलाहाबाद
- विमर्शः, राष्ट्रिय-संस्कृत-संस्थानम्, नव दिल्ली
- विश्व संस्कृतम्, साधु आश्रम, होशियारपुरम्

वैष्णवी, श्री रणवीर केन्द्रय संस्कृत विद्यापीठम्, जम्मू

- सरस्वती सुषमा, सम्पूर्णान्नद संस्कृत विश्वविद्यालयः, वाराणसी

English Reference Books

- A Course in Modern Linguistics, Charles F. Hocket, Oxford & IBH Pub, 1970.
- A Dictionary of Sanskrit Grammar, A.K.V Abhayankar, Baroda, 1961.
- An Introduction to Descriptive Linguistics, H.A, Gleason jr. Oxford, 1955.
- Anylsis of Meaning in Indian Sementics, Siddheshwar Verma Journal of Department of Letters Calcutta.
- Bhartrihari's List of Sentence Defination- A Textual Problems' K. Kunjuni Raja 'The Adya Library Bulletin, Madras.
- Bhoja's Srinagar Prakash (Thesis) V. Ragwan, R. K. Puram Street, Madras, 1978.
- Dictionary of Panini, S.M. Katre, Poone, 1968.
- Indian Theorists on the Nature of the Sentence, Matilal B.K Foundations of Language, 1966.
- Indian Theory of Meaning (Thesis) K. Kunjuni Raja, The Adyar Library and Research Centrer, Madras, 1963.Phi losophy of Grammer, Otto Yesperson, 1951.
- Philosophy of Word and meaning, Gaurinath Shastri, Calcutta, 1959.
- Pratibha as the Meaning, a Sentence, Iyer Subramanian (Paper) All India Oriental Conference, 1940.
- Sanskrit Syntax, J.S. Taraporwala.
- Sanskrit Syntax and Grammer, (Thesis) B.S.Kumar K.S.D. University, Bihar, 1976.

- Sphotanirnay of Kound Bhatt, S.D.Joshi, Poone, 1967.
- Syntactical Meaning - Two Theories (Paper) E.R. Shri Krishana Sharma, Adyar Library Bulletin, Madras, 1969.
- Syntactical and Sementic Relations in Panini (Paper) J.F. Steal and P.Kiparsky. Foundations of Language.
- The Doctrine of Pratibha in Indian Philosphy (Paper) Gopinath Kaviraj, ABORI, Vol.-5, 1924.
- The Doctrine of Sphota, JGRI Vol.-5, pt.-2, Iyer Subramanum.
- The Doctrine of Sphota, V.A. Rama Swami, Journal of Annamali University, Vol.1-2.
- The Meaning of Meaning, Ogden Richards.
- The Philosophy of Sentence and its parts, V.S.Rao, Munshi Ram, Manohar lal, Delhi.
- The Philosophy of Sanskrit Grammer, P.C. Chakravati (Thesis) University of Calcutta, 1930.
- The Theory of Syntax in ModernLinguistics, Olga Akhmanova, Galina Makaela.
- Vak Before Bhartrihari, K.M. Sharma, Poone Orientalists, Vol.1-2.

डॉ. यशः पाल खजूरिया
प्राध्यापकः
स्नातकस्नातकोत्तरविभागः
श्री रणवीरकेन्द्रीयसंस्कृतविद्यापीठम्,
शास्त्रिनगरं जम्मू-तवी ।

शिक्षाः-व्याकरणशास्त्रे भाषाविज्ञाने च स्नातकोत्तरोपाधिः, विद्यावारिधिश्च (पी- एच. डी.)

प्रकाशितग्रन्थः शोधपत्राणि च
भृङ्गीशसंहिता,
भाषाविज्ञानं पर्यावरणञ्चाधिकृत्य शोधपत्राणि ।

actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाषावि
actica
भाष